S
181.43
U d 9 N ; 1

Library IIAS, Shimla
S 181.43 Ud 9 N: 1
00024884

ॐ नमः परमात्मने ।

न्यायवार्त्तिकस्य

भूमिका ।

विश्वनाथन्यायपञ्चानना गोतमसूत्रवृत्तौ प्रमाणप्रमेयेत्यादि-प्रथमसूत्रव्याख्याने "अत्र वार्त्तिकं यदि वादे देशनीयत्वात् पृथगभिधानं तदा न्यूनाधिकापसिद्धान्तानां वादे देशनीयत्वात् पृथगभिधानं स्यात्"(१) इत्युक्तवन्तः । शङ्करमिश्रेण वैशेषिकसूत्रोपस्कारे २ अध्याये २ आह्निके सामान्यप्रत्यक्षादिशेषाप्रत्यक्षादिशेषस्मृतेश्च संशय इति १७ सूत्रव्याख्याने "न्यायवार्त्तिकेऽपि यत् कारणभेदेन संशये चिन्तमुक्तं तदपि न सम्भवति व्यभिचारेण समानधर्मादीनां त्रयाणां कारणत्वस्यैवासम्भवात्"(२) इत्युक्तम् । श्रीधराचार्येण न्यायकन्दल्यां पृथिवीनिरूपणे "यथाहोद्योतकरः समानासमानजातीयव्यवच्छेदो लक्षणार्थः"(३) इत्युक्तम् । वर्द्धमानोपाध्यायेन द्रव्यकिरणावलीप्रकाशे "तस्य संस्कारात् कालाद्वा

(१) अस्मिन्नेव मुद्रिते न्यायवार्त्तिकपुस्तके पृ० २१ प० २ द्रष्टव्यम् ।
(२) " पृ० १०३ प० ४ "
(३) " पृ० २९ प० १९ "

Acc No
Date

विनाश इति वार्त्तिकविरोधाच्च" इत्युक्तम्। षड्दर्शनटीकाकृद्वाचस्पतिमिश्रेणापि "प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्"(१) इतिकारिकाव्याख्यायां सांख्यतत्त्वकौमुद्यां "सर्वं चैतदस्माभिर्न्यायवार्त्तिकतात्पर्यटीकायां व्युत्पादितं नेहोक्तं विस्तरभया"दित्युक्तम्। चित्सुखाचार्येण तत्त्वप्रदीपिकायां (चित्सुख्यां) द्वितीयपरिच्छेदे "वाचको गवयस्याय"मिति ३१ कारिकाव्याख्यायां "तथा च भगवदक्षपादप्रणीतं सूत्रम् प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति। व्याख्यातं चैतदुद्योतकरेण वार्त्तिककृता आगमाहितसंस्कारस्मृत्यपेक्षं सादृश्यज्ञानमुपमानमिति"(२) इत्युक्तम्। एवमनेकेषु न्याय-वैशेषिक-सांख्य-वेदान्तग्रन्थेषु न्यायवार्त्तिकस्य तथा तट्टीकायाश्च नाम दृष्ट्वा उद्योतकराचार्यकृतं न्यायवार्त्तिकनामानं महानिबन्धं मनसि विज्ञाय पण्डितवृद्धेभ्यो न्यायदर्शनवात्स्यायनभाष्यस्य पठनपाठनयोः परमोपयोगित्वं तस्य निशम्य तदन्वेषणेऽहं प्रवृत्तः। किन्तु "न्यायवार्त्तिकस्य विनष्टप्रायत्वात् तल्लाभेऽनेके महापण्डिताश्चिरादेव विफलप्रयत्ना अभूवं(३) स्तव किं साध्यं भविष्यतीति" नैयायिकवृद्धैर्निरुत्साहितोऽप्यहम्

---

(१) पञ्चमी कारिका।

(२) अस्मिन्नेव मुद्रिते न्यायवार्त्तिकपुस्तके पृ० ६० प० १३ द्रष्टव्यम्।

(३) न्यायवार्त्तिकस्य दुर्लभत्वे खण्डश उपलब्धत्वे वा वक्ष्यमाणा लेखा वर्तन्ते।

A contribution towards an index to the Bibliography of the Indian Philosophical systems by FitzEdward Hall, M.A., page 20, III. Nyāya-Varttika-Tatparya-Pariśuddhi, also

"उद्योगेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥"

इत्यनुसरन् न्यायवार्त्तिकं स्मरन् कतिपयवर्षानन्तरमेकस्य ब्राह्मणस्य गृहेऽहं भोजनार्थमाहूतो ब्राह्मणानां पङ्क्तौ उपविष्टस्तत्रैकस्य महावातायनस्य मध्ये यादृच्छिकेन जीर्णवस्त्रेण वेष्टितानि धूलीधूसराणि ऊर्णनाभादिभिराच्छादितानि अनेकानि पुस्तकपुटकानि प्रवेशितानि दृष्ट्वा तेषां निष्कासने प्रवृत्तो गृहपतिना वृद्धेन

---

called Nyāya-nibandha. This is probably an emendation of Pakshila Svamin's Varttika or Supplement to No. 1. Diñnága, whom Vāchaspati Miśra names with censure: he was another ancient expositor of the logical institutes. The writings of both have, perhaps, perished. Complete copies of the work in question may be forthcoming; but I have never seen one. Its author is Udayana Āchārya, who is also called Uddyotakara Āchārya and Udayakara Āchārya. He was of the gotra of Bharadwāja. F. E. H.

The Kusumanjali, edited and translated by E. B. Cowell, preface page vi, III—The Nyāya-Varttika, a commentary on No. II. by Uddyotakara Āchārya. I procured lately, from a pandit of Nuddea, a fragment of this work containing a portion of the first book.

A classified index of the Sanskrit MSS. in the palace at Tanjore by A. C. Burnell, p. 113; these are all precisely similar recent transcripts made at Benares by several persons about 1820. As the work is exceedingly rare, it is much to be regretted that these MSS. are so incorrect as to be useless. Whole lines are quite unintelligible, and some of the copyists seem to have been perfectly ignorant of even the form of the letters.

See Catalogus Catalogorum by Theodor Aufrecht printed in 1891—1903, part I, p. 311; pt. II, p. 68; pt. III, p. 66.

ब्राह्मणेन "मा स्पृश मा स्पृश मार्जारगमनागमननिरोधार्थं स्थापितानीमानि पुस्तकानि भोजनकाले मार्जार आगमिष्यति कीदृशस्त्वं बालकवच्चञ्चलः सर्वमन्नपानादिकं मार्जारेण भंग्रयिष्यसि" इत्यादिभिरनेकैर्भर्त्सनैरपमानितो निवारितोऽप्यहं विलम्बेन भोजनं करिष्यामीति ब्रुवन् तत्र स्थितानि कतिपयपुस्तकपुटकानि समाकृष्टवान्। तेष्वेकस्मिन् पुटके न्यायवार्त्तिकस्य प्रथमाध्यायस्य त्रिसूत्रीप्रकरणं प्रमाणप्रकरणं(१) द्वितीयतृतीयाध्यायौ च सम्पूर्णौ(२) लब्धवान्। ततश्चास्मद्गुरुवरमहामहोपाध्यायश्रीमत्कैलासचन्द्रभट्टाचार्यशिरोमणिभिर्दत्तं प्रथमाध्यायत्रिसूत्रीवार्त्तिकपुस्तकम् तत्प्राप्त्या

---

(१) पुस्तकमिदं देवनागराक्षरैः कागजाख्याधारे लिखितं परिशुद्धं च। पेशवामहाराजसभासदा नैयायिकप्रवरेण श्रीमेरुशास्त्रिणा लिखितेन वाराणसीस्थेन न्यायदर्शनवात्स्यायनभाष्यपुस्तकेन संवादादिदं वार्त्तिकपुस्तकमपि तेनैव पण्डितेन लिखितमित्यनुमीयते। अस्यैव पुस्तकस्य प्रथमपत्रे निरङ्कुशेष्ठे

प्र०	२८००
द्वि०	२३००
तृ०	१६००
च०	११००
प०	४३५
	८२३५

इति लेखदर्शनात् संपूर्णस्य वार्त्तिकग्रन्थस्य संख्यावगता। "प्र० २८००" इत्यनेन प्रथमाध्याये श्लोकसंख्या "द्वि० २३००" इत्यनेन द्वितीयाध्याये श्लोकसंख्या एवंरीत्याग्रेऽपि बोध्या।

(२) अयं द्वितीयाध्यायो देवनागराक्षरैः कागजाख्याधारे लिखितोऽशुद्धश्च। अत्र लेखकेन लिपिकाल एवंरूपेण लिखितः।

चात्यन्तं हर्षितः । ततश्च क्रमशोऽन्वेषणे कृते चिरेण मिथिला-देशस्थश्रोपाख्यपण्डितश्रीचण्डेश्वरसकाशात् प्रमेयप्रकरणमारभ्य प्रथमाध्यायमभाप्यन्तं पुस्तक[१]मुपलब्धवान् । द्वित्यमध्यायत्रये सम्पन्ने वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तमानं तृतीय-चतुर्थाध्यायपुस्तकं[२] ततश्च स्वर्गनिवासिनां भूतपूर्ववाराणसीभूषण-भूतानां श्रीविभवरामपण्डितानां पुरातनं पञ्चमाध्यायपुस्तक[३]-

---

"इत्याचार्यश्रीउदयोतकरकृतौ द्वितीयोऽध्यायः समाप्तः ॥ शुभमस्तु ॥ संवत् १६०० शाके १४६५ विरोधकृत् नाम संवत्सरे पुस्तक लिषि(खि)तं वाराणसीमध्ये लिषा(खा)यितं ब्राह्मण लिषि(खि)तं धर्म्मदासकायस्थ मासमाघवदि एकादशी ॥ श्रीविश्वेश्वरस्थानात् ॥ श्रि(श्री)साहि आलमराज्ये प्रवर्तमाने ॥"

तृतीयाध्यायोऽपि तथैव लिखितो जीर्णत्वाद्याकारेणानुमीयते यद्वर्ष-त्रिशत्याः पूर्वं लिखितो भवेदिति ।

(१) पुस्तकमिदं मैथिलाक्षरैस्तेलपत्रेषु लिखितं पुरातनं जीर्णं कृमिस्पृष्टं प्रायः शुद्धं च । अन्ते लेखकेन "पुस्तकमिदं महोपाध्याय-श्रीभवानन्दभट्टाचार्याणाम्" इति लिखितत्वात् कस्यचित्पण्डितस्य पुस्तक-मिदमित्यवगम्यते । तेलेतपत्राणि तालपत्रेभ्यो भिन्नानि समीचीनान्यपि भवन्ति । तेलेतफलं च सुदृढं कृष्णवर्णं भाषायां वच्चवट्टू इति प्रसिद्धं दृष्टिदोषनिवारणार्थं बालकैर्धार्यते ।

(२) इदमपि मैथिलाक्षरैः कागजाख्याधारे लिखितं परिशुद्धं जीर्णम् । अत्र यद्यपि लिपिकालो न लिखितस्तथापि जीर्णत्वाद्याकारेण तत्सम्बद्ध-न्यायनिबन्धप्रकाशपुस्तकेन ल० सं० ४५६ (लक्ष्मणसेनसंवत्सर)लिखितेन चानुमीयते तस्मिन्नेव समये लिखितं भवेदिति ।

(३) देवनागराक्षरैः कागजाख्याधारेषु लिखितं "१६०० विक्रमीये संवत्सरे लिखितमिति" तत्र लिपिकालो लिखितो लेखकेन ।

अथ च वाराणसीस्थितेन श्रीहरिनामदासमाधुना कृपया प्रदत्तं नवीनं प्रथमाध्यायपुस्तकं[१] च प्राप्य पञ्चाध्याय्यात्मकं सम्पूर्णं न्यायवार्त्तिकं सङ्कलय्य[२] तमानन्दमविन्दं यो वचसामगोचरः।

"लाभालाभः प्रवर्द्धत" इति न्यायवार्त्तिकलाभात् न्यायवार्त्तिकतात्पर्यटीकाया अप्यन्वेषणे कृतेऽस्या अपि त्रीणि पुस्तकानि[३] प्राप्तानि। ततश्च क्रमशो न्यायवार्त्तिकतात्पर्यटीकाया अपि व्याख्यानमुदयनाचार्यकृतं न्यायवार्त्तिकतात्पर्यपरिशुद्ध्याख्य[४]म-

---

(१) इदमशुद्धं नवीनमपि सन्दिग्धस्थले पाठापपाठनिश्चायकमत्यन्तमुपयोगि च।

(२) एषु पञ्चस्वध्यायेषु "इति प्रमाणप्रकरणम्" "इति प्रमेयप्रकरणं" मेवंरूपेण भिन्नान्येव प्रकरणानि आसन् तानि च वाचस्पतिमिश्रकृतन्यायसूचीनिबन्धानुसारेण एकत्र सङ्कलितानि कृत्वा ग्रन्थः सम्पूर्णीकृत इति। अयं च न्यायसूचीनिबन्धोऽप्यत्र मुद्रित एव विस्तरस्त्वग्रे वक्ष्यते॥

(३) प्रथमं पुस्तकं कागजाख्याधारे देवनागराक्षरैर्वाराणस्यां लिखितम्। तत्र लेखकेन लिपिकाल एवं लिखितः।

"इति वाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां प्रथमोऽध्यायः समाप्तः॥ ळ्॥ ळ्॥ ळ्॥ स्वस्ति संवत् १४५४ समये आश्विनवदि १० रविवासरे॥ श्रीः॥ ळ्॥ ॐ नमो नारायणाय॥॥ स्वस्ति॥॥ कार्ष्णी करोतु कल्याणं विश्वेशः सर्व्वसम्पदः" इत्यादि।

द्वितीयं तु तेहेतपत्त्रेषु मैथिलाक्षरैर्लिखितं तत्र लेखकेन लिपिकाल एवं लिखितः। "ल० सं० ४१७" (लक्ष्मणसेनसंवत्सरे)

तृतीयं कागजाख्याधारे देवनागराक्षरैर्लिखितं नवीनमशुद्धं च।

ग्रन्थोऽयं श्लोकदशसाहस्रात्मक इदानीं मुद्रित उपलभ्यते।

(४) ग्रन्थोऽयं श्लोकद्वादशसाहस्रात्मकः। इदानीमस्या एव एसि-

स्यापि व्याख्यानं श्रीगङ्गेशोपाध्यायात्मजश्रीवर्द्धमानोपाध्याय-विरचितं न्यायनिबन्धप्रकाशाख्य[१]मस्यापि व्याख्यानं श्रीबल्लभद्र-मिश्रात्मजश्रीपद्मनाभमिश्रविरचितं वर्द्धमानेन्दुनामक[२]मस्यापि व्याख्यानं तात्पर्यमण्डनाभिधं श्रीशङ्कर[३]कृतं च प्राप्तम् । एतेषां प्राप्त्या परमप्रमुदितमना एते ग्रन्थाः सर्वेषामपि विद्यानुरागिणां सुलभा भवेयुरिति चिन्तयन् मुद्रणद्वारा प्रकाशने यतमानोऽहम-मतिष्ठम् ।

अत्रान्तरे न्यायवार्त्तिकमन्वेषयद्भिर्वाराणस्यां समागतैः कलिकातास्थगवर्नमेण्टसंस्कृतपाठशालाप्रधानाध्यक्षैर्महामहोपाध्यायै-रिदानीं स्वर्गस्थैः श्रीमहेशचन्द्रन्यायरत्नभट्टाचार्य— सी. आई. ई. महाशयैरहं प्रोत्साहितो "यदेतेषां ग्रन्थानां मुद्रणं वङ्गदेशस्थ-एसियाटिक्सोसाइटीसभासमादेशेन यदि भवेत् तर्हि सर्वप्रकारेण समीचीनं भविष्यतीति" तच्च न्यायदर्शनवात्स्यायनभाष्यस्य पृथङ् मुद्रितत्वादिदानीं न्यायवार्त्तिकादीनां ग्रन्थानामपि पार्थक्येनैव

याटिक्सोसाइटीसभाया निदेशेन श्रीवर्द्धमानोपाध्यायकृतटीकासहितो मुद्रितो भवतीति तद्विशेषवर्णनं तद्भूमिकायां द्रष्टव्यम् ।

(१) ग्रन्थोऽयं श्लोकविंशतिसाहस्रात्मकः ।

(२) आरम्भादात्मनिरूपणान्तस्य ग्रन्थस्य पुस्तकमस्मन्निकटे वर्ततेऽतः सम्पूर्णग्रन्थस्य श्लोकसंख्या इदानीं कर्तुं न शक्यते । अनेनैव पद्मना-भमिश्रेण किरणावलीप्रकाशोऽपि व्याख्यातस्तदपि व्याख्यानं वर्द्धमानेन्दु-नामकं द्रव्यग्रन्थात्मकमस्मन्निकटे वर्तते तच्च श्लोकसंख्या ३६०० ।

(३) अयं शङ्करमिश्रो वा शङ्करभट्टाचार्यो वेति निर्णयस्तन्मुद्रणावसरे भविष्यति ।

मुद्रणं समुचितमिति निर्धारितं तैरेव महाशयैः। ततश्च मयानुमोदितेऽस्मिन्नर्थे उक्तमहाशयेषु कलिकातानगरे गतेषु उक्तसोसादटीसम्पादकमहाशयानामपि ममादेशपत्रे समागते न्यायवार्त्तिकमुद्रणारम्भो जात इति

तत्र च सर्वेष्वप्युपलभ्यन्यायवार्त्तिकादर्शपुस्तकेषु व्याख्येयत्वेन मूलत्वेन वा विन्यस्तानि न्यायसूत्राणि वार्त्तिकसंश्लिष्टानि न तु पार्थक्येन, मया तु जिज्ञासूनां सुबोधार्थं तत्रतत्रैव सर्वाणि न्यायसूत्राणि स्थूलाक्षरैः पार्थक्येन मुद्रणसमये विन्यस्तानीति विज्ञेयम्।

अत्रादर्शपुस्तकेषु प्रथमद्वितीयाध्यायपुस्तकानि देवनागराक्षरलिखितपरमादर्शपुस्तकाद्देवनागराक्षरैर्लिखितानीति लेखकलिखितनामग्रामादिभ्योऽनुमीयते। अपराणि तृतीयचतुर्थाध्यायपुस्तकानि देवनागराक्षरैर्लिखितानि प्राचीनान्यपि मैथिलाक्षरलिखितपरमादर्शपुस्तकाद्देवनागराक्षरेष्ववतारितानि यतस्तेषु क्वचिद् रकारस्थाने वकारः क्वचिच्च वकारस्थाने रकार इत्यादिलेखोऽस्ति। अन्यानि प्रथमतृतीयचतुर्थाध्यायपुस्तकानि मैथिलाक्षरलिखितानि किन्तु प्राचीनत्वाज्जीर्णत्वाद्विलुप्ताक्षरत्वाच्च मैथिलानामपि दुष्पठानि ततः का कथा मादृशानामचिरपरिचितमैथिलाक्षराणाम्। एवं क्वचित् क्वचित् तात्पर्यटीकायामप्यव्याख्यातत्वाद् भ्रामकेष्वक्षरेषु अर्थानुसन्धानेनाक्षरान्तरविन्यासः क्वचित् सम्भवतीति भ्रान्तेः पुरुषधर्मत्वादिति तत् चन्तव्यं विद्वद्भिः परिश्रमवेत्तृभिरिति।

मुद्रणसमयेऽस्मिन् पुस्तके पाठान्तरबोधनार्थं वाराणस्यां वृद्ध-ब्राह्मणस्य गृहे प्राप्तं पुस्तकं प्रथमत्वेन मिथिलादेशस्थेन झोपाख्य-पण्डितश्रीचण्डेश्वरशर्मणा दत्तं पुस्तकं द्वितीयत्वेन गुरुभिर्दत्तं पुस्तकं तृतीयत्वेन वाराणसीस्थराजकीयसंस्कृतपाठशालीयं चतुर्थ-त्वेन विभवरामपण्डितानां पुस्तकं पञ्चमत्वेन द्वितीयाध्यायमुद्रण-समये च महामहोपाध्यायश्रीगङ्गाधरशास्त्रि— सी. आइ. ई. महाशयैर्वाराणसीस्थराजकीयसंस्कृतपाठशालीयभूतपूर्वाध्यापकैः प्रदत्तं द्वितीयाध्यायपुस्तकं च षष्ठत्वेनाङ्कद्वारा सूचितम् ।

यद्यप्यस्य न्यायवार्त्तिकस्य टीका आचार्यवाचस्पतिमिश्रेण कृता तस्या अपि टीका उदयनाचार्येण कृता तस्या अपि टीका वर्द्ध-मानोपाध्यायेन कृता एवंरूपेण टीकापरम्पराशालिनोऽप्यस्य न्याय-दर्शनरहस्यप्रकाशकस्य महानिबन्धस्य मुद्रणकार्यं महानैयायिकाना-मप्यसाध्यं किं पुनर्मादृशानामल्पज्ञानां तथापि चिरेणाननुभूत-महाश्रमेणोत्करौत्या वार्त्तिकपुस्तकं सम्पूर्णं सङ्कलय्य यावच्छक्यं संशोध्य पाठान्तराणि च सन्निवेश्य सर्वसाधारणविद्यानुरागिणां सौलभ्यार्थमुक्तसोसाइटीसभानिदेशेन मुद्रितवानहमस्मि । अत्र गुणैकपक्षपातिनो नैयायिकप्रवराः सम्पूर्णं मुद्रितपुस्तकं समधि-गम्य दृष्टिपूतं कृत्वा मामकीनं परिश्रमं सफलयन्तु नैसर्गिकदयया अस्मद्दृष्टिदोषजा मुद्राप्रमादजा अशुद्धीः संशोधयन्त्विति च भूयोभूय एवाभ्यर्थये । अनेन कर्मणा प्रसीदतु सर्वान्तर्यामी श्रीपरमेश्वर इति ॥

अत्र वाराणसीस्थराजकीयसंस्कृतपाठशालाभूषणभूतैरिदानीं

स्वर्गस्थैर्महामहोपाध्यायैस्तार्किकशिरोमणिभिरस्मद्गुरुवरैः श्री ६-कैलासचन्द्रभट्टाचार्यमहाशयैरादर्शपुस्तकसम्पादनसाहाय्येन विषम-स्खलव्याख्यानादिना च परममनुकम्पितोऽस्मि नोचेदस्य संस्करणं मम साध्यं कथमपि न भवेदिति ॥

यद्यपि कविभिः कल्पनया(१) शिष्यप्रशिष्यैश्च स्तुत्या(२) सम्प्रदायप्रवर्तकैश्चोत्कर्षख्यापनाय(३) अन्यैश्च माद्दशिकैः किंवदन्ती-

(१) यथा माधवीये शङ्करविजये ३ सर्गे विष्णुः पद्मपादाचार्योऽभूत्। वायुर्हस्तामलकाचार्योऽभूत्। वायुरेव तोटकाचार्योऽभूत्। ब्रह्मा सुरेश्वराचार्योऽभूदेवमेवाऽनेके देवाः शङ्कराचार्यस्य चरणौ सेवितुं ब्राह्मणपुत्रा अभूवन्निति निरूपितम्।

अयं माधवश्च न वेदभाष्यकर्ता पूर्वोत्तरमीमांसाव्याख्याता पराशर-स्मृत्यादिधर्मशास्त्रव्याख्याता सायनमाधवाचार्यः यतः पूर्वोक्तामाख्यायिकां प्रमाणोल्लेखरहितां स कथं लिखेत्। अपि च ९१३ शाकाब्दे निर्मितां न्यायकन्दलीं चित्सुखीग्रन्थे समुद्धृतवन्तं चित्सुखाचार्यं खण्डनखण्डखाद्य-टीकाकारं श्रीहर्षादपि पश्चाद्भाविनं शङ्कराचार्यस्य शिष्यत्वेन च कथं लिखेत्। अन्यच्च "वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे" इत्यादिमुद्रा-श्लोकानां शङ्करविजयेऽभावात्। यद्यपि मुद्राश्लोकः सर्वदर्शनसंग्रहेऽपि नास्ति तथापि "श्रीमत्सायनदुग्धाब्धिकौस्तुभेन महौजसे"त्यादिश्लोक-दर्शनात् तस्य तत्कर्तृत्वं निर्विवादमेव।

(२) गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ इत्यादि।

(३) यथा रामानुजाचार्यो लक्ष्मणार्यापरनामधेयः फणिराजशेषस्याव-तारः १२० वर्षाणि भूमौ स्थितो लोकोत्तराणि कार्याणि कृतवानित्यादि-प्रपन्नामृतग्रन्थे रामानुजचरित्रनामधेये प्रतिपादितम्। मध्वाचार्यस्तु

श्रवणादिना[१] अपरेषु हेत्वाभासैर्भ्रमात्मकानुमानेन[२] बहूनां

वायोरवतार इत्यादिमहाभारते भविष्यपर्वणि आर्यविद्यासुधाकरग्रन्थेऽपि । महाभारतस्य खिलो हरिवंशोऽस्यापि खिलो भविष्यत्पर्व अस्यापि खिलः कदाचिद्भवेत् . वल्लभाचार्यस्तु अग्नेरवतार इत्यादिवल्लभदिग्विजयग्रन्थे । एवं नानकग्राहस्य नानकचन्द्रोदयग्रन्थस्तके गोरखनाथस्य निरञ्जनपुराणे माहात्म्यम् । अनयैव रीत्या बहूनां निरूपणम् ।

(१) यथा भक्तमालग्रन्थे १०८ भक्तानां चरितानि ।

मानसिंहः । हनूमान् । विभीषणः । शबरी । अजामिलः । जटायुः । अम्बरीषः । विदुरः । सुदामा । चन्द्रहासः । ध्रुविः । उशीनरः । द्रौपदी । वाल्मीकिः । रुक्माङ्गदः । मयूरध्वजः । प्रह्लादः । निम्बादित्यः । श्रीमार्गः । रामानुजः । श्रीरङ्गः । श्रीकृष्णदासः । अग्रदासामरसिंहौ । शङ्कराचार्यः । मण्डनमिश्रः । उदयनाचार्यः । विट्ठलेशः । नामदेवः । गीतगोविन्दकारजयदेवः । पद्मावती । श्रीधरस्वामी । बिल्वमङ्गलः । पद्मकला । विष्णुशर्मा । ज्ञानदेवः । चिलोचनः । कुलशेखरः । रतिमतिः । द्युतिमान् । कर्मावाई । राजकन्या । राजपुत्रः । वैश्यसाधुः । चतुर्भुजः । कामधुक् । जयमल्लः । श्रीधरः । साक्षीगोपालः । रामदासः । नन्ददासः । आत्मदासः । रविदासः । कबीरदासः । पीपाजी । धनाभागवतः । रामराजः । सुखानन्दः । सुरसरित् । नरहरिः । माधवदासः । दृढा । परमानन्दः । श्रीकृष्णचैतन्यः । सूरदासः । हरिव्यासः । कृष्णदासः । विट्ठलः । व्रजवल्लभः । रूपसनातनः । व्यासः । गोविन्दस्वामी । मुरारिः । सदनकसाई । लडुदासः । सत्याराज्ञी । लंपा । नरसी । मीराबाई । तुलसीदासः । परशुरामः । एवमन्येऽपि बहवो निरूपिताः ।

एवमेव सन्तविलासग्रन्थेऽपि अनेके निरूपिताः ।

(२) यथा केनचिन्निरूपितं "वराहमिहिराचार्यो भिल्लजातीयो वा कश्चित् शूद्र इति । उक्तं च बृहज्जातके ।

पुरुषाणामेकनाम्ना प्रसिद्धापि नाममात्रेणैवा[१]र्वाचीनानामपि

आदित्यदासतनयस्तदवाप्तबोधः
काम्पिल्लके सवितृलब्धवरप्रसादः ।
आवन्तिको मुनिमतान्यवलोक्य यत्नाद्
ढोरां वराहमिहिरो रुचिरां व्यधत्त ॥ इति ।

अत्र आदित्यदासतनय इत्यत्र दासपदोपादानात् ।"

वस्तुतस्तु भट्टोत्पलेन बृहज्जातकटीकायाम् ।

"आदित्यदासाख्यो ब्राह्मणस्तस्य तनयः पुत्रः"

"चैत्रमासस्य पञ्चम्यां सितायां गुरुवासरे ।
वसुष्टाष्टमिते शाके ८८८ कृतेयं विवृतिर्मया ॥"

इत्युक्तत्वाद् ब्राह्मण एव। अन्येऽपीदानींतना ब्राह्मणा गोपालदास-कालिदासादिनामानो वर्तन्ते ।

(१) एके तु तर्कभाषाकर्तुः केशवमिश्रस्य समयनिर्णये प्रतिपादित-वन्तः गोवर्धनेन तर्कभाषायाष्टीका रचितेति गोवर्धनसमयात् पूर्वकाल-भावी केशवः अपि च तर्कसंग्रहटीकापि न्यायबोधिनी गोवर्धनेन कृता यथा

"अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः ।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥"

इति टीकामुखदर्शनादवगम्यते गोवर्धनात्पूर्वकालवर्त्ती अन्नम्भट्टोऽपि तर्कसंग्रहकारः । "पूङ्कारोत्तमसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्द्धी कोऽपि न विश्रुतः" इति गीतगोविन्दे आदावेव दर्शनात् जयदेवसमयात् पूर्वकालवर्त्ती गोवर्द्धनाचार्यः

"ख्यातो गोवर्धनाचार्य उमापतिधरस्तथा ।
शरण्यो जयदेवश्च धोयीकविन्दवः क्रमात् ॥
राज्ञो लक्ष्मणसेनस्य पञ्चरत्नानि संसदि ॥"

इत्यनेन लक्ष्मणसेनस्य राज्ञः समये १०१० शकाब्दे वा तदासन्ने समये जयदेवस्य स्थितिरिति निष्पन्नं भवति । श्रीरजनीकान्तगुप्तमहाशयेन जयदेवचरितपुस्तके १३०० शकाब्दे जयदेवस्य स्थितिरनुमिता ततोऽपि जयदेवात्पूर्वं गोवर्धनाचार्यस्ततोऽपि पूर्वं तर्कभाषातर्कसंग्रहकारावितिं ।

वस्तुतस्तु तर्कभाषाटीकारम्भे

"यस्तर्कभाषामनुभाषते स्म गोवर्धनस्तर्ककथासु धीरः ।
तेनानवद्येन सुधांशुगौरी कीर्तिर्गुरूणामभूताधिकास्तु ॥
विजयश्रीतनूजन्मा गोवर्धन इति श्रुतः ।
तर्कानुभाषां तनुते विविच्य गुरुनिर्मितिम् ॥
श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा ।
तनोति तर्कानधिगत्य सर्वान् श्रीपद्मनाभाद्विदुषो विनोदम् ॥" इति ।

दर्शनात् गोवर्धनः पद्मनाभमिश्रस्य भ्राता बलभद्रमिश्रस्य पुत्रः । पद्मनाभेन च किरणावलीभास्करे

"उपदिष्टा गुरुचरणैरस्पृष्टा वर्धमानेन ।
किरणावल्यामर्थास्तन्यन्ते पद्मनाभेन ॥"
"यस्तर्कदुस्तरतरार्णवकर्णधारो
वेदान्तवर्त्मनिरताध्वगसार्थवाहः ।
श्रीपद्मनाभरचितेन दिवाकरेण
तुष्टोऽमुनास्तु सुकृती बलभद्रमिश्रः ॥"

इत्युक्तत्वात् वर्धमानोपाध्यायादपि पश्चात्कालभावीत्यर्वाचीनः सः यत उदयनाचार्यं न्यायलीलावत्यां प्रमाणयति न्यायलीलावतीकारः सा च वर्द्धमानोपाध्यायेन व्याख्याता इति ॥

अपि च शुक्लयजुःसंहिताभाष्यकर्तुः महीधरस्य समयनिर्णये १८९९ ईसवीयवर्षे सप्तेम्बरमासे पण्डितपत्त्रे मुद्रितं जयचन्द्रप्रदत्तताम्रपत्त्रशासनस्थं "द्वाचिंशदधिकद्वादशशततसंवत्सरे भाद्रे मासि शुक्लपक्षे त्रयोदश्यां तिथौ

रविदिने अङ्कतोऽपि संवत् १२३२" इत्युपक्रम्य "महापण्डितश्रीमहीधरपौत्राय महामिश्रपण्डितश्रीहालेपुत्राय महापण्डितश्रीकृष्णकेशवधर्म्मणे ब्राह्मणाय" इत्युक्तं वचनमवलम्ब्य १२३२ संवत्सरात् पूर्वं महीधरस्थितिर्निर्णीता।

वस्तुतस्तु शुक्लयजुःसंहिताभाष्यकर्त्ता महीधरेणात्मचरितमेवं लिखितम्।

"रसवेदाङ्कभू १६४६ वर्षे मास्यसे ? धवले दले।
चयोदश्यां रवेर्वारे वाराणस्यां महीधरः॥
श्रीरत्नेश्वरमिश्रस्य गुरोः केशवजन्मनः।
आज्ञया विवृतिं शौक्लीं भाष्यवृत्त्यनुसारिणीम्॥
विदुषां सुखबोधाय व्यधाद्दुग्ध्यनुसारतः।
भाष्यं रामकृतां वृत्तिं तारावालोच्य ? तत्त्वतः॥
नीलकण्ठो रमानाथः सिताम्भश्चन्द्रशेखरः।
भैरवोऽथ कृपासिन्धुस्तेन तुष्यान्त्केशवी॥
इति महीधरविरचिता शुक्लसूत्रवृत्तिः समाप्ता॥"

अत्र कदाचिद्बहूनां महीधराणां सम्भवोक्ति तथापि तत्कृतग्रन्थेषु मङ्गलश्लोकस्यैक्यात् संहिताभाष्ये आदावेव "भाष्यं विलोक्यौव्वटमाधवीयम्" इत्युक्त्या च माधवाचार्यस्य १३१३ शकाब्दे वर्तमानस्य समयात् पश्चाद्भावी महीधर इति तु वचलेपायितम्।

एवं – ऋग्वेदीयसर्वानुक्रमे मेधातिथिः ऋषिः, मेधातिथिभट्टोऽपि मनुस्मृतिभाष्यकारः। श्रीवाचस्पतिमिश्रो भामत्यामन्ते "तस्मिन्महीपे महनीयकीर्त्तौ श्रीमन्नृगेऽकारि मया निबन्धः।" नृगोपाख्यानं महाभारते अनुशासनपर्वणि ७० अध्याये श्रीमद्भागवतेऽपीत्यन्यो नृगनृपतिः। रामावतारसमये रावणो दशमुखः अपरोऽपि लक्ष्मणोत्सवग्रन्थकर्तुर्लक्ष्मणकायस्थस्य भ्राता रावण इति लक्ष्मणोत्सवग्रन्थे प्रथमोल्लासे वर्णितः।

निबन्धकाराणां जीवनचरितस्य निरूपितत्वात् तथेनेयत्तया विवादरहितमर्वाचीनानां जीवनचरितं प्रायो नावगम्यते किं पुनश्चिरन्तनानां गोतम-कणाद-प्रभृतीनां महर्षीणामन्येषामपि ऋषिकल्पानामाचार्याणां तथापि यथोपलब्धं सप्रमाणमत्र निरूपयामि ॥

न्यायशास्त्रप्रणेतुर्भगवतो महर्षेर्गोतमस्य चरितम्।

तत्र तावन्न्यायशास्त्रप्रणेता भगवान् गोतममहर्षिः(१) कस्मिन् काले कस्मिन् देशे आविरासीदिति निर्णयस्तु दूरे गतस्तस्य नाम्न्येव विवादो वर्तते। स च गोतमो गौतमो वा? दृश्यते चानेकत्र गोतम इति बहुत्र च गौतम इति। किन्तु नैषधचरिते १७ सर्गे ७५ श्लोकः।

वैशेषिकसूत्रकर्ता कणादमहर्षिरपरोऽपि कणादभट्टाचार्यो भाषारत्नस्य कर्ता। मान्धाता महार्णवकर्मविपाकग्रन्थकारः अन्योऽपि मान्धाता महाभारते राजधर्मे ६४ अध्याये निरूपितः। एवमेव बहवो वर्तन्ते।

(१) महर्षिलक्षणं वायुपुराणे पूर्वार्द्धे ५९ अध्याये।

"ऋषीत्येष गतौ धातुः श्रुतौ सत्ये तपस्यथ।
एतत्सन्नियते तस्मिन् ब्रह्मणा स ऋषिः स्मृतः ॥ ७९ ॥" इत्यादि।

"यस्मान्न हन्यते मानैर्महान् परिगतः पुरः।
यस्मादृषन्ति ये धीरा महान्तं सर्वतो गुणैः ॥

"मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम् ।
गोतमं तमवेत्यैनं यथा वित्थ तथैव सः ॥" इति ।

महापण्डितेन लोकोत्तरविद्यावैभवशालिना श्रीहर्षणोक्तत्वात्(१) न्यायसूत्रवृत्तावपन्ते ।

तस्मान्महर्षयः प्रोक्ता बुद्धेः परमदर्शिनः ॥ ८२ ॥"

विस्तरस्तु तत्रैवाथ मत्स्यपुराणे १४४ अध्याये ऽप्यनुसन्धेयः ।

ऋषिलक्षणं तेषां चातुर्विध्यमुक्तं सम्प्रदायविद्भिः । यथा

"ऋषीणाम् ऋषिपुत्राणामृषिकाणां स्वयम्भुवाम् ।
तथा नामाभिजानीयाद्यथैषां मन्त्रदृष्टयः ॥
प्रवरैर्यै समाख्याता ऋषयस्ते इति श्रुतिः ।
तत्पुत्रपौत्रजनना ऋषिपुत्रा इति स्मृताः ॥
राजन्यवैश्या ऋषिकास्त्रियस्तास्तिर्यग्योनयः ।
देवादेवाप्सरो नद्यो गन्धर्वास्ते स्वयम्भुवः ॥" इति ।

(१) श्रीहर्षेण स्वकपोलकल्पनया नोक्तमिदं किन्तु चार्वाकोक्तिरेवात्तरणोऽनूदिता। चार्वाकस्य कथा तु महाभारते शान्तिपर्वणि राजधर्मे ३८। ३९ अध्याये विस्तरेण वर्तते । यथा

"वैशम्पायन उवाच ।

ततस्तत्र तु राजानं तिष्ठन्तं भ्रातृभिः सह ।
उवाच देवकीपुत्रः सर्वदर्शी जनार्दनः ॥

वासुदेव उवाच ।

ब्राह्मणास्तात लोकेऽस्मिन् अर्चनीयाः सदा मम ।
एते भूमिचरा देवा वाग्विषाः सुप्रसादकाः ॥
पुरा कृतयुगे राजंश्चार्वाको नाम राक्षसः ।
तपस्तेपे महाबाहो बदर्यां वज्रवार्षिकम् ॥

वरेण क्रन्द्यमानस्य ब्रह्मणा च पुनःपुनः ।
अभयं सर्वभूतेभ्यो वरयामास भारत ॥
द्विजावमानादन्यत्र प्रादाद्वरमनुत्तमम् ।
अभयं सर्वभूतेभ्यो ददौ तस्मै जगत्पतिः ॥
स तु लब्धवरः पापो देवानमितविक्रमः ।
राक्षसस्तापयामास तीव्रकर्मा महाबलः ॥" इत्युपक्रम्य
"स एष निहतः शेते ब्रह्मदण्डेन राक्षसः ।
चार्वाको नृपतिश्रेष्ठ मा शुचो भरतर्षभ ॥" इत्युक्तम् ।

अत्र केचित् बृहस्पतिशिष्य एकश्चार्वाको दुर्योधनसखः राक्षस-श्चार्वाकोऽपर इतिचार्वाकद्वयं निर्मूलं कल्पयन्ति । तथात्वेऽपि वेदादि-निन्दकस्य न्यायकर्तृगोतमनिरूपकस्य चार्वाकस्य नलकथाप्रसङ्गे निरू-पणान्महाभारतेऽस्य निरूपणं नासम्भवीति मन्तव्यम् ।

अपि च शान्तिपर्वणि मोक्षधर्मे १८६ अध्याये । भारद्वाज उवाच ।

"यदि प्राणयते वायुर्वायुरेव विचेष्टते ।
श्वसित्याभाषते चैव तस्माज्जीवो निरर्थकः ॥"

अत्र नीलकण्ठटीकाकारः । नित्यं समिध्यत इति जीवस्यानौपाधिकं रूपं दीप्यत इत्युक्तं तल्लोकायतमते स्थित्वा आक्षिपति । यदीति । एवमेव २१८ अध्याये २३ तमे श्लोके लोकायतमतसञ्चारः कृतः "दृश्यमाने विनाग्नौ च प्रत्यक्षे लोकसाक्षिके" इत्यादिना ।

चार्वाकः चारुः लोकसम्मतो वाको वाक्यं यस्य पृषोदरादित्वात् साधुः । "अत एव तस्य चार्वाकमतस्य लोकायतमित्यन्वर्थपरं नामधेय" मिति सर्वदर्शनसंग्रहे चार्वाकदर्शने माधवाचार्येणोक्तत्वात् चार्वाको लौकायति-कश्चैक एवेति ।

अपरे तु "अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥" इति
"त्रयो वेदस्य कर्तारो धूर्तभण्डनिशाचराः ।"

"एषा मुनिप्रवरगोतमसूत्रवृत्तिः(१)
श्रीविश्वनाथकृतिना सुगमाल्पवर्णा ।
श्रीकृष्णचन्द्रचरणाम्बुजचञ्चरीक-
श्रीमच्छिरोमणिवचःप्रचयैरकारि ॥"

इति नैयायिकप्रवरेण विश्वनाथन्यायपञ्चाननेनोक्तत्वात् ।

इत्याद्यपि च वदतश्चार्वाकराक्षसस्यैवेदमपि "मुक्तये यः शिलात्वाये"-त्यादिवचनमित्यविज्ञाय न्यायशास्त्रस्य वास्तविकनिन्दायां तत् प्रमाणयन्ति तत्तुपहासास्पदम् राक्षसोक्तत्वेन शिष्टापरिग्रहात् । न चैवं गौत्या गोतम-नामाप्युपहासास्पदमित्यप्युच्यतामिति वाच्यम् । वेदानां वेदमज्ञयैव अग्नि-होत्रस्याग्निहोत्रसज्ञयैवोच्चरितत्वात् । यथा च अग्निहोत्रविदगडभस्म-धारणादीनां बुद्धिपौरुषहीनानां जीविकात्वेन व्यवस्थापनं कृतम् तथैव गोतममहर्षेर्गौतमत्वं व्यवस्थापितं महापशुत्वमिति यावत् तस्य गौतम इति नाम्नि तन्न सम्भवतीति भावः ।

अत्र महाभारते राजधर्मे युधिष्ठिरस्य राज्याभिषेकसमये चार्वाकः समायातश्चार्वाकाद् बहुपूर्वो वाल्मपूर्वो महर्षिर्गोतम इति लौकिकानां मते निर्णयो भवितुमर्हतीति ।

स च समय "आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ" इत्यादिवृद्धसंहितावचनेन यदा सप्तर्षयो मघानक्षत्रे स्थितास्तदेति ५४०० गतवर्षासन्ने सम्भवतीति गणितशास्त्रानुसारेणैतिह्यासिकवृत्तेन च न्यायदर्शनभाष्यकारत्वात्स्यायनचरित्रे ऽत्रैव निपुणतरमुपपादयिष्यते ।

(१) अस्मन्निकटे पुण्यग्राम(पूनानगर)लिखितं पुरातनमेकं परिशुद्धं पुस्तकं वर्तते तत्राऽयमेव पाठः तथा इण्डियाफिसलाइब्रेरीपुस्तकालये वर्तमाने लिखितपुस्तकेऽपि एवं १८२८ इसवीयवर्षे कलिकातानगरे मुद्रिते ऽपि पुस्तके नवीने तु क्वचित् शोधकप्रमादाद्"गौतमसूत्रवृत्ति"-रिति जातम् ।

वेदादिभाष्यकर्त्रा श्रीमाधवाचार्येण च सर्वदर्शनसंग्रहे[१] ऽक्षपाद-दर्शने "तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गोतमेन प्रमाणादिपदार्थनवकलक्षणनिरूपणं विधाये"त्याद्युक्तत्वाद् श्रीजय-नारायणतर्कपञ्चाननेन च वैशेषिकसूत्रविवृत्याद्यनेकनिबन्धकारेण वङ्गदेशस्थ-एसियाटिक्-सोसाइटीद्वारा मुद्रिते न्यायदर्शनपुस्तके "गोतममुनिप्रणीतं न्यायदर्शन"मिति लिखितत्वात् । श्रीतारा-नाथतर्कवाचस्पतिभट्टाचार्येणापि वाचस्पत्ये बृहदभिधाने न्यायशब्दे न्यायशास्त्रस्य गोतमप्रणीतत्वेनैवावधारणात् गोतम इत्येव निर्णीतं भवति ।

अयं च गोतमः पुरोहितत्वेन सूक्तकर्तृत्वेन वा ऋग्वेद-संहिता-तद्भाष्य-अथर्ववेदसंहिता-शतपथब्राह्मणादिषु अनेकेषु स्थले-षूक्त इत्यस्य समयादिनिर्णये वेदा एव प्रमाणानीति ।

तथाहि ऋग्वेदसंहितायाम् १ अष्टके ५ अध्याये ६२ सूक्ते ।

मनायते गोतम इन्द्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

एवमेव ७७ । ७८ सूक्तयोरपि ।

अथर्ववेदसंहितायाम् ४ काण्डे ६ अनुवाके, १८ काण्डे ३ अनुवाकेऽपि गोतमस्य चर्चास्ति ।

माध्यन्दिनीये शतपथब्राह्मणे[२] १ काण्डे ४ अध्याये । "विदेघो ह माधवोऽग्निं वैश्वानरं मुखे बभार तस्य गोतमो राहूगण ऋषिः

(१) सोसाइटीमुद्रिते पुस्तके ११२ पृष्ठेऽवलोक्यम् ।

(२) Dr. Albrecht Weber. वेबरमहाशयमुद्रिते पुस्तके ३४ पृष्ठे द्रष्टव्यम् ।

पुरोहित आस तस्मै ह स्मामन्त्र्यमाणो न प्रतिशृणोति तन्माऽग्निर्वै-श्वानरो मुखान्निष्पद्याताऽइति ।" एवमेवाग्रेऽपि तस्मिन्नेवाध्याये ।

ऋग्वेदसंहिताभाष्ये प्रथमाष्टके ५ अध्याये २१ वर्ग । "त्रयो-दशानुवाके एकादश सूक्तानि तत्रोपप्रयन्त इति नवर्चं प्रथमं सूक्तम् । तत्रानुक्रम्यते । उपप्रयन्तो नव गोतमो राहूगणो गायत्रं त्रिति । अस्यायमर्थः रहूगणनामा कश्चिदृषिः तस्य पुत्रो गोतमोऽस्य सूक्तस्य ऋषिरि"त्यादि ।

अपि च । यजुर्वेदीयकाठकोपनिषदि ५ वल्ल्याम् । छान्दोग्यो-पनिषदि ४ प्रपाठके ४ खण्डे, ५ प्रपाठके ३ । ४ । ५ । ६ । ७ । १६ । खण्डेषु बृहदारण्यकेऽपि ४ अध्याये ६ ब्राह्मणे गौतमस्य चर्चाया वर्तमानत्वान्निश्चितं भवति गोतमस्यापत्यं गौतमः ऋष्यन्धकवृष्णिकुरुभ्यश्च (पाणि० अ. ४ पा. १ सू. ११४) इत्यनेन अण्प्रत्यये कृते गोतमं विना गौतमस्यासम्भवात् गोतम एव मूलपुरुषः ।

अत एव बृहदारण्यकोपनिषदि ५ अध्याये १ ब्राह्मणे "सोऽब्र-वीत् पतञ्चलं काप्यं याज्ञिकाँश्च यो वै तत् काप्य सूत्रं विद्यात् तच्चान्तर्यामिणमिति स ब्रह्मवित् स लोकवित् स देववित् स वेदवित् स भूतवित् स आत्मवित् स सर्वविदि"त्युपक्रम्य "स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति" इत्युक्तम् । अत्र शाङ्करभाष्ये "गौतमेति गोत्रतः" इत्युक्तम् । अन्ये तु अस्यामेवोपनिषदि ४ अ. २ ब्रा. "इमामेव गोतमभरद्वाजा-

वयमेव गोतमोऽयं भरद्वाज" इत्यत्र गोतमशब्दवदत्रापि गोतम एवेत्याहुः ।

यद्यपि नैषधचरितश्लोके शास्त्रमित्येवोक्तं न तु न्यायशास्त्रमिति तथापि भगीरथ-नृहरि-नारायण-लक्ष्मणप्रभृतिटीकाकारैः "शास्त्रं न्यायदर्शनं" "तदत्यन्तविमोक्षोऽपवर्ग इतिसूत्रेण" इत्यस्यैवोक्तत्वात् गोतमकृतस्य अस्यैव न्यायशास्त्रस्य ग्रहणम् । अपि च गोतमान्तरेण कृतमर्वाचीनमिदं न्यायशास्त्रमित्यपि न भ्रमितव्यम् । विश्वनाथ-न्यायपञ्चाननेन न्यायसूत्रवृत्तौ प्रथमाध्याये प्रथमसूत्रव्याख्याने न्यायस्य सर्वशास्त्रोत्तमत्वसाधनप्रस्तावे "तथा च न्यायो मीमांसा धर्मशास्त्राणीति श्रुति[१]"रित्युक्तत्वात् वेदे[२] न्यायशब्दोपादानान्न्याय-स्यातिचिरकालावस्थायित्वात् तत्कर्तुर्गोतमस्याप्यतिचिरकालाव-स्थायित्वं निर्विवादमेव । अत्र श्रुतौ मीमांसाधर्मशास्त्रसान्निध्यान्न्याय-शब्दवाच्यानामन्येषां ग्रहणं न सम्भवति तस्मान्न्यायशास्त्रस्य ऋग्वेदसंहिताशतपथब्राह्मण-यजुर्वेदीयकाठकोपनिषत्-सामवेदीय-च्छान्दोग्योपनिषत्प्रतिपादितगोतम[३]प्रणीतत्वे नासमञ्जसमिति ।

(१) ऋग्वेदीयचरणव्यूहे तथा यजुर्वेदीयचरणव्यूहेऽपि दृश्यते ।


(२) श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । मनुस्मृतिः अ० १ श्लो० १० ।

(३) केचित्तु वायुपुराणीयगयामाहात्म्ये २ अध्याये ।

"ब्रह्मा संभृतसंभारो मानसान्ऋत्विजोऽसृजत् ।" इत्युपक्रम्य ।

"सुकपालं गोतमं च तथा वेदशिरोव्रतम् ।"

इत्युक्तं वचनमवलम्ब्य श्वेतवाराहकल्पे गोतमस्य ब्रह्मणः पुत्रत्वं वदन्ति तथात्वे ।



एतदनुकूलान्येव वचनानि पुराणेष्वपि उपलभ्यन्ते ।

तथाहि पद्मपुराणे उत्तरखण्डे २६३ अध्याये ।

"कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् ।
गोतमेन[1] तथा न्यायं सांख्यं तु कपिलेन वै ॥
द्विजन्मना जैमिनिना पूर्वं वेदमयार्थतः ।
निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम् ॥" इत्यादि

स्कन्दपुराणे कालिकाखण्डे १७ अध्याये ।

"क्षीरोदार्णवसम्भूत लक्ष्मीबन्धो निशाकर ।
गृहाणार्घ्यं मया दत्तं गणेशप्रीतिवर्द्धनम् ।"

इति गणेशचतुर्थीव्रतकथायां दर्शनाच्चन्द्रमसः समुद्रादुत्पत्तिः अपि च

"नेत्राभ्यां वारि सुस्राव दशधा द्योतयद्दिशः ।
तद्गर्भविधिना दृष्ट्वा दिशो देव्यो दधुस्तदा ॥
समेत्य धारयामासुर्न च ताः समशक्नुवन् ।
स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः ॥
पपात भासयँल्लोकाञ्छोतांशुः सर्वभावनः ॥" इति

हरिवंशात् अत्रेर्महर्षेर्नेत्रादुत्पत्तिः अस्य च समन्वयः कल्पभेदाद्भवतीति गोतमोत्पत्तावपि तथैव समन्वयः कार्य इति । गयामाहात्म्ये मुद्रिते तु गौतमं चेति दृश्यते ।

(१) अपरोऽपि गोतमो मत्स्यपुराणे ४८ अध्याये निरूपितः । अयं च उशिजान्महर्षेर्ममतागर्भे स्थितो बृहस्पतिशापाद् दीर्घतमा नाम (अन्धः) ऋषिरभूत् पुनः सुरभेरनुग्रहात् गोभिस्तमो ध्वस्तं यस्येति निरुक्त्या गोतमः सञ्जातः ।

महाभारते आदिपर्वणि १०४, १०५ अध्याये दीर्घतमसो गोतमस्यो-

त्पत्तिः गौतमादिभिस्तत्पुत्रैश्च स्वमाचनुज्ञया दीर्घतमसो गङ्गाजले प्रक्षेप इत्युक्तम् ।

अहं तु ऋग्वेदसंहिताभाष्य-शतपथब्राह्मणादीननालोच्यैव न्यायकन्दलीभूमिकायामस्यैव गोतमस्य न्यायशास्त्रकर्तृत्वं प्रतिपादितवान् किन्विदानीं तत्समालोचनाद् राहूगणस्य गोतमस्य वैदिकसूक्तस्य ऋषित्वात् पौरोहित्याच्च शास्त्रकर्तृत्वसम्भवाद्दीर्घतमोऽन्धस्य शास्त्रकर्तृत्वं निराकृतं भवति । अपि चानुपदमेव वक्ष्यामि अस्य न्यायशास्त्रकर्तुर्गोतमस्य अक्षपाद इति नामान्तरम् तथा सति दीर्घतमसोऽन्धस्य गोतमस्य प्राकृते चक्षुषी एव नस्तः अक्षपादत्वं तु प्रमाणसहस्रेणापि भवितुं नार्हतीति ।

अपि च मनुस्मृतौ १ अध्याये श्लो० ३४ । ३५ ।

" अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् ।
पतीन् प्रजानामसृजं महर्षीनादितो दश ॥
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्राचेतसं वसिष्ठं च भृगुं नारदमेव च ॥ "

इत्युक्तत्वाद् अङ्गिरा ब्रह्मणः पुत्रस्तद्वंश्यो गोतमो गोत्रप्रवर्तको यथाह मनुः ।

" जमदग्निर्भरद्वाजो विश्वामित्रोत्रिगोतमाः ।
वसिष्ठकश्यपावेत्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते ॥ "

इदमुपलक्षणमन्येषामपि ग्रन्थान्तरे दर्शनात् ।

गोत्रप्रवरनिरूपकेषु ग्रन्थेषु गोतमगणे दश पठिताः । आयास्याः । प्रस्कन्वाः । कौमण्डाः । दीर्घतमसः । औशनसः । कारेणुपालाः । राहूगणाः । सोमराजकाः । वामदेवाः । बृहदुक्थाश्चेति ।

इत्यनेन राहूगणो भिन्नो गोतमो दीर्घतमाश्च भिन्न इति सिद्ध्यति । एवमन्यादीनामवान्तरभेदा सप्रमाणं वात्स्यायनचरिते निरूपयिष्यन्त इति ॥

अत्र गोतमस्यापत्यं पुमान् गौतमः ऋष्यन्धकवृष्णिकुरुभ्यश्च (पाणि०

"गोतमः स्वेन तर्केण खण्डयन् तत्रतत्र स्त्री" त्यादि ।

अपि च न्यायदर्शनवात्स्यायनभाष्येऽन्ते ।

अ० ४ पा १ सूत्र ११४) इत्यनेन अण्प्रत्यये कृते अनेके गोतमाः सम्भवन्ति । तथाहि बाल्मीकिरामायणे बालकाण्डे ५० सर्गे

"प्रतानन्दं पुरस्कृत्य पुरोहितमनिन्दितः ।"

"प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ।" इति ।

"गौतमश्च प्रतानन्दो जनकानां पुरोहितः ।" इति उत्तरकाण्डचर्चिते "गौतमः गोतमस्य महर्षेरपत्यं पुमानिति तट्टीकाकारः

प्रतानन्दस्य पिता गोतमः माता च अहल्या अस्मिन् विषये साधकानि बाधकानि च प्रमाणानि सङ्किरन्ते पण्डिताः किन्तु साधके ममापि संमतिः गोतमो राहूगणो विदेहराजस्य तत्रत्यस्य पुरोहित आसीदिति प्रतपथब्राह्मणे प्रतिपादितमिति पूर्वं पृ. २० पं. १ दर्शितम् । तत्पुत्रस्य प्रतानन्दस्य जनकानां पुरोहितत्वे किमपि नासमञ्जसम् । एवं चेद्बाल्मीकिरामायणे बालकाण्डे ४८–५१ सर्गेषु मिथिलाभूमौ जनकपुरोपकण्ठे गौतमाश्रमस्य वर्णनात् तस्मिन् देशे न्यायशास्त्रस्य प्रणायनकथनं न साहसास्पदं भविष्यतीति । अत एव मिथिलायां न्यायचर्चाधिक्यात् उदयनवाचस्पति-गङ्गेश-वर्धमानोपाध्यायैरनेके न्यायरहस्यग्रन्था निर्मिता इति ।

अपि चामरकोशे बुद्धनामभेदेऽपि ।

"सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।" इत्यादि ।

"गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ।" इति ।

अन्यच्च । जैनतीर्थङ्करस्य २४ संख्यकस्य महावीरस्वामिनः शिष्योऽपि गौतमः यतो गौतमः पृच्छति महावीरस्वामी भणतीति जैनागमेषु दृष्टत्वात् ते चागमाः उभयसंवादरूपा एवेति ।

एतेनापि प्रमाणेन गोतमस्य चिरन्तनत्वमेव सिद्धम् ।

"योऽपाद्[१]मृषिं न्यायः प्रत्यभाद्ददतां वरम् ।
तस्य वात्स्यायन इति भाष्यजातमवर्तयत् ॥" इति ।

न्यायवार्त्तिकारम्भे च ।

"यदक्षपादः प्रवरो मुनीनां
शमाय शास्त्रं जगतो जगाद ।" इति

इत्यनेनास्य गोतमस्य महर्षेः अक्षपाद इति नामान्तरं निष्पन्नं भवति ।

महाभारतटीकायां नेलकण्ठेनादौ ।

"कणभक्षमक्षचरणं जैमिनिकपिलौ पतञ्जलिं च नुमः ।" इति दर्शनात् अक्षचरण इत्यपि नामान्तरमेवेति ।

अनेन गोतमेन प्रणीतस्य न्यायशास्त्रस्य सर्वविद्योत्तमत्वं प्रतिपादयन्ति स्म श्रुतिस्मृतिपुराणेषु ।

तथाहि "न्यायो मीमांसा धर्मशास्त्राणीति श्रुतिः । "

---

(१) "नैयायिकस्त्वक्षपाद" इत्यमरः । (भट्टकीलहार्णनिदेशेन मुद्रिते-ऽमरकोशे १६७ पृष्ठे) नैयायिकः अक्षपादः वे प्रमाणप्रमेयसंशयेत्यादिषोडशपदार्थवादिनो गोतमस्ये"ति तद्व्याख्यातारः । अक्षं नेत्रं दर्शनसाधनतया जातः पादेस्येति तदर्थः ।

कदाचिद्वेदव्यासापरनामधेयः कृष्णद्वैपायनमहर्षिर्गोतमेन सङ्गतः इदमूचे यदनेन जीवब्रह्मणोर्भेदस्तर्केण प्रतिपादित इत्यस्य मुखं नावलोकयिष्यामीति तावदेव गोतमेन महर्षिणा व्यासस्यावलोकनार्थं पादः प्रसारित इति पादे चक्षुः सञ्जातं ततश्च व्यासो गोतममक्षपादनाम्ना स्तुतवानिति पौराणिकीं कथां कथयन्ति वृद्धाः । इमामेव कथां भङ्ग्यन्तरेण समुद्धृत्य वाचस्पत्ये बृहदभिधानेऽक्षपादशब्दे शब्दार्थसमन्वयः कृत इति ।

मनुः ।

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥"(१) इति ।

याज्ञवल्क्योऽपि ।

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"(२) इति ।

विष्णुपुराणे च ।

"अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु ॥"(३) इति ।

अत्र कर्मोपासनाज्ञानात्मकरत्नत्रयप्रतिपादकत्वाद् वेदानां काण्डत्रयात्मकत्वान्मीमांसापि कर्ममीमांसा भक्तिमीमांसा ब्रह्ममीमांसा चेति त्रिविधैव मीमांसापदेन ग्राह्या । परमात्मजीवात्मनोर्भेदस्य सिद्धान्तत्वेन प्रतिपादकत्वाद्वैशेषिकसांख्ययोगानां न्यायविस्तरपदेन न्याये ऽन्तर्भाव इति प्राधान्येन न्यायपदोपादानम् ।

---

(१) इदं वचनं तु "वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेतीति" रघुवंशस्यपञ्चमसर्गस्यश्लोकव्याख्याने मनुनाम्ना समुद्धृतम् ।

(२) याज्ञवल्क्यस्मृतौ १अध्याये ३ श्लोकः । अत्र पुराणतर्कमीमांसेति पाठं पठन्ति केचित् अनेनापि पाठेन तर्कपदेन न्यायस्यैव ग्रहणम् ।

(३) विष्णुपुराणे ३ अंशे ६ अध्याये । एवं वायुपुराणे पूर्वार्द्धे ६१ अध्याये श्लो. ७८ । ७९ ।

यद्यपि सांख्ये परमात्मनिरूपणं नास्ति तथापि "एकं सांख्यं च योगं च यः पश्यति स पश्यति" इति वचनप्रामाण्यात् सांख्य-योगयोरेकवाक्यतया सांख्यस्यापि ग्रहणम्[१] ।

अत एव मनुरपि । १२ अध्याये १०६ श्लो० ।

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥" इति ।

इदमेव मनुवचन[२]मुद्गाव्य तार्किकरत्ना-

---

(१) जरन्नैयायिकजयन्तस्तु न्यायमञ्जर्यां प्रारम्भे एव । "न्यायविस्तर-ग्रन्थेनैतदेव शास्त्रमुच्यते । न्यायस्तर्कोऽनुमानं सोऽस्मिन्नेव व्युत्पाद्यते । यतः सांख्यार्हतानां तावत्प्रपञ्चकानां कीदृशमनुमानोपदेशकौशलं कियदेव तत्तर्केण वेदप्रामाण्यं रक्ष्यते इति नासाविह गणनार्हः इति ।"

(२) अत्र मनुवचनं नैकदेशीयत्वेन ग्राह्यम् । मेधातिथिप्रभृति-भाष्यकारैर्मन्वर्थमुक्तावलीकारैः कुल्लूकभट्टैरपि "मनुर्वै यत्किञ्चावदत् तद्भेषजमिति ।

ऋचो यजूंषि सामानि मन्त्रा आथर्वणाश्च ये ।
सन्नर्षिभिस्तु यत् प्रोक्तं तत्सर्वं मनुरब्रवीत् ॥" इत्याद्युक्तम् ॥

मनोः प्राधान्ये मन्वर्थमुक्तावल्युद्धृतछान्दोग्यब्राह्मणे "मनुर्वै यत्किञ्चिद-वदत् तद्भेषजं भेषजताया इति ।" एवं छान्दोग्योपनिषदि ८ प्रपाठके १५ खण्डे "तद्धैतद्ब्रह्मा प्रजापतये उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदि"त्यादिदर्शनान्मनोः प्रशंसा वेदेऽपि वर्तत इति विज्ञेयम् ।

बृहस्पतिनाप्युक्तम् ।

र्थां[१] तर्कस्य सर्वप्रमाणानुग्राहकत्वं प्रसाधितम्। एतस्मादपि तर्कनिरूपकन्यायशास्त्रस्य ग्रहणं सम्भवति। अत्र तर्कशब्देन गोतमप्रणीताया आन्वीक्षिक्या एव ग्रहणम्। "आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयो"रित्यमरकोशात्। अत एव सर्वलिङ्ग-संन्यासग्रन्थे "नैषा तर्केण मतिरापनेयेति कठोपनिषद" "स्तर्कादि-शास्त्रपठनं वर्जयेच्छ्रुतिग्रामना"दित्यादिर्वेदान्तिकार्थः सङ्गच्छत-इति। न्यायदर्शनवात्स्यायनभाष्ये १ सूत्रव्याख्याने।

"सेयमान्वीक्षिकी विद्या
प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता॥"[२] इति।

जयन्तोऽपि न्यायमञ्जर्याख्यायां न्यायसूत्रवृत्तौ प्रथमसूत्रावः-

---

"वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते॥
तावच्छास्त्राणि शोभन्ते तर्कव्याकरणानि च।
धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृश्यते॥"

वचनमिदं कुल्लूकभट्टेन मनुटीकायां समुद्धृतं किन्तूपलभ्यमानायां मुद्रितायां बृहस्पतिस्मृतौ नोपलभ्यते उपलभ्यते च वृद्धबृहस्पतिस्मृतौ ग्रन्थोऽयं ३२०० श्लोकात्मको वर्तते इति श्रुतं मया श्रीगुरुचरणेभ्यः।

(१) तार्किकरक्षायां दिघसिङ्गतजर्नलमुद्रिते पुस्तके १९५ पृष्ठेऽवलोक्यम्।

(२) अस्यार्थो न्यायवार्त्तिक-न्यायवार्त्तिकतात्पर्यटीका-न्यायवार्त्तिक-तात्पर्यपरिशुद्ध्यादौ बहुविस्तरेण श्रुतिस्मृतिपुराणप्रामाण्येन न्यायस्य सर्वविद्योत्तमत्वं व्यवस्थाप्य प्रपञ्चितोऽतो विस्तरभिया न निरूपितोऽस्माभिरिति।

तरणिकायाम् । "इयमेवान्वीक्षिकी चतसृणां विद्यानां मध्ये न्याय-विद्या गण्यते आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वतीति। प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षाऽनुमानमित्यर्थः । तद्यु-त्पादकं शास्त्रमान्वीक्षिकम् । ननु चतस्रश्चेद् विद्याः कथं चतुर्दश दर्शिताः" इत्युपक्रम्य "नन्वक्षपादात्पूर्वं कुतो वेदप्रामाण्यनिश्चय आसीत् । अत्यल्पमिदमुच्यते। जैमिनेः पूर्वं केन वेदार्थो व्याख्यातः पाणिनेः पूर्वं केन पदानि व्युत्पादितानि । पिङ्गलात्पूर्वं केन छन्दांसि रचितानि । आदिसर्गात्प्रभृति वेदवदिमाः विद्याः प्रवृत्ताः । संक्षेपविस्तरविवक्षया तु तांस्तांस्तत्तत्र कर्तृनाचक्षते" इत्यन्तेनामुमर्थं निपुणतरमुपपादितवान् ।

अत एव गङ्गेशोपाध्याया अपि तत्त्वचिन्तामणौ

"अथ जगदेव दुःखपङ्कमग्नमुद्धिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हित-तमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाये"त्याद्युक्तवन्तः ।

विश्वनाथन्यायपञ्चाननास्तु न्यायसूत्रवृत्तौ प्रथमसूत्रव्याख्याने "श्रवणादनु पश्चादीक्षा अन्वीक्षा उन्नयनं तन्निर्वाहिका सेयमान्वी-क्षिकी न्याय[१]तर्कादिशब्दैरपि व्यवह्रियते तथा च न्यायो

(१) न्यायदर्शनवात्स्यायनभाष्ये प्रमाणप्रमेयेत्यादिप्रथमसूत्रव्याख्याने "कः पुनरयं न्यायः । प्रमाणैरर्थपरीक्षणं न्यायः । प्रत्यक्षागमाश्रितमनु-मानं सान्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम् ।" अत्र तात्पर्यटीका "पञ्चरूप-श्चतूरूपो वा हेतुर्न्यायः । प्रतिज्ञाद्यवयवसमूहो वा न्यायः । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्याय इति ।"

निर्णीयतेऽनेनेति न्याय इति व्युत्पत्त्या न्यायशब्दो वैदिकपदार्थनिर्णा-

मीमांसा धर्मशास्त्राणीति श्रुतिः। पुराणन्यायमीमांसेत्यादि-स्मृतिः। मीमांसा न्यायतर्कश्च उपाङ्गः(१) परिकीर्तित इति पुराणम्।

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥ इति मनुः(२)।

तथा। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर इत्यादि(३)।

यकेऽधिकरणभेदे प्रयुज्यते अत एव जैमिनीयन्यायमालाविस्तरे माधवाचार्याः "सर्वे न्यायाः समर्थिता भवन्तीति।" क्वचिद्धर्मशास्त्रेऽपि न्यायशास्त्रत्वेन प्रयुज्यते। काकतालीयन्यायादौ आभाणके न्यायशब्दप्रयोगस्तु पारिभाषिकस्ते च न्याया लौकिकन्यायसंग्रहग्रन्थे ३३४ संख्यकाः पण्डित-श्रीरामदयालुशिष्यश्रीरघुनाथेन संगृहीताः।

(१) वेदाङ्गानि अथर्ववेदीयमुण्डकोपनिषदि १ मुण्डके "द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति॥"

पाणिनीयशिक्षादौ च वेदाङ्गानां निरूपणं यथा

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्यौतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्॥
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥"

वेदाङ्गोपाङ्गभेदाः शिक्षाकल्पव्याकरणभेदादयश्चतुर्वेदपरिशिष्टसंग्रह-भूमिकायां जैनेन्द्रव्याकरणभूमिकायां च निरूपयिष्यन्तेऽस्माभिः।

(२) मनुस्मृतौ ७ अध्याये श्लो० ४३। विस्तरस्तु मेधातिथि भाष्यादौ द्रष्टव्यः।

(३) मनुस्मृतौ १२ अध्याये श्लो० १०६।

मोक्षधर्मे भारते ।

तत्रोपनिषदं तात परिशेषं तु पार्थिव ।
मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम् ॥

इत्युपनिषदर्थस्यान्वीक्ष्यनुसारी ग्राह्य" इत्याद्युक्तवन्तः ।

देवीपुराणेऽपि ४५ अध्याये ।

"आत्मवेदनशीलत्वादन्वीक्षणपरायणा ।
अन्वीक्षाकरणत्वाद्वा तस्मादान्वीक्षिकी स्मृता ॥" इति ।

कामन्दकोऽपि ।

"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।
विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः ॥
आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अर्थानर्थौ च वार्तायां दण्डनीतौ नयानयौ ॥" इति ।

इमामेवान्वीक्षिकीं विद्यामध्यात्मविद्यात्वेन दत्तात्रेयः अलर्काय प्रह्लादादिभ्य उक्तवानिति श्रीमद्भागवते महापुराणे १ स्कन्धे ३ अध्याये १० । ११ श्लोके प्रतिपादितं यथा

"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥
षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥" इति ।

अत्र टीकाकाराः, तत्र श्रीधरस्वामी आन्वीक्षिकीमात्मविद्याम् । राधारमणदासगोस्वामी अन्वीक्ष्यते आत्मा इत्यन्वीक्षा तामधिकृत्य ताम् । वीरराघवः आन्वीक्षिकीमध्यात्मविद्याम् । विजयध्वजः

आन्वीक्षिकीं तत्त्वविद्याम्। वल्लभाचार्यः आन्वीक्षिकीं योगपुरः-सरामात्मविद्याम्। विश्वनाथचक्रवर्त्ती आन्वीक्षिकीमात्मविद्याम्। शुकदेवः आन्वीक्षिकीमध्यात्मविद्याम्।

एतेन न्यायभिन्ना आन्वीक्षिकी इति न प्रतीयते। अत एव "आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयो"रित्यमरकोशेऽपि सिद्धान्तितः।

"नैयायिकानां मुख्येन वरुणस्यात्मजेन च।
पराजितो यत्र वन्दी विवादेन महात्मना॥"

इति महाभारतेऽपि तृतीयो नैयायिकः मङ्क्षच्छते अन्यथान्वीक्षिकीचिन्तयापत्तेः। अयमेवार्थो न्यायनिन्दाप्रशंसा-समन्वये ऽग्रे विस्तरेण प्रपञ्चयिष्यते।

तत्र उपनिषदर्थश्च आन्वीक्षिक्यनुसारी ग्राह्य इत्यत्र "तत्रोप-निषदं तात परिशेषं तु पार्थिवेत्यादि"महाभारतीयमोक्षधर्मं प्रमाणयन्ति स्म विश्वनाथन्यायपञ्चाननादयः परं समन्वयं तु न प्रदर्शितवन्त इति समन्वयः प्रदर्श्यते।

महर्षिणा गोतमेन आन्वीक्षिकीत्यपरनामधेये न्यायशास्त्रे प्रमाणादिपदार्थनिर्वचनरूपाणि सूत्राणि[१] रचितानि उपनि-

(१) परागरोपपुराणे १८ अध्याये।

"स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥" इति।

अस्मन्निकटे वर्तमाने एकस्मिन् प्राचीने व्याकरणमहाभाष्यपुस्तके केनचित् पण्डितेन समुद्धृतम्।

षत्स्वपि तत्तत्रोपदेशप्रसङ्गेन स्वभावोक्त्या भङ्ग्यन्तरेण वा तत्तत्पदार्थज्ञापनपराणि वाक्यान्युपलभ्यन्ते इति उपनिषद्वाक्याभिप्रायकाण्येव सूचाणीति विज्ञायते।

तथाहि। प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। इति न्यायसूत्रम्।

प्रमाणम्—मौक्ष्म्यत्वादेतत् प्रमाणम्—न विना प्रमाणेन प्रमेयस्योपलब्धिः। मैत्र्युपनिषदि ६। १४, प्रमाणैरेतैरवगतः। नृसिंहोत्तरतापन्याम् ९, प्रमाणाप्रमाणसाधारणा। सर्वोपनिषत्सारे, किं द्रव्यं किं स्थानं कति प्रमाणम्। कालाग्निरुद्रोपनिषदि १, उपनिषदः प्रमाणम्। मुक्तिकोपनिषदि २॥

प्रत्यक्षम्—अनो ह वै नाम प्रत्यक्षम्। छान्दोग्ये ५। २। १, त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। तैत्तिरीयके। १। १। १॥

अनुमा वा अनुमानम्—बहिरात्मका गत्यान्तरात्मनोऽनुमीयते

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
सूत्रस्य लक्षणं चैतत् सहेतु अनुमापकम्॥" इति।

भामत्यां श्रीवाचस्पतिमिश्राश्च।

"लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥" इति।

केचित्तु "बह्वर्थसूचनात् सूत्र"मित्याहुः।

गतिः—अन्तरात्मक्या गत्या बहिरात्मनोऽनुमीयते गतिः । मैत्र्युपनिषदि ६ । १ ।

उपमा वा उपमानम्—सप्तविधेयं तस्योपमा । मैत्र्युपनिषदि ६ । २२ ।

शब्दः—प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वाञ्छब्दानाप्नोति । कौषीतकिब्राह्मणोप. । ३ । ६ । उपनिषदः प्रमाणम् । मुक्तिकोपनिषदि २ ॥

प्रमेयम्—प्रमेयोऽपि प्रमाणतां पृथक्त्वादुपैति । मैत्र्युपनिषदि ६ । १४ ।

आत्मा—कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा रूपं पश्यति येन वा शब्दं शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति । ऐतरेयोपनिषदि ३ अध्याये ।

आत्मानꣳ रथिनं विद्धि शरीरꣳ रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयाꣳस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

कठोप. १ अध्या० । ३ वल्ल्याम् ।

महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।

कठोप . ४ वल्ल्याम् ।

अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा। बृहदारण्यके ४। ५। १४।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यः। बृहदारण्य. २।४।५,

(आत्मगुणाः)—दृच्छयाप्नोति कैवल्यम्। अमृतबिन्दु. २९, विदेहमुक्ताविच्छा चेत्। मुक्तिकोपनिषदि १। २९, द्वेषस्त्राणूरमल्लोऽयम्। क्षुरिकोप. १५, तत्प्रयत्नेन शोधयेत्, मैत्र्युपनि. ६। ३४, तत्पुरुषप्रयत्नसाध्यम्। मुक्तिकोप. २, पौरुषेण प्रयत्नेन। मुक्तिकोप. २। ६, अन्वेष्टव्यं प्रयत्नेन। मुक्तिकोप. ६३।

यदा वै सुखं लभते ऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञासे। छान्दोग्ये। ७। २२। १, तेषां सुखं शाश्वतं नेतरेषाम्। कठो. ५। १२, इतरे दुःखमेवापि यन्ति। बृहदारण्यके ४। ४। १४, श्वेताश्वत. ३। १०। दुःखस्यान्तं भविष्यति। श्वेताश्वत. ६। २०। ज्ञानमात्मनि महति नियच्छेत। कठोप. ३। १३। अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्। कैवल्य २४।

शरीरम्—केन सुखदुःखे इति शरीरेणेति। कौषीतकि. १। ७, प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति। कौषीतकि. २। ६। स्वे शरीरे यथाकामं परिवर्त्तते। बृहदारण्यके २। १। १८, अस्मिन् पञ्चात्मके शरीरे। गर्भोप. १।

इन्द्रियम्—भूतानीन्द्रियाणि। नृसिंहोत्तरता. ८। दशेन्द्रियाणि मनो. १। चक्षुरादीन्द्रियं स्वतः। मुक्ति. २। २२।

अर्थाः—शब्दस्पर्शादयो ह्यर्थाः। मैत्र्युप. ४। २।

बुद्धिः—संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति। ऐतरेयोप. ३ अध्याये, बुद्धिर्धृतिः स्मृतिः प्रज्ञानम्। मैत्र्युप. ६। ३१।

मनः—दशेन्द्रियाणि मन एकादशम्। मण्डोप. १। इन्द्रियाणि मनसा सन्निवेश्य। श्वेताश्वत. २। ८। मनः सर्वेन्द्रियाणि च। मुण्डकोप. २। १। ३। इन्द्रियैर्मनसि सम्पद्यमानैः। प्रश्नोप. ३। ६।

प्रेत्यभावः—अञ्जसा प्रेत्य सम्भवः। बृहदारण्यके ३। ९। २८।

फलम्—रतिमात्रं फलमस्याः। मैत्र्युप. ७। ८।

दुःखम्—दुःखे नोद्वेगः। परमहंसोप. ३।, कर्तृत्वादिदुःखनिवृत्तिद्वारा। मुक्ति. २।

अपवर्गः—स्वर्गस्वर्गापवर्गहेतुः। मैत्र्युप. ६। ३०, अध्यवसायस्य दोषक्षयाद्धि मोक्षः। मैत्र्युप. ६। ३०, बद्धोऽतस्तद्विपरीतो मुक्तः। मैत्र्युप. ६। ३०, तन्निवृत्तिर्मोक्षः। सर्वोपनिषत्सारे १। मोक्षः स्यादासनाक्षयः। मुक्तिकोप. २। ६८।

अनयैव दिशा संशयादयोऽपि पदार्थास्तत्रतत्रोक्ता वेदितव्या विस्तरभयादिहोपरम्यते।

एवमुपनिषत्सु तत्रतत्र तर्क-चिकित्सित-योग-वेदान्त-मीमांसा-ऋग्यजुःसामाथर्ववेदेतिहासपुराणादिविद्यानां नामानि तत्प्रतिपाद्यविषयाश्च वर्तन्त इत्यवगन्तव्यम् ।

अत एव "आदिसर्गात् प्रभृति वेदवदिमा विद्या" इत्यादि २९ पृष्ठोक्तजयन्तलेखोऽपि सङ्गच्छतइति ।

तच्च न्यायशास्त्रं[१] पञ्चाध्याय्यात्मकं तथा च न्यायवार्त्तिके आरम्भे "शास्त्रं पुनः प्रमाणादिवाचकपदसमूहो व्यूहविशिष्टः पदं पुनर्वर्णसमूहः पदसमूहः सूत्रम् सूत्रसमूहः प्रकरणम् प्रकरणसमूह आह्निकम् आह्निकसमूहोऽध्यायः पञ्चाध्यायी शास्त्रम्" इति ।

तत्र प्रथमाध्यायान्ते ।

"तत्त्वप्रतिज्ञा संसारस्तन्निवृत्तिश्च संविदा ।
उद्देशो लक्षणं चैव तत्त्वानामिह कीर्तितम् ॥"

द्वितीयाध्यायान्ते ।

"संशयस्य प्रमाणानां विचारस्तद्व्यवस्थितिः ।
शब्दस्य तत्त्वप्रामाण्यं पदार्थाश्चेह कीर्तिताः ॥"

तृतीयाध्यायान्ते ।

---

(१) केचित्तु वात्स्यायनभाष्ये आत्मशरीरेन्द्रियार्थेत्यादिप्रमेयसूत्रव्याख्याने "अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयम् । तद्भेदेन चापरिसंख्येयम् । अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात्संसार इति ।" अपि च वैशेषिकशास्त्रे त्रय एव हेत्वाभासाः संक्षेपेण निरूपितास्त एव विस्तरेण पञ्च न्यायशास्त्रे निरूपिता इत्यादिना बलवतीं युक्तिं प्रदर्श्य न्यायापेक्षया वैशेषिकस्य प्राथम्यं निरूपयन्ति । तदसत् मुक्तावलीप्रकाशादौ प्रमाणादिषोडशपदार्थानां न्यायोक्तानां वैशेषिकोक्त-

"आत्मा शरीरं करणमर्थो बुद्धिर्मनस्तथा ।
यद्यथा वस्तु तत्त्वेन तत्तथेहोपपादितम् ॥"

चतुर्थाध्यायान्ते ।

"प्रवृत्तिदोषसम्बन्धः प्रेत्यभावः प्रपञ्चितः ।
फलं दुःखं विमुक्तिश्च चतुर्थे परिकीर्तितः ॥"

पञ्चमाध्यायान्ते ।

"जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥"

इत्येवमाकारेण शास्त्रार्थसंग्रहे कृतेऽपि[१] इदानीं न्यायसूत्रपाठनिर्णये बहवो मतभेदा दृश्यन्ते । तत्र तावत् सूत्रपाठपुस्तकं द्विविधमुपलभ्यते प्राचीनं भाष्यकारसम्मतपाठानुसारि नवीनं च विश्वनाथन्यायपञ्चाननकृतवृत्त्यनुसारि । किन्त्वेकं पुरातनं प्रायःशुद्धं पुण्यग्रामे (पूनानगरे) लिखितं नैयायिकैः प्रामाणिकत्वेनावधृतं वात्स्यायनीयन्यायभाष्यपुस्तकमस्मन्निकटे वर्तते तत्र सर्वत्र सूत्रभाष्ययोर्मध्ये विरामचिह्नाभावात् सूत्राचराणां नवीनपुस्तकवत् गैरिकादिना रञ्जितत्वाभावात् क्वचिच्च भाष्यकारेणापि अवतरण-

---

द्रव्यादिसप्तपदार्थेष्वन्तर्भावनिरूपणात् । संक्षेपस्यैव पूर्वकालावस्थायित्वे "पदार्थो द्विविधो भावोऽभावश्च भावः षड्विधः अभावश्चतुर्विध" इति निरूपणात् जगदीशभट्टाचार्यकृततर्कामृत-कोण्डभट्टकृतपदार्थप्रदीपिकादीनां सर्वापेक्षया प्राथम्यापत्तेश्च ।

(१) न्यायोक्तानां पदार्थानां संक्षेपेण निरूपणं न्यायसिद्धान्तनिरूपणं च सर्वदर्शनसंग्रहादौ श्रीमाधवाचार्यादिभिः कृतमेवेति पिष्टपेषणभिया न प्रदर्शितमस्माभिः ।

व्याख्यानयोर्मध्ये सूत्राणां मिश्रणात्(१) क्वचिच्च स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वात् सूत्रकारेण यत्रयत्र ग्रन्थसङ्कोचः कृतस्तत्रतत्र वैगद्यार्थं भाष्यकारेण सूत्रत्वेनावभास्यमानानि बहूनि वाक्यानि रचितानि तान्यपि "स्वपदानि च वर्णन्ते भाष्यं भाष्यविदो विद"रिति भाष्यलक्षणसमन्वयिना तेन व्याख्यातानीति(२) भाष्यग्रन्थेन सूत्रपाठनिर्णयो दुरधिगम एव।

सूत्राणां लघुत्वात् स्वल्पाक्षरत्वात् सर्वतः सारभूतत्वात् भाष्यसंवलितानामेव तेषां पठनपाठनयोः प्रचारश्चिरन्तनः। कुतार्किकैश्च कुहेतूत्थापनादिना स च प्रचारो लुप्ततां नीत इति एतावन्मात्रं सूत्रमेतावन्मात्रं भाष्यमिति निर्णयो न्यायवार्त्तिककारसमयेऽपि दुरधिगम एवासीत् अत एव वार्त्तिककारोऽपि "अन्ये तु साधर्म्यात् तद्धर्मभावित्वं दृष्टान्तस्येति सूत्रं पठन्ति" इत्याद्युक्तवान्(३) किन्तु महर्षिणाक्षपादेन प्रणीतस्य निःश्रेयसहेतुभूतस्य शास्त्रस्य कुतार्किकाज्ञानान्धकारतिरोहितस्य प्रकाशनार्थं महाप्रदीपप्रज्वलने प्रवृत्तेन वार्त्तिककारेण प्रायो बहूनि सूत्राणि नीर्णीतानीति तत्रतत्र वार्त्तिकदर्शनादवगतं भवति।

अथ वार्त्तिककारकृतसूत्रनिर्णयोऽपि मन्देभ्यो नालं भविष्यतीति षड्दर्शनटीकाकार आचार्यवाचस्पतिमिश्रो न्यायवार्त्तिकतात्पर्यटीकायां सूत्रपाठनिर्णयं यत्र तत्र कृत्वापि साकल्येन

(१) १ अ० १ आ० २८ सर्वतन्त्रसिद्धान्तसूत्रव्याख्याने द्रष्टव्यम्।

(२) १ अ० १ आ० तदत्यन्तविमोक्षोऽपवर्गइति २२ सूत्रव्याख्याने द्रष्टव्यम्।

(३) मुद्रितवार्त्तिकपुस्तके पृ० १३८ पं० ७ द्रष्टव्यम्।

तद्दार्ढ्यार्थं न्यायसूचीनिबन्धाख्यं[१] न्यायदर्शनमारार्थबोधकं ग्रन्थं

(१) एतदनुसारेणैव विश्वनाथन्यायपञ्चाननैरपि न्यायसूत्रवृत्तौ तत्तन्नाम्ना ८४ प्रकरणानि विभक्तानि किन्तु मुद्रितस्य तत्सूत्रवृत्ति-पुस्तकस्यानवस्थितत्वात् परिशुद्धे पुस्तके तत्सर्वं द्रष्टव्यम् ।

निबन्धोऽयं न्यायवार्त्तिके द्वितीयखण्डेऽन्ते मुद्रितः । अस्माभिः समालोचितं न्यायसूचीनिबन्धे पदसंख्यायामक्षरसंख्यायां च लेखगणनावैषम्यं वर्तत इति । तच्च लेखकप्रबोधकप्रमादाज्जातमिति बोध्यम् ।

केचित्तु अस्य न्यायसूचीनिबन्धस्य न्यायवार्त्तिकतात्पर्यटीकायां क्वचिद् विसंवाददर्शनाद्विभिन्नकर्तृकत्वं वदन्ति । तदसत् न्यायवार्त्तिकटीकायामेव १ सूत्रव्याख्याने पृ. २ "तदिदमभिधेयसम्बन्धप्रयोजनप्रतिपादनार्थकत्वं प्रथमसूत्रस्येत्युक्तम्" पृ. ४८ "तदेवं प्रथमसूत्रेण शास्त्रस्याभिधेयप्रयोजन-सम्बन्धान् दर्शयता पदार्थाः प्रमाणादय उद्दिष्टा" इति वैषम्यदर्शनात् पूर्वपरग्रन्थयोर्विभिन्नकर्तृकत्वापत्तेः ।

आनिधुकास्तु नैतादृशो निबन्धः केनापि प्रामाणिकेनाचार्येण कस्मिंश्चिदपि शास्त्रे निर्मित इति केनचिद्धूर्त्तेनास्य सूत्रनिर्माणकस्य ग्रन्थस्योपलब्धेः प्रदर्शनेन कीर्त्तिलाभेच्छया कल्पितोऽयमित्युद्घोषयन्ति । तदत्यन्तदरिद्राधितमनोरथम् यतः ऋग्वेदीयशाकल्यसंहिताया मण्डलाध्यायसूक्तमन्त्रादीनां संख्या वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तमाने देवीपुराणे २१४ पत्रे निरूपितास्ति । अपरोऽपि तन्निरूपकोऽनुवाकानुक्रमनामा ऋग्वेदीयग्रन्थो वर्तते । यत्राध्याय-मण्डल-वर्ग-सूक्त-ऋक्-पदाक्षराणां संख्यैव प्रकाशिता । यथा

"अध्यायानां चतुःषष्ट्युत्तरमण्डलानि दशैव १० तु ।
वर्गाणां तु सहस्रे द्वे संख्याते च षडुत्तरे २००६ ॥
सहस्रमेतत्सूक्तानां निश्चितं खैलिकैर्विना ।
दश सप्त च पठ्यन्ते संख्यातं वै पदक्रमम् १०१७ (?) ॥
एकर्चं एकवर्गः स्यादेकश्च नवकस्तथा ।

द्वौ वर्गौ तु ह्यृचो ज्ञेयौ न्यूनं द्वयशतं स्मृतम् ॥
चतुष्कं शतमेकं च चत्वारः सप्ततिस्तथा ।
पञ्चकानां सहस्रं तु द्वे च सप्तोत्तरे शते ॥
त्रीणि शतानि षट्कानां चत्वारिंशत्षट् च वर्गकाः ।
शतमेकनविंशतिभिः सप्तकानामूनाषष्टिरष्टकानाम् ॥
ऋचां दश सहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिः पादश्च १०५८०। पारायणं संप्रकीर्तितम् ।
ऊर्द्धर्चानां सहस्राणामेकविंशतिकं तथा ।
शतद्वयं तु द्वात्रिंशत्पादं २१२३२। मुनिभिः पुरा ॥
शाकल्यदृष्टे पदलक्षमेकं
सार्द्धं च वेदे त्रिसहस्रयुक्तम् ।
शतानि चाष्टौ दशकं द्वयं च १५३८१२
पदानि चर्चां दश चर्चितानि ॥
एकं च शतसहस्रं च दश च सहस्राणि सप्त शतानि ।
चर्चापदानि ज्ञेयानि पदानि चान्यानि चत्वारि ॥
चत्वारि शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि ४३२००० ॥"

इति ।

एवं यजुर्वेद-सामवेद-अथर्ववेदीयसंहिताग्रन्थानां मन्त्रादिसंख्या वायुपुराणे पूर्वार्द्धे ५९ । ६० । ६१ अध्यायेषु निरूपिता ।

माधवाचार्येण पराशरमाधवाख्ये पराशरस्मृतिभाष्ये ५९२ स्मृतीनां संख्या कृता । यथा

"पराशरस्मृतावस्यां ग्रन्थसङ्ख्यानिर्विचिच्यते ।
द्वे काण्डे द्वादशाध्यायाः श्लोका अष्टोनषट्शतम् ॥"

एवं महाभारते आदिपर्वणि संपूर्णस्य महाभारतस्य पर्वान्तरपर्वाध्यायश्लोकानां संख्या कृता ।

तथा मार्कण्डेयपुराणान्तर्गतचण्डीसप्तशतीस्तोत्रस्य टीकायामन्ते नागेश-

रचितवान्। यत्र न केवलं न्यायदर्शनाध्यायाह्निकप्रकरणसूत्राणां संख्या निर्धारिता किन्तु पदानामक्षराणामपि संख्या निर्धारिता।

भट्टेन कात्यायनीयतन्त्रानुसारेण प्रत्येकाध्यायस्य प्रत्येकमन्त्राणामक्षराणां संख्यां प्रदर्श्य "अत्रायं गोप्यविधि"रित्यादिना संख्या लिखिता। यथा

मार्कण्डेय उवाच ५ वैश्य उवाच २ राजोवाच ४ ऋषिरुवाच २१ भगवानुवाच १ ब्रह्मोवाच १ देव्युवाच १२ देवा ऊचुः ३ दूत उवाच २ अर्द्धश्लोकाः ४० पादमन्त्राः २३ पादार्द्धमन्त्राः २२ सार्द्धपादार्द्धश्लोकमन्त्राः २२ श्लोकमन्त्राः ५३६ इत्थं सप्तशतमन्त्राः ७०० श्लोकसंख्या ५७८ ग्रन्थसंख्या ६०२ अक्षरसंख्या १९२७२।

अति च। महाभाष्यानुसारी पाणिनिसूत्रपाठो भिन्नः काशिकादिवृत्त्यनुसारी च भिन्न इति नागेशभट्टेनैव।

त्रीणि सूत्रसहस्राणि नव सूत्रशतानि च।
चतुष्षष्टि च सूत्राणि कृतवान् पाणिनिः स्वयम्॥

महाभाष्यानुसारिपाणिनिव्याकरणसूत्रसंख्यानिर्णयः कृत इति।

काशिकासम्मतस्त्वायं सूत्रपाठ इति प्रदर्श्य।

"त्रीणि सूत्रसहस्राणि तथा नव शतानि च।
चतुर्नवतिसूत्राणि पाणिनिः कृतवान् स्वयम्॥"

इत्युक्तम्। इदं पुस्तकद्वयमस्मन्निकटे वर्तते॥

एवं शारीरकमीमांसासूत्रपाठनिर्णयेऽपि

"सूत्रं तु पञ्चपञ्चाशदुत्तरं शतपञ्चकम्"।

५५५ सूत्राणि इति वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तमाने शारीरकसूत्रसारार्थचन्द्रिकापुस्तके निरूपितम्।

एवमुदयनाचार्या न्यायपरिशिष्टाख्यां[१] बोधसिद्धिर्बोधशुद्धिर्वेत्य-परनामधेयां न्यायसूत्रवृत्तिमेवं महानैयायिकश्रीगङ्गेशोपाध्याया-त्मजवर्द्धमानोपाध्याया अपि अन्वीक्षानयतत्त्वबोधाख्यां न्यायसूत्रवृत्तिं निर्मितवन्त[२] इति ।

अपरोऽपि वाचस्पतिमिश्रो न्यायतत्त्वालोकाख्यां न्यायसूत्रवृत्तिं रचितवान् तत्त्वचिन्तामणिप्रकाशाख्यां तत्त्वचिन्तामणिव्याख्यामपि, तेनैव

"श्रीवाचस्पतिमिश्रेण मिथिलेश्वरसूरिणा[३] ।
लिख्यते मुनिमूर्धन्यश्रीगोतममतं महत् ॥"

---

(१) अस्य ग्रन्थस्य खण्डितमेकं जीर्णं पुस्तकं ममान्तिके वर्तते । तट्टीकापि न्यायपरिशिष्टप्रकाशाख्या वर्द्धमानोपाध्यायकृता वर्तते ।

(२) सूत्रपाठनिर्णयार्थं तत्पदार्थनिरूपणार्थमेव वा उदयनाचार्य-वर्द्धमानोपाध्यायादिभिर्वृत्तिग्रन्थो रचितो नो चेत् तात्पर्यपरिशुद्धिग्रन्थेन तट्टीकया न्यायनिबन्धप्रकाशेन च सर्वांशस्य व्याख्यातत्वात् किमपरमवशिष्टं यदर्थं वृत्तिग्रन्थः पार्थक्येन रचित इति ।

(३) "श्रीभैरवेन्द्रधरणीपतिधर्मपत्नी
राजाधिराजपुरुषोत्तमदेवमाता ।
वाचस्पतिं निखिलतन्त्रविदं नियुज्य
द्वैते विनिर्णयविधिं विधिवत् तनोति" ॥

इति द्वैतनिर्णये ।

अस्य वाचस्पतिमिश्रस्य जीवनचरितमाचार्यवाचस्पतिजीवनचरितप्रक-रणे प्रपञ्चयिष्यते ।

दृत्यादिना न्यायसूत्रोद्धारनामा ग्रन्थो(१) रचितः किं तु तच्च सूत्रपाठ एव न त्वपरः कश्चिल्लेखः सूत्राणां निर्णायक इति ।

यत्तु स्कन्दपुराणीयकालिकाखण्डे १५—१८ अध्यायेषु वेदादि-विद्यानामितिहासो विस्तरेण निरूपितस्तत्रैव १७ अध्याये ।

आश्वलायननामासौ शौनकात् प्राप्य चाखिलम् ।
संगृह्यापि च वैतानं सूत्रं होतुर्विनिर्ममे ॥
आपस्तम्बो भरद्वाजः सत्याषाढो(२) महामुनिः ।
कात्यायनोऽथ वि—नास्तथा बोधायनो मुनिः ॥
तत्रैवाध्वर्युसूत्राणि निर्ममुर्यजुषां तथा ।
जैमिनिः सामसूत्राणि निर्ममे छन्दसां ततः ॥
सर्वेषां प्रत्ययेः कर्म यज्ञीयं समभूत् तदा ।
गोतमः स्वेन तर्केण खण्डयन् तत्रतत्र हि ॥
शप्तोऽथ मुनिभिस्तत्र शार्गालौ योनिमृच्छति ।
पुनश्चानुगृहीतोऽसौ श्रुतिसिद्धान्ततर्कतः ।
सर्वलोकोपकाराय तव शास्त्रं भविष्यति ॥ इत्युक्तम् ।

तत्तु शापानुग्रहाभ्यां समन्वयनीयम् ॥

प्राणतोषिणीतन्त्रे तु अष्टादशविद्यानिरूपणप्रस्तावे "गोतमेन तथा न्याय" मित्यादिवचनानि गन्धर्वतन्त्रनाम्ना समुद्धृत्य न्याय-निन्दाप्रशंसासमन्वयः कृतस्तथाहि "गन्धर्वतन्त्रे" ।

---

(१) अयं न्यायसूत्रोद्धारग्रन्थो विजयनगरसंस्कृतसीरीजमुद्रितेन न्यायभाष्येण साकं मुद्रितोऽस्ति ।

(२) सत्याषाढो हिरण्यकेश एव इति सम्प्रदायविदः ।

"गोतमप्रोक्तशास्त्रार्थनिरताः सर्व एव हि ।
शार्गालीं योनिमापन्नाः सन्दिग्धाः सर्वकर्मसु ॥

अत एव महाभारते मोक्षधर्मे काश्यपेन्द्रसंवादे ।

अहमासं पण्डितको हैतुको वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थकाम् ॥ इति प्रस्तुत्य
आक्रोष्टा चातिवक्ता च ब्रह्मयज्ञेषु वै द्विजान् ।
यस्येयं फलनिष्पत्तिः शृगालत्वं मम द्विज ॥

इति ब्राह्मणं प्रति शृगालवाक्यम् ।

नन्वा 'न्वीक्षिकी दण्डनीतिस्त्रयी चेदिवसुन्दरीति' कालीकुलसर्वस्वीयवचनेन आद्यानामसहस्रान्तर्गतत्वेनान्वीक्षिक्याः श्रीमद्दक्षिणकालिकास्वरूपाया अध्ययनरूपोपासनया यदि शृगालत्वं स्यात् तदा चतुर्वर्गफलं कुतो लब्धव्यमिति चेत् सत्यम् आन्वीक्षिक्यध्यात्मविद्येति ब्रूमः सा च दत्तात्रेयप्रणीता न गोतमोक्ता तथा च भागवते प्रथमस्कन्धे ।

'षष्ठेऽत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥' इति ।

अत्रिणा वृतः सन् तस्यापत्यत्वं प्राप्तः कथमित्याह अनसूयया मामेवापत्यं वृतवान् इति दोषदृष्टिमकुर्वन्नित्यर्थः । शेषं सुगमम् । "आन्वीक्षिकीमात्मविद्यामिति" श्रीधरस्वामिना व्याख्यातं न गोतमोक्तविद्या सा तु तर्काक्षेपत्वेन प्रसिद्धेति चेन्नैवम् तथात्वे आन्वीक्षिकीं तर्कविद्यामिति मोक्षधर्मश्लोके तर्कविद्येति विशेषणम् आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोरित्यमरसिंहोक्तं न

मङ्गच्छते तस्मात् तयोर्द्वयोरेवान्वीक्षिकीति नामधेयम्। अथ तर्ह्युक्तदोषस्तदवस्थ इति सत्यम् गन्धर्वतन्त्राभिप्रायमनालोच्य दोषमाशङ्कसे तथाहि निष्ठाया अतीतार्थाभिधायित्वाच्छार्गालीं योनिमापन्नाः प्राप्नाः शृगालयोनिकाः सर्व एव गोतमप्रोक्त-शास्त्रार्थनिरताः केवल तर्कशास्त्रनिपुणाः मन्तः सर्वकर्मसु मन्दिग्धा भवन्तीति वचनस्य निर्गलितार्थः। शास्त्रान्तरव्यावृत्तिस्तु निपातेन व्यज्यते। अत एव

'आम्नायार्थाविवादेन न्यायचिन्तां करोति यः।
तेन निःश्रेयसं प्राप्यं शार्गालीं योनिमन्यथा॥'

इति पठन्ति। मोक्षधर्मश्लोकार्थस्तु तर्कविद्यामान्वीक्षिकीमनु-रक्तोऽहं द्विजानाक्रोष्टातिवक्ता च यस्य ब्राह्मणं प्रत्याक्रोशस्य अति-वादस्य च फलनिष्पत्तिर्मम शृगालत्वमिति। युक्तं चैतद् वाचिक-पापस्य मनुना तथात्वस्य प्रतिपादितत्वात् तथा च मनुः

'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षितां याति मानसैरन्त्यजातिताम॥' इति।

मानसपापं तु न गृहस्थानामित्यग्रे वक्ष्यते। कलीतरपरं वा तथा च भागवते प्रथमस्कन्धे

'सानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्।
कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत्॥'

सारङ्गोभ्यनर इव सारग्राही सम्राड् राजा कलिं नानु-द्वेष्टीत्यन्वयः। कुशलानि पुण्यानि आशु सङ्कल्पेन सिद्ध्यन्ति फलन्ति। इतराणि पापानि नाशु सिध्यन्ति यतस्तानि कृतान्येव

सिद्ध्यन्ति न तु सङ्कल्पमात्रादित्यर्थः । सङ्कल्पः कर्म मानस-मित्यमरः यदि तु तर्कविद्यापाठेन गृहगालत्वमुच्यते तदा तु मोक्षधर्मस्याक्रोष्टेत्यादिश्लोकस्य वैयर्थ्यं स्यादिति सुधीभिर्विचार्य-मिति ॥" इत्यं च प्राणतोषिणीकृद्व्यवस्थाया आक्रोशस्य अति-वादस्य च फलं गृहगालत्वं न त्वाचीत्विक्यनुरागस्येति निष्कर्षः ॥

यत्तु सांख्यप्रवचनभाष्ये पराशरोपपुराणनाम्ना

"ऋचपादप्रणीते च काणादे सांख्ययोगयोः ।
त्याज्यः श्रुतिविरुद्धोंशः श्रुत्येकशरणैर्नृभिः ॥
जैमिनीये च वैयासे विरुद्धांशो न कश्चन ।
श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि तौ ॥"

इति वचनं समुद्धृतं तत्सर्वं पूर्वोक्तन्यायप्रशंसाप्रतिपादक-श्रुतिस्मृतिपुराणेतिहासादिविरुद्धत्वादेकदेशीयत्वादपपुराणोक्तत्वा-च्चोपेक्षणीयम् ।

तथाहि श्रुतिस्मृतिपुराणसदाचारबलाबलपरीक्षायाम् पूना-नगरस्थानन्दाश्रमयन्त्रमुद्रितगौतमप्रणीतधर्मसूत्रे २ पृष्ठे "अथ यत्र द्वे विरुद्धे तुल्यबले प्रमाणे उपनिपतनः, यथा "अतिरात्रे षोडशिनं गृह्णाति" "नातिरात्रे षोडशिनं गृह्णाति" "उदिते जुहोति" "अनुदिते जुहोति" इतिश्रुत्योर्विरोधः, तथा "नित्यमभोज्यं केश-कीटावपन्नम्" इति गौतमः "पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् । केशकीटावपन्नं च मृत्प्रक्षेपेण शुध्यति" इति मनुः । तत्र किं कर्त्तव्यम् तुल्यबलविरोधे विकल्पः । प्रकर्षबोधने तु श्रुतिस्मृति-विरोधे स्मृत्यर्थो नादरणीयः अतुल्यबलत्वात्, अत एव जाबालि-

राह "श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी । अविरोधे सदा कार्यं स्मार्त्तं वैदिकवत् सदा" ॥

आचारात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् ।
तेन दुष्टमिदं तेषां प्रामाण्यं विप्रलुप्यते ॥

अतोऽपि विशेषं जिज्ञासुभिः तत्त्ववार्त्तिकाद्याकरग्रन्थतोऽवसेयमिति ॥

यत्तु विश्वनाथन्यायपञ्चाननेन न्यायसूत्रवृत्तौ पृ. ५ पं. १७ "निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभिधानप्रयोजनं जानाति भगवान् अक्षपाद एव" इत्युक्तम् ।

शङ्कराचार्येण बृहदारण्यकोपनिषद्भाष्ये ४ अध्यायस्य २ ब्राह्मण व्याख्याने "अहोऽनुमानकौशलं दर्शितमपुच्छशृङ्गैस्तार्किकबलीवर्दैः" रिति ।

विज्ञानभिक्षुणा विज्ञानामृताख्ये ब्रह्ममीमांसाभाष्ये अद्वैतसिद्धान्तखण्डनप्रसङ्गे "आधुनिकास्तु" "प्रच्छन्नबौद्धास्तु" इत्यादिवाक्यैः शङ्कराचार्या एव परिगृहीताः ।

प्रशस्तपादभाष्यटीकायां न्यायकन्दल्यां तदलं प्रकोपितैः औचित्यवृद्धद्विजन्मभिरित्यादिवाक्यैर्जैमिनीया एव परिगृहीताः ।

तत्सर्वं प्रस्थानभेदेन औद्धत्येन वा कृतमेवं समन्वयनीयम् ॥

आधुनिकन्यायतत्त्वविदस्तु वदन्ति । एतानि न्यायदर्शनसूत्राणि खण्डितानि(१) पुरातनान्न्यायदर्शनाद् याथातथ्येनोपलब्धात् केनचित्

(१) विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तके सिद्धान्तलक्षणसूत्रटिप्पणां द्रष्टव्यम् ।

मसुद्धृतानि यतः परीक्षाप्रकरणे प्रमाणादीनां परीक्षां विहाय प्रथमतः संशयस्यैव परीक्षितत्वात् सकलपदार्थानां परीक्षाभावात् उद्देशक्रमपरीक्षाक्रमयोर्वैषम्याच्च । इदं वात्स्यायनीयं न्यायभाष्यमपि विहाय किमपि प्राचीनं न्यायभाष्यमासीत्[१] इदमुपलभ्यमानं वार्त्तिकमपि विहाय किमपि प्राचीनं वार्त्तिकमासीत्[२] हेत्वाभाससूत्रवार्त्तिके "वार्त्तिकं कुर्वाणेनोक्त" मित्याद्युक्तत्वात् ।

इदं सर्वं कुकल्पनामात्रं शास्त्रतात्पर्यानवबोधात् वाचस्पतिमिश्रोदयनाचार्यवर्द्धमानोपाध्यायादिभिरर्चितत्वाच्च ॥

अभिनवदार्शनिकास्तु वदन्ति "यस्मिन् समये ऋग्वेदादिसंहिताग्रन्थानां[३] मन्वादिस्मृतीनां वायुपुराणादिपुराणानां च प्रणयनं तस्मिन् समये मूर्खबङ्गले संसारेऽध्यात्मविद्याया अभावात् कोऽपि पुरुषस्तद्विद्याप्रणयने न समर्थ आसीदिति पञ्चभिः पुरुषै-

---

(१) विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तके सिद्धान्तलक्षणसूत्रटिप्पण्यां द्रष्टव्यम् ।

(२) विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तके भूमिकायां २ पृष्ठे "सूत्रनिर्माणभाष्यनिर्मितिकालमध्ये कश्चन वार्त्तिकं निर्ममौ यन्नाम साम्प्रतं नोपलभ्यते यथा पाणिनीयव्याकरणे सूत्रभाष्ययोरन्तरा कात्यायन इति तर्कयतां पाश्चात्यानां मतेन वार्त्तिकवचनानीत्यादि "

विंडिशमहाशयैरुक्त एवार्थः प्रसाधितः । "Ueber Das Nyáyabháshya", von Ernst Windisch, Leipzig.

(३) संहिताग्रन्थेषु पृथिव्यापस्तेजोवायूनामन्येषामपि स्तुतिपराणि वाक्यानि रचितानि तेषां समूहाः सूक्तानीत्युक्तानि भवन्ति तेषां समुदायः संहितापदवाच्य इति संहिताया अन्वर्थं नामेति तेषां सिद्धान्तः ।

रितस्ततः प्रकीर्णानि न्यायविद्यासम्बन्धीनि ५२८ लघुवाक्यानि कल्पितानि अत एव तान्यनवस्थितानि यतस्तृतीयाध्यायेषु आधुनिकतार्किककल्पितोद्देशलक्षणपरीक्षानुसारेण यथातथ्येन शास्त्रसमाप्तिः कृता पञ्चमाध्यायस्तु व्यर्थ एव ॥

एवं शारीरकमीमांसासूत्राणि १२००० नारदेन प्रणीतानि तद्भाष्यमपि ६०००० श्लोकात्मकं महर्षिणा वार्त्त्यायनेन(१) प्रणीतम्। उपलभ्यमानानि वेदव्यासकृतित्वेन प्रसिद्धानि शारीरकमीमांसासूत्राणि शाङ्करं तद्भाष्यमप्युपलभ्यमानं यमनराज्यप्राबल्यसमये सर्वगोपनार्थमद्वैतसिद्धान्तप्रचारार्थं केनचिन्महाधूर्तेन प्रणीतमिति ॥"

अत्र परीक्षकास्तत्त्वविदस्तु वदन्ति प्रमेयसिद्धिः प्रमाणाद्भवति अभिनवदार्शनिकैर्निरूपितेऽर्थे न किमपि प्रमाणं दर्शितं नापि बलवती युक्तिरभिहितेति तत्सर्वं खपुष्पगगविषाणनिरूपणायितमिति। तत्सिद्धान्तस्य परीक्षणेऽस्माकं वाक्यद्वयं स्फुरति।

"घटं भिन्द्यात् पटं छिन्द्यात् कृत्वा रासभरोहणम्।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ॥"

"सुखमस्तीति वक्तव्यं दशहस्ता हरितकी ॥" इति।

अपि च। प्रयागक्षेत्रे भूतपूर्वप्रदर्शिन्यामेकः सुदीर्घकायो लम्बग्रीवः सुपुष्टाङ्गो नातिवृद्धस्तिलकमालाधारी वैष्णवाभासः प्रदर्शनीयपुस्तकसंग्रहभवने मिलितो यच्चान्यच्चासुलभानि बहुमूल्यानि

(१) "वार्त्त्यायणि"रिति तु निरुक्तग्रन्थनाम्ना नागेशभट्टेन समुद्धृतं वैयाकरणसिद्धान्तमञ्जूषायाम्।

महाभारतादीनि पुस्तकानि स्थापितान्यासन् तेन महापुरुषेणोक्तम् "ममान्तिक एकमेवास्ति महत्पुस्तकम् यत्र भूतभविष्यद्वर्तमानानां समस्तजगतः पुस्तकानामन्तर्भावोऽस्ति यथा

वेदस्मृतिपुराणेषु तन्त्राङ्गोपाङ्गनीतिसु ।
कौमुदीनां सहस्राणि चन्द्रिकानां तथैव च ॥
कौस्तुभानां तु लक्षाणि दर्पणानां तथैव च ।
मनोरमाणां लक्षाणि प्रकाशानां तथैव च ॥
चिन्तामणीनामयुतं प्रदीपानां सहस्रकम् ।
लघुभाष्यमहाभाष्यटीकानां टिप्पणस्य च ॥
विवरणानां च विवृतेर्लघुवृत्तेश्च दीधितेः ।
सुबोधिनीदीपिकानां प्रयुतान्यर्बुदानि च ॥
मारास्तेषां संगृहीता ग्रन्थे मार्तण्डमण्डले ।
तिस्रः कोटयोर्द्धकोटिश्च ग्रन्था मार्तण्डमण्डले ॥" इत्यादि ।

अत्र परीक्षका वदन्ति । सर्वैरपि निबन्धकारैरनिबन्धकारैश्च विद्वद्भिरदृष्टत्वादनुद्धृतत्वादस्य ग्रन्थस्य महत्त्वस्य चासम्भवदोषेण दूषितत्वात् तच्छशविषाणायितमिति ॥

पाश्चात्यानुयायिनस्तु "तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः" (४ अ. २ आ. ४६ सू.) इति सूत्रव्याख्याने "योगशास्त्राच्चाध्यात्मविधिः प्रतिपत्तव्य" इति भाष्यकारेणोक्तत्वात् योगशास्त्रस्य पतञ्जलिप्रणीतत्वात् पतञ्जलेश्च खीष्टाब्दारम्भात् १४० वर्षेभ्यः पूर्वं तदासन्नसमये वा वर्तमानत्वात् तत्पश्चात्काले न्यायसूत्राणां निर्माणं जातमिति वदन्ति। तन्म-

न्दम्। पातञ्जले व्याकरणमहाभाष्ये(१) प्रथमाह्निक एव "सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या(२) बहुधा

(१) योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन ।
योपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

चरक एव पतञ्जलिरिति भावप्रकाशे आयुर्वेदोत्पत्तिप्रकरणे विस्तरेण निरूपितम् ।

(२) केचित्तु "रहस्यमुपनिषद् मन्वादिस्मृतयो वा" इति महाभाष्यप्रदीपोद्द्योते नागेशभट्टेनोक्तत्वादुपनिषदर्थप्रतिपादकत्वान्न्यायमीमांसाधर्मशास्त्राणां तत्र गतार्थत्वात् तेषामुपादानस्य पौनरुक्त्यमुद्भाव्य तत्पाठस्य प्रक्षिप्तत्वं कल्पयन्ति तथात्वेऽपि इतिहासः पुराणमिति पाठस्य मुद्रितामुद्रितसर्वसाधारणेषु महाभाष्यपुस्तकेषु वर्तमानत्वात् पुराणेषु च न्यायस्य निरूपणात् योगापेक्षया न्यायस्यातिपुराणत्वं दुर्वारमेव । यथा च पुराणेषु न्यायनिरूपणं तथा प्रतिपादितमधस्तात् ॥

यद्वा। छान्दोग्योपनिषदि ३ प्रपाठके १७ खण्डे "तद्धैतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्तोवाच" इति। श्रीकृष्णेन तु भगवद्गीतायाम् ५ अध्याये

"सांख्ययोगौ पृथक् बालाः प्रवदन्ति न पण्डिताः।"
"एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥" इति ।

४ अध्याये। "इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरैक्ष्वाकवे ऽब्रवीत् ॥ १ ॥
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ॥ ७ ॥"

अपि च श्वेताश्वतरोपनिषदि ६ अध्याये

"तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १३ ॥"

अत्रेदं न भ्रमितव्यं यत् तदानीं कापिलं सांख्यं नासीदेव ५ अध्याये ऽश्वेतोपनिषदि "ऋषिं प्रसूतं कपिलं यस्तमग्रे" इत्यादुक्तत्वात् । देवकीपुत्रेण श्रीकृष्णेन भगवद्गीतायां १० अध्याये

"सिद्धानां कपिलो मुनिः ॥ २६ ॥" इत्युक्तत्वाच्च ।

भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा वाकृच्यं नवधाऽथर्वणो वेदः वाको वाक्यमितिहासः पुराणम् न्यायो मीमांसा धर्मशास्त्राणि वैद्यकमित्येतावान् शब्दस्य प्रयोग-विषयः" इत्याद्युक्तत्वात् योगापेक्षया न्यायस्य प्राचीनत्वसिद्धेः ॥

एके निरूपयन्ति "खीष्टाब्दारम्भात् परं षष्ठशताब्द्यामन्ते सप्तमशताब्द्यामारम्भे वा बौद्धो दिङ्नागाचार्यः प्रादुरभूत् तन्मत-खण्डनात् न्यायवार्त्तिककार उद्योतकराचार्यो दिङ्नागादर्वाचीनः । वार्त्तिककारात् वर्षशतकात् पूर्वं भाष्यकारो वात्स्यायनः भाष्य-कारात् वर्षशतकात् पूर्वं वर्षशतद्वयाद्वा पूर्वं न्यायसूत्रप्रणेता गौतमः बुद्धोऽपि गौतमः जैनोऽपि गौतम आसीत् तन्नामभेदज्ञापनाय सूत्रकारस्य गौतमस्य गोतम इति नाम कल्पितम् । खीष्टाब्दा-रम्भात् परं द्वितीये वर्षशतके न्यायसूत्रकारोऽभूदिति परमार्थः ।

वैशेषिकशास्त्रप्रणेता काणादः स च काकमांसभक्षीति सम्भा-व्यते" इति ॥

केचिदवदन्ति "शतपथब्राह्मणाद्युक्तो गोतमः शाक्यसिंहो बुद्धो गौतमः इन्द्रभूतिर्जैनगौतमश्च एते खीष्टाब्दारम्भात् ६०० वर्षेभ्यः

अत्रान्वेषकंमन्याः स्वाभिप्रायसिद्धये छान्दोग्योपनिषदुक्ता देवकी भिन्ना तत्पुत्रः कृष्णोऽपि भिन्नः महाभारतभागवताद्युक्ता देवकी भिन्ना तत्पुत्रः कृष्णोऽपि भिन्नः सांख्यकर्ता कपिलो भिन्नः उपनिषदुक्तः कपिल-स्तदुक्तं सांख्यं च भिन्नमित्यादि प्रलपन्ति । तत्तुच्छहासास्पदम् तथोक्त-भिन्नत्वे तेषु तेषु ग्रन्थेषु देवकीकृष्णोक्त्या तदानन्त्यप्रसङ्गात् उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावात् तत्तुल्ययुक्त्या सूर्यचन्द्रादीनामपि प्रत्यहमुदयास्तत्वात् स्थानान्तरे दर्शनात् परिमाणन्यूनाधिक्यदर्शनादेषा-मप्यानन्त्यकल्पनापत्तेरित्यलं पल्लवितेन ॥

पूर्वं वर्त्तमाना एककालावस्थायिन आसन् परं गोतमेन तस्मिन समये न्यायसूत्राणि प्रणीतानि न वेति प्रणीतानि वा पञ्चाध्यायात्मकानि प्रणीतानि न वेति सन्देहः। मम तु मतं प्रथमाध्याय एव प्रणीतो द्वितीय-तृतीय-चतुर्थाध्यायाः येषु वैशेषिक-योग-मीमांसा-वेदान्त-बौद्धदर्शनानां समालोचनानि तेऽन्येन केनचिद्ग्रन्थकारेण भिन्ने समये रचिताः। एष्वध्यायेषु अनेकत्र लङ्कावतारसूत्रेभ्यो नागार्जुनकृतमाध्यमिकसूत्रेभ्य आर्यदेवकृतशतकाच्च शब्दतो विषयाः समुद्धृताः। एते च ग्रन्थाः खीष्टाब्दारम्भसमयनिकटवर्तिन" इति। गोतमप्रणीतमुपलभ्यमानं पञ्चाध्यायात्मकं न्यायशास्त्रं बुद्धसमयात् पूर्वं नासीदेव पञ्चमाध्यायस्तु व्यर्थ एवेति तेषां हृदयम्॥

अन्ये तु "उपलभ्यमानन्यायसूत्राणामतिसावधानतया पाठेन समालोचनेन च निष्पन्नं भवति तावद् योगवेदान्तादिशास्त्रनिरूपितविषयोपनिपातात् जैनवचनप्रामाण्याभ्युपगमात् प्रमेयेषु सुखस्य परिगणनात् अत्र च न्यायशास्त्रे प्रमेयेषु तदभावात् जातिनिरूपणे प्रथमाध्यायपञ्चमाध्याययोर्विरोधाच्च महान् विप्लवो जातः। अपि च द्वितीय-तृतीय-चतुर्थाध्यायेषु षोडशपदार्थानां परीक्षाया अभावात् नेदं पूर्णं शास्त्रमिति। अन्यच्च हिन्दूशास्त्रेषु न्यायशास्त्रस्य निन्दाया दर्शनात् बौद्धशास्त्रेण संश्लिष्टमिदं शास्त्रं जातम्। यत्तु खीष्टाब्दारम्भसमयात् २०० वर्षेभ्यः परं वर्त्तमानाद्वात्स्यायनात् प्रभृति इदानींतनपर्यन्तैष्टीकाकारैः स्वव्याख्यानेन समाहितं संयोजितं तेऽपि नापारयंस्तत्त्वतो व्यवस्थापयितुं तत्त्वार्था-

नित्यादि" निरूपयन्ति। इयं हि उक्तार्थसंसिद्धौ तेषां प्रबला युक्तिर्यद् "वाचस्पतिमिश्रेण न्यायसूत्रोद्धारः न्यायसूचीनिबन्धश्च रचितः[१] अनयोः संवादेन समालोचनेन च महान् विप्लवो दृश्यते" इति। इदमुपलभ्यमानं न्यायशास्त्रं सर्वथानवस्थितं पठन-पाठनानुपयुक्तमिति तेषां हृदयम्॥

इदं सर्वं न चित्रं नाप्यपूर्वार्थनिर्द्धारणं जैनागमे सुयणाङ्गसूत्रे त्रिषष्ट्यधिकानि त्रीणि शतानि मतानि[२] प्रदर्शितानि भारत-वर्षीयोपासकसम्प्रदायाख्यपुस्तके ऽपि बहूनि मतानि निरूपितानि तानि च स्वमते सर्वथैवानुभवसिद्धानि परमते तु स्वमतं विहाय सर्वत्रैवानुभवापलाप इति सर्वेषां साधुत्वे यत्समाधानं तदेवैकेषां केषामन्येषां च मते समाधानं भवितुमर्हतीति। अपि च पूर्वाचार्यैः कृतानामेतादृशीनां शङ्कानां समाधानं तु उदयना-चार्येण किरणावल्यां श्रीहर्षेण खण्डनखण्डखाद्ये साहित्याचार्यैरपि तत्रतत्र कृतमेव। अधिकं तु मया न्यायदर्शनभाष्यकर्तुर्वात्स्यायनस्य चरिते भाष्यवर्णने यथायथं परीक्षिष्यते॥

---

(१) एकेनैव वाचस्पतिमिश्रेण ग्रन्थद्वयं रचितं विभिन्नेन वा कुत्र को वा विप्लव इति ते जानन्ति न वेति बहूनां सन्देहो भवति स्वयं तीर्णः परान् तारयतीति लौकिकाभाणकेन तत्प्रदर्शनस्यात्यन्तावश्यकत्वात्। मया तु किञ्चिद्वर्णितमधस्तात् परिशिष्टं वाचस्पतिमिश्रचरिते निरूपयिष्यते।

(२) मलयगिरिकृतायां द्वितीयोपाङ्गटीकायां मुखबन्धे द्रष्टव्यम्। Indian Antiquary, 1888, p. 344.

अथ न्यायदर्शनभाष्यकर्तुर्महामुनेर्वात्स्यायनस्य चरितम् ।

तत्र तावन्न्यायदर्शनभाष्यकर्ता भगवान् वात्स्यायनः कस्मिन् देशे कस्मिन् काले आविर्भूत इति निर्णयस्तु दूरे गतस्तस्मान्येव मतभेदा दृश्यन्ते एकत्र वात्स्यायनोऽपरत्र पक्षिलस्वामी अन्यत्र पक्षिलमुनिः वा पक्षिल इति ।

किं तु न्यायभाष्यान्ते ।

"योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम् ।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत् ॥"(१) इति ।

न्यायवार्त्तिकसमाप्तौ च ।

"यदक्षपादप्रतिभो(२) भाष्यं वात्स्यायनो जगौ ।
अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम् ॥"

इति दर्शनान्निर्णीतं भवति तस्य मुख्यं नाम वात्स्यायन इति ॥

न्यायवार्त्तिकतात्पर्यटीकायामारम्भे आचार्यवाचस्पतिमिश्रेण "अथ भगवता अक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते व्याख्याते च भगवता पक्षिलस्वामिना किमपरमवशिष्यते यदर्थं वार्त्तिकारम्भ" इत्युक्तत्वात् पक्षिलस्वामी इत्यपि निष्पन्नं भवति ।

---

(१) वाक्यमिदं विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तके श्रीशङ्कराचार्यव्यवस्थापितगोवर्द्धनमठस्थतालपत्रलिखितपुस्तके तथा अस्मन्निकटे वर्तमाने महानैयायिकैः प्रामाणिकत्वेनावधृते प्रायः शुद्धे पुण्यग्रामे (पूनानगरे) लिखिते प्राचीने पुस्तके ऽपि वर्तते ।

(२) यदक्षपादप्रतिम इत्यपि क्वचित् ।

[illegible] Fasc. 1-5 @ /10/ each	...	...	1 12
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ 1/- each	...	...	9 0
Mugdhabodha Vyakarana, Vol. I, Fasc. 1-7, @ /10/ each	...	...	4 6
Nirukta, (2nd edition) Vol. I, Fasc. 1-2, @ Rs. 1-4	...	...	2 8
Nityāchārapaddhati, Fasc. 1-7 @ /10/ each	...	...	4 6
Nityāchārapradipa, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-4 @ /10/ each	...	...	7 8
Nyāyabindutikā, Fasc. 1 @ /10/ each	...	...	0 10
Nyaya Vartika Tatparya Parisudhi, Fasc. 1-4 @ /10/ each		..	2 8
Nyayasarah		...	2 0
Padumāwati, Fasc. 1-6 @ 2/ each ...	...	...	12 0
Prākrita-Paingalam, Fasc. 1-7 @ /10/ each	...	...	4 6
*Parāçara Smṛti, Vol. I, Fasc. 2-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each		...	11 14
Paraçara, Institutes of (English) @ 1/- each	...	...	1 0
Pariksamukha Sutram		...	1 0
Prabandhacintāmaṇi (English) Fasc. 1-3 @ 1/4/ each	...	...	3 12
Rasarnavam, Fasc. 1-3	...	...	3 12
Ravisiddhanta Manjari, Fasc. 1	...	...	0 10
Sadukti-karna-mrita, Fasc. 1-2, @ /10/ each	...	...	1 4
Saddarśana-Samuccaya, Fasc. 1-2 @ /10/ each		...	1 4
Samaraicca Kaha, Fasc. 1-7, @ /10/ each	...	...	4 6
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	...	...	2 8
Ditto (English) Fasc. 1-8 @ 1/- each		...	3 0
Six Buddhist Nyaya Tracts	...	...	0 10
Siva Parinahya	...	...	
Smriti Prakasha, Fasc. 1 ...	...	...	0 10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each		...	3 12
Sri Surisarvasvam, Fasc 1-2, @ /10/ each	...	...	1 4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	...	...	1 0
Suddhi Kaumudi, Fasc. 1-4 @ /10/ each	...	..	2 8
Sundaranandam Kavyam ...	...	...	1 0
Suryya Siddhanta, Fasc. 1-2 @ 1-4 each	...	...	2 8
Syainika Sastra ...	...	...	1 0
Tantra Vārtika (English) Fasc. 1-14 @ /1/4	...	...	17 8
*Tattva Cintāmaṇi, Vol. I, Fasc. 1-9; Vol II, Fasc. 2 10; Vol. III, Fasc. 1-2; Vol. IV, Fasc. 1; Vol. V, Fasc. 1-5; Part IV, Vol. II, Fasc. 1-12 @ /10/ each		..	23 12
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-3, Vol. III, Fasc. 1, @ /10/ each		...	7 8
Tattva Cintamani Didhiti Prakas, Fasc. 1-6 @ /10/ each	...	...	3 12
Tirthacintamoni, Fasc. 1-4, @ /10/ each ...	...	...	2 8
Trikāṇḍa-Maṇḍanam, Fasc. 1-8 @ /10/	...	...	1 14
Tul'si Satsai, Fasc. 1-5 @ /10/ ...	...	..	3 2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each		...	6 14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/-	...	..	6 0
Vallāla Carita, Fasc. 1 @ /10/ ...	...	...	0 10
Varṣa KriyāKaumudī, Fasc. 1-6 @ /10/	...	...	3 12
Vidhāna Pārijāta, Fasc. 1-8; Vol. II, Fasc. 1 @ /10/	...	...	6 10
Ditto Vol. II, Fasc. 2-6 @ 1/4	...	...	6 4
Vishahitam, Fasc. 1	...	...	0 10
Vivādaratnākara, Fasc. 1-7 @ /10/ each	...	...	4 6
Vrhat Svayambhū Purāṇa, Fasc. 1-6 @ /10/	...	...	3 12
Yogaśāstra, Fasc. 1-3	...	...	3 12

Tibetan Series.

Amarakosah	...	...	2 0
Amartika Kamdhenuh	...	...	1 0
Bauddhastotrasangraha, Vol. I ...	...	...	2 0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-4, @ 1/- each		...	4 0
Nyayabindu of Dharmakirti, Fasc. 1-2	...	...	2 0
Pag-Sam S'hi Tin, Fasc. 1-4 @ 1/- each	...	...	4 0
Rtogs brjod dpag bkhri S'iñ (Tib. & Sans. Avadāña Kalpalatā) Vol. I, Fasc. 1-11, Vol. II, Fasc. 1-11 @ 1/- each ...		...	22 0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each	...	...	14 0
Timed-Kun-Din	...	...	1 0

Arabic and Persian Series.

Amal-i-Salih, or Shah Jahan Namah ...	...	...	2 0
Al-Muqaddasi (English) Vol. I, Fasc. 1-4 @ 1/-	...	...	4 0
Āin-i-Akbarī, Fasc. 1-22 @ 1/8/ each:	...	...	33 0
Ditto (English) Vol II, Fasc. 1-5, Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each ...	...	...	22 0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each	...		55 8

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Fasc. 1-6, @ 1/4/ each	5	
Conquest of Syria, Fasc. 1-9 @ /10/ each	2	10
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each ...	3	
Catalogue of the Persian Books and Manuscripts Fasc. 1-3 @ 1/- each ...	1	
Faras Nama, of Hashini	1	
Ditto of Zabardast Khan	21	
Farnang-i-Rashidi, Fasc. 1-14 @ 1/8 each. ...	1	
Fihrist-i-Tusi, or Tūsy's list of Shy'a Books, Fasc. 1 & 2 @ 1/- each ...	2	
Gulriz	2	
Hadiqatu'L, Haqiqat, (Text & Eng.)	1	
History of Gujarat	1	
Haft Asman, History of the Persian Masnawi, Fasc. 1 @ 1/- each ...	12	
History of the Caliphs, (English) Fasc. 1-6 @ 1/4 each ...	1	
Iqālnamah-i-Jahāngiri, Fasc. 1-3 @ /10/ each.	1	16
Isābah, with Supplement, 51 Fasc. @ 1/- each.	2	
Kashf al-Hujub wal Astār:	2	
List of Arabic and Persian MSS. 1903-1907 and 1908-1910, @ 1/- each ...	2	
Ma'āṣir-i-Rahimi, Part I, Fasc. 1-4 @ 2 each	2	
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, 1-10, Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ 1/- each ...	30	
Ditto (Eng.) Vol. I, Fasc. 1-6, @ 1/4 each ...	7	
Memoirs of Tahmasp	1	
Marhamu 'L-Ilali 'L-Mu'Dila, Fasc. 1-3	3	
Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each	9	
Ditto (English), Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1-2 @ 1/- each	17	
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each... ...	11	14
Ditto Part 8, Fasc. 1-4 @ 1/- each ...	1	
Persian and Turki Divans of Bayram Khan, Khan Khanan ...	1	
Qawaniuu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes	3	
Riyāzu-s-Salātin, Fasc. 1-5 @ /10/ each ...	3	
Riyāzu-s-Salātin, (English) Fasc. 1-5 @ 1/-	5	
Shah Alam Nama, Fasc. 1-2	2	
Tadhkira-i-Khushnavisān	1	
Tabaqnat-i-Nasiri (English), Fasc. 1-14 and Index @ 1/- each ...	15	
Tārikh-i-Firūz Shahi of Ziyau-d-din Barni, Fasc. 1-7 @ 10/ each ...	4	
Tārikh-i-Firūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ 10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	3	
The Mabani 'L Lughat: A Grammar of the Turki Language in Persian ...	1	
Tuzuk-i-Jahāngiri (Eng.) Fasc. 1 @ 1/-	1	
Wis o Rāmin, Fasc. 1-5 @ /10/ each	3	
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ...	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vol. XX @ 10/- each	10	0
2. Proceedings of the Asiatic Society from 1875 to 1899 (1900 to 1904 are out of stock) @ /8/ per No.		
3. Journal of the Asiatic Society for 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members. N.B.—*The figures enclosed in brackets give the number of Nos. in each year.*		
4. Journal and Proceedings, N.S., (Nos. 1-4 of 1905 are out of stock), 1905—1912 @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.		
5. Memoirs, Vol. I (21), Vol. II (11), Vol. III (6), Vol. IV (1). Price varies from number to number. Discount of 25% to Members.		
6. Centenary Review of the Researches of the Society from 1784-1883	3	0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910 ...	8	0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera. Parts I-III, with 8 coloured Plates, 4to, @ 6/- each	18	0
9. Kaçmiraçabdāmṛta, Parts I and II @ 1/8/	3	0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes	10	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

1-1-14.

Books are supplied by V.P.P.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 834.



न्यायवार्त्तिकम्।

NYÁYA-VÁRTTIKAM

EDITED BY

PANḌIT VINDHYEŚVARÎ PRASÁD DUBE.

LIBRARIAN, GOVT. SANSKRIT COLLEGE, BENARES.

FASCICULUS II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY. 57, PARK STREET.

1893.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. KEGAN PAUL, TRENCH, TRÜBNER & CO., LD.

PATERNOSTER HOUSE, CHARING CROSS ROAD, LONDON, W. C., AND

MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.		
Advaita Brahma Siddhi, (Text) Fasc. I—IV @ /6/ each		1	8
*Agni Puráṇa, (Text) Fasc. II—XIV @ /6/ each		4	14
Aitareya Áraṇyaka of the Rig Veda, (Text) Fasc. I—V @ /6/ each		1	14
Aṇu Bháshyam, (Text) Fasc. I—II		0	12
Aphorisms of Śáṇḍilya, (English) Fasc. I		0	6
Ashtasáhasriká Prajṇapáramitá, (Text) Fasc. I—VI @ /6/ each		2	4
Áśvavaidyaka, (Text) Fasc. I—V @ /6/ each		1	14
Avadána Kalpalatá, (Sans. and Tibetan) Vol. I, Fasc. I–III; Vol. II. Fasc. I—II @ 1/		5	0
*Bhámati, (Text) Fasc. II—VIII @ /6/ each		2	10
Brahma Sútra, (English) Fasc. I		0	12
Brihaddevata (Text) Fasc. I—IV @ /6/ each		1	8
*Brihadharma Puráṇa, (Text) Fasc. I—III @ /6/ each		1	2
Brihataranyaka Upanishad (English) Fasc. II—III @ /6/ each		0	12
Chaitandya-Chandrodaya Nátaka, (Text) Fasc. II—III @ /6/ each		0	12
Chaturvarga Chintamaṇi (Text) Vols. II, 1—25; III. Part I, Fasc. 1—18. Part II, Fasc. 1—9 @ /6/ each		19	8
*Chhándogya Upanishad, (English) Fasc. II		0	6
Gopatha Brahmana, (Text) Fasc. I—II		0	12
*Hindu Astronomy, (English) Fasc. II—III @ /6/ each		0	12
Kála Mádhaba, (Text) Fasc. I—IV @ /6/ each		1	8
Kátantra, (Text) Fasc. I—VI @ /12/ each		4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each		10	8
Kúrma Purana, (Text) Fasc. I—IX @ /6/ each		3	6
*Lalita-Vistara, (Text) Fasc. III—VI @ /6/ each		1	8
Ditto (English) Fasc. I—III @ /12/ each		2	4
Madana Párijáta, (Text) Fasc. I—XI @ /6/ each		4	2
Mantiká Sangraha, (Text) Fasc. I—III @ /6/ each		1	2
*Márkaṇḍeya Puráṇa, (Text) Fasc. IV—VII @ /6/ each		1	8
Márkaṇḍeya Puráṇa, (English) Fasc. I—III @ /12/ each		2	4
*Mimánsá Darśana, (Text) Fasc. III—XIX @ /6/ each		6	6
Nárada Smṛiti, (Text) Fasc. I—III @ /6/		1	2
Nyayavártika, (Text) Fasc. I—II		0	12
*Nirukta, (Text) Vol. I, Fasc. 4—6; Vol. II, Fasc. 1—6; Vol. III, Fasc. 1—6; Vol. IV, Fasc. 1—8 @ /6/ each		8	10
*Nítisára, or The Elements of Polity, By Kámandaki, (Sans.) Fasc. II—V @ /6/ each		1	8
Nyayabindutika, (Text)		0	10
Nyáya Kusumánjali Prakarana (Text) Vol. I, Fasc. 1—6; Vol. II, Fasc. 1—2 @ /6/ each		3	0
Pariśishṭa Parvan, (Text) Fasc. I—V @ /6/ each		1	14

व्यभिचारिधर्मद्वयोपनिपातोऽनेकधर्म इति केचित्। एके त्वनेकधर्म इत्यन्यथा व्याचक्षते एकस्माद्न्योऽनेकधर्म इति। एवं च विरुद्धाव्यभिचारिधर्मद्वयोपनिपातो लभ्यते यं प्रति तर्कमाहुः स च संशयहेतुः यथा श्रावणत्वकृतकत्वे शब्दस्येति। तदयुक्तम्। असम्भवात्। न ह्यव्यभिचारिणौ विरुद्धावेकस्मिन्नर्थे धर्मौ सम्भवतः वस्तुनो द्वैरूप्यासम्भवात् यद्युभावव्यभिचारिणौ स्याताम् एकतमं वस्तु द्व्यात्मकं भवेत् न चैतदस्ति तस्मान्नोभावव्यभिचारिणाविति। न चायं प्रयोगो युक्तः। कथमिति। यदि तावदयं प्रयुङ्क्ते यथा प्रयुक्ते नो हेतुः तथायमपीति। प्रसिद्धेन व्यपदेशा भवन्तीति सिद्धं सर्वस्याहेतुत्वम् विरुद्धार्थप्रतिपत्तिबाधितत्वादुत्तरस्थानभिधानम्। अथैवं क्रियते यथैव द्वितीयमनुमानं न भवति तथा प्राक्तनमपीति एवं प्रतिपन्नं द्वितीयानुमानस्यासाधकत्वम् अत्र विरुद्धधर्मावेकत्र सम्भवत इति सम्भवान्न विरुद्धौ। कस्य विरुद्धार्थः किं सहासम्भवः आहो विरुद्धार्थसाधकत्वम् अथ स्वरूपमिति। यदि सहासम्भवः स नास्ति दर्शनात्। अथ विरुद्धार्थसाधकत्वं विरोधः तदपि न युक्तम् वस्तुनो द्व्यात्मकत्वासम्भवात् यदि विरुद्धार्थसाधकत्वमनयोर्धर्मयोर्भवेत् एकं वस्तु द्व्यात्मकमापद्येत। अथ स्वरूपमनयोर्विरुद्धमिति न किञ्चिद्बाधितमवति यस्मात् कृतकत्वं न श्रावणत्वं श्रावणत्वं वा न कृतकत्वं तस्मान्न संशय इति। उपेत्य वा विरोधं यदि विरुद्धार्थाभ्यां कृतकत्वश्रावणत्वाभ्यां शब्दे संशयः क्रियते विशेषदर्शनादुपजातः कस्य दर्शनान्निवर्तते न हि विशेषदर्शने सति विशेषाकाङ्क्षा भवति यथोपलब्धसामान्यस्य विशेषाकाङ्क्षा भवति। प्रत्यक्षतो निवर्तिष्यत इति चेत्।

न। योऽनुमानाभ्यां सन्निपाताभ्यामर्थे संशयः स प्रत्यक्षान्निवर्तिष्यत इति। तन्न युक्तम्। प्रत्यक्षाविषयत्वात्। नायमर्थः प्रत्यक्षविषय इति। किं शब्दोऽनित्यो वेति। आगमान्निवर्तिष्यत इति चेत्। न। आगमस्य च विचार्यमाणत्वात् आगम एवायं विचार्यते किं शब्दो नित्योऽथानित्य इति। न चायं प्रत्यक्षविषयो नागमविषयः अनुमानाभ्यां च नायं परिच्छेत्तुं शक्यते सोऽयमनिवर्त्यः संशयः प्राप्तः। भवतु किं नो बाध्यते कथं न बाध्यते। यदा वस्त्वन्तरपरिच्छेदकमनुमानं न भवति यथाऽनित्या बुद्धिः कृतकत्वादिति इदं खलु कृतकत्वं शब्दे दृष्टं स चानवधारितस्वभावो नित्योऽनित्य इति। तच्च चोपलभ्यमानं कृतकत्वमन्यत्र बुद्ध्यादौ संशयहेतुरिति सर्वमनुमानमनित्यत्वसाधनं न स्यात् सर्वं चानुमानमयं न्यायो बाधत इति यश्च न्यायोऽनुमानमूलमुच्छिनत्ति नायं न्यायो बाधितुं युक्तः नित्यासम्भवात् नायमस्माभ्यायो बाधते यस्य नित्यं किञ्चिदस्ति तस्य विरुद्धाव्यभिचारी भवति। अस्माकं तु पक्षे नित्यं किञ्चिन्नास्तीति। न। बाधापरिज्ञानात् न भवता बाधविषयोऽवलोकितः किन्तु नित्यमस्माकं नास्तीति एतावन्मात्रेण परपक्षे दोषोऽभिधीयते भवतामपि पक्षे विरुद्धाव्यभिचारी कृतावकाशः कथं सप्रतिघं विज्ञानं मत्वा रूपवदित्येकः अप्रतिघं विज्ञानं स्वरूपत्वाद्वेदनावदित्यपरः। तदेवमव्यभिचारिधर्मद्वयोपनिपातान्न सप्रतिघं नाप्रतिघं सिद्ध्येत् तस्मादपन्यायोऽयं विरुद्धयोश्च धर्मयोः सन्निपाताच्छब्दे संशय इति। धर्मयोः सातत्यादभिलापानुपपत्तिः नायमतद्धर्मा कदाचिदपि शब्द उपलभ्यते सततं तु तद्धर्मा भवति श्रावणः कृतकश्चेति

अभिलापो न स्यात् नित्योऽनित्य इति । न हि कदाचिदयं द्रष्टा एकस्मिन् वस्तुनि स्थाणुपुरुषधर्मावुपलभमानः शक्नुयादवक्तुम् स्थाणुर्वा पुरुषो वा । नैवं भविष्यतीति व्याहतमुच्यते । ननु च भवताभिधीयते नित्य इति मयाप्यभिधीयते अनित्य इति कथं नाभिलप्यते सोऽयं विरुद्धाव्यभिचारिन्यायो विचार्यमाणः सर्वथानुमानं बाधत इति अलमनेन। अथ श्रुतकत्वश्रावणत्वे सहिते हेतू भवत इति तथापि श्रुतकत्वश्रावणत्वे सहिते न विभागजत्वाद्विद्येते यथैव विभागजत्वमन्यावृत्तित्वादसाधारणं शब्दे संशयं करोति तथा श्रुतकत्वश्रावणत्वेऽपि शब्दवृत्तित्वादन्यत्रासम्भवात् संशयहेतू भवतः सोऽयमसाधारण एव न धर्मान्तरं तद्ग्रहणेनैव सङ्गृहीत इति तस्मादेकस्मादन्यो धर्मोऽनेकधर्म इति वक्तव्यमिति । यदा पुनरेवम्भूतौ धर्मावेकस्य वस्तुनो भवतः तदा तेनोपलब्ध्या तस्य वस्तुनः किं प्रतिपत्तव्यं तदा तयोरेव धर्मयोः सामर्थ्याधिगतौ यत्नः कर्तव्यः नोभावेतौ साधने कतरोऽत्र साधनं कतरश्चासाधनमिति सामर्थ्याधिगमे यत्नः करणीय इति। यत्नश्च क्रियमाणोऽनित्यसाधनेष्वेवावतिष्ठते कुतो नित्यत्वस्य प्रमाणबाधितत्वात् तच्चोपरिष्टाद्वक्ष्यामः । तदेवं व्यवस्थितमेतत् अनेकधर्मोपपत्तेरसाधारणात् धर्मात् संशया इति विप्रतिपत्तेः संशय इति व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थो व्याहतार्थप्रवादविषयत्वमुपलभमानस्योपलब्ध्यनुपलब्ध्योश्चाव्यवस्थाने सति तद्गतविशेषार्थस्मृतौ सत्यां संशयो भवतीति । तत्र समानोऽनेकश्च धर्मो ज्ञेयस्य उपलब्ध्यनुपलब्धी पुनर्ज्ञातस्थे इति भाष्यम् । तत्रोपलब्ध्यनुपलब्ध्योस्तावत् पृथक् संशयकारणत्वं न भव-

तीति चर्चितमेतत्। समानोऽनेकश्च धर्मो ज्ञेयस्य इत्येतदपि न बुद्ध्यामहे। किमत्र धर्मः संशयकारणमथ ज्ञानमिति। न धर्मः संशयकारणमित्यनेकधा समर्थितम्। समानानेकधर्मज्ञानं तु संशय कारणं तच्च ज्ञातरि वर्तत इति नास्ति भेदः। समानानेकधर्मयोस्तु पृथगभिधानं[१] उक्तं प्रयोजनम् विधीयमानप्रतिषिध्यमानधर्मभेदा-दिति। विप्रतिपत्तेरित्ययं वक्तृगतः संशयहेतुः। केऽत्र सम्यक्प्रतिपन्नाः के मिथ्येति श्रोतुः सन्देहो भवति एतावता भेदेन पृथगभिधानम्। समानधर्मः स एवायमिति चेत् समानधर्मोपपत्तेर्विशेषापेक्षो विमर्षश्च प्रतिपत्तेश्चेति[२] सर्व एवायं समानधर्मोऽभिधीयते तस्माद्वै-यर्थ्यात् पृथगनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च इति न प्रयोजनमस्ति। अत एवं वक्तव्यम्। समानधर्मोपपत्तेर्विशेषापेक्षो विमर्षः संशय इति न सूत्रार्थापरिज्ञानात् सूत्रार्थमपरिज्ञायैतद्दृश्यते। यथा च भेदः समानानेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति तथा वर्णितम्। अपरे पुनः समानधर्मोपपत्त्यादिभिः पदैः पृथक् पञ्चविधं संशयं वर्णयन्ति। समानधर्मोपपत्तेर्विशेषापेक्षो विमर्षः संशय इति एवं शेषेषु पदेषु तत्र युक्तम् उपलब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात् समान-धर्मोपपत्तौ सत्यामुपलब्ध्यनुपलब्ध्यव्यवस्थायां च सत्यां विशेषापेक्षो विमर्षः संशय इति सूत्रार्थः। एवमनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति वाच्यम्। तस्मान्नोपलब्ध्यनुपलब्ध्यव्यवस्था पृथक् संशयकारणमिति। उपलब्ध्यनुपलब्ध्योर्दैविध्यात् संशयो न युक्तः कुतः लोकविरोधात्

(१) पृथगभिधाने—इति साधुः।

(२) समानधर्मोपपत्तेर्विप्रतिपत्तेश्चेति—पा० १ पु०। अयमेव साधुः। विमर्शश्चेति क्वचित्। एवमग्रे ऽपि।

उपलब्ध्यनुपलब्ध्योर्द्वैविध्यात् संशयो भवतीति ब्रुवाणो लोकं बाधते। कथमिति यत्किञ्चिदयमुपलभते सर्वत्रास्य संशयो न[१] भवितव्यम्। किं कारणम् उपलभ्यमानं द्वेधा भवति। उपलब्ध्योर्द्वैविध्यात्तु यः संशयो भवतीति तस्य कुतो निवृत्तिः विशेषदर्शनान्निवर्त्तत इति चेत् विशेषेष्वप्येवं य एते विशेषा उपलभ्यन्ते किमेते सन्त आहोऽसन्त इति यावदुपलब्धिर्द्वैविध्यात् संशय इत्यनिवर्त्यः संशयः। एवमनुपलब्धिर्द्वैविध्येऽपि वक्तव्यम् न चास्य क्वचित् समाश्वासः स्यात्। यदायमपवरकादौ सर्पादीनुपलभते तदा सर्पवत् तद्वेश्म उतासर्पवदिति संशयः अयमपि संशयोऽनिवर्त्य एवेति सर्वत्राश्वासो न स्यात्। येषां च पञ्चविधः संशय इति सूत्रार्थः तैरस्य कारणकृतो भेदो वक्तव्यः स्वभावकृतो वा। तद्यदि कारणकृतो न पञ्चविधोऽनेकरूपः संशय इति प्राप्तम्। अथ स्वभावभेदात् स्वभावभेदस्यासम्भवादेकरूपः संशीतिः संशय इति। तस्मात् पञ्चविधः संशय इति न सूत्रार्थः समानधर्मग्रहणान्न संशयो धर्मिविषयत्वात् यदिदमुच्यते समानधर्मोपपत्तेः संशय इति। तदयुक्तम्। धर्मिविषयत्वात्। न हि समाने धर्म उपलब्धे धर्मिणि संशयो (न) युक्तः धर्मधर्मिणोर्भेदात्। न हि गवि दृष्टे अश्वे संशयः (धर्मिणश्चादृष्टत्वात्। नानुपलब्धे न निर्णीते संशयो भवतीति च व्याघातः। धर्मधर्मिभावात् संशय इत्येके। एके तावत् परिहारं ब्रुवते धर्मे दृष्टे धर्मिणि संशयः[२]) धर्मधर्मिभावानुपपत्तेः न हि धर्मधर्मिभावेन नानात्वं निवर्तते। अथ

(१) संशयेन—इति साधुः।

(२) परीहारं—पा० २ पु०। ( ) एतन्मध्यस्थः पाठोऽनुपयुक्त इति क्वचितं २ पु०।

धर्मधर्मिभावे नियामक इच्छादिसूत्रं तर्हि व्याहन्यते कथमिति इच्छादयः प्रतिसन्धानादात्मानं गमयन्तीति सूत्रार्थः। तत्र परः प्रत्यवस्थितः कार्यकारणभावात् प्रतिसन्धानमिति न नानात्वस्यावधानादित्येतेन निवर्त्यते। इह पुनर्भवता धर्मधर्मिभावादिति पुनर्ब्रुवता नानात्वमेव धर्मधर्मिभावविशिष्टं नियामकमुच्यत इति शक्नुयात् परोऽपि वक्तुं कार्यकारणभावो नियामक इति तस्मादप्यव्याख्यानमेतत् धर्मधर्मिभावात् संशय इति। अथ समानधर्मोपलब्धेरन्यस्मिन्नुपलब्धे धर्मिणि संशयो भवतीति कः परिहारः। अयं परिहारः बहुव्रीहिः समासोऽतो धर्मिणोऽभिधानं समानधर्मोपपत्तेरित्यनेन पदेन बहुव्रीहिसमासे धर्म्येव व्यपदिश्यते कथं समानो धर्मो यस्य स भवति समानधर्मा समानधर्मेण[1] उपपत्तिः समानधर्मोपपत्तिः किमुक्तं भवति समानधर्मवतो धर्मिणो दर्शनादिति। विशेषापेक्षो विमर्षः संशय इति विशेषापेक्षो विशेषस्मृत्यपेक्ष इति। अथ सा विशेषस्मृतिः किंविशेषविषया उतान्यविषयेति योऽसौ संशयस्य विषयः तं समानधर्माणमुपलभते तस्यायं विशेषाननुस्मरति उतान्यस्येति। यदि तावत् तस्य तन्न युक्तं तद्विशेषाणां क्वचिदननुभवात् सोऽर्थः पूर्वमुपलब्धविशेषः तद्गतान् विशेषाननुस्मरतीति युक्तम् तद्विशेषाणामनुभूतत्वात् यदा पुनरयमनुपलब्धविशेषे सामान्ये उपलभ्यमानः सन्दिह्यते तत्र विशेषानुस्मृतिः कथम् तद्विशेषाणामनुभूतत्वादिति। न। सामान्यवचनत्वात्। विशेषापेक्ष इति

---

(१) समानधर्मेण इति—पा० २ पु०। स च प्रामादिकः।

सामान्यवचनं पुनरनेनावधार्यते तस्य वान्यस्य वेति यदा तद्गता विशेषाः सुस्मूर्षिता भवन्ति तदानुभूतेषु विशेषस्मृतिः यदा त्वनुपलब्धपूर्वे संशयः तदा सादृश्यादन्यगतान् विशेषान् सुस्मूर्षते एवं तावद्व्यवस्थिते त्रिविधः संशय इति । अनेन च संशयलक्षणेन यान्यन्यानि विरुद्धानि तान्यपि संगृहीतानि । यथा काश्यपीयम्[१] । सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशय इति । अस्यार्थः सामान्यप्रत्यक्षादिति सामान्यवतः प्रत्यक्षादिति विशेषाप्रत्यक्षत्वमव्यवस्थितविशेषत्वं नास्य विशेषा व्यवस्थिता इति विशेषस्मृतेश्च संशय इति समानम् । कथं पुनरनेन सूत्रेणासाधारणो लभ्यत इति लभ्यते च व्यभिचारित्वात् व्यभिचारी साधारणः तच्चासाधारणेऽपि व्यभिचारित्वमस्तीति लभ्यते । अनेकधर्मोपपत्तिस्तर्हि पृथङ्न पठितव्या[२] अन्वयव्यतिरेकभेदविवक्षायां पृथगभिधानं पुनः संशयकारणभेदविवक्षयेति । ये त्वत्र विशेषाप्रत्यक्षाद्विशेषास्मृतेश्चेतिपदयोः पौनरुक्त्यं वर्णयन्ति । सामान्यप्रत्यक्षाद्विशेषस्मृतेश्च संशय इत्यभिधीयमाने किल गम्यत एतद्विशेषाप्रत्यक्षादिति न हि कश्चिद्विशेषान्[३] प्रत्यक्षान् स्मरति । तन्न । सूत्रार्थापरिज्ञानात् । नायं सूत्रार्थः विशेषाणामप्रत्यक्षत्वमिति । अपि त्वव्यवस्थितविशेषवत्त्वं विशेषाप्रत्यक्षत्वमित्यतो नायं दोष इति । अन्ये तु संशयलक्षणमन्यथा व्याचक्षते । साधर्म्यदर्शनाद्विशेषोपलिप्सोर्विमर्षः संशय इति । तैरपि साधर्म्यस्यावधारितत्वात् संशयस्य विषयो वक्तव्यः । धर्मीति चेत् ननूक्तः संशयस्य

(१) काश्यपी क्षितिरित्यमरः ।
(२) पाक्षितव्या—पा० २ पु० ।
(३) प्रत्यक्षान्—इति केचित् ।

विषयो धर्मी सत्यमुक्तो न पुनर्युक्तः कथं न युक्तः यदि तावद्धर्मव्यतिरिक्तं धर्मिणमभ्युपैति व्याहतं भवति । धर्मधर्मिणोश्च नानात्वाभ्युपगमे धर्मस्यावधृतत्वात् धर्मिणश्चादृष्टत्वात् न ह्यन्यस्मिन् दृष्टे ऽन्यत्र संशयो भवति। अथाप्यसद्दिग्गा साधर्म्याभिधानेन धर्म्येवोच्येत तन्न युक्तं सधर्मणो भावः साधर्म्यं साधर्म्यमिति च भावाभिधानेन धर्मोभिधीयते न धर्मी न च युक्तोऽन्यस्य दर्शनादन्यत्र संशय इति । अथार्थान्तरभावं नाभ्युपैति तथापि साधर्म्यस्यावधृतत्वात् क्व संशय इति। यदि चायं धर्मिणं नोपलभते कस्यायं विशेषमुपलिप्सेत । न हि साधर्म्यस्य विशेषाः सम्भवन्तीति। अथ सामान्यवतो विशेषा इति तन्न तथास्यादृष्टत्वादित्युक्तम् । न सामान्यविशेषाः सन्तीति सामान्यवतो विशेषा भवन्तीत्येवं ब्रुवता सामान्यविशेषतद्वतां भेदोनुज्ञातो भवति व्यर्थञ्चाभिधानं न सामान्यविशेषास्तद्वतो विशेषा इति। उपलब्ध्यनुपलब्धिव्यवस्थाने च साधर्म्यदर्शने सत्यपि विशेषोपलिप्सायां च न संशयो भवतीति उपलब्ध्यनुपलब्ध्यव्यवस्थात इति वक्तव्यम् अनेकधर्मदर्शनादिति च समानानेकधर्मोपपत्तेरित्येवमादिवाक्यं संशयलक्षणं तद्विचार्यते किन्तावदयं कारणोपदेश आहो संशयस्वरूपावधारणमिति। यदि कारणनिर्देशोत्यल्पमिदमुच्यते समानानेकधर्मादिभ्य इति अन्यान्यपि संशयकारणानि तान्युपसंख्येयानि । यथात्ममनःसंयोग आन्तरस्य आत्ममनःसन्निकर्ष इन्द्रियार्थसन्निकर्षो बाह्यस्येति। अथ स्वरूपावधारणं कारणं निर्देशोऽनर्थकः संशीतिः संशय इति वक्तव्यम् । अस्तु तावत् कारणावधारणम् ननूक्तं कारणान्तरमप्युपसंख्येयमिति न नेदं कारणाव-

धारणार्थमपि त्वसाधारणकारणनिर्देशोऽयम् तस्मादिन्द्रियार्थसन्नि-कर्षादीनामप्रसङ्गः प्रत्यक्षसाधारणत्वात् स्वरूपनिर्देशो वा भवतु इदमेवास्य स्वरूपं समानधर्मादिभ्यो जन्मेति सोऽयमेवम्भूतः संशयो विचाराङ्गतयोपादीयते। संशयवद्विपर्ययोऽपि विचाराङ्गम् सोऽपि पदार्थत्वेन वक्तव्यः सत्यमसौ पदार्थो न तु विचाराङ्गमित्यतो नाभिधेयः कथं न विचाराङ्गं यथा सन्दिग्धस्तद्विशेषप्रतिपत्तये यतते नैवं विपर्यस्त[१] इति न्यायविद्यानङ्गत्वात् अतो नाभिधीयते ॥

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् ॥ २४ ॥

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्। यमर्थमधिकृत्येति। व्यवसायोधिकारः। कस्य व्यवसायः सुखदुःखसाधनानाम्। इदं सुखसाधनमिति ज्ञात्वा सुखाप्तये प्रयतते इदं सुखसाधन[२]मिति चाधिगम्य दुःखहानायेति। सुखदुःखयोरवाप्तिहानाभ्यामयं लोकः प्रसज्यत इति। सुखदुःखाप्तिहानौ प्रयोजनमिति। अनेन च प्रयो-जनेन सर्वे ऽर्थाः संगृहीता भवन्तीति। एकस्मिंश्च सूत्रार्थे परस्य दोषविवक्षया चोद्यमानस्य वक्तुमशक्यस्य व्यवहारो लौकिकोऽयमर्थः प्रसज्यते ऽनेनेति प्रयोजनमिति। न चानेन न्यायस्य किञ्चित् क्रियत इति न्यायाङ्गभावो नास्तीति यस्तावल्लौकिकोऽयमर्थ इति न ते[३] प्रकृष्टतार्किकादन्यो वक्तुमर्हति। अयमेव च पदार्थो लौकिको न प्रमाणादय इति कश्चासौ लौकिक इति। यदि प्रमाणोपपन्न-

---

(१) विपर्ययस्य—इति २ पु०। (२) दुःखसाधनमित्यनुमीयते।
(३) न ऋते—इति छेदः।

मित्ययमर्थः अतिदोषोऽयं प्रमाणोपपन्नं न वक्तव्यमिति। अथायं लौकिकशब्दार्थः तन्न बुध्यामहे कथमन्य इति तदपि प्रयोजनं न्यायस्याङ्गं न भवतीति। तदयुक्तम्। या खलु निःप्रयोजना चिन्ता सा न न्यायाङ्गमिति परीक्षाविधेषु प्रधानाङ्गं प्रयोजनमेव तन्मूलत्वात् परीक्षाविधेरिति॥

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः॥ २५॥

लौकिकपरीक्षकाणामिति सूत्रम्। बुद्धिसाम्यविषयो दृष्टान्त इति सूत्रार्थः। एवं चाकाशाद्यवबोध इति यदि पुनरेवमवधार्यते लौकिकानां परीक्षकाणां च यो विषयः स दृष्टान्त इत्यलौकिकार्थो न दृष्टान्तः स्यादाकाशादिरिति उदाहरणत्वेन तु लौकिकपरीक्षकविषयस्याभिधानात् न तु लौकिकपरीक्षकाणामेवेति। सोऽयं दृष्टान्तः सारूप्यव्युत्पत्त्यर्थो वा स्यादसिद्धसाधनार्थो वा यदि तावत् सारूप्यव्युत्पत्त्यर्थस्तदा नोपमानाद्विद्यते अथासिद्धसाधनार्थो नोदाहरणाद्विद्यते यद्युपमानं प्रमाणेऽन्तर्भावः अथोदाहरणमवयवमिति न पृथक् दृष्टान्तोऽस्तीति। इदं त्वुत्तरमप्रतिसमाधेयमिति पश्यामः। कस्मात् त्रयस्याप्यविज्ञानात्। एवं ब्रुवता न दृष्टान्तो नोदाहरणं नोपमानं विज्ञातमिति। सारूप्यव्युत्पत्त्यर्थं तावदुपमानं न भवतीति वर्णितम्। दृष्टान्तः सारूप्यव्युत्पत्त्यर्थः असिद्धसाधनार्थो वेति दृष्टान्तो न भवति उदाहरणार्थमुदाहरणं वर्णयन्तो वक्ष्याम इति॥

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः॥ २६॥

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तर-भावात् ॥ २७ ॥

इदमित्यभूतं चेति भाष्यम् । इदमिति सामान्यतोऽवगममाह । इत्यभूतं चेति विशेषतः । एतदुक्तभवति । सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्त इति । अस्यार्थस्य प्रदर्शनार्थं(१) सूत्रम् । तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्त इति । किं पुनरिदं सूत्रं लक्षणार्थमाहो विभागार्थमिति । किं चातः यदि लक्षणार्थं तन्त्राधिकरणग्रहणं न कर्तव्यं एतावद्भवत्यभ्युपगमव्यवस्था सिद्धान्त इति । अथ विभागार्थं सर्वतन्त्रग्रहणं कर्तव्यं प्रतिज्ञादिवत् यथा प्रतिज्ञाहेत्वुदाहरणोपनयनिगमनान्यवयवा इति समस्ताभिधानम् । एवं सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितिरिति वक्तव्यम् । लक्षणार्थं च सूत्रान्तरं वक्तव्यम् । सर्वतन्त्रप्रतितन्त्राभ्युपगमसंस्थित्यर्थान्तरभावादित्यस्य सूत्रार्थो(२)ऽन्यो वक्तव्यः । अथेदं विभागार्थं तथापि(३) पूर्वसूत्रं परित्यज्यताम् अथ विभक्तानां पुनर्विभागः त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरिति व्याहतम् । विभागश्च नियमार्थः । विभक्तानां विभागः किमर्थः । यदि नियमार्थः आद्येन सूत्रेण कृतत्वान्न प्रयोजनमस्तीति तस्मात् पूर्वमुत्तरं वा सूत्रमनार्षमिति । नानार्षम् । आद्यस्य लक्षणार्थत्वादुत्तरस्य विभागार्थत्वादिति । विभागश्च नियमार्थ इत्युक्तम् । एतेन अनेकधा भिन्नस्य सिद्धान्तस्य चतुर्धासंग्रह इति नियमं दर्शयति । अथाद्यं सूत्रं कथं लक्षणार्थमिति । तन्त्राधिकरणाना-

(१) अस्यार्थः प्रदर्शनार्थम्—पा० २ पु० ।
(२) सूत्रस्यार्थो—इति साधुः ।
(३) यथापि—पा० २ पु० । अथापीति केचित् ।

मर्थानामभ्युपगम इति सूत्रार्थः। तन्त्रमधिकरणं येषामर्थानां भवति ते तन्त्राधिकरणाः तेषामभ्युपगममंस्थिति[१]रित्यभावव्यवस्थाधर्मनियमः सिद्धान्तो भवतीति किमुक्तम्भवति योऽर्थो न शास्त्रितः तस्याभ्युपगमो न सिद्धान्त इति॥

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः॥२८॥

सर्वेषां सम्प्रतिपत्तिविषयः[२] सर्वतन्त्रसिद्धान्त इति। यथा प्रमाणानि प्रमेयसाधनानि न दृष्टान्तात् सर्वतन्त्रसिद्धान्तो भिद्यते तत्राप्यविप्रतिपत्तिरिहापीति। भिद्यत इत्याह। दृष्टान्तो हि वादिप्रतिवादिभ्यामेव निश्चितः न पुनरेवं सर्वतन्त्रसिद्धान्त इति। अनुमानागमयोराश्रयो दृष्टान्तो नैवं सर्वतन्त्रसिद्धान्त इति। यद्यनुमानागमयोराश्रयो दृष्टान्त इति प्रत्यक्षेऽपि प्रसङ्गः प्रत्यक्षमप्यनुमानागमयोराश्रयः तत्कारणत्वात् यः प्रत्यक्षविषयः सोऽर्थो दृष्टान्तोऽधिगतार्थः कथ्यत इत्यनुमानागमयोराश्रयः। अधिगमसाधनं तु प्रत्यक्षं तस्मान्न प्रत्यक्षे प्रसङ्गः॥

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः॥२९॥

सामान्यविशेषतदुतां नियमेनाभ्युपगमः प्रतितन्त्रसिद्धान्त इति। यथा भौतिकानीन्द्रियाणीति योगानामभौतिकानीति सांख्यानामिति॥

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः॥३०॥

---

(१) अभ्युपगमं स्थितिः—पा० २ पु०।

(२) सम्प्रतिपत्तिर्विषय इति क्वचित्।

वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति तस्योदाहरणं भाष्ये। यथेन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति ॥

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥

अपरीक्षिताभ्युपगमादिति सूत्रम् । अपरीक्षितोऽसूक्षित इति योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽभ्युपगमसिद्धान्त इति । यथा नैयायिकानां मन इन्द्रियमिति । वैशेषिकाणां नैयायिकानां च श्रोत्रमाकाशमिति । अपरीक्षितः शास्त्रानभ्युपगतः स्वबुद्धातिशयख्यापयिषया परबुद्धवज्ञानाच्च प्रवर्तत इति न युक्तम् । कुतः परावज्ञानस्यायुक्तत्वात् । यदि तावत् परस्यासामर्थ्यं बुद्धा नायं समर्थ इति प्रवर्तते तदानेन न परः प्रतिपादितो भवति किन्तु विप्रतिपादितः यस्याज्ञः किं तस्य प्रतिपादयितव्यम् । अथ परिज्ञातसामर्थ्यं पुरुषमवजानाति तदापि नातिशयबुद्धिमतोवज्ञानस्यायुक्तत्वात् तस्मान्नायं सूत्रार्थोऽशास्त्रिताभ्युपगमः सिद्धान्त इति । सर्व एवायं पचः स्वमुखेनार्थापत्त्या वा विधीयत इति किमनेनातिविस्तृतेनेति केचित् । पचपर्याय एव सिद्धान्त इत्यपरे । पचस्य किलायं पर्यायः सिद्धान्त इति सिद्धान्तः पर्यायोऽयमिति न बुद्धामहे सिद्धान्त इत्युपपन्नप्रमाणकोऽयमर्थः तत्रत्ययादभ्युपगमः पच इत्यन्यतरवादिविप्रतिपन्नस्यान्यतरं प्रति कर्मतया वस्तुनो यदुपादानं स पचः यश्च कारकशब्दो यश्च वस्तुशब्दो नैतौ पर्यायौ अन्यथा परशुच्छेदनमिति परशुरिति कदाचिदभिधीयते यदा

पुरुषव्यापारनिरपेक्षं वस्तु सन्निधीयमानतयावतिष्ठते क्षेदनमिति च यदेतान्योन्यस्य दारूणि निपात्यते तावेतौ क्षेदनपरशुशब्दौ वस्तुनः क्रियासम्बन्धासम्बन्धापेक्षौ प्रवर्तेते इति तथा सर्व एव कारकशब्दा न द्रव्यमात्रे न वा क्रियामात्रे वर्तन्ते। किन्तर्हि क्रिया-साधने क्रियाविशेषयुक्त इति कारकशब्दस्य पक्षो न सिद्धान्तः। स कथं पर्यायो भवतीति सर्वतन्त्रसिद्धान्तस्य पक्षपर्याय इति। अहो पर्यायशब्देषु कौशलं भदन्तस्य पक्षो विचारणायामिष्टोऽर्थ इति चाभिधीयते अविचारणीयस्यार्थः पक्षेऽन्तर्भवतीति चित्रम्। अथ पुनः सर्वतन्त्रसिद्धान्तं नैव प्रतिपद्यते तेनापि सर्वतन्त्रसिद्धान्तं निह्नुवानेन तदस्तत्वप्रतिपादको न्यायोऽभिधेयः यस्यासौ न्यायाभ्युप-गमः स सर्वतन्त्रसिद्धान्त इति व्याहतम्। सर्वतन्त्रसिद्धान्ते नास्तीति। अथ न्यायमपि न प्रतिपद्यते अनिवृत्तो व्याघातः वचने ऽवचने च यदि तावन्न्यायोऽस्तीति ब्रवीति प्रतिपादयति नास्ति चेति व्याहतम्। अथ ब्रवीति अवचनेऽस्यार्थो न सिद्धः[१] तस्मात् सर्वतन्त्रसिद्धान्तो नास्तीति सम्भ्रमव्याहतम्। इदं तावत् भवान् प्रष्टव्यो जायते किं पक्षः सिद्धान्तसामान्यं भवतु अथ संग्रहः पक्षशब्देन सिद्धान्तस्य अथ सिद्धान्तस्य पक्षशब्दः पर्याय इति तद्यदि तावत् सिद्धान्तसामान्यं तन्नास्त्यव्यापकत्वात् न हि पक्षः सर्वतन्त्रसिद्धान्तं व्याप्नोति असाध्य-त्वात् यथा सत्ता द्रव्यगुणकर्माणि व्याप्नोति व्यापकत्वात् सामान्यं भवति नैवं पक्ष इति। पर्यायशब्दोऽपि न भवतीत्युक्तम्। यदि च पक्षः सिद्धान्तपर्यायः सर्वतन्त्रसिद्धान्तः साध्यो जायते सर्वतन्त्रसि-

(१) सिध्यः—पा० २ पु०।

द्धान्तः साध्यश्चेति व्याघातः अर्थापत्तितोऽधिकरणसिद्धान्तस्याभेद इति चेत् अथापि न मन्येथाः अर्थापत्तितोऽधिकरणसिद्धान्तो न भिद्यते भिद्यते वाक्यार्थप्रतिपत्तौ तद्विपरीतवाक्यार्थप्रतिपत्तिरर्थापत्तिर्वाक्यानुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति ॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ ३२॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः । अवयवानां विभागोद्देशार्थं सूत्रम् । विभागोद्देशश्च नियमार्थः । किं नियन्तव्यं दशावयवं त्र्यवयवं च वाक्यं(१) एके तावद्ब्रुवते दशावयवं वाक्यम् । अपरे त्र्यवयवमिति । उभयनियमज्ञापनार्थः प्रतिज्ञादीनां विभागोद्देश इति । कथं पुनर्जिज्ञासादयोऽवयवा न भवन्ति पराप्रतिपादकत्वात् । परप्रतिपादका ये वाक्याङ्गभूता इतरेतराप्रत्यायितेनार्थेनार्थवन्तो वाक्याङ्गतामुपयान्ति ते ऽवयवाः । वाक्याङ्गत्वमवयवार्थः किं पुनर्वाक्यम् यस्य प्रतिज्ञादिभिरुपहृतस्य(२) विशेषावस्थापनमर्थः तद्वाक्यं वाक्यार्थं संहत्यैते पञ्च निष्पादयन्तीत्यवयवा इत्युच्यन्ते न पुनर्जिज्ञासादयः परप्रतिपादका इत्यतो न वाक्यस्यावयवा इति निश्चितत्वाच्च । निश्चितश्च साधयिता भवति । न तस्य जिज्ञासासंशयौ स्तः प्रयोजनमपि साधनादेव गम्यते शक्यप्राप्तिश्चेति न ह्यशक्यमप्रयोजकं वा कश्चित् साधयतीति तस्मात् प्रयोजनशक्यप्राप्ती अपि न वाक्यावयवौ । प्रकरणे तु जिज्ञासादयः समर्था इति भाष्यम् । प्रकरणमेते उत्थापयन्तीति । न हि जिज्ञासादीनन्तरेण

(१) वाच्यं—पा० २ पु० । (२) हृतस्य ।

प्रकरणस्योत्थानमस्तीति प्रकरणोत्थापका अवयवा जिज्ञासादय इति। परप्रतिपादकत्वात्तु प्रतिज्ञादीनामयमधिकार इति ते उपदिश्यन्ते। अवयवमपि वाक्यं तथा न भवति तथोपनयनिगमनयोरर्थान्तरभावं वर्णयन्तो वक्ष्यामः॥

साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥

तेषां त्ववयवत्वेन सामान्येन संगृहीतानामितरेतरविशेषकं लक्षणमुच्यत इति। साध्यनिर्देशः प्रतिज्ञेति। तत्र प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यस्तस्य निर्देशः प्रतिज्ञा परिग्रहवचनमुदाहरणमनित्यः शब्द इति। सिद्धत्वाद्धर्मिणो न साध्यतेति केचित्। धर्मी किल धर्मलक्षणः सिद्ध एव सिद्धस्य साध्यो न भवति नैष दोषः प्रज्ञापनीयधर्मविशिष्टस्येति वचनात्। न ब्रूमो धर्मिमात्रं साध्यमपि तु प्रज्ञापनीयधर्मविशिष्टो धर्मीति। यदि प्रज्ञापनीयो न विशेषणम् अथ विशेषणं न प्रज्ञापनीयः नासिद्धं विशेषणं भवतीति सिद्धेनायं विशिष्यते न साध्येनेति। सत्यमप्रज्ञातं विशेषणं न भवतीति प्रज्ञातं त्विदमनित्यत्वं घटे शब्दस्य साध्यमिति। एवं तर्हि शब्दस्यानित्यत्वं साध्यं न शब्द इति शब्दस्येति विशेषणान्न दोषः शब्दस्येति ब्रुवता नानित्यत्वमात्रं साध्यत्वेनाभिज्ञायते न धर्मिमात्रं किं तर्हि धर्मिणः शब्दस्य प्रज्ञातस्य नित्यत्वस्याधर्मत्वेन यो विशेषणविशेष्यभाव इतरेतरनियामकत्वेनानियमः स साध्यः स चोभयाश्रितो भवति। उभयाश्रयत्वे सति किमुक्तम्भवति धर्मी विशेषणं धर्मो वा विशेषणमिति शब्दस्यानित्यत्वमनित्यत्वस्य वा शब्द इति धर्मी विशिष्यत इति युक्तम्। सामान्यतोऽधिगतत्वा-

द्विशेषतो ऽनधिगतत्वाच्च विशेषप्रतिपादकत्वाच्चानुमानस्य न च पुनर्धर्मस्य सामान्याधिगमोऽस्ति न नास्ति किमयं धर्मः शब्दस्य उतान्यस्येति। एवं तर्हि शब्दे ऽनित्यत्वमित्ययमर्थः साध्यः तस्य च न कृतकत्वादियोग इति युक्तम्। प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः तस्य निर्देशः प्रतिज्ञा उभयावधारणप्राप्तावन्यतरावधारणे च दोषः। यदि साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञालक्षणं व्यतिरेकित्वादिति अत्र साध्यनिर्देशः प्रतिज्ञैव साध्यनिर्देशोऽवधृतः न च प्रतिज्ञा साध्यनिर्देशो नान्यथास्तीति एवमपि साध्यनिर्देशो न प्रतिज्ञालक्षणम् अव्यापकत्वात्। यदपि व्यतिरेकि तदप्यलक्षणम् यथा विषाणित्वं गोः यदप्यव्यापकं तदप्यलक्षणं यथा गन्धवत्त्वं द्रव्यस्य। अथ पूर्वोत्तरेऽसाधारणे[१] न क्रियेते तथापि किल वाक्यमनर्थकं भवति न चान्या गतिरस्ति तस्मात् साध्यनिर्देशः प्रतिज्ञेति न युक्तम्। सर्वस्मिन् वाक्येऽसाधारणमिति तु न बुध्यामहे तद्यथा गोपालकेन मार्गे ऽपदिष्टे एष पन्थाः श्रुघ्नं[२] गच्छतीति नावधारणस्य विषयं पश्यामः अवधारणस्य तु विषयः सामान्यश्रुतौ नियमः येन वाक्येन समानश्रुत्यानेकार्थो गम्यते तत्रातिप्रसक्तावतिप्रसङ्गनिराकरणार्थमवधारणमिति न पुनः साध्यनिर्देशः प्रतिज्ञेत्युक्ते क्वचित् प्रसङ्गोऽस्ति यन्निराकरणायावधारणं क्रियते सर्वत्र च साधारणं कुर्वाणो लोकं बाधत इति। यत्र च विशेषणस्यावकाशस्तत्रावधारणस्यापीति नायं दोषः पूर्वोत्तरेऽवधारणे न कल्प्येते इति। ननु साध्यनिर्देशः प्रतिज्ञेत्युक्ते साध्ययोर्हेतुदृष्टान्तयोरपि प्रसङ्गो यथाऽनित्यः शब्दश्चाक्षुषत्वात्

(१) अवधारणे—इति साधुः। (२) श्रुघ्नं नगरम्।

नित्यः शब्दोऽस्पर्शत्वाद्बुद्धिवच्चेति न सूत्रार्थापरिज्ञानात् साध्यनिर्देशः प्रतिज्ञेति प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनम्। न च चाक्षुषत्वं प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनमपि तु धर्मनिर्देशोऽयम् चाक्षुषत्वादिति। तथा बुद्धेर्नित्यत्वमिति। अथ पुनः साध्यनिर्देशग्रहणात्साध्यनिर्देशनिवृत्तिः साध्यनिर्देशग्रहणात् किलासाध्यनिर्देशो निवर्त्यते असाध्यं च द्वेधा सिद्धमनुपपद्यमानसाधनं च। तत्र साध्यनिर्देश इत्यनेन वचनेनोभयं निवर्त्यते सिद्धमनुपपद्यमानसाधनं च तत्रानुपलभ्यमानसाधनं चाक्षुषत्वं बुद्धिनित्यत्वं च तस्मान्न तत्र प्रसङ्गः न पुनः कृतकत्वाद्यन्यतरपक्षसिद्धं साध्यतयोपनीयते तदा कृतकत्वादेः साध्यनिर्देशस्य प्रतिज्ञात्वं प्राप्नमिति नैष दोषः विकल्पानुपपत्तेश्च यदि तारं ब्रवीति(१) कृतकत्वं साध्यमिति तदा सूत्रार्थापरिज्ञानादिति परिहारः। अथ कृतकः शब्द इत्येतत् साध्यमित्येवं प्रत्यवतिष्ठते तदाभ्युपगम एव दोषत्वेन दर्शित इति न किञ्चिद्बाध्यते। यच्चेदमुच्यते। असाध्यनिर्देशनिवृत्तिद्वारेण साध्यनिर्देशः प्रतिज्ञेत्युच्यत इति तद्विधीयमानप्रतिषिध्यमानशब्दार्थाभ्युपगमान्नियमो न युक्तः क्वचिद्वाक्ये विधीयमानोऽर्थोऽभिधीयते क्वचित् प्रतिषिध्यमान इति एकान्तवादिनस्तु दोषः तथा च न प्रतिषिध्यमान एव पदार्थो भवति तच्चोपरिष्टाद्वक्ष्याम इति। साध्यनिर्देश इति च प्रतिज्ञायां साध्ययोर्हेतुदृष्टान्तयोः प्रसङ्ग इति न प्रसङ्गः सिद्धान्तविशेषणत्वात् साध्यशब्दस्य, सिद्धान्तविशेषणोऽयं साध्यशब्दः न साध्यमात्रं तथा च कः प्रसङ्गो

(१) तारम् उच्चैः ब्रवीति।

हेतुदृष्टान्तयोः सिद्धान्तस्यानन्तरोक्त्या साध्यशब्दस्य विशेषणं भवति सिद्धान्तोऽनन्तरमवधारितत्वात् यद्यनन्तरोक्त्या सिद्धान्तो विशेषणं तन्निर्देशः प्रतिज्ञेति कार्यं न सर्वतन्त्रसिद्धान्तनिराकरणार्थत्वात्। यदि तन्निर्देशः प्रतिज्ञेत्युच्यते सर्वतन्त्रसिद्धान्तोऽपि प्रकृतत्वात् तच्छब्देनानुकृष्येतेति तन्निर्देशोऽपि प्रतिज्ञेति स्यात् अतः साध्यग्रहणेन साध्यः सिद्धान्तः सम्बध्यते न सर्वतन्त्रसिद्धान्त इति सामर्थ्यात् सर्वतन्त्रसिद्धान्तनिराकरणमिति। यद्यप्ययं सामान्यशब्दः तन्निर्देशः प्रतिज्ञेति तथापि सामर्थ्यात् सर्वतन्त्रसिद्धान्तो निराक्रियते सर्वतन्त्रसिद्धान्तस्यासाध्यत्वात् इतरस्य च प्रतितन्त्रादेरवस्थायां साध्यत्वादिति। उदाहरणम् ब्राह्मणान् भोजयेति अग्रेषब्राह्मणभोजनस्याग्रक्यत्वात् सामर्थ्यान्नियम इति। यदि सामर्थ्यमाश्रीयते समस्तस्यानभिधानं तन्निर्देशः प्रतिज्ञेत्येतदपि न कर्तव्यम् प्रतिज्ञेति वक्तव्यम्। सामर्थ्यतो नियमो गम्यत इति नावोचः किन्नो बाध्यत इति कथं न बाध्यते यदभ्युपगतं तन्निवर्तते तन्निर्देशः प्रतिज्ञेति जिज्ञासादिविशेषणाद्वा न प्रसङ्गः साध्यनिर्देशः प्रतिज्ञेति जिज्ञासादिविशेषणाद्वा न प्रसङ्गः साध्यनिर्देशः प्रतिज्ञेति जिज्ञासादिभिः प्रकरणोत्थापनावयवैर्विशेषितमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति यस्मिन्नर्थे जिज्ञासादयः सोऽर्थः साध्य इति तस्य निर्देशः प्रतिज्ञेति। तथा च हेतुदृष्टान्तयोः कः प्रसङ्गः अर्हत्यर्थे वा कृत्याभिधानं साध्यनिर्देशः प्रतिज्ञेत्यर्हत्यर्थे कृत्यः साधनमर्हतीति साध्यः तस्य निर्देशः प्रतिज्ञा। न च हेतुदृष्टान्तौ साधनार्हावतो न प्रसङ्गः कर्मकरणयोर्धर्मभेदाद्वा अन्यः कर्मधर्मोऽन्यः करणधर्म इति कर्तु-

रीप्सिततमं कर्मेति कर्मधर्मः न चेतरस्य धर्म इतरधर्मो भवितुमर्हतीति कर्मनिर्देशस्यायं साध्यनिर्देशः प्रतिज्ञेति करणनिर्देशस्याचुषत्वादिति अतो न प्रसङ्गः। साध्यासिद्धसिद्धभेदाद्वा अन्यत् साध्यमन्यत् सिद्धमन्यच्चासिद्धमिति साध्यमन्यतरपक्षसिद्धमन्यतरं प्रति कर्मतया यदुपादीयते उभयपक्षासम्प्रतिपन्नमसिद्धम् उभयपक्षसम्प्रतिपन्नं सिद्धमिति तेन यथा सिद्धमित्युक्तेन साध्येनासिद्धे च प्रसङ्गः तथा साध्यमित्युक्तेनासिद्धे सिद्धे च प्रसङ्गः अथाप्रसक्तमपि देश्यते सर्वे ऽर्थाः सिद्धा अपि प्रतिज्ञात्वेन देशनीया भवन्ति। अथवा साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञाद्यवयवविषयो योऽर्थः स साध्यः यः प्रतिज्ञादीनामवयवानां विषयो धर्मी प्रसिद्धधर्मविशिष्टः स धर्मान्तराधिकरणत्वेन साध्यते न तथा हेतुदृष्टान्तयोः प्रसङ्गः न चेदयं प्रसङ्गोऽस्ति तस्मादिष्टग्रहणमनर्थकं साध्यनिर्देशः प्रतिज्ञेति किल साध्यस्येष्टग्रहणेनाविशेषितत्वात् साध्ययोर्हेतुदृष्टान्तयोः प्रसङ्ग इति मन्यमानैः कैश्चिदन्यथा पचतिचणानि क्रियन्ते तद्यथा पचो यः साधयितुमिष्ट इति। अत्रेष्टग्रहणं तावदनर्थकं साध्यपदेन हेतुदृष्टान्ताभासोक्तेर्निराकृतत्वात् तन्निराकरणार्थमिष्टग्रहणमित्ययुक्तम् कर्मग्रहणाच्चावाप्तमेतदिष्टमीप्सितमिति चानर्थान्तरम् अथाप्यनिष्टपचव्युदासार्थमिष्टग्रहणं क्रियते अर्थतः किलास्य नेष्टं भवति यत् स्ववचनादिना विरुध्यत इति यथा च वाचकाः शब्दा इति अवाचकत्वं च शब्दानां प्रतिज्ञायते शब्दा एवार्थप्रत्यायनायोच्चार्यन्त इति व्याहतम् अनुष्णोऽग्निरिति प्रत्यचविरोधः अश्रावणः शब्द इति प्रत्यचविरोधं केचिदर्णयन्ति तदयुक्तम् इन्द्रियवृत्तीनामतीन्द्रियत्वात्

इन्द्रियवृत्तयोऽतीन्द्रिया इदमनेनेन्द्रियेण गृह्यते नेदमनेनेति न कस्यचित् प्रत्यक्षमस्ति किन्तु तद्भावाभावानुविधानात्। रूपादिज्ञानादिन्द्रियवृत्तयोऽनुमीयन्ते तस्मान्नेदमुदाहरणम् उदाहरणन्वनुष्णोऽग्निरिति युक्तम्। आगमविरुद्धमिति वैशेषिकस्य नित्यः शब्द इति यथा इदमपि नागमविरुद्धमिति पश्यामः। न हि वैशेषिकेण शब्दानित्यत्वमागमतः प्रतिपन्नम् अपि त्वनुमानात् कारणतोऽधिकारादित्येवमादेः तदप्यनुमानविरुद्धमेव। अथ सूत्रकारवचनात् प्रतिपन्न इत्यागमविरोधः ननु च नित्यो घट इत्ययमप्यागमविरोधः प्राप्तः तस्माद् ब्राह्मणेन सुरापेयेत्यागमविरोधः प्रसिद्धिविरुद्धं तु न बुद्ध्यामहे कोऽयं प्रसिद्धिविरोध इति प्रसिद्धिः प्रत्यक्षादीनां प्रमाणानामन्यतमेनार्थप्रतिपत्तिः यथा चन्द्रः शशीति। तस्मात् पूर्वप्रमाणविरोध एवान्तर्भवतीति न प्रसिद्धिविरोधाभिधाने पृथक् प्रयोजनं पश्यामः शक्यन्तु प्रतिपत्तुम् सर्व एवायं प्रसिद्धिविरोध इति तदर्थनिराकरणार्थमिष्टग्रहणं पठन्ति। एतच्च सर्वं न युक्तमिति पश्यामः। कथं स्वार्थापवादादिदोषाणां प्रतिज्ञादोषत्वेनाभ्युपगमात् सर्व एते[१] स्वार्थापवादादिदोषाः प्रतिज्ञादोषत्वेन सम्भवन्तीति न पक्षे दोषत्वेन कथमिति अर्थस्य तादवस्थ्यात् यथाभूतोऽर्थोऽभिधीयमानः तथाभूत एवानभिधीयमान इति वचनमपि तर्ह्येवमेवेति वचनेऽप्येते दोषा माभूवन् सत्यममी नार्थदोषाः न वचनदोषाः किन्तु पुरुषदोषाः ये हि कर्तृदोषास्ते क्रियाद्वारेण उद्भाव्यन्त इति क्रियायां कर्तृदोषमुपचर्य दुष्टा क्रियेत्युच्यते

(१) सर्वत्र ते—पा० २ पु०।

एवं वक्तृदोषान् वचने उपचर्य दुष्टं वचनमित्युच्यते। वस्तुतस्तु पक्षदोषो नार्थे न वचन इति अर्थस्य क्रियासामर्थ्यात् सर्वोऽर्थः स्वस्यां स्वस्यां क्रियायां समर्थः स तु स्वक्रियाव्यतिरेकेण क्रियान्तरे विनियुज्यमानः कर्तुरेवाकौशलं प्रकाशयति। एवं वचनमपि स्वस्मिन्नर्थे समर्थं विषयान्तरे तु प्रयुज्यमानं वक्तुः संमोहं प्रकटयति। प्रतिज्ञायाः पक्षविषयत्वात् प्रतिज्ञादोषाः पक्षदोषा इत्युच्यन्ते नैतद्युक्तम् हेत्वादिदोषाणामपि पक्षदोषत्वप्रसङ्गात्। एवं सति हेत्वाद्योऽपि पक्षविशेषा इति कृत्वा हेत्वादिदोषा अपि पक्षदोषा भवन्ति ततश्च दूषणं पक्षदोष इति वक्तव्यं न पुनर्दूषणानि न्यूनतावयवोत्तरदोषाक्षेपतयोद्भावनानीति(१)। अथ वाच्यवाचकभावेन नियमो भविष्यतीति न साध्यसाधकभावेनेति न युक्तम् प्रमाणाभावादिति साधनविषयत्वेनावतिष्ठते पक्षो वचनविषयत्वेन च तत्र वाच्यवाचकभावनियमाद्वचनदोषाः पक्षे भवन्तु, माभूवन् साध्यसाधकभावात्। साधनदोषाः पक्षदोषा इति न प्रमाणमस्ति वचनदोषाश्च पक्ष उपचर्यन्ते। न हि सम्भवे सत्युपचारो लभ्यते तद्यथा मञ्चाः क्रोशन्तीति क्रोशनक्रियाया मञ्चे ऽसम्भवात् लौकिकवाक्याख्यानं कुर्वता मञ्चस्था इति स्थानिषु पुरुषेषु न(२) मञ्चशब्दमारोप्य प्रमाणसम्भवेनोपचारः क्रियते मञ्चाः क्रोशन्तीति। न पुनः प्रतिज्ञादिदोषाः प्रतिज्ञायां न सम्भवन्ति यतस्तत्रासम्भवन्तोऽवश्यमन्वाख्येयतया व्यवस्थिताः पक्षे उपचर्येरन्निति आकस्मिकं च मुख्यार्थव्यतिक्रमं कुर्वाणो यदुक्तं नैयायिके हेतुप्रतिषेधे नाकस्मिको मुख्यार्थव्यतिक्रमो लभ्यत इति

(१) उद्भाव्यमानानि—पा० १ पु०। (२) नकारोऽसम्बन्धः।

तद्व्याहन्येत । अथेष्टग्रहणेन लौकिकोऽभिधीयते दृष्टमभिप्रेतमिति। अयमप्यर्थः साधनादेव गम्यते न हि कश्चिदनिष्टं साधयति योऽप्यनिष्टं भयात् साधयति तस्याप्यनिष्टनिवृत्तिरिष्टेति नानिष्टं साधयति तस्मादिष्टग्रहणमनर्थकम् । एवं विचारणायामिष्टोऽर्थः पच्च इत्यत्रापीष्टग्रहणमनर्थकम् का चेयं विचारणा यदि साधन-दूषणप्रयोगः तत्रानेकार्थसन्निपाते न ज्ञायते कथमिष्टमिति किं साध्यत्वेन साधनत्वेन दूषणत्वेन दूष्यत्वेन वेति। अथ संशयो विचारणा तद्यथा आत्मनोऽस्तित्वनास्तित्वविचारणायामिति आत्मनोऽस्तित्वना-स्तित्वसंशय इति यावदुक्तं भवति तावदुक्तव्यं भवति आत्मनोऽस्ति-त्वनास्तित्वविचारणायामिति संशयो विचारणापदस्य नायमर्थः न विचारणा संशयपदस्य विचारणा हि नाम संशयोत्तरकालभाविनी साधनदूषणप्रयोगरूपान्यतराधिकरणनिर्णयावसाना सा न संशय इति संशयः न पुनरवधारणात्मकः प्रत्यय इति न च वादे संशयो भवति तयोर्निश्चितत्वात् निश्चितौ हि विवादं कुरुत इति सूत्रेण साध्यत्वेनेप्सितः पच्च इति प्रत्युक्तम् । ईप्सितग्रहणस्यानिष्ट-निराकरणार्थत्वात् विरुद्धार्थानिराकृत इति न वक्तव्यम् । पच्चो यः साधयितुमिष्ट इत्यत्रेष्टग्रहणेनानिष्टपच्चनिराकरणमिहापीप्सित-ग्रहणादनिष्टपच्चनिरास इत्युत्तरकारिकार्द्धं न वक्तव्यो विरुद्धा-र्थानिराकृत इति । अथ विरुद्धार्थानिराकृत इत्यनेनानिष्टाः पच्चदोषा निराक्रियन्त ईप्सितग्रहणं तर्हि व्यर्थम् । अथोभय-मीप्सितग्रहणं विरुद्धार्थानिराकृत इति च पच्चदोषाणां निरा-कर्तृ तं वा पच्चो यः साधयितुमिष्ट इत्यत्रापि विरुद्धार्थानिराकृत

इति कर्त्तव्यम्। सर्वथेते पक्षलक्षणे विचार्यमाणे एकस्य न्यूनमेकस्याधिक्यं ख्यापयत इति। स्वयं साध्यत्वेनेप्सित इति च स्वयङ्ग्रहणं न कर्त्तव्यम्। किङ्कारणम्। कर्मणः कर्त्रपेक्षत्वात् यथा कर्त्ता वृक्षं छिनत्तीत्युक्ते स्वयमिति गम्यते न ह्यन्यस्य क्षेद्यमन्यश्छिनत्ति। एवं यस्य साध्यं स साधयितेति[१] स्वयमिति गम्यते। सोऽयं परस्याचराधिक्यदोषानविविच्य स्ववचनयोगेषु संमूढ इति। यदपि वादविधानटीकायां साधयतीति शब्दस्य स्वयं परेण च तुल्यत्वात् स्वयमिति विशेषणं साधयतीति किलायं शब्दः प्रयोज्ये प्रयोक्तरि च तुल्यरूपो भवतीति। सत्यम्। तुल्यरूप एष शब्दो न पुनः साधारणप्रयोगे प्रयोजनं पश्यामः। अत एवं वक्तव्यम्। पक्षो यः साधयितुमिष्ट इति। तत्त्वभाक्तयोश्च तत्त्वसम्प्रतिपत्तेः प्रयोक्तर्यसम्प्रतिपत्तेः यद्यप्ययं तुल्यरूपः शब्दस्तथापि प्रयोज्य एव सम्भवति साधयतीति न प्रयोक्तरि भाक्तत्वात् प्रयोज्ये चाञ्जसत्वात् तुमुनश्च समानकर्तृके नियमात् साधयितुमिति तुमुनः प्रयोगोऽयम् स चायं समानकर्तृकेष्वेव दृष्टः। तद्यथा स्नातुं गच्छामीति न पुनरनुन्मत्त एवं ब्रूयात् स्वयं स्नातुं यामीति तथेहापि। यद्यपि साधयतिशब्दस्तुल्यरूपस्तथापि तुमुना विशेषितत्वात् प्रयोक्तर्यनतिप्रसङ्गः यदपि स्वयंशब्देन[२] शास्त्रानपेक्षमभ्युपगमं दर्शयतीत्येवोक्तम्। किमुक्तम्। परावज्ञानस्यायुक्तत्वादित्येवमादि किं पुनः शास्त्रं यदपेक्षमभ्युपगमं दर्शयति ननु शास्त्रं प्रत्यक्षागमाभ्यामविरुद्ध आगमस्तदनपेक्षमभ्युपगमं दर्शयतीति ब्रुवताऽप्रमाणैकमर्थमभ्युपेतीत्युक्तम्। यथाप्रमाण-

(१) सिसाधयिषेति—पा० २ पु०। (२) स्वयं शब्देन—इति क्वचित्।

कोऽभ्युपगमो नामावभ्युपगन्तुं स्वस्यात्मना[१] युक्तः नापि प्रतिपादयितुं युक्त इति। यदपि वादविधौ साध्याभिधानं प्रतिज्ञेति प्रतिज्ञालक्षणमुक्तं तदप्युभयथा दोषान्न युक्तम्। कथमिति। यदि तावत् पूर्वप्रक्रान्तपक्षमपेक्षमाणेनेदमुच्यते साध्याभिधानं प्रतिज्ञेति तदा साध्यग्रहणानर्थक्यम्। प्रक्रान्तः पक्षस्तच्छब्देनाभिसम्भन्त्स्यत इति तदभिधानं प्रतिज्ञेति वक्तव्यम्। अथ पक्षानपेक्षं स्वतन्त्रमेतल्लक्षणं तथापि यो नैयायिकप्रतिज्ञायां दोष उक्तः स इह प्रसक्तः यस्तु तत्र भवता परीहारः[२] क्रियते ममापि स एव परीहारो भविष्यतीति न वक्तव्यम्। मयानभ्युपगमात् भवता चाभ्युपगतत्वात् यथा नाम कश्चित्परं ब्रूयात् माता तव बन्धकी[३] स्त्रीत्वादिति स तस्योत्तरं ब्रूयात्। न बन्धकीत्वे स्त्रीत्वं हेतुः किन्तु स्वपुरुषव्यतिरेकेण पुरुषान्तरसम्बन्ध इति स्त्रीत्वाद्बन्धकीत्वं ब्रुवाणस्य मातुर्बन्धकीत्वमपरिहार्यम्। अथ परपुरुषसम्बन्धं हेतुमभ्युपेयात् स्त्रीत्वाद्बन्धकीत्वं व्याहतमिति तथा भवतोऽपि व्याघातः साध्यहेतुदृष्टान्तयोः निर्देशः प्रतिज्ञा प्राप्नोतीति तस्मादपेतसर्वदोषमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति॥

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः॥३४॥

हेतोरवसरप्राप्तस्य लक्षणापदेशद्वारेणोदाहरणसाधर्म्यमिति सूत्रम्। उदाहरणेन साधर्म्यमुदाहरणसाधर्म्यम्। किं पुनरुदाहरणं वक्ष्यमाणकं तेन साधर्म्यं समानधर्मता यो धर्मः साध्ये भवति तथाभूत एवोदाहरणेऽपीति न पुनः स एव अन्यधर्मस्यान्यत्रावृत्तेः

(१) स्वस्यात्मना—पा० १ पु०।
(२) 'परिहार'शब्दस्य स्थाने तालपत्रपुस्तके सर्वत्र परीहार इति पाठः।
(३) बन्धकी पुंश्चली।

न ह्यन्यस्य धर्मोऽन्यत्र वर्तते किन्तु तत्तुल्यः स एवेत्युच्यत इति। यदि पुनः साधर्म्यं हेतुरित्येतावन्मात्रमुच्येत भवत्येवं विवक्षितार्थसिद्धिरनिष्टप्रतिषेधस्तु न स्यात् साधर्म्यमात्रं हेतुः स्यादित्यतोऽनिष्टप्रतिषेधार्थमुदाहरणग्रहणम् उदाहरणसाधर्म्यग्रहणादनुदाहरणसाधर्म्यमर्थान्निराकृतं भवति अवधारणेन वा निराक्रियते उदाहरणेनैव साधर्म्यं न पुनरनुदाहरणेनापि साधर्म्यमेव[1] पुनर्वैधर्म्यमपीति। कस्य पुनरुदाहरणेन साधर्म्यं कस्यान्यस्य पुनः स्यात् साध्यस्य प्रकृतत्वात् प्रत्यासत्तेश्च प्रकृतं प्रत्यासन्नं च साध्यं तस्मादुदाहरणसाधर्म्यं साध्यस्य। अपि च साध्येन साधर्म्यमिति साधर्म्यमेवेत्यवधार्यते किं पुनरनेनावधारणेन लभ्यते साध्यैकदेशवृत्तिरहेतुरिति लभ्यते। सोऽयं हेतुः साध्योदाहरणाभ्यां प्रतिसंहितः किं पुनरस्य प्रतिसन्धानं साध्ये व्यापकत्वम् उदाहरणे चासम्भवः एवं द्विलक्षणस्त्रिलक्षणश्च हेतुर्लभ्यते उदाहरणेनैव साधर्म्यमित्येवं ब्रुवतानभ्युपगतविपक्षस्याप्युदाहरणेनैव साधर्म्यमिति द्विलक्षणोऽपि हेतुर्भवतीत्युक्तम्। यदा पुनर्विपक्षमभ्युपैति तदाप्युदाहरणेनैव साधर्म्यान्नानुदाहरणेनेति त्रिलक्षणो हेतुरित्युक्तं भवति। तदेवं द्वावप्यन्वयव्यतिरेकिणौ यथा वैशेषिकस्यानित्यः शब्दः कृतकत्वात् सामान्यतोऽस्मदादिवाह्यकरणप्रत्यक्षत्वाद्वेति द्वावन्वयिनौ यथा सर्वानित्यवादिनः अनित्यः शब्दः प्रमेयत्वात् अमूर्तत्वाच्च तदेवमन्वयव्यतिरेकिभेदवानन्वयवांश्चतुःप्रकारो हेतुरित्युक्तं भवति। तदेवं हेतुस्वरूपावधारणाद्धेत्वाभासा निराकृता भवन्ति। तच्चोदाहरणेनैव साधर्म्यमित्यनेन विपर्ययहेतोरनैकान्तिकस्य च निराकरणम्।

(१) साधर्म्यमिवेति क्वचित्।

साधर्म्यमेवोदाहरणेनेत्यनेनावधारणेन साध्याव्यक्तिः साध्यैकदेशव्यक्तिश्च निराकृत इति। तच्च तावद्विपर्ययहेतुरश्वो विषाणित्वात् गौर्विषाणित्वादित्यनैकान्तिकः साध्याव्यक्तिश्चाक्षुषत्वादनित्यः शब्द इति। साध्यैकदेशव्यक्तिरनित्याः परमाणवो गन्धवत्त्वादिति स्वरूपतस्तूभयनैकान्तिकादिग्रहणं न कर्त्तव्यम्। यद्यनेन हेतुलक्षणेन एवंभाव्यमानेनानैकान्तिकहेत्वादयो निराक्रियन्ते। नन्वनैकान्तिकः व्यभिचार इत्येवमादिसूत्रानारम्भः नातिप्रसक्तस्य नियमार्थत्वात्। अनेकधा हेत्वाभासा भिन्ना इति तेषां नियमज्ञापनार्थमनैकान्तिकादिग्रहणमिति। उदाहरणसाधर्म्याच्च किमन्यत्साध्यसाधनमित्येके। न किलोदाहरणसाधर्म्यव्यतिरेकेण साध्यसाधनमस्तीत्यत एवं कर्त्तव्यम्। स्वत उदाहरणसाधर्म्यं हेतुरिति। अथ पुनः साध्यसाधनशब्दोपादानमुदाहरणसाधर्म्यविशेषणार्थमेवमपि पञ्चम्यपदेशोऽनर्थक इति। न हि भवति नीलादुत्पलमिति। अन्ये तु पञ्चम्यपदेशादनर्थकमन्यथा(१) वर्णयन्ति। अर्थान्तरे दृष्टत्वादित्यनर्थक इति। अर्थान्तरे किल पञ्चमी दृष्टा यथा ग्रामादागच्छति। न पुनरुदाहरणसाधर्म्यव्यतिरेकेण साध्यस्य साधनमस्तीत्यतः पञ्चम्यपदेशोऽनर्थक इति। साध्यसाधनविशिष्टं चोदाहरणसाधर्म्यं हेतुत्वेन ब्रुवाणेनाभिधेयो हेतुरित्युक्तं भवति। तथा च साध्यनिर्देशः प्रतिज्ञेति व्याहतं भवति न चाभिधानाभिधेयात्मकः समुदायो दृष्ट इति नैवोभयेषामवयवत्वम्। तन्नैष दोषो न परीहारान्तरं प्रयोजयति तेनैवापाकृतत्वात् उदाहरणसाधर्म्यात् साध्यसाधनवचनं हेतुरित्येवं व्याचक्षाणेन समस्त एव दोषोऽपाकृतो भवतीति। अतो न परीहारान्तरं प्रयोजयति साधर्म्यस्य व्यभि-

(१) पञ्चम्यपदेशानर्थक्यमन्यथा—इति साधुः।

चार्यव्यभिचारित्वात् विशेषणयोगो न तद्वचनस्याप्रकारकत्वात् यत्त-
त्प्रकारवत्तद्विशेष्यते साधर्म्ये चैतदस्ति न च वचसोति वचसः कार-
कत्वं न भवतीति न बुद्धामहे यथैवार्थः प्रकारवान् तथा वचन-
मपीति। अर्थस्तावत् कथं प्रकारवान् उभयथाभावात् यस्मादयमर्थ
उभयथा भवति नित्योऽनित्यः मूर्तोऽमूर्तश्च वचनमपि तर्ह्युभयथा
भवतीति तुल्यम्। नित्यानित्यमूर्ताऽमूर्तशब्दाभिधेयमिति। दृष्टश्च
शब्दे विशेषणयोगः यथा किमयमाह गौरित्ययमाह इतिपरतया
शब्दः शब्दान्तराद्व्यवच्छिद्यते स्वयं वचनविशेषकाणि बह्वनि वाक्यानि
प्रयुक्तानि। तद्यथा स्वपरपक्षयोः सिद्धसिद्ध्यर्थं वचनं वाद इति। अथ
वचनं नैवंविधमिति(१) सिद्धसिद्ध्यर्थं वचनं वाद इत्येवमादि व्याह-
तम्। सोऽयं सूक्ष्मोऽचिकया परस्य दोषानभिधानो लोकादप्यपभ्रष्ट
इति। यद्यप्यर्थान्तरे दृष्टत्वादित्यनर्थकः पञ्चम्यपदेश इत्येवं ब्रुवाणः
स्वसिद्धान्तं बाधते न हि भवन्तः सेनावनादीन्यर्थान्तरभूतानि प्रति-
पद्यन्ते अथ च पञ्चम्यपदेशो भवति वनादयं वृक्ष आनीतः सेनातोऽश्व
इति। दृष्टश्च तन्त्रान्तरे पञ्चम्यपदेशोऽनर्थान्तरे सन्धिवियहाभ्यां
षाड्गुण्यं सम्पद्यते। अनभ्युपगतार्थान्तरविशेषस्य च हेतुर्विपक्षादिशेष
इति। पञ्चम्या अर्थान्तरवाचकत्वं कुतः यदप्युदाहरणसाधर्म्यस्येति
वक्तव्यम् नोदाहरणसाधर्म्यादिति तदपि न विवक्षातः कारकशब्द-
प्रयोगात् यदा साधर्म्यमभिधीयमानतया विवक्षितं भवति उदा-
हरणसाधर्म्यस्येति युक्तम्। यदा तूदाहरणसाधर्म्यस्य निमित्तभावो
वचने विवक्षितस्तदोदाहरणसाधर्म्यादिति निमित्तपञ्चमी युक्ता कथं

(१) नैव विधम्—पा० २ पु०।

पुनरुदाहरणसाधर्म्यस्य निमित्तभावः सति भावात् यस्मादुदाहरणसाधर्म्यं बुद्ध्वा विवक्षाप्रयत्नवायूदीरणताल्वाद्यभिघातादयः शब्दस्य निमित्तं भवन्ति अतः पारम्पर्येणोदाहरणसाधर्म्यमपि निमित्तमिति तस्मात् पञ्चम्यभिधानमेव ज्यायः उदाहरणमनित्यः शब्द उत्पत्तिधर्मकत्वात् उत्पत्तिधर्मकमनित्यं स्थाल्यादि दृष्टमिति । किं पुनरनित्यं नाम यस्यानित्यत्वं तदनित्यम् अथानित्यत्वं किम् उभयान्तावच्छिन्नवस्तुसत्तासम्बन्धः सत्ता वा तद्विशेषणा अथोत्पत्तिधर्मकं किम् उत्पत्तिर्धर्मो यस्य स उत्पत्तिधर्मा उत्पत्तिधर्मैवोत्पत्तिधर्मकः का पुनरियमुत्पत्तिः असद्विशेषणस्य सतोऽत्यन्तमभावभावप्रतिषेधः सदसद्विशेषणं सद्भवति तत्पूर्वं नासीत् पश्चाद्भवतीति गम्यते तस्यात्यन्तमभावोऽत्यन्तञ्च भाव इति प्रतिषेधो यः स उत्पत्तिशब्दार्थः सत्ता वैवंविशेषणा वाक्यार्थाभ्यनुज्ञानाच्च पदार्थाभ्यनुज्ञातो यो वाक्यस्यार्थोऽभूत्वा भवतीति स पदस्यार्थ उत्पद्यत इति । सोत्पत्तिर्धर्मो यस्य स भवत्युत्पत्तिधर्मक इति ॥

तथा वैधर्म्यात् ॥ ३५ ॥

किमेतावद्धेतुलक्षणमिति नेत्युच्यते किं तर्हि तथा वैधर्म्यात् । अत्राप्युदाहरणवैधर्म्यादित्युदाहरणेनैव वैधर्म्यं नानुदाहरणेनेति वैधर्म्यमेवो[१]दाहरणेन साधर्म्यमपीति उदाहरणमनित्यः शब्दः उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यं दृष्टम् आत्मादिद्रव्यमिति भाष्यम् । एतत्तु न समञ्जसमिति पश्यामः प्रयोगमात्रभेदात् प्रयोगमात्रं हि भिद्यते नार्थ इति । न च प्रयोगमात्रभेदादन्यत्वान्तरं भवितुमर्हतीति

(१) वैधर्म्यमिवेति क्वचित् ।

उदाहरणमात्रभेदाच्च उदाहरणमात्रं केवलं भिद्यते आत्मा घट इति। यदि चोदाहरणभेदाद्भेदो भवति तथा वैधर्म्यादिति न पठितव्यम्। किं कारणम्। उदाहरणभेदादेव भेदो गम्यते उदाहरणसूत्रं च भेदकमस्ति तद्विपर्ययाद्वा विपरीतमिति तस्मान्नेदमुदाहरणं न्याय्यमिति। उदाहरणं तु नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्रसङ्गादिति। यदुभयपक्षसम्प्रतिपन्नमप्राणादिमत् तत्सर्वं निरात्मकं दृष्टम् न चेदमप्राणादिमद्भवति तस्मान्नेदं निरात्मकमिति। सोऽयमवीतः परपक्षप्रतिषेधार्थ एव भवति तावेतौ वीतावीतहेतू लक्षणाभ्यां पृथगभिहिताविति। तत्र स्वरूपेणार्थपरिच्छेदकत्वं वीतधर्मः अवीतः पुनः परपक्षप्रतिषेधेनैव प्रवर्तत इति। एकस्य 'विधीयमानोऽर्थ इतरस्य प्रतिषिध्यमानः कथं पुनरयमवीतोऽर्थपरिच्छेदक इति। अथ योऽभ्यनुज्ञातो वीतोऽर्थपरिच्छेदकः स कथम् अन्वयादिति चेत् वीतो हेतुरन्वयेन प्रतिपादयति। अथ प्रमेयत्वं कस्मान्न हेतुः यद्यन्वयस्यैतत् सामर्थ्यम् व्यभिचारात् प्रमेयत्वं न हेतुः न तर्ह्यन्वयः प्रतिपादकः अपि त्वव्यभिचारः यदि चाव्यभिचाराद्धेतुरर्थं प्रतिपादयति तदा अदेशमेतत् कथमवीतः प्रतिपादक इति अवीतस्यापि व्यतिरेकाव्यभिचारित्वात् प्रतिपादकत्वमिति। कथं यावदप्रमाणादिमत्[१] तत् सर्वं निरात्मकं दृष्टमिति अप्राणादिमत्त्वं च जीवच्छरीरान्निवर्तते तस्मात्तदव्यभिचारिनिरात्मकत्वमपि निवर्त्स्यतीति। अथ पुनरप्राणादिमत्त्वनिवृत्तिरेव प्रतिपाद्यते न पुनर्निरात्मकत्वस्य न युक्तमेवं भवितुं किं कारणम् पक्ष

(१) अप्राणादिरिति साधुः।

एवं सति व्यभिचारो दर्शितः स्यात् पक्षव्यभिचारोपदर्शने सति शक्यं वक्तुम् अन्वयिनि तु हेतौ शब्दे नित्यत्वमस्तु सति कृतकत्व इति तस्माद्यथान्वयिनोऽन्वयसम्बन्धाव्यभिचारः प्रतिपादकः तथा व्यतिरेकिणोऽपि व्यतिरेकाव्यभिचार इति। एतेन यथाऽवीतहेतोरव्यभिचारिण एकस्य धर्मस्य दर्शनादितरधर्मानुमानमेवं वीतहेतावपि एकधर्मनिवृत्तिदर्शनादितरधर्मनिवृत्त्यनुमानमिति। सर्वात्मकत्वप्रसङ्ग इति चेत् न विकल्पानुपपत्तेः यद्येकधर्मनिवृत्तिदर्शनादितरधर्मनिवृत्तिरनुमीयते तन्निवृत्त्या च सात्मकत्वं सिद्धतीति मन्यसे एवं च सर्वात्मकं शरीरं प्राप्नोति किङ्कारणम् अप्राणादिनिवृत्तेरडित्यादिनिवृत्तिप्रतिपादकत्वात् नेदमडित्यवच्छरीरं प्राणादिमत्त्वप्रसङ्गादेवमडित्यादिप्रतिषेधोऽपि वक्तव्य इति। तच्च नैवं विकल्पानुपपत्तेः इदं तावत् भवान् पृष्टो व्याचष्टाम् किमवधारितकार्यस्वभावः पदार्थो डित्यशब्दवाच्यः आहो नेति। यद्यवधारितकार्यस्वभावः संज्ञाभेदमात्रमात्मा स इति। अथानवधारितकार्यस्वभावः तस्य व्यावृत्तिरशक्या प्रतिपादयितुम् व्यावृत्तिप्रधानं चेदं वाक्यं तस्मादवीतहेतोरर्थमबुद्ध्वा सर्वात्मकता देश्यत इति। यदि तर्ह्यसाधारणो धर्मो हेतुर्नित्या पृथिवी गन्धवत्त्वादित्यादयो हेतवः प्राप्नुवन्ति न हेत्वर्थापरिज्ञानात् सत्यमसाधारणो वैधर्म्यहेतुः न पुनर्वैधर्म्यं व्यभिचारि गन्धवत्त्वं च नित्यानित्यव्यभिचारि तस्मादन्वयिनो व्यतिरेकिणश्च नान्वयव्यतिरेकौ हेतुभावे निमित्तम् किन्त्वन्वयव्यतिरेकयोरव्यभिचार इति। यः पुनरसाधारणो धर्मः पक्ष एव केवलं यस्य तत्तुल्यविपक्षौ न स्तः स कस्मान्न हेतुः यथा सर्वं नित्यं सत्त्वात्

सत्यमयमसाधारणो न व्यावृत्तः अव्यावृत्ते[१] हेतुरिति एतेन यः पचैकदेशवृत्तिरविद्यमानसपचविपचः स न हेतुरित्युक्तं भवति। यथा सर्वं नित्यममूर्त्तत्वादिति यः पचैकदेशे वर्तते अविद्यमानसपचो विपचाच्च निवर्तते यथानभ्युपगतनित्यपचस्य नित्ये वाङ्मनसे श्रावणत्वादिति स कस्मान्न हेतुः अयमपि न हेतुः सूत्रार्थेनापोदितत्वात् सूत्रार्थस्तथा वैधर्म्यादिति अत्र च वैधर्म्यमुदाहरणेनैव वैधर्म्यमेव चोदाहरणेन न पुनरिदं वैधर्म्यमेव तस्मान्न प्रसङ्गः। एवमनयोर्वीतावीतहेत्वोः पृथगर्थप्रतिपादकत्वमाकुमारं प्रसिद्धेः यदुक्तं वीतावीतौ न पृथक् प्रतिपत्तिहेतू इति तत्संमूढेनोक्तं हेतुर्विपचाद्विशेष इत्यन्ये। अन्येत्वन्यथा लचणं व्याचचते हेतुर्विपचाद्विशेष इति यदि पुनरेतावन्मात्रमुच्येत हेतुर्विशेष इति किं स्यात् विशेषमात्रं हेतुः स्यात् साधर्म्यमात्रनिराकरणं च स्यात् साधर्म्यमात्रनिराकरणे विशेषमात्रपरिग्रहे च दृष्टानिष्टसंग्रह इति। अतोऽनिष्टहेतुनिराक्रियायै विपचग्रहणम् विपचाद्यो विशेषः स हेतुः विपचाद्विशेषो हेतुरित्येतावति चोद्यमाने विपचाद्विशेषमात्रस्य हेतुत्वं स चानेकभेदः तन्निवृत्त्यर्थं विपचादेवावधार्यते अवधारणे चैतस्मिन् विपचैकदेशवृत्तिरेकोनुषज्यते गौर्विषाणित्वात् स हि विपचादेव विशेष इति नायमनेनावधारणेन निराक्रियत इति तन्निवृत्तौ द्वितीयमसाधारणं विशेष एव च विपचान्न त्वयं विशेष एव विपचैकदेशवृत्तित्वात् सामान्यमपि, तदेवमाभ्यामवधारणाभ्या[२]मन्वयव्यतिरेकीचिलचणो हेतुर्लभ्यत इति। सत्यमेकस्त्रिलचणो हेतुर्लभ्यते समानेपचैकदेश-

(१) व्यावृत्तो हेतुरिति साधुः। (२) व्यवधारणाभ्यां—पा० २ पु०।

वृत्तिः एकस्मिंलक्षण एव निराक्रियत इति । कथमिति । आद्येनावधारणेन विपक्षादेव यो विशेषः स हेतुरिति ब्रुवता यस्तुल्यैकदेशवृत्तिः स निवर्तितो भवति न ह्ययं विपक्षादेव विशेषः किन्तु सपक्षैकदेशादपीति विपक्षैकदेशवृत्तिप्रतिषेधात् समानपक्षाद्यो विशेष एव स हेतुरित्युक्तम्भवति यथाश्वोऽयं विषाणित्वात् न पुनरयं प्रयत्नानन्तरीयकत्वादिर्विपक्षादेव विशेषः किन्तु तत्तुल्यैकदेशादपि यथा श्रूयमाणकेनार्थेनावधारणेऽर्थवती । एवञ्च सति तुल्यैकदेशवृत्तिवत् साध्यैकदेशवृत्तेरपि हेतुत्वप्रसङ्गः येनैव सामर्थ्येन तत्तुल्यैकदेशवृत्तिर्लभ्यते तेनैव सामर्थ्येनानुमेयैकदेशवृत्तिरपि हेतुः प्राप्तः । यथा नित्याः परमाणवो गन्धवत्त्वादिति । ते एतेऽवधारणे यदि तावद्यथाश्रुते भवतस्तत दृष्टः प्रयत्नानन्तरीयकत्वादिर्न हेतुः । अथान्यथा श्रूयते अन्यथा प्रकल्प्यते अभिप्रेतार्थसिद्ध्यर्थं तथाप्यभिप्रेतप्राप्तिवदनिष्टोऽपि गन्धवत्त्वादिर्लभ्यत इति उभयं च लक्षणदोषः अभिप्रेतहानिरनिष्टप्रसङ्गश्च । नैष दोषः वृत्तौ विशेषितत्वात् अनिष्टस्य गन्धवत्त्वादेः प्राप्तिरित्यतो दोषः । यस्माद्वृत्तावाह यो धर्मः पक्षस्येति । अनेन चाक्षुषत्वादिः पक्षासम्भवी निराक्रियते पक्षैकदेशवृत्तिस्तु कथम् न ह्यसौ न पक्षधर्मो न भवति तथा विपक्षैकदेशवृत्तिर्न पक्षस्य धर्म इति तस्मादन्यथा निराकरणे यत्नः कर्तव्य इति न कर्तव्योऽवधारणान्निवृत्तेः । अवधारणादेकदेशवृत्तिर्निवर्त्तिष्यते किं पुनरवधार्यते किं धर्म एव पक्षस्य उत पक्षस्यैव धर्म इति, वेत्तु तावद्धर्म एव पक्षस्येति किं पुनरस्यावधारणस्य सामर्थ्यं किमनेन सम्भवो ज्ञाप्यते उतासम्भवो व्यावर्त्यते उभयथापि नावधारणस्य सामर्थ्यमस्ति सम्भवज्ञानेरसम्भव-

निवृत्तेश्चावधारणमन्तरेणाप्यवगतेः न चैकदेशवृत्तिर्निराक्रियत इति व्यर्थमवधारणम्। अथ पुनर्व्याप्तिरस्यावधारणस्यार्थः धर्म एव पक्षस्येति न पुनरधर्मोऽपि यः पुनः पक्षैकदेशवृत्तिरभावधर्मोऽपि सत्यमनेनैकदेशवृत्तिर्निराक्रियत इति एतस्मिन्नर्थेकं मन्वित्सत इदमन्यत् प्रच्यवते। भवत्वेकदेशवृत्तेर्निराकरणं सपक्षे सिद्धे एतत्पदं किमर्थमारभ्यत इति कथं पुनरिदमनारभ्यं यस्माद् व्याप्त्यर्थेनावधारणेन चरितार्थत्वात्। धर्म एव पक्षस्येति पक्षो नियतो धर्मोऽनियतः तस्यानियतस्य व्याप्त्यभिभ्यां तत्तुल्यपक्षगतिः तच्च विपक्षे नास्तीति सपक्षे सिद्ध इत्येतत्पदं माभूत्। अथ पुनरिदमवधारणमन्यथा[१] क्रियते पक्षस्यैवेति। एवमनन्तरे द्वे अपि पक्षे सिद्धो विपक्षे नास्तीति च बाधिते भवतः कथं सपक्षे सिद्ध इत्येतदवधारणार्थबाधितम् पक्षस्यैव धर्मः सपक्षे सिद्ध इति। न हि लोक एवंप्रकाराणि वाक्यानि प्रवर्तन्ते देवदत्तमेव भोजय यज्ञदत्तं च उत्तरं तु पदं विपक्षे नास्तीति गम्यमानत्वादकार्यं केन गम्यमानत्वादित्यवधारणेन पक्षस्यैव धर्मः सामान्यस्येति गम्यत इति विपक्षे नास्तीत्येतन्न कर्तव्यमिति न च पक्षैकदेशवृत्तिर्निराक्रियत इति यदर्थमवधारणं स एवार्थो हीयत इति। अथ पुनः सपक्षे सिद्ध इत्येतदपि पदमवधारणार्थमेवारभ्यते सपक्ष एव सिद्धः सिद्ध एव सपक्ष इति किं पुनरस्मिन् पदेनावधारणेन लभ्यते यदि सम्भवः सोऽनवधारितोऽपि गम्यते सपक्षे सिद्धः। अथ व्याप्तिः तज्जातीयस्यैकदेशवृत्तिरहेतुरिति प्राप्तम्। अथ सपक्ष एव सिद्ध इति तथापि पूर्वोत्तरे पदे व्याहते भवतः पक्षस्य धर्मो विपक्षे नास्तीति अव-

(१) अवधारणाभ्यां—पा० १ पु०।

धारणार्थबाधितत्वात् पूर्वमनारभ्यं गम्यमानत्वादुत्तरमपि। अथ विपक्षे नास्तीत्येतदप्यवधारणार्थमेवेति। अत्रापि किमवधार्यते विपक्ष एव नास्तीति नास्त्येव विपक्ष इति। यदि विपक्ष एव नास्ति तदा गौर्विषाणित्वादिति हेतुः प्राप्नः स हि विपक्ष एव नास्तीति। अथ विपक्षे नास्त्येवेति न पुनर्मध्यमस्य पदस्यानारम्भः तत्र पूर्वपदं व्याप्त्यर्थं उत्तरपदं विपक्षैकदेशवृत्तिप्रतिषेधार्थम् अथ सपक्षे सिद्ध इत्येतत्पदं किमर्थमारभ्यत इति यदि सम्भवार्थं व्याप्त्यर्थेनाद्यावधारणेन(१) सम्भवो लभ्यत इति व्यर्थम्। तदेतस्मिन् लक्षणे सहवृत्त्या विचार्यमाणे ऽनिष्टहेत्वपनिपातो वा दृष्टहेतुपरित्यागो वाभिप्रेतग्रस्तहानिर्वेति दोषः हेतुर्विपक्षाद्विशेष इति। यदा सौत्रान्तिकपक्षमाश्रित्य लक्षणं विचार्यते तदा विपक्षासम्भवाद्धेतुर्विपक्षाद्विशेष इति विपक्षार्थो वक्तव्यः न ह्यसति विपक्षे विपक्षार्थं पश्याम इति। न चासति पञ्चम्याः प्रयोगः सम्भवति विपक्षादितिपञ्चमीविषयो वाच्यः असति विपक्षे नाधिकरणार्थः सम्भवति इति विपक्षे नास्तीति सप्तम्यर्थो वक्तव्यः विपक्षासम्भवे सति पक्षतज्जातीयव्यापकत्वात् कृतकत्वादेर्विशेषोऽर्थश्चिन्त्यः। कृतकत्वादिति तदसाधारणत्वमसामान्यं न विशेष इति। तदेतल्लक्षणं स्वसिद्धान्तेनासङ्गतत्वादलक्षणमिति तदपि हेतुवार्त्तिकं कुर्वाणेनोक्तम्(२)। सन्निकासम्भवे षट्प्रतिषेधादेकद्विपदपर्युदासेन त्रिलक्षणो हेतुरिति तदप्ययुक्तम् द्विपदलक्षणयुक्तयोर्हेतुत्वात् तत्र किल सन्निका सम्भवति पक्षस्यैव धर्मः समान एव

(१) आद्येवधारणेनेति—पा० २ पु०।
(२) हेतुवार्त्तिकं—पा० २ पु०। वार्त्तिकं कुर्वाणेनेति तु महाभाष्ये गोनर्दीयस्त्वाहेति-वदित्यनुमीयते विस्तरस्तु भूमिकायाम्।

सिद्धः। विपक्ष एव नास्ति। पक्षस्य धर्मः समाने च सिद्धः। पक्षस्य धर्मो विपक्षे नास्ति। समान एव च सिद्धः, विपक्षे नास्ति पक्षस्य धर्मः, समाने च सिद्धो विपक्षे च नास्तीति। तदेवं सन्नि-कर्षसम्भवेति षट्प्रतिषेधमुक्त्वा यदयं त्रिपदपरिग्रहेण त्रिलक्षणस्य हेतुतां ग्राह्यति तेनैकद्विपदपर्युदासं ज्ञापयतीति। तच्च नैवम्। द्वि-लक्षणयुक्तयोर्हेतुत्वादिति अनभ्युपगतनित्यपक्षस्य कृतकत्वादित्ययं द्वाभ्यां लक्षणाभ्यां युज्यते प्रयत्नानन्तरीयकत्वादिति चानयोर्हेतुभावो न स्यात् यश्चायं व्यतिरेकी हेतुः नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्रसङ्गादित्येवमादिः स न हेतुः स्यात् द्विपदयोगा-दिति तस्माद्धेतुर्विपक्षाद्विशेष इत्येतल्लक्षणं विचार्यमाणमभिमतं वा हेतुमापादयति दृष्टं बाधते ग्रस्तं निराकरोति ग्राह्यं बाधत इति। तत्र यः समानजातीये द्वेधा चासँस्तदत्यय इत्यन्ये सन् स-जातीये द्वेधा चासँस्तदत्यय इत्यसपक्षे नास्ति। एतावता च किल लक्षणेन त्रिलक्षणो हेतुर्लभ्यत इति यथाश्रुति न लभ्यते। यदि तावदेतल्लक्षणं यथाश्रुति भवति विपक्षे विद्यत इति केनैतल्लभ्यते इति। ननु चोक्तं हेतुः तदाभासो वा प्रायः पक्षधर्म एव भवति। उक्तमेतन्न पुनरनेन पक्षधर्मो हेतुरिति लभ्यते किं त्वपक्षधर्मो न हेतुः न हेत्वाभास इति। अथाप्यर्थतो लभ्येतापक्षधर्मो हेतुर्न हेत्वाभास इत्ययं यदि वाक्यार्थो भवति अर्थाद् गम्यते हेतुर्हेत्वाभासश्च पक्षधर्म इति सत्यमर्थात् पक्षधर्मो गम्यते न तु व्यापके नियतो लभ्यतइति। अपक्षधर्मनिवृत्तिमात्रेण सम्भवमात्रं लभ्यत इति। तच्च द्वेधा व्यापकमव्यापकं च। तत्राव्यापकोऽनिष्टो हेतुः प्राप्तः न प्राप्तः पक्षधर्म

एवेत्यभिधानात् यः पक्षस्य धर्म एव स हेतुः प्राप्तः न त्वयं पक्षधर्म एव एकदेशवृत्तित्वादिति नावधारणस्यान्यार्थत्वात् अन्यार्थमवधारणं भवन्तः कल्पयन्ति किमर्थं हेतुहेत्वाभासनियमज्ञापनार्थम् तदवधारणमन्यार्थं सत् कथमव्यापकं निवर्तयिष्यति । अथोपकारि भवत्यव्यापकनिवृत्त्यर्थं हेतुहेत्वाभासनियमज्ञापनार्थं च तथापि सन्सजातीये द्वेधा चेत्यकरणीयम् । कथम्, व्याप्त्यर्थेनावधारणेन पक्षोऽपि नियतो धर्मश्च नियत इति । अनियतस्य व्याप्त्यव्याप्तिभ्यां धर्मस्य द्वौ राशी म्रियमाणौ सजातीयस्तदत्ययः तत्रातिप्रसक्तेरसँस्तदत्यय इति सन् सजातीय इति किमर्थम् । यदि सम्भवार्थं तन्न अनियमात् व्याप्त्यव्याप्त्योः सम्भवो गम्यत इति किमनेन सन् सजातीय इति द्वेधा चेति सर्वथा न वक्तव्यम् । इदं तावत् गम्यमानत्वात् सन् सजातीय इति न कर्तव्यम् । सच्छब्देन व्याप्त्यव्याप्त्योः सामान्येनाभिधानात् द्वेधा चेति प्रमत्तवाक्यम् । अथ मन्येत सन् सजातीय इत्यवधारणार्थमारभ्यत इति अवधारणेऽर्थो युक्त आरम्भः अवधारणं न युक्तम् । कथमिति यदि तावदेवमवधार्यते सन्नेव सजातीय इति प्रयत्नानन्तरीयकत्वादिस्तेन हेतुः यस्मात् प्रयत्नानन्तरीयकत्वादिः सन्नसन्नपि द्विधा चेति तदवधारणार्थबाधितम् । न हि भवति ब्राह्मणमेव भोजय क्षत्रियं चेति । अथ सजातीय एव सन्नित्यवधार्यते तथापि पूर्वोत्तरे बाधिते भवतः कथम् । एकमवधारणार्थमबाधितं एकं गम्यमानत्वात् । अथ पुनर्द्विधा चेत्यवधारणार्थम् । अत्रापि किमवधार्यते किं सजातीय एव द्विधा द्विधैव सजातीय इति । यदि तावत् सजातीय एव द्विधा

नान्यत्र पक्षे न तदत्यये तद्द्विधेत्युक्तम्भवति यद्येवं सन् सजातीयमपि न कर्तव्यम्। प्राप्त्यर्थेनावधारणेनान्यपदे सजातीये सम्भवस्योक्तत्वात् द्विधा चेत्यन्यपदद्विधानिवृत्तिपरत्वात् द्विधा चेत्यभिधानात् सम्भवो गम्यत इति सन् सजातीय इति सर्वथा न वक्तव्यम् सजातीय एव द्विधा चेत्यनेनैवावधारणेन पक्षव्याप्तिर्लभ्यत इति धर्म एव पक्षस्येति व्याप्त्यर्थमवधारणमयुक्तम्। माभूत् सर्वपदावधारणव्याघात इति नानवधारणे तथापि मध्यमे द्वे पदे अपि न कर्तव्ये। सोऽयं गडु-प्रवेशाच्चितारकानिर्गमन्याय इति। अथ पुनर्द्विधैव सजातीय इति तथापि कृतकत्वादिर्न हेतुः न ह्यसौ सजातीये द्विधैव त्रिलक्षणं च हेतुं ब्रुवाणेन स्वसिद्धान्तोपात्तयोर्द्विपदयुक्तयोरहेतुत्वमिति प्राप्तम्। व्यतिरेकी च न हेतुरिति प्राप्तम्। नैव हेतुरिति चेत् कृतस्तस्य हेतुत्वे यत्न इत्यनुत्तरम्। अथ पुनरवधारणानि न क्रियन्ते तथापि पक्षैकदेशवृत्तिरनैकान्तिकश्चानुषक्त इति। एतेन ग्राह्यधर्म-स्वदंशेन व्याप्तोर्हेतुरिति(१) प्रत्युक्तम्। अनेनाव्यापकादिर्लभ्यत इति उक्तोत्तरमेतदपीति। असँस्तदत्यय इत्येतदपि विपक्षे नास्तीत्यनेन समानमिति। तादृगविनाभाविधर्मोपदर्शनं हेतुरित्यपरे। तादृशा-विना न भवतीत्यनेन किल द्वयं लभ्यते विपक्षासत्त्वं तादृशसत्त्वं च उपदर्शनग्रहणेन किल पक्षे सत्त्वं लभ्यत इत्येवं त्रिलक्षणप्रविभावि-तात्मा पक्षो लभ्यत इति। यत्तावत्तादृगविनाभावियहणाद्विपक्षे-ऽसत्त्वं तादृक्सत्त्वं च लभ्यत इति न युक्तम्। तादृशाविना न भवतीति एतस्माद्विपक्षेऽसत्त्वं गम्यते तादृशे तु सम्भव इत्येतदेव कुतः न ह्ययं नियमो यो विपक्षे नास्ति सोऽवश्यं तज्जातीयेऽस्तीति।

(१) व्याप्तो हेतुरिति तात्पर्यटीकायाम्।

एवं च श्रावणत्वाद्यपि हेतुः प्राप्नः श्रावणत्वाद्यपि तादृग्गाविना न भवतीति । भवतु तावत्तादृगविनाभाविग्रहणे तत्तज्जातीये सम्भवतः स पुनः पक्षे सम्भवतीत्येतत् कुतः । ननूपदर्शनग्रहणादेतल्लभ्यते न लभ्यते उपदर्शनग्रहणस्याभिधानार्थत्वात् उपदर्शनग्रहणमभिधानार्थम् उपदर्श्यतेऽनेनेति न पुनरस्येतत् सामर्थ्यमस्ति पक्षे ऽन्यत्र चेति क्व पुनरन्यत्र स्याद्यत्र सम्भवः क्व चास्य सम्भवः तज्जातीये । तस्मादेतदुक्तम्भवति तज्जातीयाविनाभाविनः तज्जातीय एवाभिधानहेतुरिति । एवं च ते चाक्षुषत्वं हेतुर्भवति न हि चाक्षुषत्वमनित्यत्वेन विनाभावि उपेत्य वा भवतु तादृगविनाभाविनो धर्मस्य पक्ष उपदर्शनमिति । तथापि पक्षैकदेशवृत्तिं केन निराकरोषि उपदर्शनग्रहणेनेति चेत् न तस्य सम्भवमात्रज्ञापनार्थत्वात् । अथ मन्येत उपदर्शनग्रहणेन व्याप्तिर्लभ्यत इति न युक्तम् उपदर्शनग्रहणस्य सम्भवमात्रज्ञापनार्थत्वात् उपदर्शनग्रहणेन सम्भवमात्रं ज्ञाप्यते पक्षे स पुनर्व्यापक इति न युक्तम् । अथात्रापि केनचिन्न्यायेनावधारणानि क्रियेरन् तान्यव्यापकहेतुनिराकरणेन समर्थानीति पूर्ववत् प्रसङ्गः यच्चिदमुदाहरणमेतस्मिन् प्रयत्नानन्तरीयकत्वादिरनित्यत्वस्याग्नेर्धूम इति । तत्र धूमस्तावदग्नेरप्रतिपादक इत्युक्तम् । प्रयत्नानन्तरीयकमित्यहेतुः कुतः प्रयत्नानन्तरीयकत्वस्य पक्षावृत्तित्वात् न हि प्रयत्नानन्तरीयकत्वं शब्दधर्मः न हि कश्चिच्छब्दः प्रयत्नानन्तरीयकोऽस्ति संयोगविभागयोनित्वाच्छब्दस्य । अथ पारम्पर्यक्रमेण प्रयत्नः शब्दकारणम् पारम्पर्येण सर्वेऽर्थाः शब्दकारणमिति विशेषणमयुक्तं प्रयत्नानन्तरीयकत्वादिति अनित्यः शब्दो यतस्तदुत्पत्तेरिति वक्तव्यम्

यच्चेदं प्रयत्नानन्तरीयकत्वं शब्दस्यानित्यत्वे कारणं भावाभिधानेनोच्यते किं पुनस्तत् किं जन्म उतोपलब्धिरिति। यदि तावज्जन्म तत्रैव समर्थमिति प्रयत्नानन्तरीयकत्वग्रहणं व्यर्थम्। न हि भवत्यनित्यः शब्दो देवदत्तकृतकत्वादिति। अत एवं वक्तव्यं जन्मवत्त्वादिति यदि चेदं जन्म व्यभिचारि भवेत् ततः प्रयत्नानन्तरीयकत्वग्रहणमर्थवत् किं कारणम् व्यभिचारिणि विशेषणान्यर्थवन्ति भवन्ति। अथोपलब्धिः प्रयत्नानन्तरीयकत्वादित्यनेन भावाभिधानेनोच्यते एवमप्युपलब्धेरेव सामर्थ्यमस्तीति व्यर्थं विशेषणम्। न ह्युपलभ्यमानं द्वेधा भवति नित्यमनित्यं प्रयत्नानन्तरीयकमन्यथा चेति। अथ ब्रूषे प्रयत्नानन्तरमुपलभ्यमानं घटत्वं नित्यमिति त्वयैवेतद्व्यभिचारि तदिति शब्दानित्यत्वानुमितौ प्रयत्नानन्तरीयकत्वं हेतुः अव्यापकं च प्रयत्नानन्तरीयकत्वं शब्दराशेः पञ्चीकृतत्वात्। अथ शब्दविशेषं पञ्चीकृत्योच्यते तत्रापाद्य एव प्रयत्नानन्तरीयकत्वं सम्भवति न द्वितीयादिष्विति अव्यापकत्वमनिवृत्तम्। अथ यः प्रयत्नानन्तरीयकः सोऽनित्य इति तथाप्यन्यो हेतुर्वक्तव्यः। हेतोः पञ्चविशेषणत्वेनोपात्तत्वात् यदप्युक्तमप्रयत्नानन्तरीयकस्य चयोगतिरिति किञ्चिन्नित्यमाकाशाद्यन्येषां किञ्चिदनित्यं विद्युदादि किञ्चिदेवाकाशकुसुमादि इदं महानैयायिकत्वं महावादित्वं च यत्तावदसदप्रयत्नानन्तरीयकं च किञ्चिच्चेति चित्रम्। नित्यं तु किञ्चिद्भवति न पुनरप्रयत्नानन्तरीयकत्वम् न ह्याकाशं प्रयत्नानन्तरीयकमिति शक्यं वक्तुम् अप्रयत्नानन्तरीयकस्य जन्मविशेषितत्वात् न चाकाशस्य जन्मास्ति तस्मान्न प्रयत्नानन्तरीयकमाकाशमिति। एतेनाभावो व्याख्यातः

अभावेऽप्येवमेवेति। तदेवमेतानि न हेतुलक्षणानि सम्भवन्तीदमेवार्षं हेतुलक्षणं न्याय्यमिति॥

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्॥३६॥

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति सूत्रम्। अस्योदाहरणोपलक्षणमर्थः। साध्यस्य साधर्म्यं साध्येन समानधर्मता। अत्रापि साध्येनैव साधर्म्यं न पुनरसाध्येनापि साधर्म्यमेव साध्येन पुनर्वैधर्म्यमपि यस्मात् साध्यसाधर्म्यात् तद्धर्मभावी भवति। किं कुतश्चित् साध्यसाधर्म्यात् तद्धर्मभावी न भवति न भवत्यपि यथा अमूर्त्तत्वादेः कर्मणः तस्मात् साध्यसाधर्म्याच्च तद्धर्मो भवति स भवति तद्धर्मभावी योऽयं दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावित्वेन विशेषणेन युज्यमान उदाहरणं भवति उदाह्रियतेऽनेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम्। ननु च करणकारकपरिग्रहाद्वचनमुदाहरणं दृष्टान्तश्चार्थो न चानयोः सामानाधिकरण्यं युज्यते न हि विषाणादिमदित्यभिधानं गवा समानाधिकरणं भवति। नैष दोषः वचनविशेषणत्वेन दृष्टान्तस्योपादानान्न स्वतन्त्रो दृष्टान्त उदाहरणम्। किन्तु साध्यसाधर्म्यात् तद्धर्मभावित्वे सति अभिधीयमान इति। तद्धर्मभावी तस्य धर्मः तद्धर्मः तस्येति साध्यस्य। साध्यञ्च द्वेधा भवति धर्मो धर्मी च। एकदा धर्मो विशेषणत्वेनान्यदा धर्मी विशेषणत्वेनेति तस्येति धर्मिग्रहणं युक्तम्। न पृथक् धर्मस्य ग्रहणात् यस्माद्धर्मिणो धर्म उत्पत्तिधर्मकत्वादयः न धर्मस्य धर्मे च साध्ये उदाहरणसाधर्म्यादिति व्याघातः। न हि धर्मस्योदाहरणेन किञ्चित्साधर्म्यं किन्तु साध्यसाधर्म्यञ्चोदाहरणस्य धर्मिण एव साध्ये चोप-

संहारो धर्मिण्येव तस्माद्धर्मी साध्य इति तस्य धर्मिणः साध्यस्य यो धर्मः साध्यः स यस्मिन् दृष्टान्ते भवति विद्यते स दृष्टान्त उदाहरणम्। उदाहरणं स्यात्सादिद्रव्यमिति तदुत्पत्तिधर्मकं चानित्यं दृष्टमिति ॥

तद्विपर्ययाद्वा विपरीतम् ॥ ३७ ॥

तद्विपर्ययाद्वा विपरीतम्। साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणमिति। उदाहरणमवीतहेतौ द्रष्टव्यमिति। अन्ये तु साध्यसाधर्म्यात् तद्धर्मभावित्वं दृष्टान्तस्येति सूत्रं पठन्ति। तेषां त्वयमभिप्रायः दृष्टान्तोदाहरणयोर्माभूदैक्यमिति। किं पुनस्तद्धर्मभावित्वं साध्यसाधनाभ्यां योगः साध्यसाधनयोगे च तद्धर्मभावी भवति अतो भावाभिधानेन साध्यसाधनाभ्यां योगोऽभिधीयत इति। एतच्च सूत्रमपरे दूषयन्ति। अस्माकन्तु नायं सूत्रपाठः तस्मान्नायं दोष इति तस्मिन्नपि पाठे किल भाविग्रहणमनर्थकम्। कस्मात् सर्वावयवानां साध्यधर्मभावित्वात्। यस्मात् किल सर्वावयवाः साध्यधर्मभाविनो भवन्ति भावयन्ति गमयन्तीति नायं सूत्रार्थ इति। अन्ये तु तद्धर्मभावीत्येतत्पदमन्यथा निराकुर्वन्ति तद्धर्मभावी भवन्नुष्णभोजिन्यायेन(१) वा भवेत् दण्डिन्यायेन वा भवेत् तद्यदि तावदुष्णभोजिन्यायेन उष्णं भोक्तुं शीलमस्येत्युष्णभोजी तद्धर्मं वा भावयितुं शीलमस्येति तद्धर्मभावी। अत्रापि भावयितुं गमयितुं यावदुक्तं स्यादिति। नायं सूत्रार्थ इति न किञ्चिदेतत् दण्डिन्यायस्तु दण्डो यस्यास्तीति स दण्डी तद्धर्मभावो यस्यास्ति स

(१) उष्णभोजीति क्वचित्।

भवति तद्धर्मभावी । अत्र भाविग्रहणमनर्थकं तद्धर्मभावीति कथमिति तद्धर्मश्चासौ भावश्चेति तद्धर्मभावः स यस्यास्ति स भवति तद्धर्मभावी । एवं सति विशेष्यविशेषणभावानुपपत्तेः तद्धर्मभावीति युक्तम् न हि तद्धर्मश्च स्याद्भावश्च स्याद्यतो विशेषणविशेष्यभावः समर्थितः स्यादिति । अतस्तद्धर्मीति किल वक्तव्यम् । न वक्तव्यम् । तद्धर्माणामुभयथाभावात् उभयथा भवन्ति धर्मा विधीयमानाः प्रतिषिध्यमानाश्च । तत्रान्वयिनि विधीयमानधर्मवान् दृष्टान्तग्रहणम् यथा स्याल्यामुत्पत्तिधर्मकत्वमनित्यत्वं च विद्यमानौ धर्माविति तस्मात्तद्धर्मश्चासौ भावश्चेति युक्तं सामानाधिकरण्यम् यत् पुनरेतद्धर्मीति वक्तव्यम् एतदपि न परिज्ञातम् । न हि बहुव्रीहौ पुनर्मत्वर्थीयो लभ्यत इति । अथावश्यं वयं प्रत्ययितव्याः । तत्र एवं तद्धर्मेति वक्तव्यमिति । सन्ति चैवंवादिनो येषां कृतकत्वानित्यत्वेऽभाव इति । तन्निराकरणार्थं चेदं वक्तव्यं तद्धर्मश्चासौ भावश्चेति । तदेतस्मिन्नवयवत्रये एवं लक्षणेनोपपादिते तेषां त्रयो दुर्विभावा इति । अनेन वाक्येन महानैयायिकत्वमात्मनः ख्यापितं भवति । तथा सिद्धो दृष्टान्त इत्यन्ये । कथं पुनरस्यार्थः यथा साध्यः साधयितुमिष्टस्तथायमसिद्धोऽनित्यत्वेन यथा च विशिष्टः प्रत्ययभेदभेदित्वेन तथा यः सिद्धः स दृष्टान्तः साध्यसाधनवानिति । अत्र विस्फूर्जितापि स्वसिद्धान्तमत्यजता कृतकत्वानित्यत्वयोः न प्राक्यः सम्बन्धो दर्शयितुं कृतकत्वानित्यत्वयोः कालभेदाद्वस्तुबाधनाच्च । अन्यदा कृतकत्वमन्यदा चानित्यत्वमिति यदा च वस्तु न तदा प्राक्प्रध्वंसाभावौ स्त इति । एतेन तयोः सम्बन्धिनिदर्शनं दृष्टान्त इति

प्रत्युक्तम्। साध्येनानुगमो हेतोः साध्याभावे च नास्तितेति च॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः॥ ३८॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः। एवं चायं कृतक इति यथा तथेति प्रतिबिम्बनार्थम् किं पुनरत्र प्रतिबिम्बनम् दृष्टान्तगतस्य धर्मस्याव्यभिचारित्वे सिद्धे तेन साध्यगतस्य तुल्यधर्मता एवं चायं कृतक इति साध्ये वा सम्भव उपनयार्थः। ननु च कृतकत्वादित्यनेन सम्भव उक्तः साध्यसाधनभावनिर्देशात् साध्यसाधनभावमात्रनिर्देशः कृतकः कृतकत्वादनित्यः शब्दो भवति। तत् पुनः शब्दे कृतकत्वमस्ति नास्तीत्युपनयेन सम्भवो गम्यते अस्ति च शब्दे कृतकत्वमिति स यदा धर्मेणोदाहरणं तदा तथेति यदा वैधर्म्येण तदा न तथेति॥

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्॥ ३९॥

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्। प्रतिज्ञायाः पुनर्वचनमिति। प्रतिज्ञाविषयस्यार्थस्याशेषप्रमाणोपपत्तौ साध्यविपरीतप्रसङ्गप्रतिषेधार्थं यत् पुनरभिधानं निगमनमिति। एतस्मिन् सूत्रार्थे परस्यावकाशो नास्तीति अभ्युपेत्य तद्दोषनिराचिकीर्षया वाक्यमुपचिप्यते। उपनयनिगमने नावयवान्तरे अर्थाविशेषादितद्वाक्यं यथाश्रुति न केनचिदर्थेन सम्बध्यते अथ हेतूपनयावेकेन पक्षीकृत्यार्थाविशेषादिति हेतुः स विपक्षवृत्तित्वाद्विपर्ययहेतुरर्थाविशेषस्यैकत्वेऽदर्शनादिति नानात्वे च दर्शनादिति। यथा बहूनां घटाना-

मेकोऽर्थाद्धारणादिर्न चैकत्वमिति। अथैकप्रयोजनकत्वेन पचीकृत्य ब्रूयादेकत्वमेकप्रयोजनत्वमिति। तथापि हेतुर्नास्ति प्रतिज्ञार्थेनाच्छिन्नत्वात् हेतूपनययोरेकार्थत्वमिति प्रतिज्ञार्थः। अर्थाविशेषादिति हेत्वर्थोऽपि स एव अन्यश्च हेत्वर्थः अन्यश्चोपनयार्थ इत्यसिद्धोऽप्ययं हेतुस्तद्वर्णितं पचधर्मत्वसम्बन्धसाध्योक्तेरन्यवर्जनमित्येतदनेनैव प्रत्युक्तम्। यदपि यथा तथेत्युपसंहारे कृते तथेत्यनेन शब्देन सर्वसामान्यं वा कृतकत्वसामान्यं वाभिधीयते कृतकत्वविशेषो वा सर्वसामान्यं तावन्न युक्तम् तथेतिव्यपदेशाग्राह्यत्वादिति कृतकत्वविशेषोऽपि न युक्तः अन्यथा शब्दस्य कृतकत्वोपरिशेषात् कृतकत्वसामान्यं तच्च हेतुनैवोक्तमिति। तदप्ययुक्तम्। उपनयस्योपमानार्थत्वात् उपमानार्थ उपनय इति तच्चोपमानं न सर्वथा साध्यसाधनभावावाश्रित्य प्रवर्तत इति यत्किञ्चिदेतत्। कृतकत्वसामान्यं तु शब्दसन्निधावभिधीयत इति चित्रमिदम् कृतकत्वं खल्वशब्दसन्निधावभिधीयत इति शब्देन च विशेष्यमाणं कथं सामान्यं भविष्यति तस्मात् सामान्यविशेषवान् हेतुरिति गतार्थत्वान्नोपनय इत्यनेन प्रत्युक्तम्। यदप्युक्तं यथा तथेत्युपमानमेतदुपमानं चोपनयो न दृष्टान्त इति एतेन निगमनं प्रत्युक्तम्। ते एते वीतावीतवाक्ये स्वतन्त्रे पञ्चावयवेन पुनरेकमन्वयव्यतिरेकि चेति॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः॥ ४०॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इति सूत्रम्। अस्यार्थः पूर्ववत् अविज्ञाततत्त्वेऽर्थे इति। यथा सोऽर्थो भवति सोऽस्य तथा भावस्तत्त्वम् एतस्मिन्नविज्ञाते सामान्यतोऽवगम्यते कुतः

पुनरेतत् सामान्यतोऽवगतमिति । अविज्ञाततत्त्वेऽर्थे प्रत्यभिज्ञानात् यस्माद्ययमाहाविज्ञाततत्त्व इति तेन ज्ञापयति सामान्यमवगतमिति। यदि पुनः सामान्यमपि नाधिगतं स्यान्न ब्रूयादविज्ञाततत्त्व इति अविज्ञात इत्येवं ब्रूयादिति अविज्ञाततत्त्व इति समासोऽयं न चार्थो गम्यते किमविज्ञातं तत्त्वं येन उताविज्ञातं तत्त्वं यस्य कस्यचित्र विशेषः। यद्यविज्ञातं तत्त्वं येन सोऽयमविज्ञाततत्त्वः परिच्छेत्ता तस्मिन्नविज्ञाततत्त्वे परिच्छेत्तरि तदवगतार्थमूहस्तर्क इति प्राप्नोति । अथाविज्ञातं तत्त्वं यस्य तदविज्ञाततत्त्वं यस्मिन्नविज्ञाततत्त्व इति षष्ठीविग्रहेण युक्तमेतत्। विशेषहेत्वभावान्नार्थाधिगमः नात्र विशेषहेतुरिति किमयं तृतीयाविग्रहेण समास उत षष्ठीविग्रहेणेति युक्तम् अर्थग्रहणसामर्थ्यात् यस्माद्विज्ञाततत्त्व इति अर्थश्चार्थ्यमाणत्वात् कर्म तेन ज्ञापयति षष्ठीसमासोऽयम्। तृतीयाविग्रह इति अर्थग्रहणमन्तरेणापि सामान्यतोऽवगतेरविज्ञातं तत्त्वं यस्येत्यप्यनुक्तेऽप्यर्थे गम्यत एवैतदर्थं इति। एवमपि समासे सन्देहतादवस्थ्यम्। माभूत् समासो वाक्यमेवास्तु अविज्ञातं तत्त्वमस्येति भवत्येवाभीष्टार्थप्राप्तिः लाघवार्थं तु समासकरणम् अनुक्तेऽप्यर्थे सामर्थ्याद् गम्यते अविज्ञातं तत्त्वमस्येति अथोक्तं सन्देह एवं स्यादिति समस्तानभिधानप्रसङ्गाच्च । यदि च सामर्थ्यमाश्रित्यार्थग्रहणं प्रतिषिध्यते तदैवं युक्तमूहस्तर्क इति सामर्थ्यतः शेषं गम्यत इति तस्मादर्थग्रहणं ज्ञातनिराकरणार्थमिति। माभूत् समस्ताभिधानं किन्नो बाध्यते न बुद्धिधर्मनिराकरणार्थत्वात् उभयथा खल्वयमूहो भवति विज्ञाततत्त्वेऽविज्ञाततत्त्वे च तत्र तावद्विज्ञाततत्त्व ऊहः शुश्रूषाश्रवणधारणविज्ञानोहापोहतत्त्वाभिनिवेशा बुद्धिधर्मा

इति तत्त्वमवधृतं विजानाति विज्ञातमूह इति किमुक्तं भवति। योऽसावर्थः पूर्वमनेन विज्ञातस्तमेवोह इति पूर्वानुभूतपरिच्छेद ऊह इत्युच्यते न त्वयं तर्कः यः पुनरविज्ञाततत्त्वेऽर्थे ऊहः स तर्कः। षष्ठ्यभिधानमधिकरणार्था[१]सम्भवाद्विज्ञाततत्त्वस्यार्थस्येति वक्तव्यम् अविज्ञाततत्त्वोऽर्थो ज्ञायमानः कर्म भवति कर्मणि च षष्ठ्येव ज्यायसी यथा घटस्य विज्ञानमिति। न। विभक्तिव्यत्ययात्। षष्ठीस्थल एवैषा सप्तमी द्रष्टव्या यथान्यत्र दृषावयुगपत् संयोगविशेषाः कर्मान्यत्वे हेतव इति व्यत्ययः कस्मात् यदि व्यत्ययेन कश्चिदर्थो लभ्यते युक्तो व्यत्ययः यथा यस्मिन्नेवायुगपत् संयोगविशेषा इति अधिकरणार्थ दृषोरपि येऽवयवास्तेषामपि संयोगविशेषास्तेऽपि कर्मान्यत्वे हेतव इति। न पुनरिह व्यत्ययेन फलं पश्यामः तस्मादयुक्तो विभक्ति-व्यत्यय इति। न न युक्तः। सामान्याधिगतस्य विशेषज्ञापनार्थं यस्यैव सामान्यमधिगतं तद्वर्त्तिनो विशेषा अप्यवगन्तव्या इति ते च विशेषाः संयोगिनः समवायिनश्च भवन्तीति कारणोपपत्तितः प्रमा-णोपपत्तितश्च। उपपत्तिः सम्भवः सम्भवत्यस्मिन्नर्थे प्रमाणमिति भवेदयमर्थ इति। उदाहरणं योऽयं ज्ञाता ज्ञातव्यमर्थं जानाति तं तत्त्वतो जानीयेयमिति किमुत्पत्तिधर्मकोऽथानुत्पत्तिधर्म इति यावत्। एक उभयं जानातीति भाष्यम्। अनुत्पत्तिधर्मकेनानेन भवितव्यमिति य ऊहः स तर्क इति। नन्वेतत् तत्त्वज्ञानमेव किमु-च्यते तत्त्वज्ञानार्थमिति नेदं तत्त्वज्ञानमनवधारणात्। न ह्ययमव-धारयत्येवमेवेति किं त्वनुत्पत्तिधर्मकेन ज्ञात्रा भवितव्यमिति

[१] षष्ठ्यभिधानसविकरणार्था—पा० २ पु०।

प्रमाणविषयमनुजानाति कथं पुनरयं तत्त्वज्ञानार्थं भवति प्रमाण-विषयाविवेचनात् प्रमाणविषयमनेन विविनक्ति अयमर्थो युक्त इति प्रमाणानि प्रवर्तमानानि तर्कविविक्तमर्थं तथाभूतमवगच्छन्तीति ऊहः संशयनिर्णयाभ्यां न भिद्यत इति केचित्। अयं किलोहः संशयो वा यदि संग्रहस्तेन संगृहीतत्वात् पृथक् न पठितव्यः अथ निर्णयस्तेन संगृहीत इति। अपरे त्वनुमानं तर्क इत्याहुः। हेतु-स्तर्को न्यायोऽन्वीक्षा इत्यनुमानमाख्यायत इति। अपरे त्वनुमानमेव तर्कं युक्त्यपेक्षं वर्णयन्ति यत्तावन्निर्णयसंशयाभ्यां नोहो भिद्यत इति। तन्न प्रत्ययस्वरूपानववोधात्। अविज्ञाततत्त्वेऽर्थे भवतीति सामान्ये-नाचिख्यो भवान् सत्यमविज्ञाततत्त्वे भवतीति न पुनः प्रत्ययस्वरूपं व्याजाषि भवता अनवधारणात्मकः प्रत्ययः संशयः किंस्विदिति। अवधारणात्मकः प्रत्यय एवमिदमिति निर्णयः। अयन्तु संशयात् प्रच्युतः कारणोपपत्तिरस्ति निर्णयं चाप्राप्तो विशेषादर्शनाद्विशेष-दर्शनान्निर्णयो भवति न चास्मिन् विशेषदर्शनमस्ति। एतेनानुमानं तर्क इत्येतदपि प्रत्युक्तम्। विशेषादर्शनादिति किं पुनरस्य स्वरूपं भवेदित्येव प्रत्यय इत्येतस्य स्वरूपमिति यैरप्यनुमानं युक्त्यपेक्षं तर्क इत्युच्यते तैरप्यनुमानात् तर्कभेदः स्वयं वक्तव्यः युक्तिः प्रमाणोप-पत्तिः प्रमाणोपपत्तिमपेक्षमाणो यः प्रत्ययः स तर्क इति केवलं सञ्ज्ञाभेदमात्रम्। अथ न प्रमाणोपपत्तिर्युक्तिः अनुमानं युक्त्यपेक्ष-मित्यपेक्षासामर्थ्यं वक्तव्यम्। स्वविषयाधिगमे चानुमानं किमपेक्षते। अथेतरप्रमाणापेक्षा युक्तिरित्युच्यते एवमप्यर्थग्रहार्थो वक्तव्यः। कथं प्रत्यक्षागमाभ्यामनुमानमनुगृह्यत इति। अथानुमानस्य प्रत्यक्षाग-

मैकविषयत्वं तत्रापि तर्कः त्रीण्येतानि प्रमाणविषयतया प्रतिसंहितानीति भवेत्। अवधारणप्रत्ययौ भिन्ननिमित्तौ विशेषवत्त्वात् प्रत्यक्षानुमानप्रत्ययवत् अनुमानं तर्कः लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वात् अनुमानवत् न तर्कस्वरूपानवबोधात् नैव लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षः तर्कः कथमिति द्वयस्यानधिगतेः यत्र द्वयमधिगम्यते धर्मौ साधनधर्मश्च तत्रानुमानं प्रवर्तते यत्र पुनर्द्वौ र्मिमात्राधिगतिर्न लिङ्गाधिगतिरस्ति सत्कर्मविशेषे इति। तस्मान्नलिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वमनुपपन्नम् अनुमानं च धर्मिगतधर्मोपलब्धौ प्रवर्तते न पुनस्तर्कः तर्कस्त्वन्यगतधर्मप्रदर्शनेनापि प्रवर्तते यथा भवितव्यमनेन पुरुषेणेति यथास्मिन् देशेऽश्वा वाह्यन्त इति अश्ववाहनं पुरुषधर्मः सोऽयमन्यगतधर्मोपपत्त्या स्थाणुव्यवच्छेदमात्रमूह इति। सोऽयं तर्कः प्रमाणानि संधत्त इति प्रमाणसहितो वादेऽपदिष्टः न पुनरयं प्रमाणपरिच्छेदकत्वादिति॥

विमृश्य[१] पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः॥४१॥

एतस्मिन् तर्कविषये विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति सूत्रम्। सम्बन्धोऽर्थश्च पूर्ववदिति। विमृश्येति। विमर्षं कृत्वा पक्षान्यप्रतिपक्षाच्च पक्षप्रतिपक्षाभ्यां पक्षशब्देन पक्षविषयं साधनमुच्यते प्रतिपक्षशब्देन प्रतिपक्षविषयस्य साधनस्योपालम्भः ताभ्यां साधनोपालम्भाभ्यां यदर्थावधारणं स निर्णय इति। क्व पुनरयं नियमः किं तावन्निर्णये आहोस्वित् पक्षप्रतिपक्षाभ्याम् अथ विमृश्यैवेति यदा विमृश्य पक्षप्रतिपक्षाभ्यामेव निर्णय इति निर्णये नियम इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यस्य व्याघातः। एतेन

(१) विमृश्येति क्वचित्।

विमृश्यैवेति प्रत्युक्तम्। अथ पक्षप्रतिपक्षाभ्यां निर्णय एव उभयाश्रयो निर्णयः प्राप्नोति तर्कविषये नियमो नान्यत्र योऽयं तर्कस्य विषय एतस्मिन् तर्कविषये विमृश्य पक्षप्रतिपक्षाभ्यामेव निर्णयो भवति पक्षप्रतिपक्षाभ्यामेव निर्णयो विमृश्यैवेति सामान्यनिर्णयलक्षणमेतत् कुतोऽयं नियमस्तर्कविषय इति तर्कस्यानन्तरोद्देशात् तर्कविषय इति नियमः अन्यथापि निर्णयभावान्न निर्णय इति। अथ निर्णयस्य किं लक्षणम् अर्थपरिच्छेदोऽवधारणं निर्णय इति सोऽयं निर्णयः प्रमाणविषये भवन्नेकशः प्रमाणैः क्रियते संहत्य च तर्कविषये संहत्यान्यत्रैक इति वादे शास्त्रे च विमर्षवर्जे वादे पक्षप्रतिपक्षाभ्यामेव न शास्त्रे वादे वा विमर्षोऽस्ति उभयोर्निश्चितत्वात् शास्त्राभ्युपगतपदार्थस्य निश्चितत्वाच्च। पक्षप्रतिपक्षशब्देन साधनोपालम्भयोर्ग्रहणमित्ययुक्तं प्रमाणाभावात् पक्षप्रतिपक्षशब्देन साधनोपालम्भावुच्येते इति। किं प्रमाणम् कस्मात् पुनर्यथाश्रुति न भवति पक्षप्रतिपक्षयोः कर्मत्वात् न च कर्मार्थपरिच्छेदकं परिच्छेद्यत्वात् तस्मात् पक्षप्रतिपक्षशब्देन परिच्छेदकयोः साधनोपालम्भयोर्ग्रहणम् तयोरकर्मकत्वात् तयोरेकस्मान्न ग्रहणमेवं वक्तव्यम् विमृश्य साधनोपालम्भाभ्यामर्थावधारणं निर्णय इति। एवं मति स्वविशिष्टोऽर्थो भवति। न च लाघवकृतः कश्चिद्विशेष इति नैकविषयज्ञापनार्थत्वात् यद्विषयौ साधनोपालम्भौ तद्विषयो निर्णयः। अन्यथा हि साधनोपालम्भाभ्यां निर्णय इत्युक्ते न ज्ञायते क्व पुनर्निर्णय इति। पक्षप्रतिपक्षशब्दाभ्यां च साधनोपालम्भयोर्ग्रहणं तद्विषयस्य चेति। अर्थग्रहणं तर्हि न कर्तव्यम् गम्यमानत्वात् केन गम्यमानत्वात् विमृश्य पक्ष-

प्रतिपक्षाभ्यामेवावधारणमित्युक्ते गम्यते ऽर्थस्येति तस्मादर्थग्रहणं न कर्तव्यम्। श्रुतिसामर्थ्यादन्यतरनिर्णयज्ञापनार्थम् गम्यमानमर्थग्रहणं यत् करोति तेन ज्ञापयत्यन्यतरस्मिन् पक्षे निर्णय इति। पक्ष-प्रतिपक्षाभ्यामर्थावधारणमित्ययुक्तम् कस्मात् एकस्मादधिगतः नेदं पक्षप्रतिपक्षाभ्यां सह ताभ्यामवधारणं किं तर्ह्येकस्माद्योवतिष्ठत इति उभाभ्यामेवेत्याह। कथमिति। उभयनिवृत्तावनिवृत्तो हि विमर्षः उभयावस्थाने चानिवृत्त इति यदा त्वेकोऽवतिष्ठत एको निवर्तत इति तदा निर्णय इति अतः संहत्य पक्षप्रतिपक्षौ निर्णयहेतू इति। एतस्मिन् विषये कदा निर्णयो भवति किं प्रथमे उत द्वितीये उत तृतीये इति। सर्वत्र भवत्यर्थस्य तथाभावात् अथवा तृतीय इति युक्तम्। कथमिति। एकस्मात् साधनेन पक्षमवस्था-पयति द्वितीयः साधनं दृष्ट्वा निवर्तते साधनाभासं वा बुद्ध्वा साधन-दोषाद्विभावयिषया प्रवर्तते तस्मिन्निवर्त्य साधनं ब्रूते प्रथम इदानीं निश्चितं[१] साधनमिति। यदि मन्यते न प्रवर्तते अथ दूषणाभा-समिति बुद्ध्यते तदुद्भावनार्थं प्रवर्तते तन्निवृत्तौ द्वितीयपक्षसाधन-मपि निवर्तते। किं कारणम् प्रथमपक्षसाधनस्य निर्दोषत्वात् निर्दोषे च प्रथमपक्षसाधने न द्वितीयस्यावकाश इति निवर्तते न द्वितीयः पक्ष इति यत्रावतिष्ठते तस्मिन्निर्णयः स निर्णयः सम्भवा-सम्भवाभ्यां पक्षप्रतिपक्षयोः संहत्य क्रियते। निर्णयोऽनुमानमेवेति केचित्। केचिद्वर्णयन्ति निर्णयोऽनुमानमेव न पदार्थान्तरमिति। न। लिङ्गलिङ्गिसम्बन्ध्यपेक्षत्वादनुमानस्य निर्णये च तद्भावः प्रमाण-

(१) निश्चेतुं—पा० १ पु०।

फलत्वात् प्रमाणमनुमानम् प्रमाणफलं तु निर्णयः निर्णयः स्वविषय एव अनुमानं तु स्वविषयेऽन्यत्र च। यथा धूमदर्शनं धूमपरिच्छेदेनानुमानमपि निर्णय इति। यदा च परिच्छिनत्ति धूमेन तदानुमीयतेऽनेनेत्यनुमानमग्निपरिच्छेदः फलम्। यदा च भावमाधनमाश्रित्योच्यते ऽनुमानं निर्णय इति तदाभ्यनुज्ञया वर्तितव्यम्। यदा च करणसाधनतामाश्रित्योच्यते ऽनुमानं निर्णय इति तदा प्रतिषेधो वचनीयः कार्यकारणयोर्भेदात् कारणमनुमानं कार्यं निर्णयः तस्मान्नानुमानं निर्णय इति॥

इति—श्रीद्योतकरे न्यायवार्त्तिके[१] प्रथमस्याध्यायस्याद्यमाह्निकम्॥

अथ द्वितीयमाह्निकम्।

तिस्रः कथा भवन्ति वादो जल्पो वितण्डेति। नायं कथा नियमः किं तर्हि विचारवस्तुनियमः यद्वस्तु विचार्यते तत् त्रेधा विचार्यते। तत्र विचारो वादो जल्पो वितण्डेति। तत्र गुर्वादिभिः सह वादः। विजिगीषुणा सह जल्पवितण्डे। तत्र यथोद्देशं लक्षणापदेशः वादस्य लक्षणमुच्यते तत्र प्रमाणतर्कसाधनोपालम्भ इति सूत्रम्॥

---

(१) परमर्षिभारद्वाजोद्योतकरीये न्यायसूत्रवार्त्तिके—इति क्वचित्।

यदक्षपादप्रतिमो भाष्यं वात्स्यायनो जगौ।
व्यकारि सूत्रतत्त्वस्य भारद्वाजेन वार्त्तिकम्॥

इति पञ्चमाध्यायान्तस्थं वचनं तु भूमिकायां समालोचयिष्यामः।

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ ४२ ॥(१)

तत्र वादः पक्षप्रतिपक्षपरिग्रहः कौ पुनरेतौ पक्षप्रतिपक्षौ वस्तुधर्मावेकाधिकरणौ विरुद्धावेककालावनवस्थितौ वस्तुधर्माविति वस्तुविशेषौ वस्तुनः सामान्येनाधिगतत्वात् विशेषतोऽनधिगतत्वाच्च। विशेषावगमनिमित्तो विचारः तस्माद्वस्तुधर्मावविशेषावेकाधिकरणौ नानाधिकरणौ विचारमप्रयोजयतः उभयोः प्रमाणोपपत्तेः तद्यथा अनित्या बुद्धिर्नित्य आत्मेति। अविरुद्धावप्येवं यौ विरुद्धौ तौ विचारं प्रयोजयतो नाविरुद्धाविति तद्यथा क्रियावद्द्रव्यं गुणवच्चेति। तत्र कालाविति निर्णयोत्तरकालं विचाराभावात् तावेतौ विरुद्धावेवं विशेषणौ धर्मौ पक्षप्रतिपक्षौ तयोः परिग्रह इत्यभ्युपगमनियमः। एवंधर्मायं धर्मी नैवंधर्मेति सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः। अस्य कथा माकुतयेऽपि(२) समानत्वात् विशेषणार्थं प्रमाणतर्कसाधनोपालम्भ इति प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियत इत्यस्मिन् भवतीति अस्मिन्निति सप्तमीनिर्देशो विषयज्ञापनार्थः। अस्मिन् विचारे कथं पुनः तर्केण साधनमुपालम्भश्च अप्रमाणत्वात् प्रमाणानुग्राहकत्वात् न प्रमाणसंगृहीतस्तर्को न प्रमाणान्तरमित्युक्तम्। सोऽयमप्रमाणात्मकः सन् कथं सिद्ध्युपालम्भयोः करणं भविष्यति न ब्रूमस्तर्कः सिद्ध्युपालब्ध्योः करणमपि तु प्रमाविषयविवेचनात्तर्कः प्रमाणान्यनुगृह्णातीति तर्कविविक्तं विषयं प्रमाणानि प्रवर्तमानानि परिच्छिन्दन्ति। सोऽयं प्रमाणानामनुग्राहकत्वात् प्रमाण-

(१) यद्यपि न्यायसूचीग्रन्थानुसारेण प्रत्याह्निकं सूत्राङ्का भिन्ना एव तथापि मुद्रितसूत्रभाष्यपुस्तके ऽत्राङ्कक्रमभेदाभावान्नाङ्कक्रमभेदः कृतः।

(२) कथाचये ऽपीत्यत्यनुमीयते।

सहितो वादेऽपदिष्ट इति। साधनमुपालभ्यतेऽस्मिन् भवतीति किं तावत् सिद्धिः साधनमुपालभ्यतेऽनेनेति साधनम् उपालभते ऽनेनेत्युपालम्भः। यदि तावद्भावसाधनौ साधनोपालम्भशब्दौ तदा प्रमाणैस्तर्केण च न युक्तौ प्रमाणानां तर्कस्य च पराप्रतिपादकत्वात् प्रमाणान्यात्मप्रतिपत्तिसाधनानि परप्रतिपादनार्थश्चायं विचारः तस्मान्न प्रमाणैस्तर्केण च सिद्ध्युपालम्भौ भवतः अथ करणसाधनौ तथापि पञ्चावयवोपपन्न इति पृथक् न पठितव्यम्। किं कारणम् प्रमाणतर्कसाधनोपालम्भ इति करणसाधनेन पदेनावयवार्थस्योक्तत्वात् नान्यार्थत्वात् पञ्चावयवोपपन्न इत्यस्यान्योऽर्थः तथा च वक्ष्यामः। अथैतौ साधनोपालम्भशब्दौ भावसाधनौ किंविषयौ प्रमाणैस्तर्केण च क्रियेते। ननूक्तं पक्षविषयाविति पक्षविषयं साधनम् प्रतिपक्षविषय उपालम्भः सत्यमुक्तम् न पुनर्युक्तमुक्तम्। का पुनर्युक्तिहानिरत्र उपालम्भस्य प्रतिपक्षाविषयत्वात् प्रमाणतर्कसाधनासिद्धिः पक्षस्य भवतु न पुनरुपालम्भस्य प्रतिपक्षो विषयः न ब्रूमः प्रतिपक्षविषय उपालम्भ इति किन्तु साधनविषयः प्रतिपक्षस्य यत् साधनं तद्विषय उपालम्भ इति। कथं पुनः प्रतिपक्षसन्निधावपदिश्यमान उपालम्भशब्दः प्रतिपक्षव्यतिरेकेण साधनेन सम्बध्यते सामर्थ्यादसामर्थ्याच्च यदुपालम्भयोग्यं तदुपालभ्यते न च प्रतिपक्ष उपालम्भयोग्यः कथमिति उपालभ्यमानस्य चानुपालभ्यमानस्य च वस्तुनस्तथाभावात् तथाभूतमेव वस्त्वुपालभ्यमानं त***(१) हस्यानानि लभ्यन्ते।

(१) अत्र कश्चिदंशो निपतितः प्रथमद्वितीयादर्शपुस्तकयोरप्यत्र खण्डितत्वादत्र किंयन्त्यक्षराण्यामन्त्रितीदानीं निश्चयो न भवति तानि शुद्धिपत्रे यथासम्भवं प्रदर्शयिष्यामः।

अत एवानियमार्थं उत्तरे पदे आरभ्येते सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नश्चेति। सिद्धान्तविरुद्ध इत्यनेन किल पदेन विरुद्धो हेत्वाभासो लभ्यते तन्नान्यतोऽधिगतेः अन्य एवायं लभ्यते पञ्चावयवोपपन्न इति पञ्चग्रहणात् न्यूनाधिके लभ्येते अवयवग्रहणात् तदाभावो(१) लभ्यन्त इति। लभ्यमानस्यार्थस्य पुनरभिधाने पिष्टं पिष्टं स्यात् तस्मान्नायमर्थः। अथ किमिदं पदं सिद्धान्ताविरुद्ध इत्यनर्थकमेव (तस्मान्नायमर्थः)(२) नानर्थकमपसिद्धान्तावरोधात् सिद्धान्तमभ्युपेत्यानियमात्- कथाप्रसङ्गोपसिद्धान्त इति सोऽनेनावरुद्ध्यते तस्मान्नानर्थकं कस्मात् पुनरयं नियमो वादे अवयवाभासापसिद्धान्तश्च निग्रहस्थानमिति। गुर्वादिभिः सह वादोपदेशान्नियमः यस्मादयं तत्त्वबुभुत्सुर्गुर्वादिभिः सह विविधं फलमाकाङ्क्षन् वादं करोति ततोऽस्य बुभुत्सावतस्तावत्साधनं वक्तव्यम् यावदनेन ज्ञातव्यमप्रतिद्वन्द्वित्वात् प्रतिद्वन्द्विना सह न वादः किं तु जल्पः तत्र समस्तनिग्रहस्थानप्रयोग इति युक्तम्। प्रमाणतर्कसाधनोपालम्भ इत्यभिधानात् उभयोः सिद्ध्यसिद्धिप्रसङ्गः यदि प्रमाणतर्कसाधनोपालम्भो वादः उभयोर्वादिप्रतिवादिनोः प्रमाणतर्कसाधनोपालम्भाभिधाने नाधिकार इत्युभयपक्षसिद्ध्यसिद्धिप्रसङ्गः। नैष दोषः अप्रतिज्ञानात् नेदं प्रतिज्ञायते उभयोर्वादिनोः प्रमाणानि सन्तीति अपि त्वभाभ्यां साधनं वक्तव्यमेतन्नियम्यते न पुनः साधनमेवैतद्भवतीति दूषणमप्येवम्। अपरे तु स्वपरपक्षसिद्ध्यसिद्ध्यर्थं वचनं वाद इति वादलक्षणं वर्णयन्ति। अत्र च पञ्चविशेषणार्थमुपात्तयोः स्वपरपक्षयोरनुपपत्तिर्वि-

(१) तदाभासाः—इति साधुः। (२) एतन्मध्यस्थः पाठोऽयुक्त इति स्वचित्तम् २ पु०।

कल्पानुपपत्तेः ममामामम्भवाच्च । एतौ खलु खपरशब्दौ परिग्रह-वर्जनार्थौ वा स्याताम् साधनीयदूषणीयार्थौ वा पूर्वोत्तरपक्षार्थव्यवस्थापकौ वा पक्षप्रतिपक्षावद्योतकौ वा प्रथमद्वितीयपक्षाभिप्रायकौ वा एकस्य वानेकविशेषणाभिसम्बन्धिनोऽनेकशब्दाभिधानमिति। तच्च परिग्रहपरिवर्जनार्थता तावदनुपपन्ना किमोर्थाभम्भवात्। न परिग्रहार्थतायां किमोर्थः सम्भवति कस्यायं स्वो भविष्यति कस्य स्वार्थ इति स्वीकरणं परिग्रहार्थः यस्य स्वीकारो भवति तस्य स्व इति। तदेव चिन्त्यते किं तत् स्वीकरणमिति। ममेति प्रत्ययोत्पत्तिकारणभावाभावौ स्वपरशब्दार्थः निर्दिष्टः स्वार्थो नरस्य स्वं न हि शास्त्रकारस्य स्वः परो वा सम्भवति यदर्थमिदं स्यादिति। यच्च स्वस्य स्वं भवति तत्तस्यामिद्ध्यर्थं किञ्चिदुपकरोति न पुनः स्वामिनः पक्षेण कश्चिदुपकारः क्रियते तस्मात् परिग्रहवर्जनार्थौ तावत् स्वपरशब्दौ न भवतः। साधनीयदूषणीयार्थौ स्वपरशब्दाविति चेत् अथापीदं स्यात् साधनीयः स्वपक्षो दूषणीयः परपक्ष इति। अहो शास्त्रार्थकौशलं साधनीयः साध्यः स्यात् साधनीयः स्वपक्ष इति कुत एतत् लक्षणं चैतत् पक्षस्य साधयितुमिष्टः पक्ष इति साधनीयशब्देनापि तदेवोच्यते व्यवच्छेदार्थं चेदमुच्यते स्वपक्षः परपक्ष इति परपक्षाच्चायं स्वशब्देन व्यवच्छेद्यमानेन समानमर्थं शक्नोति वक्तुम् व्यर्थं वा विशेषणम् सामान्यशब्दा अपि विशेषे वर्तन्त इत्यदृष्टमेतत् न ते सामान्यशब्दा ये विशेषेषु वर्तन्त इति किन्तु प्रमाणादिभेदानुविधायिनो विशेषशब्दा एव अपि च साधनीयः पक्षः स्वपक्षः दूषणीयः पक्षः परपक्षः। एतदपि न बुद्धामहे साधनीय-

ग्रब्दस्य पचविषयत्वात् साधनीयः पचो भवतु दूषणं तु न कदाचित् परपचेण सम्बध्यते परपचस्य तादवस्थ्यात्। ग्रथ दूषणस्य को विषयः कस्यचित् स्थापनाविषय इति किञ्चिद्दूषणं स्वपरपचाभ्यामसम्बद्धमेव। कतमद्दूषणं स्थापनया सम्बद्धते का चेयं स्थापना चेति स्थापना पञ्चावयवं पचसाधकं वाच्यम्(१) वाक्यदोषो दूषणं तद्वाक्यं न्यूनमधिकं च भवति ग्रवयवाभासोपपन्नञ्च तदुद्भावनं दूषणमेतत् स्थापनया सम्बध्यते तद्विषयत्वात्। ग्रेषं तु दूषणं न स्थापनया न स्वपरपचाभ्यां सम्बद्धम् उत्तरदोष ग्राचेपभावश्चेति। सत्यं न साचात् पचस्य दूषणेनाभिसम्बन्धः स्थापनानिवृत्तिद्वारेण तु प्रवर्तमानं दूषणं न पचं निवर्तयति स्थापनानिवृत्तेः परपचं दूषयतीत्युच्यते उपचरितग्रब्दप्रयोगो लचणेऽनुपपन्नो लचणस्य तत्त्वविषयत्वात् तत्त्वव्यवच्छेदकं लचणम् न पुनरुपचरितग्रब्दप्रयोगेन व्यवस्थास्ति। यदि च पारम्पर्येण प्रवृत्त्या प्रवर्तमानं दूषणं परपचं निवर्तयति तदेवं वक्तुं कर्त्तुं परपचाङ्गार्थं वचनं वाद इति। एवमभिधीयमाने किं भविष्यतीति लघु च सूचं भवतीत्युभयोश्च साधनदूषणयोः पारम्पर्येण परपचासिद्ध्यर्थतेति। ग्रथ माभूदुभयच पारम्पर्यमिति स्वरूपत एवं वक्तव्यम्। पचस्थापनासिद्धासिद्ध्यर्थं वचनं वाद इति। एवं हि स्पष्टता लचणस्य यथाविषयं चाभिसम्बन्ध इति स्थापनापि न पूर्वं दूषणं सम्बद्धत इति दोषतादवस्थ्यम् कस्यचित् सम्भवात्। किञ्च दूषणं स्थापनया सम्बद्धत इति सामान्याभिधानेऽपि सामर्थ्यान्नियमः तस्मादिदमनुपपन्नम्। साधनीयदूषणीयार्थौ स्वपर-

(१) वाक्यम्—पा० २ पु०।

शब्दाविति स्वपरशब्दौ पूर्वोत्तरपचार्थौ भविष्यत इति यदुक्तम्भवति पूर्वोत्तरपचाविति न युक्तमेतदपीति साधनदूषणयोर्नियमाभ्युपगमात् तेन साधनदूषणैरित्येतस्मिन् सूत्रे साधनदूषणयोर्नियमाभिधानं स्वपचसाधनं परपचे दूषणमिति। एतस्मिँश्च नियमत उत्तरविषयं प्राप्नोति तेनोत्तरपचवादी स्वमेव पचं दूषयतीति प्राप्नम्। स्वपचस्योत्तरवादिनः पूर्वपचादन्य इति स्वपरे शब्दाभ्यां[१] पूर्वोत्तरपचयोरभिधानमिति न पदार्थो न परिभावने रूढिः। एतेन पचप्रतिपचार्थता प्रथमद्वितीयपचार्थता च व्याख्याता। एक एवायं पच इति विशेषणद्वययोगात् साध्यतया दूष्यतया च विशेष्यमाणः स्वपरशब्दवाच्य इति युक्तमेतद्विवचनं तु न युक्तम्। एकस्यानेकविशेषणयोगो न प्रतिषिध्यते द्विवचनं तु न भवतीति ब्रूमः न ह्येकस्यानेकविशेषणाभिसम्बन्धे सति द्विवचनबहुवचने भवतः नहि देवदत्तं क्वचिद्दण्डाभ्यां समुपलभ्य वक्तारो भवन्ति[२] क्वचिद्दण्डिनावागतावितिं तदेवं विकल्पानुपपत्तेः स्वपरशब्दानुत्पत्तिः समासासम्भवाच्च। स्वपरपच इति समासपदमेतत् तत्र तावद्विशेषणविशेष्यस्वरूपानवगतेः षष्ठीसमासः यत्र पुनः षष्ठी समस्यते तत्र विशेषणं विशेष्यात् पृथगवधार्यते यथा राजपुरुष इति भेदाच्च यत्र च विशेषणविशेष्यभाव इति तत्र भेदो दृष्टो राजपुरुषवदेव असत्यपि भेदे दृष्ट इति चेत् असत्यपि भेदे दृष्टः षष्ठीसमासः तद्यथा सेनापतिः पानकाङ्गमिति तच्च नानभ्युपगमात् को हि सुस्थात्मा पानकशब्दार्थमङ्गेभ्यो नार्थान्तरं प्रतिपद्यते सेनां च सैनिकेभ्य इति। यथा च

(१) स्वपरशब्दाभ्याम्। (२) वदन्तीति साधुः।

सेनादीन्यर्थान्तरभूतानि तथोक्तं गुणगुणिवाद् इति। अथ मन्यसे नार्थः शब्दस्यार्थः पचशब्दस्येति तन्नापोदितत्वात्। यथा स्वार्थवाचकः शब्दो न भवति तथोक्तम्, तस्मान्न षष्ठीसमासः। एतेन कर्मधारयः प्रत्युक्तः। स्वश्चासौ पचश्चेति विशेषणस्वरूपासिद्धेर्भेदाभावाच्च। एतेन बहुव्रीहिरपि प्रत्युक्तः। साधयितृविषयञ्च साधनं प्राप्नोति अतो न बहुव्रीहिः। ननु च साधनीयता स्वार्थः पचविशेषणत्वेन सम्भवति न सम्भवति पर्यायत्वात् साधनीयः पच इति पर्याय एव न च पर्यायशब्दैः समानाधिकरणो बहुव्रीहिः सम्भवति नहि भवति वृचस्तरुं छिनत्तीति विरोधाच्च। यदि तावदयं पचशब्दः स्वपचाच्छिद्यते परपचवचनं प्रतिज्ञेति व्याघातः। किं कारणम्, प्रतिज्ञायाः स्वपचविषयत्वात्। अथाभिन्नस्तथापीदं न प्राप्नोति स्वपरपचयोः सिद्धसिद्ध्यर्थं वचनं वाद् इति न चान्यः समासः सम्भवति न चेदं वाक्यम्, तस्मात् स्वपरपचयोरित्यसारम्। आस्तां तावत् स्वपरशब्दार्थौ विशेषणविशेष्यभावश्च स्वपरशब्दयोः। अथ समासः कस्मान्न क्रियते स्वपरपचसिद्धसिद्ध्यर्थं वचनं वाद् इति किमेवं कृते भवति स एवार्थो लाघवं च। अत्र केचित् परिहारं ब्रुवते। यदि किल समासः क्रियते उभयाश्रिते सिद्धसिद्धी भवतः न दोषतादवस्थ्यात् नायं दोषः समासकरणेन परिहियते कथमिति स्वपचसिद्धसिद्धपरपचसिद्ध्यर्थं स्वपरपचयोः सिद्धसिद्ध्यर्थमिति नासामर्थ्यात् न ह्ययं समासः समर्थः स्वपचसिद्धसिद्ध्यर्थमिति कस्मात् व्याहतत्वात् यदि सिद्ध्यर्थं यततेऽसिद्ध्यर्थमिति व्याघातः यद्यसिद्ध्यर्थं यतते सिद्ध्यर्थमिति व्याघातः यद्यसामर्थ्यान्न समासः

समासोऽपि[१] तर्ह्यसामर्थ्यात् नोभयपक्षसिद्ध्यसिद्धिप्रसङ्गः । एकवचनबहुवचनप्रसङ्ग इत्यन्ये। यदि किल समासः क्रियेत समासोऽनभिव्यक्तवचनभेदः तस्माद्वचनभेदव्यक्तिनिमित्तासमासः। कथं नाम स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः स्यात् न स्वपरपक्षाणां न स्वपरपक्षस्येति नासम्भवादेकस्य सिद्ध्यर्थं वचनम् नैवास्ति स्वपरपक्षाणां साधनमनुमानमेकमिति तथाप्येषा नास्त्यतोऽस्थाने आशङ्का। अनित्यः समासविधिरित्यपरे। अपरे समासविधेरनित्यतां वर्णयन्ति। एवमाहुः। नायमवश्यं विधिः सर्वत्र समास इति। क्वचित् समासः क्वचिच्च वाक्यम् यथा च राज्ञः पुरुषः राजपुरुष इति समासः। न ह्युभयप्राप्तिरसमासः कस्मात् अनित्यः समासविधिरिति एवं ब्रुवतोक्तं भवति प्राप्तमुभयम् अथोभयप्राप्तौ कस्मादसमास इति समासः कस्मादनिवृत्तोनुयोगः नानिवृत्तो लाघवार्थत्वात् समासे लाघवा[२] समासे गौरवम् अनुगत्यर्थं च शब्दानामुपादानमिति गुर्वभिधाने प्रायोजनं वाच्यम्। वर्णे गुरुलाघवानभ्युपगम इति चेत् नायं परिहारोऽनुयोगस्यानिवृत्तेः वर्णे गुरुलाघवानुयोगं न प्रतिपद्यामह इति चेत् न निवर्त्यतेऽनुयोगः कस्मादिति शास्त्रत्वेन च वादाभिधानमभ्युपगम्यते न च वर्णे गुरुलाघवमाश्रीयत इति न युक्तम् सिद्ध्यसिद्ध्यर्थमित्येतदपि न युक्तम् कस्मात् द्वेधासुपपत्तेः अयं खल्वसिद्धिशब्दः कल्प्यमानो द्वेधा कल्प्येत व्यक्तावुत्पत्तौ वा तत्र तावदुत्पत्तौ युज्यते प्रतिज्ञादिकस्य साधनस्य साधनहानिप्रसङ्गात् नहि प्रतिज्ञादिसाधनेन वस्तूत्पाद्यते किं तु

(१) समासेऽपि—इति वाचस्पतिसम्मतः पा०।
(२) लाघवमसमासे इति साधुः।

विद्यमानप्रकाशकत्वं साधनार्थः स क्षीयते सिद्धावुत्पत्तौ कल्पितायामिति। व्यक्ताविति चेत् नाधिकरणाधारत्वात्। अथ मन्यसे सिद्ध्यसिद्धिर्व्यक्तिर्नोत्पत्तिः युक्तमेतदुत्तरं तु व्याहतं भवति अधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति ये चैतेऽधिकरणप्रत्यायनलक्षणे सिद्ध्यसिद्धी तेऽधिकरणे वर्तमाने पचस्य कथं सपचस्य भवत इति षष्ठ्यर्थो वाच्यः स चायं दुर्वचः तद्विषयत्वात् तयोः सिद्ध्यसिद्ध्योः पचो विषयः अतस्तद्विषयत्वात्तस्येति। न युक्तमेतत्। ये एते सिद्ध्यसिद्धी पचविषये किं तावत् पचे सिद्धे उतासिद्धे यदि तावत् सिद्धे नाधिकरणप्रत्यायनं सिद्धिः किन्तर्हि यतस्तत्प्रत्यायनं स सिद्धिः कुतश्च तद्भवत्यर्थस्य तथात्वात् यस्मात् सोऽर्थस्तथा भवति कथं तथा भवति यथा प्रमाणैरभिसम्बद्ध इति यत् प्रमाणैरविसंवादित्वं स तथाभावः(१)। अथासिद्धे पचेऽधिकरणप्रत्यायनं भवति साधनप्रयोगात् प्रागधिकरणप्रत्यायनमस्तीति वादवैयर्थ्यं स्यात् पचस्य सिद्धिरधिकरणप्रत्यायनम् असिद्धिस्तु कथम् नहि परपचसिद्धिर्दूषणेन क्रियत इत्युक्तम् स्थापनानिवृत्तेरुपचार इति चेत् स्यामतिर्दूषणं(२) प्रयुज्यमानं साक्षात् स्थापनां निवर्तयति स्थापनानिवृत्तेस्तु परपचनिवृत्तिरुपचर्यत इति न प्रयोजनाभावात्। नहि प्रयोजनमन्तरेण मुख्यार्थव्यतिक्रमो लभ्यते अपि तु प्रमाणसम्भवेनोपचारो मञ्चाः क्रोशन्तीति यथा लोकप्रयुक्तशब्दविषयश्चोपचारः लोकगत्या शब्दार्थः न चेदं लौकिकं वाक्यं स्वपरपचयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः। अपरे तु प्रतिज्ञातार्थाज्ञापनं पचस्यासिद्धिं वर्णयन्ति तद्व-

(१) तथाभाव इति साधुः। (२) स्यान्मतिरिति साधुः।

धिकरणविषयं न निवर्तते प्रसङ्गः कथं पचस्यासिद्धिरिति सिद्धि-वत्प्रसङ्गः तस्मात् सिद्धासिद्धौ पचस्य धर्मावेव यत एतद्भवति सिद्धः पचोऽसिद्धश्चेति एवं सति द्रष्टृस्थे व्याघातः। यदि सिद्धासिद्धौ पचधर्मौ द्रष्टृस्थे सिद्धासिद्धौ इति व्याहतं भवति। अथ माभू-द्व्याघात इति द्रष्टृस्थे एव ते तथापि पचस्य व्यक्तव्यक्तौ सिद्धासिद्धौ इति व्याहतम्। अथ—तथा तथा ते पदार्थस्य सिद्धासिद्धौ तथा-व्यधिकरणप्रत्यायनं सिद्धासिद्धौ इति व्याहतं भवति। के पुनरेते *व्यक्तव्यक्तौ वस्तुधर्मावभिधानप्रत्ययहेतू* य एतावभिधानप्रत्ययौ *व्यक्तो व्यक्तश्चेति भवतः ते व्यक्तव्यक्तौ* इति। अर्थशब्दानुपपत्ति-*र्विकल्पानुपपत्तेः*। अर्थशब्दः खलु प्रवर्तमानस्त्रेधा प्रवर्तते उद्देश-प्रयोजनाभिधेयविषयत्वेन उद्देशे तावदर्थशब्दो यथा ब्राह्मणार्थं भक्त इति। एवं चतुर्विधवाक्यं सङ्गृह्णः प्रयोजनेऽर्थशब्दः किमर्थमा-गतोसीति अभिधेयेऽर्थशब्दो यथा गौरित्यभिधानस्य कोऽर्थ इति। तत्र तावदुद्देशे सम्भवति युक्तायुक्तत्वेनेति विशेषितत्वात् स्वपचस्य युक्तत्वेन परपचस्यायुक्तत्वेनेत्येवं विशेषिते उद्देशशब्दार्थः न ह्ययं युक्तायुक्तशब्दो दूषणाभासे वा साधनाभासे वा सम्भवति साधन-योगो युक्तता दूषणयोगोऽयुक्तेति। अथ पुनः शब्दार्थस्य तथा-त्वातथात्वे युक्तायुक्तत्वे युक्तत्वं तथाभावोऽयुक्तत्वमतथाभाव इति तथापि तयोः कर्मतयोपादानात् युक्तत्वेनाधिकरणप्रत्यायनमयुक्तत्वेन वेति व्याघातः नहि प्रत्याय्यं प्रत्यायनं भवतीति। अथ प्रयोजनेऽर्थशब्दः तथापि साधनदूषणाभासवादिनोऽवादिता स्यात्। किं कारणम्, सा-धनदूषणाभासयोः सिद्धासिद्धप्रयोजनत्वात् नहि साधनदूषणाभासयोः

सिद्धसिद्धौ प्रयोजनम्। एवं च तद्वादी अवादी स्यात् तथा चावादी निग्रह्यत इति दोषः। अथाभिधेयेऽर्थशब्दप्रयोगः अभिधानस्वभावानवधृतेरित्ययुक्तमेतदपि नहि ग्रन्थकारभाष्यकाराभ्यां विशेषितमेवं प्रकारमभिधानं सिद्धसिद्धोर्वाचकमिति। ननु विशेषितं येन सिद्धसिद्धौ अभिधीयेते तत्तयोर्वाचकतेति सत्यमुक्तम्, एवं तु सिद्धसिद्धौ इत्येतेऽभिधाने वादः प्राप्तः न चान्योऽर्थशब्दस्यार्थ इति। तस्मादर्थशब्दोऽप्ययुक्त इति। सिद्धसिद्ध्यर्थं वचनं वाद इति ब्रुवाणेन पूर्वमुत्तरं वा नालोचितम् नैयायिकहेतुप्रतिषेधेन विशेष्यं वचनमित्यभ्युपगमसिद्धं पुनः सूत्रमिति। समस्तवचनविशेषणार्थमिति व्याघातः। तदेवमेतानि सूत्रपदानि विचार्यमाणानि स्वतन्त्रव्याघातकानीति लोकं च बाधन्त इति। एवं तावत् सौत्राणि पदानि स्वेन न्यायेनासमर्थानि यथा च वृत्तिपदानि असम्बद्धानि तथेदमुच्यते स्वस्य पचस्येति स्वार्थासिद्धेरयुक्तम्, स्वार्थश्च प्रतिषिद्धः अतोऽर्थं स्वस्य पचस्येति यदपि षष्ठीसप्तमीवचनयोस्तुल्यरूपत्वात् षष्ठीत्वज्ञापनार्थं स्वस्य पचस्येति तदप्ययुक्तम्। अधिकरणार्थासम्भवात् नहि पचत्यतिरेकेण पचे किञ्चित् साध्यं सम्भवति तस्मादप्रसक्तः सप्तम्यर्थः तदप्रसक्तौ विशेषणानर्थक्यमिति युक्तायुक्तत्वेऽनुपपत्तिश्च विकल्पानुपपत्तेः युक्तायुक्तत्वे साधनदूषणे वा स्याताम् साधनदूषणाभ्यां वा योगः पदार्थस्य वा तथा तथा चेति। तत्र तावत् साधनदूषणे युक्तायुक्तत्वे कस्मात् साधनदूषणयोः पृथगभिधानात् ते साधनदूषणैरिति पृथगुक्ते साधनदूषणे युक्तायुक्तत्वशब्दाभ्यां च साधनदूषणयोरभिधानमिति ते साधनदूषणैरिति सूत्रमुच्चार्यम्

चरितार्थत्वादिति। अथ मन्यसे तयोरेव युक्तायुक्तयोर्विशेषणार्थं त साधनदूषणैरिति न प्रथमाभिधानप्रसङ्गात्। यदि युक्तायुक्तत्व-विशेषणार्थं ते साधनदूषणैरिति सूत्रं प्रथमैव न्याय्या ते साधन-दूषणानीति नहि विशेषणविशेष्यभावे भवति नीलमुत्पलैरिति। योग इति चेत्। अथ साधनदूषणाभ्यां योगो युक्तत्वायुक्तत्वे इत्येवं चेन्मन्यसे तत्त्वानिर्देशात् साधनदूषणाभ्यां योगो निर्दिष्ट एवंविध इति अनिर्देशादयुक्तमेतत् साधनयोग इति च कदा भवति यदासौ निर्णीतः पदार्थः तदा च न साधनार्थः कश्चिदस्तीति न युक्तायुक्तत्वेनाधिकरणप्रत्यायनमिति व्याघातादतो न योगः। अप-दार्थस्य तथातातथाते युक्तायुक्तत्वे तदपि न करणार्थस्यासम्भवात् ये तथात्वातथात्वलक्षणे युक्तायुक्तत्वे ते व्यवच्छेद्ये न तु व्यव-च्छेदस्य साधने तस्मात् करणार्थो नास्त्यतो युक्तायुक्तत्वस्येति युक्तं वक्तुमिति। अधिकरणप्रत्यायनमिति तु न युक्तम् शास्त्रसम्बन्धा-सङ्गतत्वात् शास्त्रं सम्बन्धं कुर्वाणेनोक्तं सन्देहविपर्ययप्रतिषेधार्थः शास्त्रस्यारम्भ इत्येतन्निरपेक्षेणेदमुच्यते अधिकरणप्रत्यायनं सिद्ध-सिद्धौ इति न च प्राश्निकेषु संशयविपर्ययौ स्तः परिच्छेदकत्वात् तस्मान्न प्राश्निकाः प्रत्याय्या इति यच्चोक्तं प्राश्निकप्रत्यायनादेव प्रति-वादिप्रत्यायनं कृतं भविष्यतीति। किं कारणम्, प्रतिवादी किल पक्षरागात् सन्तमप्यर्थं न प्रतिपद्यते सन्तमप्यर्थं न प्रतिपद्यते इति व्याहतमुच्यते कथं चान्यथा प्रतिपन्नः सन्नित्यभिधीयते। अथ प्रति-पद्यमानोऽपि परस्य न कामकारं ददाति तथापि न प्रतिपद्यत इति व्याहतमुच्यते यच्च प्राश्निकप्रत्यायनात् तत्प्रत्यायनमिति तदपि न

प्रतीतेः करणभेदात् प्राश्निकप्रतीतेरन्यानि करणानि अन्यानि प्रतिवादिप्रतीतेरिति न चान्यविषयस्य करणस्य क्रियेति नियमाभावाच्च । नायं नियमः प्राश्निकप्रत्यायनार्थ एव वादः प्राश्निकानन्तरेणापि गुर्वादिभिः सह वादो दृष्ट इति। यदा त्वयं न तत्त्वबुभुत्सुर्लाभपूजाख्यातिकामो वादमारभते तदा प्राश्निकैः प्रयोजनमस्तीति सत्यमस्ति प्रयोजनं वादस्तु न भवतीति न चैविध्यानभ्युपगमात् एक एवायं कथामार्गः तस्य प्रयोजनं तत्त्वावबोधो लाभादयश्च न प्रतिषेधात् प्रसिद्धस्तुतिमानलाभलिप्सोर्वादः यदपीदमुच्यते न चैविध्यानभ्युपगमादिति नानभ्युपगमायत्तः पदार्थसद्भावः अपि तु सद्भावे सत्यभ्युपगम इति यथा च चैविध्यं कथामार्गस्य तथा लक्षणभेदाद्वा जल्पवितण्डयोर्भेदमुपपादयिष्यामः। तस्मादज्ञात्वा विशेषमुच्यते चैविध्यानभ्युपगमादिति यच्चोक्तं पक्षसिद्धिविषयं प्रत्यायनं पक्षसिद्धिशब्देनोपचरितं यथा शून्यताविषयः समाधिः शून्यतेति न कामत उपचारो लभ्यते अपि तु प्रमाणसम्भवेन लोकप्रयुक्तशब्दाख्यानमुपचारः उक्तं च नोपचरितशब्दप्रयोगो लक्षणे उपपन्न इति। तदर्थं वचनमित्येतदपि किल चतुर्विधवाक्यज्ञापनार्थमुक्तम् साधनं साधनाभासो दूषणं दूषणाभासश्च सम्भवन्त्यत इति। तदयुक्तम् युक्तायुक्तत्वेनेतिविशेषितत्वात् एवं विशेषिते तस्मिन् कुतश्चतुर्विधवाक्यसंग्रह इति अधिकरणं पुनर्यो वादिप्रतिवादिभ्यामधिक्रत इत्यधिकरणार्थो वक्तव्यः न हि वादे प्राश्निकार्थं किञ्चिदस्तीति प्रत्यायनाधारत्वादधिकरणमिति चेत् नोक्तोत्तरत्वात् पक्षविषयं प्रत्यायनं न प्राश्निकविषयमिति तस्मिन् सति भावादिति चेत् नान्यथापि

दर्शनात् अन्यथापि गुर्वादिभिः सह दृष्टो वाद इति तद्वादे परीक्षा का कस्य केति वक्तव्यम्। साधनदूषणप्रयोगः स्थापनाविषयो वाद इति तस्य परीक्षा साधनदूषणतदाभासपरिज्ञानम् तदर्थमधिकारः तस्मिन्निति सप्तम्यर्थो नास्ति यदपि प्राश्निकप्रतिवादिनोः प्रियाप्रियवचसि वादप्रसङ्ग इति चोद्यं कृत्वा प्रतिसाधनमुक्तम् तत्सिद्धसिद्धिभ्यां साचात् पारम्पर्येणासम्बन्धाद्युक्तायुक्तविशेषणाच्चासम्बद्धमुत्तरेण लसङ्गतपदार्थाभिधायिनो दत्तः स्वहस्तः पूर्वापरयोरसम्बन्धादिति। यदि लसङ्गतस्याप्युत्तरं वाक्यम् तत एवं वक्तव्यम् न सूत्रार्थापरिज्ञानादिति तदेतत्सूत्रं विचार्यमाणं सहवार्त्तिकं न युक्त्या सङ्गच्छत इति यथान्यासमेवास्तु ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ ४३ ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः। समस्तं वादलक्षणं छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति[१]। यथोक्तोपपन्न इति न युक्तम् जल्पनिग्रहस्थाननियमस्थानभ्युपगमात् यद्येवमुच्येत स न तर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः छलजातिनिग्रहस्थानोपालम्भो जल्प इति न युक्तमेवं भवितुम्। सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति च पदयोरुपालम्भश्रवणात् समस्तनिग्रहस्थानप्रसक्तौ नियमार्थत्वात् नियमार्थे एते पदे सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति जल्पे च नियन्तव्यं न किञ्चिदस्ति तस्मान्नियमार्थे एते पदे नातिदेष्टव्ये

(१) साधनोपालम्भश्छलजल्प—पा० २ पु०।

दत्यतो न वक्तव्यम् यथोक्तोपपन्न दति नैष दोषः सम्भवतोऽतिदेशात् यच्च सम्बध्यते तदतिदिश्यते किञ्च सम्बध्यते प्रमाणतर्कसाधनोपालम्भ दत्येतत् तस्माद्यथोक्तोपपन्न दति लक्षणमात्रस्यातिदेशः यथान्यत्रानेकद्रव्येण समवायाद्रूपविशेषाच्च रूपोपलब्धिरित्यनेन सम्बन्धस्यर्शेषु ज्ञानं व्याख्यातमिति न स्वरूपविशेषोऽतिदिश्यत दति अपि त्वनेकद्रव्यद्रव्यसमवायमात्रं स्वगतो विशेषः सामर्थ्यात् तथेहापि यत् समर्थं तदतिदिश्यते समर्थं च लक्षणं तस्मात् तदतिदिश्यते न नियमार्थे पदे नियन्तव्यस्य बाधात्। अथवा यथोक्तोपपन्नेनोपपन्नो यथोक्तोपपन्नोपपन्न दति प्राप्ते गम्यमानत्वादेकस्योपपन्नशब्दस्य लोपः यथा गोरथ दति केन पुनरयं गम्यत दति उक्तं सामर्थ्येनेति। न हि नियमार्थयोः पदयोर्जल्पसम्भवः तस्मान्न ते अपदिश्येते दति भाष्यमिदानीं कथं न सूत्रपाठानुक्रमज्ञापनार्थत्वाद्भाष्यस्य एतस्मिन् सूत्रे यदुपपन्नं लक्षणत्वेन तदतिदिश्यत दति। छलजातिनिग्रहस्थानैर्नैकस्य कस्यचित् साधनमुपालम्भो वा युक्तोऽयुक्तोत्तरत्वात्। छलं तावत् न साधनोपालम्भायालम् कस्मात् अयुक्तोत्तरत्वात् अयुक्तमुत्तरं छलं तन्न साधनोपालम्भायेति एवं जातिः। अङ्गभाव दति चेत् अथापीदं स्यात् यत्तत् प्रमाणतर्कैः साधनोपालम्भः तस्यैतानि प्रयुज्यमानानि छलजातिनिग्रहस्थानानि रक्षणार्थत्वादङ्गं भवन्तीति तदप्ययुक्तोत्तरत्वादनुपपन्नम्। किमर्थं तर्हि प्रयोगः यद्येतानि छलजातिनिग्रहस्थानानि साधनोपालम्भयोर्न साधनमङ्गं वा किमर्थमेतेषामुपपादनमिति साधनविघातार्थम् साधनं विहनिष्यामीति अनया धियापक्षतः प्रवर्तते यच्च चैतानि छलजातिनिग्रहस्थानानि

प्रयुञ्जन्ते न स वादः न पुनरेतदभिधीयते छलजातिनिग्रहस्थानानि साधनमङ्गानि वेति साधु साधनोपादाने परेणाकुलितबुद्धिः छलवादी नियुक्तः कदाचिच्छलादिभिराकुलीकृतस्य पराजयोऽपि स्यात् न पुनरेतानि तत्त्वबुभुत्सुना वक्तव्यानि किं तु विजिगीषुणेति। सोऽयं पक्षप्रतिपक्षपरिग्रहश्छलजातिनिग्रहस्थानप्रयोगाप्रयोगाभ्यां भिद्यमानो वादो जल्पो वितण्डा च भवति। अत्रापि विरुद्धौ धर्मावेकाधिकरणस्थाविति समानम् विरुद्धयोर्धर्मयोरेकाधिकरणत्वानुपपत्तिः उभयस्वभावासम्भवात् यदि विरुद्धावेकाधिकरणौ धर्मौ भवतः तदेकं वस्तूभयस्वभावम् न चैतदस्ति तस्मान्न विरुद्धौ धर्मावेकाधिकरणाविति। नाध्यारोपितस्वरूपधर्मप्रतिपत्त्या तदुपपत्तेः एकस्तत्र धर्मः स्वरूपत एकस्तत्राध्यारोपितस्वरूपप्रवृत्तिः तस्मादुभयधर्मा धर्मौ किमुक्तं एकधर्मिस्थौ विरुद्धार्थावित्येतदपि न बुद्धामहे को विरुद्धार्थ इति न स्वरूपविपर्ययोपपत्तेः न स्वरूपमात्रविपर्ययो विरोधः पुनर्बाधा वध्यघातकभावो वेति॥

स प्रतिपक्षस्थापनाहीनो वितण्डा॥ ४४॥

स प्रतिपक्षस्थापनाहीनो वितण्डा। प्रतिपक्षस्थापनाहीन इति यावदुक्तभवति द्वितीयपक्षवादी वैतण्डिको न किञ्चित् पक्षं स्थापयति। अपरे तु ब्रुवते दूषणमात्रं वितण्डेति। दूषणमात्रमिति चात्र शब्दप्रयोगाद्वैतण्डिकस्य पक्षोऽपि नास्तीति युक्तं चैतत् चतुर्थस्याभ्युपगमात् दूषणमभ्युपगच्छन् दूष्यमभ्युपैति अयथार्थावबोधं प्रतिपद्यते प्रतिपादयितारं प्रतिपत्तारं च दूषणमात्राभ्युपगमे सति

सर्वमेतन्न स्यात् दूषणमात्राभ्युपगमाच्छेषमर्थतोऽवगम्यत इति वितण्डा वितण्डेत्येवं वक्तव्यम् यया वितण्ड्यते सा वितण्डेत्यनुगतार्थया सञ्ज्ञयैव परप्रतिपत्तिविघातः क्रियत इति तस्मात् यथा न्यासमेवास्तु न्याय्यम् ॥

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥ ४५ ॥

हेतुलक्षणाभावाद्हेतवोऽहेतुसामान्याद्धेतुवदाभासमानास्त इमे सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः । किं पुनर्हेतुभिरहेतूनां सामान्यं येन हेतुवदाभासन्त इति । प्रतिज्ञानन्तरं प्रयोगः सामान्यं यथैव हेतवः प्रतिज्ञानन्तरं प्रयुज्यन्ते एवं हेत्वाभासा अपीत्येव सामान्यम् अन्यतमलिङ्गधर्मानुविधानं वा यद्वा तत्साधनस्य लिङ्गस्य त्रैविध्यम् तत्रैकतमधर्मानुविधानम् द्विलक्षणस्यान्यतरधर्मानुविधानं विवक्षितम् । साधकासाधकत्वे तु विशेषः हेतोः साधकत्वं धर्मोऽसाधकत्वं हेत्वाभासस्य किं पुनस्तत् समस्तलक्षणोपपत्तिरसमस्तलक्षणोपपत्तिश्च कः पुनरस्य सूत्रस्यार्थः । विभागोद्देशो नियमार्थ इत्युक्तम् । किं पुनर्विभागोद्देशेन नियन्तव्यम् अनेकधा प्रकृतस्य हेतुहेत्वाभासस्य विस्तरः संक्षेप्तव्यमिति कियता पुनर्भेदेनायं हेतुहेत्वाभासः प्रकृत इति । कालपुरुषवस्तुभेदानुविधानेनापरिसंख्येयः सामान्यतः साध्यवस्तूपग्रहणहेतुहेत्वाभासभेदः प्रपञ्च्यमानः षट्सप्ततिशतम् । तत्र साध्यव्यापकधर्मभेदः षोडशधा । साध्यैकदेशवृत्तिधर्मोऽप्येवम् । एवं साध्यावृत्तिधर्मभेद इति ।

विशेषणविशेष्यासिद्धभेदाच्चतुःषष्टिः । एवं समर्थासमर्थविशेषणविशेष्यभेदादिति । तत्र साध्यव्यापकधर्मभेदानां षोडशानामुदाहरणानि साध्यतज्जातीयान्यव्यापकः प्रमेयत्वान्नित्योऽनित्यो वेति । साध्यतज्जातीयव्यापको विपक्षैकदेशवृत्तिः गौरियं विषाणित्वात् । साध्यतज्जातीयव्यापको विपक्षावृत्तिः अनित्यः शब्द उत्पत्तिधर्मकत्वात् । साध्यव्यापकस्तज्जातीयावृत्तिः विपक्षव्यापकः नित्यः शब्दः उत्पत्तिधर्मकत्वात् । साध्यव्यापकस्तज्जातीयावृत्तिः विपक्षैकदेशवृत्तिः नित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात् द्व्यणुकवत् । साध्यव्यापकस्तज्जातीयविपक्षावृत्तिर्यथा नित्यः शब्दः सामान्यविशेषवत्त्वे सति श्रावणत्वात् घटादिवत् । साध्यव्यापकस्तज्जातीयैकदेशवृत्तिः विपक्षव्यापकश्च अगौरयं विषाणित्वात् । साध्यव्यापकस्तज्जातीयविपक्षैकदेशवृत्तिः नित्यः शब्दोऽस्पर्शवत्त्वात् । साध्यव्यापकस्तज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः अनित्यः शब्दः सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् सामान्यविशेषवत् सामान्यविशेषमवयवानां निराकरणम् अस्मदादिप्रत्यक्षत्वादिति परमाणूनां बाह्यकरणप्रत्यक्षत्वादित्यात्मनः साध्यतज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदेनैकान्तवादिनः अनित्यः शब्द उत्पत्तिधर्मकत्वात् । साध्यव्यापकस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः अनित्यः शब्दो बाह्येन्द्रियप्रत्यक्षत्वात् । साध्यव्यापकस्तज्जातीयावृत्तिरविद्यमानविपक्षः अनित्यः शब्दः श्रावणत्वात् । साध्यव्यापकोऽविद्यमानसजातीयो विपक्षव्यापकः नित्यः शब्द उत्पत्तिधर्मकत्वात् । साध्यव्यापकोऽविद्यमानसजातीयो विपक्षैकदेशवृत्तिः नित्यः शब्दो बाह्येन्द्रियप्रत्यक्ष-

त्वात् । साध्यव्यापकोऽविद्यमानसजातीयो विपक्षावृत्तिः नेदं निरात्मकं जीवच्छरीरम् अनिन्द्रियाधिष्ठानत्वप्रसङ्गात् पक्षव्यापकोऽविद्यमानसपक्षविपक्षः सर्वं नित्यं प्रमेयत्वात् । त एते पक्षव्यापकाः षोडश । एषां पञ्च हेतवः शेषा हेत्वाभासाः तत्रान्वयव्यतिरेकिणौ द्वौ विपक्षावृत्ती तृतीयनवमौ एकान्तवादिनोन्वयिनावेव दशमैकादशौ व्यतिरेकौ पञ्चदश इति ।

अथ साध्यैकदेशवृत्तयः साध्यैकदेशवृत्तिस्तज्जातीयविपक्षव्यापकः पृथिव्यग्नेजोवाय्वाकाशानि अनित्यानि अगन्धवत्त्वादिति साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिश्च सामान्यविशेषवदस्मदादिबाह्यकरणप्रत्यक्षे वाङ्मनसे अनित्यत्वात् साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षावृत्तिः अनित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात् साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिः विपक्षव्यापकः अनित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात् साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिः विपक्षैकदेशवृत्तिः सामान्यविशेषवदस्मदादिबाह्यकरणप्रत्यक्षे वाङ्मनसे नित्यत्वात् साध्यैकदेशवृत्तिस्तज्जातीयविपक्षावृत्तिः अनित्यः शब्दो विभागजविभागासमवायिकारणत्वात् साधतज्जातीयैकदेशवृत्तिः विपक्षव्यापकः अनित्याः परमाणवोऽगन्धवत्त्वात् साधतज्जातीयविपक्षैकदेशवृत्तिः अनित्ये वाङ्मनसे अमूर्तत्वात् साधतज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः अनित्ये वाङ्मनसे सामान्यतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् साध्यैकदेशवृत्तिः तज्जातीयव्यापकः अविद्यमानविपक्षः सिद्धान्तभेदाश्रयेण अनित्ये रूपविज्ञाने अमूर्तत्वात् वेदनादिवत् साधतज्जातीयैकदेशवृत्तिरविद्यमानसजातिः अनित्ये चक्षुर्विज्ञाने

अमूर्तत्वात् रूपादिवदिति साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिरविद्यमानविपक्षः अनित्ये शब्दमनसी श्रावणत्वात् साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षव्यापकः अनित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात् साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षैकदेशवृत्तिश्च नित्ये चक्षुर्विज्ञाने मूर्तत्वात् साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षावृत्तिः नेदं निरात्मकं शरीरमनिन्द्रियाधिष्ठानत्वप्रसङ्गात् साध्यैकदेशवृत्तिरविद्यमानसपक्षविपक्षः सर्वमनित्यं मूर्तत्वादिति एते च साध्यैकदेशवृत्तयः षोडश यथोक्ताः सर्वे हेत्वाभासाः ॥

अथ साध्यावृत्तयः । साध्यावृत्तिस्तज्जातीयविपक्षव्यापकः अनित्या पृथिवी गन्धवत्त्वात् साध्यावृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिः अनित्यः शब्दोऽश्रावणत्वात् साध्यावृत्तिस्तज्जातीयव्यापको विपक्षावृत्तिः अर्थः शब्दः अश्रोत्रग्राह्यसामान्यवत्त्वात् साध्यजातीयावृत्तिर्विपक्षव्यापकः अर्थः शब्दः असामान्यवत्त्वात् साध्यतज्जातीयावृत्तिर्विपक्षावृत्तिश्च कारणवान् शब्दोऽर्थत्वात् साध्यतज्जातीयविपक्षावृत्तिः नित्यः शब्दोऽमत्त्वात् साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिर्विपक्षव्यापकः अस्पर्शः शब्दो द्रव्यत्वात् साध्यावृत्तिस्तज्जातीयविपक्षैकदेशवृत्तिः कारणवान् शब्दो मूर्तत्वात् साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः स्वाश्रयवान् शब्दश्चाक्षुषत्वात् औलूक्यपक्षे साध्यावृत्तिस्तज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदाश्रयेण अनित्यः शब्दोऽश्रावणत्वात् साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः अनित्यः शब्दो मूर्तत्वात् साध्यतज्जातीयावृत्तिरविद्यमानविपक्षः अनित्यः शब्दोऽमत्त्वात् साध्यावृत्तिरविद्यमानसजातिर्विपक्ष-

व्यापकः नित्यः शब्दोऽश्रावणत्वात् साध्यावृत्तिरविद्यमानसजाति-र्विपक्षैकदेशवृत्तिः नित्यः शब्दोऽसत्त्वात् साध्यावृत्तिरविद्यमान-समानविपक्षः अनित्यं सर्वमसत्त्वात् त एते षोडशसाध्यावृत्तयो हेत्वाभासाः विशेषणविशेष्यासिद्धभेदादृत्तयः षड्भिर्भवन्तीत्युक्तम्। तत्कथं व्यापकाव्यापकविशेषणयोगात् य एव साध्यव्यापकाः षोडश तयेव च पक्षैकदेशवृत्तयः ते विशेषणविशेष्यासिद्धभेदेन चतुः-षष्टिर्भवन्तीति। तत्र व्यापकानां तावदुदाहरणानि। अनित्यः शब्दोऽनभिधेयत्वे सति प्रमेयत्वात् विशेषणासिद्धः प्रमेयत्वे सत्यभि-धेयत्वादिति विशेष्यासिद्धः। एवं सर्वेषु साध्यव्यापकेषु विशेषण-विशेष्यभेदो द्रष्टव्यः नान्येव चोदाहरणानि साध्यैकदेशवृत्तीनामु-दाहरणम्। पृथिव्यग्नेजोवाय्वाकाशान्यनित्यानि अनभिधेयत्वे सति अगन्धवत्त्वात् विशेषणासिद्धेः अगन्धवत्त्वे सत्यनभिधेयत्वादिति विशेष्यासिद्धेः। एवं सर्वेषु साध्यैकदेशवृत्तिषु। एवमसमर्थविशेषणास-मर्थविशेष्याश्चतुःषष्टिरेव द्रष्टव्याः। यथा अनित्यः शब्दः कृतकत्वे सति प्रमेयत्वात् प्रमेयत्वे सति कृतकत्वादिति। एवं विशेषेषूदा-हरणेषु। एवं सन्दिग्धविशेषणविशेष्यभेदा अपि द्रष्टव्याः। यथा मयूरशब्दोऽयं षड्जादिमत्त्वे सति अवर्णात्मकत्वात् अवर्णात्मकत्वे सति षड्जादिमत्त्वात् त एते उभयपक्षसम्प्रतिपन्नाविद्यमानसाध्य-धर्मा उदाहृता इति। एवमन्यतरासिद्धा व्यापकाव्यापकभेदेन द्वाचिंशकं[१] शतम्। ते च पुनर्व्यधिकरणविशेषणविशेष्यसन्दिग्धा-समर्थविशेषणविशेष्यभेदेन द्वानवतंशतम्। यथाग्निमान् देशो धूम-

(१) द्वाभ्यामूना त्रिंशदिति व्याख्यातं तात्पर्यटीकायां वाचस्पतिमिश्रैः।

वत्त्वात् अस्ति चात्मा इच्छादिगुणत्वात् अममर्थाव्यापकासिद्धविशेषणानामुदाहरणम् अनित्यः शब्दः प्रयत्नानन्तरीयकत्वे सति कृतकत्वात्। अव्यापकाममर्थविशेष्याणामुदाहरणम् अनित्यः शब्दः प्रमेयभेदभेदित्वे[१] सति उपलभ्यमानत्वात्। व्यधिकरणविशेष्याणामुदाहरणम् अस्ति प्रधानं भेदानामन्वयदर्शनात्। व्यधिकरणविशेषणानामुदाहरणम् रूपादिशब्दाश्चन्दनशब्दादत्यन्तभिन्नार्थाः समुदायसमुदाय्यसम्भवे सति तेन व्यपदेशात्। एवमेव व्यधिकरणस्य विशेष्यस्योदाहरणम् विपर्ययेण अन्यथा विरुद्धोदाहरणम्[२] अन्येषां अभ्यासान्नित्यः शब्दः सन्दिग्धाप्रसिद्धविशेषणानामुदाहरणम् यथा सन्दिह्यमानधूमादिभावोऽग्निमान् देशो धूमवत्त्वे सति प्रकाशकत्वात् विपर्ययेण सन्दिग्धविशेष्या वक्तव्याः। एवं सन्दिग्धाप्रसिद्धाप्रसिद्धा उभयान्यतरसिद्धा व्यापकाव्यापकभेदेन चतुःषष्टिर्भवन्तीति। ते च पुनः पूर्ववद्भेदेन शतत्रयं चतुरशीतम्। एवमन्यथासिद्धभेदो द्रष्टव्यः। एवं विरुद्धविशेषणविरुद्धविशेष्याश्च सर्व एव द्रष्टव्या इति। एषां तूदाहरणानि हेत्वाभासवार्त्तिके द्रष्टव्यानि स्वयं चाप्यूह्यानि। त एते ऽहेतवो[३] हेत्वाभासाश्चासङ्कीर्णविशेषणविशेष्यभेदेन द्वे सहस्रे द्वाचिंशके[४] असिद्धादिसमुच्चयेनानन्तो भेद इति। साध्यावृत्तयस्त्वसत्त्वान्न विशेषणयोगिन इत्यतो नाभिधीयन्ते। एते विद्यमानसाध्य-

---

(१) प्रत्यक्भेदभेदित्वेनेति तात्पर्यटीकायां वाचस्पतिमिश्राः।

(२) अन्यथासिद्धोदाहरणमिति तात्पर्यटीकायाम्।

(३) तत्र तेत्र हेत्वभावो—पा० २ पु०। एत्वाभावो—इति क्वचित्।

(४) द्वाचिंशे द्वे सहस्रे भवत इति तात्पर्यटीकायाम्।

व्यापकाव्यापकधर्माः। प्रपञ्च उक्तः। तत्र मुख्यासिद्धभेदाः षोडश तयेते पक्षावृत्तयः। अनैकान्तिकास्त्वसङ्कीर्णा मुख्यतः षडेव साध्यव्यापकवर्गे विरुद्धाश्चत्वार एव तस्मिन् अन्तिमस्तु पक्षमात्रधर्मत्वात् अनुपसंहार्यैव शेषा हेत्वाभासाः तेऽसिद्धानैकान्तिका विरुद्धाव्यापकप्रसिद्धाव्यापकभेदेन सङ्कीर्णा उदाहरणेषु स्वयमूह्या इति। केचित्तु विरुद्धाव्यभिचारिणमनैकान्तिकं वर्णयन्ति। तन्नासत्त्वात्। नायमस्तीत्युक्तम्। उपेत्य तस्य पञ्चविंशतिधा भेदः पञ्चानां हेतूनां सरूपासरूपप्रतिसन्धानात् पञ्चपञ्चका भवन्तीति। तेषां तु सर्वेषां नोदाहरणानि सन्तीति नोदाह्रियन्ते। त एते हेत्वाभासाः संक्षेपेणैतावता भेदेन भेदवन्तस्तेषां सग्रहार्थं हेत्वाभासानां विभागोद्देशार्थं सूत्रम्। लक्षणत एव पञ्चत्वं गम्यत इति चेत् यद्येतानि पञ्चहेत्वाभासानां लक्षणसूत्राणि तैरेव पञ्चत्वं गम्यत इति नियमार्थं सूत्रमनर्थकम्। नानर्थकम् लक्षणस्येतरेतरव्यवच्छेदकत्वात् व्यवच्छेदकं लक्षणं न पुनर्नियमार्थम् न हि नियमो लक्षणेन गम्यत इति॥

अनैकान्तिकः सव्यभिचारः॥ ४६॥

तेषामनैकान्तिकः सव्यभिचारः। एतस्मिन्नन्ते नियत ऐकान्तिकः। कः पुनरयं व्यभिचारः साध्यतज्जातीयान्यवृत्तित्वम्। यत् खलु साध्यतज्जातीयवृत्तित्वे सति अन्यत्र वर्तते तद्व्यभिचारि तद्वृत्तित्वं व्यभिचारः सर्वोऽयं पदार्थभेदोऽन्तद्वयेवतिष्ठते अन्यत्र प्रमेयात् नित्यश्चानित्यः व्यापकश्चाव्यापकश्च इत्येवमादि। तत्र यो हेतुरुपात्त उभावन्तावाश्रित्य प्रवर्तते सोऽनैकान्तिकः अनैकान्तिक

इति । किं पुनरयं पर्युदास उत प्रसज्यप्रतिषेध इति किं चातः यदि पर्युदासः सर्वानैकान्तिकता ऐकान्तिकादन्योऽनैकान्तिक इति ब्रुवतः सर्वानैकान्तिकः प्राप्तः । एवं चैको हेत्वाभास इति प्राप्तम् । अथ प्रसज्यप्रतिषेधः तथाप्यैकान्तिकाभावोऽनैकान्तिक इति प्राप्तम् । तस्य व्यभिचारोऽर्थो नास्तीति अयुक्तोऽनैकान्तिको हेत्वाभासः नायं पर्युदासपक्षः किन्तु प्रसज्यप्रतिषेधः प्रसज्यप्रतिषेधे ऽभाव इति चेत् नाभावो धर्मविशेषकत्वात् धर्मोऽयं विशिष्यते य एते सन्नियतो धर्म इति न भवति न पुनरभावः अभावे विशेषणविशेष्यासम्भवान्नाभाव एकान्तः सन्नियतो नानैकान्तिकः सन्नियतः कथम् अब्राह्मणवदिति । यथा अब्राह्मणशब्दः प्रसज्यप्रतिषेधविषयत्वेन प्रवर्तमानो यदुत्तरे तत्प्रतिषेधतीति न पुनरभावं प्रतिपादयति तथेहापीत्यदोषः । उदाहरणं नित्यः शब्दः अस्पर्शवत्त्वात् शब्दस्यास्पर्शत्वमिति षष्ठ्या भेदः प्रदर्श्यते किं पुनस्तत् स्पर्शानाश्रयस्य स्वात्मसत्तानुभवो ऽस्पर्शत्वम् स्पर्शानाधारस्य सत्तासम्बन्धो वा उभयं च शब्दव्यतिरिक्तमित्यर्थवती षष्ठी । कुतः पुनरेतत् तद्भावे भावात् तदभावेऽभावादिति यत् खलु स्पर्शवत् सत्तामनुभवति न तत्रास्पर्शशब्दः प्रसज्यत इति यच्चासत् तत्रापि न प्रसज्यते यदस्पर्शं सत्तानुभावि तत्र प्रसज्यत इति । वाक्यार्थानुज्ञानाच्च पदार्थाभ्यनुज्ञा स्पर्शानाधारस्य वस्तुनः सत्तासम्बन्ध इति यो वाक्यार्थः स एवास्पर्शवत्त्वशब्दस्यार्थः । अतिदेशानुपपत्तिरयुक्तत्वादिति चेत् अनैकान्तिकः सव्यभिचार इति न क्वचिदनैकान्तिक उक्तः इहानैकान्तिकग्रहणात् सव्यभिचारो गम्यते अतो न युक्तमनैकान्तिकः सव्यभिचार

इति नेदमयुक्तम् लोकतस्तदधिगतेः। यत् पुनर्लोकतो न गम्यते तच्च शास्त्रमर्थवत् यत् पुनर्लोकत एव गम्यते तत्रोपदेशोनर्थकः लोकतश्चैतद्गम्यते उभयान्तसन्नियतोऽनैकान्तिक इति। यदि च यल्लोकतो गम्यते तदयुक्तमिति मन्यसे दुःखादीन्यपि देशयितव्यानि किमिदं दुःखमिति तस्मात् परिशेषवमेतदिति अव्यापकत्वादलक्षणमेतदिति अथापीदं स्यादनैकान्तिकलक्षणेन न सर्वोऽनैकान्तिको गम्यते यथा असाधारणेनेति नानेनैव संग्रहात् कथमिति व्यावृत्तिद्वारेणाभिधीयमानोऽयमुभयान्तव्यावृत्तेरनैकान्तिक इति। अपरे पुनः प्रकरणसममनैकान्तिक एवान्तर्भावयन्ति कथमिति अनित्य आत्मा शरीरादन्यत्वादिति शरीरादप्यन्यन्नित्यमनित्यं च दृष्टमतोऽनैकान्तिक इति। तैस्तु न लक्षणव्यभिचारोवगतो नोदाहरणव्यभिचार इति अनैकान्तिकः सव्यभिचार इत्येतल्लक्षणम् व्यभिचारिणः यदि चानेन प्रकरणसमसंग्रहो भवति प्राप्तस्तर्हि लक्षणस्य व्यभिचारः न पुनरुदाहरणव्यभिचारोऽनैकान्तिकलक्षणव्यभिचार इति न लक्षणस्य त्वुभयं दोषः लक्ष्याव्याप्तिरलक्ष्यव्याप्तिश्चेति वक्ष्यमाणकं प्रकरणसमस्य लक्षणमीक्षितव्यम्॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ ४७ ॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति। कोऽस्य सूत्रस्यार्थः। अभ्युपगतार्थविरोधी विरुद्धः। एवं च सर्वानुक्तविरुद्धसंग्रहः। यावान् कश्चन विरुद्धभेदः सर्वोऽसावनेन संगृहीत इति तस्मादभ्युपगतं बाधते अभ्युपगतेन बाध्यते। नन्वेवमेको हेत्वाभासो विरुद्धः

प्राप्नोति सत्यमेक एव हेत्वाभासो विरुद्धः तस्य तु सामान्येन विरुद्धत्वेन संगृहीतस्य पञ्चधापदेशो यथा प्रमेयमित्यनेन षोडशपदार्था इति। पृथगभिधानं तर्हि विरुद्धस्य न कर्तव्यम् सामान्यतोऽधिगतस्य विशेषज्ञापनार्थं यथा प्रमेयमेव तच्चानैकान्तिकादिहेत्वाभासो द्विरूपोऽनैकान्तिकादिर्विरुद्धः एतस्मिंस्तु विरुद्धतैवेत्यसाधारणतया व्रणोलपादिन्यायेन निष्कृष्याभिधानम्। तस्मादनैकान्तिकादिषु निमित्तसमावेशात् सज्ज्ञाद्वयसमावेशः विवक्षिततज्जातीयान्यवृत्तित्वेनानैकान्तिकत्वम् हेतुविषयस्वरूपबाधारूपेण तु विरुद्धः। एवं सर्वत्रोदाहरणम् तदेतत् त्रैलोक्यं व्यक्तैरपेति नित्यत्वप्रतिषेधात् अपेतमप्यस्ति विनाशप्रतिषेधात् विनाशप्रतिषेधादित्यनेन न नित्यमभ्यनुज्ञातं नित्यत्वप्रतिषेधादित्यनेन प्रतिषिद्धम्। एते ते वाक्ये परस्परार्थबाधिते तयोश्च परस्परार्थबाधाविरोधः प्रतिज्ञाहेत्वोर्वा विरोधः यो वा प्रतिज्ञाहेत्वोर्विरोधः स विरुद्धो हेत्वाभासः। ननु प्रतिज्ञाविरोधः पृथगुपदिष्टो निग्रहस्थाने पृथक् क्व हेत्वाभासः तस्मान्न प्रतिज्ञाहेत्वोर्विरोधो वक्तव्य इति। नैष दोषः उभयाश्रितत्वाद्विरोधस्य। विवक्षातोऽन्यतरनिर्देशः प्रतिज्ञाहेत्वोर्विरोध इति प्रतिज्ञाहेतू आश्रित्य उभयाश्रितो भवति तत्र यदि प्रतिज्ञया विरोधो विवक्षितस्तदा प्रतिज्ञाविरोध इत्युच्यते यदि प्रतिज्ञया हेतुविरोधो हेतोर्वा प्रतिज्ञाविरोधकत्वं तदा विरुद्धो हेतुरित्यतः प्रतिज्ञाविरोधो हेतुविरोधो वेत्यदोषः। हेतुविरोधोदाहरणम् नित्यः शब्द उत्पत्तिधर्मकत्वात् प्रतिज्ञाविरोधस्योदाहरणम् नास्त्यात्मेति प्रतिज्ञाहेतुविरोधोदाहरणम् गुणव्यतिरिक्तं

द्रव्यम् अर्थान्तरस्यानुपलब्धेः हेतुविरोधोदाहरणम् नास्त्येको भावः समूहे भावशब्दप्रयोगादिति समूह इति ब्रुवाणेनैकान्तिकोऽभ्युपगतो भवति एक समुच्चयो हि समूह इति ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ४८ ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः । कस्मात् प्रकरणचिन्ता तत्त्वानुपलब्धेः यस्मादुपलब्धतत्त्वे निवर्तते चिन्ता तस्मात् सामान्येनाधिगतस्य या विशेषतोऽनुपलब्धिः सा प्रकरणचिन्तां प्रयोजयति । उदाहरणम् नित्यः शब्दोऽनित्यधर्मानुपलब्धेः अत एव प्रकरणमित्यतो न हेतुः । नन्वयं साध्याविशिष्ट एव यथा शब्दस्य नित्यत्वं साध्यं तथाऽनित्यधर्मानुपलब्धिरपीति नाविशिष्टः तस्यैव प्रकरणप्रवृत्तिहेतोर्धर्मस्य हेतुत्वेनोपादानात् यत्र साध्येन समानो धर्मो हेतुत्वेनोपादीयते स साध्याविशिष्टः । यत्र पुनः प्रकरणप्रवृत्तिहेतुरेव प्रकरणसमः ये तु संशयहेतुत्वात् प्रकरणसमानैकान्तिकं वर्णयन्ति तेषां प्रत्यक्षानैकान्तिकप्रकरणसमानामभेदः प्राप्नोति प्रत्यक्षमपि संशयकारणमिति समूहः संशयस्य कारणमित्यतो न प्रत्यक्षप्रसङ्गः । सामान्यदर्शनं विशेषाव्यवस्था विशेषस्मृतिश्च समूह इति संशयस्य कारणम् नैकं प्रत्यक्षमतो न प्रत्यक्षप्रसङ्गः समूहः कारणमित्यभिधानादप्रतिषेधः समूहः कारणमित्येवं ब्रुवता न प्रत्यक्षस्य संशयकारणत्वं प्रतिषिद्धं भवति तस्मात् प्रसङ्गतस्तदवस्थ एवेति उभयधर्मानुपलब्धावन्यतरधर्मोपादानं प्रकरणसमार्थः । यत्र

खलूभयविशेषानुपलब्धिस्तच्चान्यतरविशेषस्योपादानम् यत्प्रकरणाप-नोदाय स प्रकरणसमो हेत्वाभासः उभयविशेषणानुपलब्धेरभिधा-नाशक्यत्वात् न ह्युभयविशेषोऽनुपलब्धः शक्यो दर्शयितुम् शरीरा-दन्यत्वं तु न सूत्रार्थः न ह्ययं शरीरादन्यत्वमुपलभमानोऽपि यदा तत्त्वमुपलभते तदा प्रवर्तत इति तदा तत्त्वं नोपलक्ष्यते शरीरा-दन्यत्वमुपलभमानोऽपि तदा प्रवर्तत इति। शरीरादन्यत्वं च नैका-न्तिकं अतश्च न सूत्रार्थः॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः॥ ४९॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः। साध्येनाविशिष्टो यः साधनधर्मः साध्यवत् प्रज्ञापयितव्यः स साध्यसमो हेत्वाभासः। तस्योदाहरणम् द्रव्यं छाया गतिमत्त्वादिति। यथैव द्रव्यं छायायाः साध्यं तथा गतिमत्त्वमपीति। गतिमत्त्वं देशान्तरदर्शनादिति चेत् तथापीदं स्यात् गतिमच्छाया देशान्तरे दर्शनादिति। यत् खलु देशान्तरेषूपलभ्यते तद्गतिमत् यथा कुम्भः तथा छाया तस्माद् गतिमती नाश्रयासिद्धत्वात्। एवमप्याश्रयासिद्धो हेतुः सति द्रव्य-भावे छायाया देशान्तरे दर्शनं समर्थं स्यात् द्रव्यभावस्त्वसिद्धः तस्मादाश्रयासिद्धो हेतुः उपेत्य देशान्तरे दर्शनं तस्यान्यथासिद्धेर-सिद्धेः यत्तु देशान्तरे दर्शनं छायायास्तदन्यथा भवति अन्यथाभव-च्चार्थं बाधति(१) कथमन्यथा आवरणसन्तानादसन्निधिसन्तानतेजसि यावके द्रव्येऽपसर्पति तेजसोऽसन्निधिविशिष्टं द्रव्यं यदुपलभ्यते तत्तु

(१) बाधते—इति साधुः।

ङायेत्युच्यते । सोऽयमसिद्धस्त्रेधा भवति प्रज्ञापनीयधर्मसमान आश्रयासिद्धः अन्यथासिद्धश्चेति । नित्यः शब्दोऽस्पर्शवत्त्वादित्येव नोदाहरणम् न ह्यस्पर्शत्वं शब्दस्य ज्ञापनीयं नाश्रयासिद्धं नान्यथासिद्धमिति यथा चास्माभिः सूत्रं वर्णितं तथा चोदाहृतम् । तथायमसम्बद्धो दोषः न सूत्रार्थो विज्ञातो नाचरार्थो न हेत्वाभासो न दृष्टान्ताभास इति ॥

कालात्ययापदिष्टः कालातीतः ॥ ५० ॥

कालात्ययापदिष्टः कालातीतः । यस्यापदिश्यमानस्य कालात्ययेनैकदेशो युज्यते स एकदेशात्ययात् कालात्ययापदिष्टः कालातीत इत्युच्यते । उदाहरणं नित्यः शब्दः संयोगव्यङ्ग्यत्वादिति उपलब्धिकाले संयोगो नास्ति सोऽयं संयोगो हेतुविशेषणत्वेनोपात्त उपलब्धिकालमत्येति यदोपलभ्यते तदा संयोगो नास्ति दारुवश्चने दारुपरशुसंयोगनिवृत्तौ शब्दोपलब्धिरिति । नन्वयमनैकान्तिक एव संयोगव्यङ्ग्यत्वादिति अनित्यमपि संयोगेन व्यज्यमानं दृष्टम् यथा घट इति संयोगव्यङ्ग्यत्वेनानवस्थानस्य साध्यत्वात् न ब्रूमो नित्यः शब्द इति अपि त्ववतिष्ठते शब्द इति प्रतिज्ञार्थः तथा च संयोगव्यङ्ग्यत्वादित्ययं हेतुर्नानैकान्तिकः । न ह्यनवस्थितं किञ्चित् संयोगेन व्यज्यमानं दृष्टमिति अवयवविपर्यासवचनमपि न सूत्रार्थः सामर्थ्यात् न हि पश्चादभिधीयमानो हेतुरुदाहरणसाधर्म्यादित्येतद्धेतुलक्षणं जहाति अजहत्ते तु लक्षणं न हेत्वाभासो भवितुमर्हतीति अवयवविपर्यासवचनमप्राप्तकालमिति निग्रहस्थानमुक्तम् । तदेव पुनरुच्यत

इति समीक्षतेऽभिधानान्निग्रहस्थानमिति चेत् अथ मन्यसे यस्मात् समीक्षते पचे पश्चादभिधीयते ततो निग्रहस्थानमिति केन समीक्षत इति वक्तव्यम् हेत्वनभिधानेन समीक्षतः। यदि हेत्वनभिधानेन समीक्षतः किमत्र हेतोरसामर्थ्यम् एतदस्यासामर्थ्यं यदयं पश्चादभिधीयत इति नैतद्धेतोरसामर्थ्यं यदयं पश्चादभिधीयत इति अपि तु वक्तुरिति न हि स्वतन्त्रो हेतुः साधनमपि तु साधयितृतन्त्रत्वात्र हेतुदोषः सामर्थ्याच्चेत्युक्तम् तस्माद्वयवविपर्यासवचनं न सूत्रार्थो न समीक्षताभिधानमिति ॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ ५१ ॥

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ॥ ५२ ॥

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ ५३ ॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम्। वचनविघातो यः क्रियते सामान्यस्य शब्दस्य विशेषानेकसम्बन्धित्वे सति अविवक्षितारोपेण छलं तदेदितव्यम्। तत्त्रिविधमिति नियमार्थम् पूर्ववदनेकधाभिन्नं छलं संगृह्यत इति। अविशेषाभिहितेऽर्थे इति सूत्रम् अविशेषाभिहितं सामान्यश्रुति वाक्यं पदं वा अविशेषाभिहितमित्युच्यते वाक्यं सामान्यश्रुति यथा नवकम्बलोऽयमिति पदं सामान्यश्रुति यथा अश्वोऽश्व इति अविशेषशब्दानभिधानं प्रयोगाभावात् न ह्यविशेषशब्देन कस्यचिदभिधानं सम्भवति न चास्य प्रयोगो युक्त इति वाक्यं

च सर्वमुच्चरद्विशेषमेव प्रत्याययतीति सामान्यप्रत्यायनमयुक्तम् न प्रकरणादीनामन्तरेण श्रुतिमात्रात्तदुपपत्तेः यदा प्रकरणादिनिरपेक्षं वाक्यमुच्चार्यते श्वेतो धावतीति तदा वाक्यश्रुतिसामान्यात् श्रोतुः सम्मोहः सम्मोहे सत्यविवक्षितमर्थमध्यारोप्य प्रतिषेधति । एवं पदेऽपीति । अर्थग्रहणं शब्दनिराकरणायार्थविषयं छलम् न शब्दविषयमिति न ह्ययं प्रतिषेद्धुं शक्नोति नायं नवकम्बलशब्द इति तस्य प्रत्यवस्थानं ज्ञात्वाऽज्ञात्वा वा प्रयोगात् प्रतिषेधानुपपत्तिः । यदि तावन्नवकम्बलस्यार्थं बुद्ध्वा नायं नवकम्बल इति प्रत्यवतिष्ठते तदार्थान्तरमाह अन्यद्बुध्यतेऽन्यत्प्रतिषिध्यत इति । अथ पुनर्नैव नवकम्बलस्यार्थं बुध्यते तथाप्यज्ञानमिति ॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ॥ ५४ ॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् । सामान्यस्य विवक्षितार्थातिक्रमेतिसामान्यमुदाहरणम् विद्याचरणसम्पन्नो ब्राह्मण इति परन्तु ब्राह्मणं विद्याचरणसम्पन्नत्वे हेतुरिति कृत्वा प्रत्यवतिष्ठते स्तुत्यर्थे वाक्येऽन्यथाकारं प्रत्यवस्थानम् उभयथा दोषो बुद्ध्वाबुद्ध्वा वेति ॥

धर्मविकल्पनिर्देशे ऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ ५५ ॥

धर्मविकल्पनिर्देश इति सूत्रम् । धर्मविकल्पनिर्देशशब्देना-

भिधानधर्मो द्वेधाभिधीयते प्रधानं भाक्तञ्च मञ्चा इति काष्ठसंघातेषु प्रधानम् मञ्चशब्दः क्रोशनक्रियाया असम्भवमीक्षिता स्थानिषु पुरुषेषु भाक्तः सोऽयमभिधानाभिधेयप्रकार एवं व्यवतिष्ठते य एतस्मिन्नन्यथाकारप्रतिषेधः तदुपचारच्छलमिति। अस्यापि पूर्ववत् प्रतिषेधो ज्ञात्वाऽज्ञात्वा वेति॥

वाक्छलमेवोपचारच्छलं तद्विशेषात्॥ ५६॥

न तदर्थान्तरभावात्॥ ५७॥

वाक्छलमेवोपचारच्छलमिति सूत्रम्। एकत्वमविशेषात् कोऽविशेषः इहाप्यर्थान्तरकल्पना तत्रापीति न तदर्थान्तरभावात् अविशेषादित्यस्य हेतोरनेन सूत्रेणासिद्धतामुद्भावयति। कथमसिद्धिः एकत्र वस्तुसद्भावः प्रतिषिध्यते नैव क्रोष्टारो मञ्च इति एकत्र वस्त्वभ्यनुज्ञाय कम्बलयोगमभ्युपगम्य कम्बलस्यानेकता धर्मः प्रतिषिध्यत इति। यत्र धर्मः प्रतिषिध्यते यत्र धर्मी सोऽयमतिमहान् विशेषः कथं मन्यसे किं तेऽनेन विशेषेण इहाप्यर्थान्तरकल्पना तत्रापीति॥

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः॥ ५८॥

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः। कोऽस्य सूत्रस्यार्थः विरोधः द्वित्वमभ्यनुज्ञायमानं निवर्तयति कतमेन पुनर्न्यायेन द्वित्वमभ्यनुज्ञायमानं वाक्छलमेवोपचारच्छलं तयोरेकत्वं ब्रुवता सामान्यच्छलमन्यदभ्यनुज्ञातं भवति विशेषणानर्थक्यं वा यदि सर्वं छलमेवेत्यभ्युपगमः वाक्छलमेवोपचारच्छलं तदविशेषादिति व्यर्थं विशेषणम् कथमेकत्वप्रसङ्गः किञ्चित्साधर्म्याद्यद्यनर्थान्तरकल्पना अविशेषा-

देकत्वम् सर्वच्छलमेकं प्राप्नोति किञ्चित्साधर्म्यादिति किं पुनस्तत् वचनविघातः अर्थविकल्पोपपत्तिश्च तस्मिँश्छल इति ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ ५९ ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः । साधर्म्येण प्रत्यवस्थानं वैधर्म्येण प्रत्यवस्थानं जातिरिति । प्रथमपक्षानुयोगं दर्शयति स्थापनायां सत्यां प्रतीपमवस्थानं प्रत्यवस्थानं प्रतिपक्षवदिति । सूत्रार्थस्तु यथाश्रुति न पुनरुदाहरणसाधर्म्येण उदाहरणवैधर्म्येण वेति किमर्थमिदमुच्यते व्यापकार्थं यदि यथाश्रुति सूत्रार्थो भवति तदा सर्वजातयो व्याप्यन्ते येन केनचित् साधर्म्यं येन केनचिद्वैधर्म्यमिति लक्षणे जातीनामव्यापकत्वं तु दोषः । भाष्ये उदाहरणसाधर्म्यमुदाहरणवैधर्म्यं चोदाहरणार्थमिति यथा चोदाहरणेन एवमनुदाहरणेनापीति ॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ ६० ॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् । अन्यथास्थितस्यान्यथाभिहितस्य अप्रतिपत्तिर्विप्रतिपत्तिश्च स्वपरार्थोत्तरा सम्प्रतिपत्तिरप्रतिपत्तिः समर्थे साधने निग्रहस्थानमप्राप्तौ कथमप्रतिपत्तिः विप्रतिपत्तिः । यदायं साधयिता समर्थेन साधनेनोपात्तेन परेण जात्यादिभिराकुलीकृतः ज्ञानं प्रतिपद्यते तदा कथमप्रतिपत्तिः कथं वा विप्रतिपत्तिरिति तदा साधनस्यैव सामर्थ्यापरिज्ञानादसमर्थमेतत् साधनमित्यप्रतिपत्तिर्विप्रतिपत्तिरिति ॥

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ ६१ ॥

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम्। ता एता जातयः कियत्यो भवन्ति कियन्ति वा निग्रहस्थानानि इत्यवधारणार्थमाह। तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वमिति। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पात् तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पाद्बह्वो जातयो बहूनि निग्रहस्थानानि भवन्ति। कतमा जातयः साधर्म्यप्रत्यवस्थानात् कतमाश्च वैधर्म्यप्रत्यवस्थानात् कतमानि निग्रहस्थानानि विप्रतिपत्तिविकल्पात् कतमानि वाऽप्रतिपत्तिविकल्पाद्भवन्तीति प्रतियोगं[1] विभजनलक्षणपृच्छाऽपेक्षायामिति। एते प्रमाणादयः पदार्था उद्दिष्टा लक्षिताश्च यथोद्देशं च यथालक्षणं च परीक्षा वर्त्तिष्यत इति॥

तत्त्वप्रतिज्ञामारभ्य लक्षितस्य च संविदा।
उद्देशो लक्षणं चैव तत्त्वानामिह कीर्तितम्[2]॥

इति—श्रीद्योतकरे न्यायसूचवार्त्तिके प्रथमाध्याये द्वितीयमाह्निकम्[3]॥

समाप्तश्चायं प्रथमोऽध्यायः॥

---

(१) पर्यनुयोगमिति क्वचित्।
(२) कीर्त्तनम्—पा० २ पु०।
(३) श्रीद्योतकरे न्यायवार्त्तिके प्रथमोऽध्यायः समाप्तः—पा० २ पु०।

न्यायवार्त्तिके

द्वितीयोऽध्यायः ।

ॐ नमः परमात्मने ।

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेत्युक्तम् । तत्रोद्देशलक्षणे पूर्वाध्याय एव व्याख्याते परीक्षा वर्तिष्यत इति । तत्र यथोद्देशस्तथा लक्षणं तथा परीक्षेति स्थानवतां परीक्षावचनमिति पूर्वं प्रमाणमुद्दिष्टं लक्षितं च पूर्वमेव तत्परीक्ष्यत इत्यवसरप्राप्तानि तानि विलङ्घ्य संशयः परीक्ष्यते । किमर्थं क्रमभेदः परीक्षाङ्गत्वात् पूर्वं संशयः परीक्ष्यते तथा चोक्तम् । विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः । ननु चोक्तं नायं निर्णये नियमो विमृश्य पक्षप्रतिपक्षाभ्यां सर्वत्र निर्णय इति वादे पक्षप्रतिपक्षाभ्यामेव शास्त्रे च विमर्षवर्जमिति शास्त्रे चायं विचारः तस्मान्न संशयपूर्वक इति संशयपूर्वको विचारस्तर्कविषय एव । नायं तर्कविषय इति । सत्यम् । न निर्णये नियमो विचारे हि नियमो निर्णय एवं चान्यथा च विचारः संशयपूर्वक एव यदप्युक्तम् वादे शास्त्रे च विमर्षवर्जमिति वादिप्रतिवादिनावधिकृत्य तदुक्तम् शास्त्राभ्युपगमे च वादिप्रतिवादिनोर्न संशयः उभयोर्निश्चितत्वात् । शास्त्रे च न संशयः । निश्चितस्य वस्तुनः शास्त्राभ्युपगमेनाभ्युपगमात् । तत्र वादिप्रतिवादिनौ तावद्विचारयतः किं नित्यसाधनं बलीयः आहोऽनित्यसाधनमिति । शास्त्रेऽपि च विचारः साधनसामर्थ्यासामर्थ्य-

परिज्ञानार्थस्तत्र संशय इति। तस्मात् संशयपूर्वक एव विचारस्तन्मूलकत्वात् परीक्षाविधेः संशयः पूर्वं परीक्ष्यत इति। तत्र संशयो वस्तुस्वरूपानवधारणात्मकः प्रत्ययः। निरुक्तव्याघात इति चेत्। अनवधारणात्मकश्च प्रत्ययश्चेति व्याहतम्। न प्रत्ययस्य स्वरूपानवधारणाद्व्यवच्छेदात्मकत्वं स्वरूपमस्य परिच्छिद्यते। न पुनरनेन विषयस्वरूपमवधार्यत इति सोऽयं संशयः समानधर्मोपपत्तेरित्येवमादिर्यस्यास्याचेपः॥

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः॥ १॥

समानानेकधर्माध्यवसायादित्येवमादि सूत्रम्। तस्य यथाश्रुत्युत्थानमिति समानस्य धर्मस्याध्यवसायात् संशयो न समानधर्ममात्रादुपलभ्यमानो धर्मः संशयहेतुरिति धर्मधर्मिग्रहणेन वा संशयाभाव इति समानमनयोर्धर्ममुपलभत इति धर्मधर्मिग्रहणे क्व संशय इति धर्मिणोऽर्थान्तरभावत्वात् न संशयः न ह्यन्यस्मिन्नुपलब्धेऽन्यत्र संशय इति। अथवा न समानधर्माध्यवसायः संशयस्य कारणं व्यवच्छेदात्मकत्वात् संशये च तदभावादिति। एतेनानेकधर्माध्यवसायादिति व्याख्यातम्। अधिगतानधिगतयोर्न संशयः अधिगते वस्तुनि संशयो न युक्तः निर्णीतत्वात् नानधिगते अदृष्टत्वात् न समानधर्माध्यवसायात् संशयः सत्यप्यभावात् सत्यपि समानधर्माध्यवसाये न दृष्टः संशयः यथा कृतकत्वाच्छब्दे न समानधर्मानध्यवसायादेव संशयोऽन्यथापि भावात् अन्यथापि दृष्टः संशयः

यथा विरुद्धाव्यभिचारिधर्मदयसन्निपाते तत्त्वानुपलब्धेश्च संशयः । यथा प्रकरणसमे एकवृत्तित्वाच्च न समान एकवृत्तिरयं धर्मो न चैकवृत्तिः समानो भवितुमर्हतीति ॥

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥

विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥ ३ ॥

एतेन विप्रतिपत्त्यव्यवस्थाध्यवसायादिति प्रत्युक्तम् । विप्रतिपन्ने व्यवस्थाध्यवसायात् संशयो न विप्रतिपत्तिमात्राद्व्यवस्थामात्राद्वा विप्रतिपत्तौ च सम्प्रतिपत्तेः न विप्रतिपत्तिरस्तीति सूत्रार्थः ॥

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ ४ ॥

अव्यवस्थात्मनि व्यवस्थितत्वाद्वा व्यवस्थाया नाव्यवस्था वेद्यत इति सूत्रार्थः ॥

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ ५ ॥

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः समानधर्मादीनां सातत्यान्नित्यः संशय इति सूत्रार्थः ॥

अस्योत्तरम् ।

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा न सूत्रार्थापरिज्ञानादिति सूत्रार्थः । यत्पुनरेतद्धर्मधर्मिग्रहणे संशयाभाव इति तन्नापरिज्ञानात् न ब्रूमो योऽसौ धर्म्युप-

लभ्यते तस्य धर्ममुपलभ इति अपि तु यौ मया पूर्वं स्थाणुपुरुषावुपलब्धौ तयोरयं समानो धर्म उपलभ्यत इति। एतेनैकवृत्तित्वादिति परिहृतम्। यत्पुनरेतन्नार्थान्तराध्यवसायादन्यत्र संशय इति नानभ्युपगमात्। अपरे अर्थान्तरभावमात्रं मया संशयहेतुत्वेन नोपादीयते किं त्वर्थान्तरविशेषः कः पुनरसौ विशेषः धर्मधर्मिभावः धर्म उपलभ्ये धर्मिणि संशय इति परिहारं मन्यन्ते न पुनः रूपस्पर्शयोर्धर्मधर्मिभाव इति पश्यामः। तच्च न किं कारणम्। अर्थान्तरभावस्यानिवृत्तेर्यथैव रूपस्पर्शयोरर्थान्तरभावस्तथा धर्मधर्मिणोरिति न युक्तोऽर्थान्तरदर्शनादर्थान्तरे संशयः अत्रापि तदेवोत्तरम् नानभ्युपगमादिति। न ब्रूमोऽर्थान्तरदर्शनादर्थान्तरे धर्मिणि सन्देहः अपि तु समानधर्मादिविशिष्टधर्मिदर्शनादविशेषवति धर्मिण्येव संशय इति। यद्यप्येतत्सारूप्याभावादिति विशेषानवधारणमुभयोः सारूप्यम् यथैव समानधर्मदर्शनेन विशेषो नावधार्यत इति तथा संशयेनापीति। कारणसद्भावात् कार्यसद्भाव इति न सारूप्यनिर्देशोऽयमपि तु कार्यकारणधर्मनिर्देशः तथा च कार्यान्तरेष्वप्येतदस्तीति। न हि किञ्चित् कार्यं कारणसद्भावमन्तरेण सम्भवतीति। एतेनानेकधर्माध्यवसायादिति प्रतिषेधः परिहृतः। य एव समानधर्माध्यवसाये परिहारः स एवानेकधर्माध्यवसायेऽपीति। यत्पुनरेतदधिगतानधिगतयोरभावादिति तत्रापरिज्ञानादिति न ब्रूमोन्यस्मिन्नधिगते ऽन्यत्र संशय इति अपि च सामान्यतोऽधिगते धर्मिणि विशेषानवधारणात्मकः प्रत्ययः संशय इति। यत्पुनरेतत् सत्यप्यभावादिति न समानार्थापरिज्ञानात्।

न हि कृतकत्वं समानो धर्मोऽन्यथा समानधर्मस्याभिधानात् समानो धर्म इति विवक्षिततज्जातीयान्यवृत्तिर्यः समानो न पुनः कृतकत्वमेवं यत्पुनरेतन्न समानधर्माध्यवसायादेवान्यथाऽपि दर्शनादिति तन्न प्रतिषेधादनवधारणाच्च। विरुद्धाव्यभिचारिधर्माध्यवसायात् संशय इति प्रतिषिद्धमेतदनवधारणेनैव तत्त्वानुपलब्धेरिति प्रत्युक्तम् । न चैतदवधार्यते समानधर्मदर्शनादेव नान्यस्मादिति अन्यस्मादपि संशयोऽनेकधर्माध्यवसायादित्युक्तम् विप्रतिपत्त्यव्यवस्थाध्यवसायादेवेत्यनेनैव प्रत्युक्तम् । नैवं ब्रूमो विप्रतिपत्तिमात्राद्व्यवस्थामात्रात् संशय इति न चाव्यवस्थातः संशय उपलब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात् पूर्वपदविशेषणमुपलब्ध्यनुपलब्धी न स्वतन्त्रे संशयकारणम् तच्च सूत्र एवोक्तमिति । यत्पुनरेतद्विप्रतिपत्तौ सम्प्रतिपत्तेरिति न संज्ञान्यथात्वादर्थस्यान्यथात्वम् यस्माद्विप्रतिपत्तिशब्दार्थस्य निमित्तान्तरसन्निपाते सम्प्रतिपत्तिरिति नाम कृतम् न तावता विप्रतिपत्तिर्नास्ति विप्रतिपत्तेस्तथाभावात् संशयहेतुत्वमिति। यत्पुनरेतदव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया नाव्यवस्थास्तीति न तदपि व्याघातात् अव्यवस्था नास्त्यव्यवस्थात्मनि च व्यवस्थितत्वाच्च व्याघातः न च निमित्तान्तरसन्निपातेनार्थस्य संज्ञान्तरकरणमर्थतथाभावं बाधते यथाभूत एवार्थः संज्ञान्तरकरणे तथाभूत एवाकरणेऽपीति । यत्पुनरेतत्तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेरिति तदपि न सूत्रार्थापरिज्ञानादित्युक्तम् । नायं समानधर्मादिभ्य एव संशयः किं तु तद्विषयाध्यवसायादुपलब्ध्यनुपलब्ध्यव्यवस्थाने च सति विशेषस्मृतिसद्भि-

तादेवं च सति नासंशयो नात्यन्तसंशयः अन्यतरधर्माध्यवसायादिति न युक्तम्। नेतस्मात् संशय इति न हि कदाचिदन्यतरधर्माध्यवसाये सति संशयः अन्यतरधर्माध्यवसायस्य निर्णयहेतुत्वादिति ॥

यच्च संशयस्तचैवमुत्तरोत्तरप्रसङ्गः ॥ ७ ॥

यच्च संशयस्तचैवमुत्तरोत्तरप्रसङ्गः। कोऽस्य सूत्रस्यार्थः स्वयं न संशयः प्रतिषेद्धव्यः परेण तु संशये प्रतिषिद्धे एवमुत्तरं वाच्यमिति शिष्यं शिक्षयति ॥

अथेदानीमवसरप्राप्तानि प्रमाणानि परीक्ष्यन्ते इति किं पुनरेषां परीक्ष्यम्। आदौ तावत् सम्भवः किं प्रमाणानि सन्युत न सन्तीति सदसतोः सामान्यात् प्रमेयत्वादिशेषादपेक्षाच्च संशयः युद्धस्य संशयं परः पक्षपरिग्रहेण प्रत्यवतिष्ठते ॥

प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेः ॥ ८ ॥

प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेरिति। अस्यार्थः त्रिष्वपि कालेषु प्रमाणानि नार्थं साधयन्तीति ॥

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ ९ ॥

पूर्वं हि प्रमाणसिद्धाविति सूत्रम्। नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षं ज्ञानमुत्पद्यत इति सूत्रार्थे व्याघातो दोषः यदि पूर्वं ज्ञानं नेन्द्रियार्थसन्निकर्षस्तस्य कारणमिति। यदुक्तमिन्द्रियार्थसन्निकर्षोत्पन्नमिति तद्व्याहन्यते ॥

पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥

पश्चात् सिद्धाविति सूत्रम्। न प्रमाणनिमित्ता प्रमेयसंज्ञेति व्याघातः न प्रमाणमन्तरेण प्रमेयमात्मानं लभत इति न प्रमाणायत्ता प्रमेयसिद्धिः ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥

चैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥

युगपत्सिद्धाविति सूत्रम्। इन्द्रियार्थानां बुद्धीनां च सन्निपाते सति युगपद्भाव इति क्रमवृत्तित्वं दृष्टं न स्यादिति व्याघातश्च दोषः युगपत् ज्ञानानुत्पत्तिरिति व्याहन्यते। अत्र समाधिः। उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वास्थिरसहभावानियमादिति वाक्यस्यासिद्धतोद्भावनमर्थः प्रत्यक्षादीनामप्रामाण्यमिति च प्रतिज्ञापदयोर्व्याघातः प्रत्यक्षादीनि नार्थं साधयन्तीत्ययमर्थः। अयं च व्याहतः कथमिति प्रत्यक्षादीनि च नार्थं साधयन्ति च यथेदं वस्तु नोपलभ्यत इति इदं च नोपलभ्यत इति व्याघातः। एवं प्रत्यक्षादीनि च नार्थं साधयन्तीति च। कथं वान्यथा प्रत्यक्षादीनि न प्रत्यक्षादिशब्दा अर्थसाधकमन्तरेण कृतार्था भवन्तीति धर्मप्रतिषेधाच्च प्रत्यक्षाद्यभ्युपगमः प्रत्यक्षादीनामप्रामाण्यमित्येवं ब्रुवता न प्रत्यक्षादीनि प्रतिषिद्धानि अपि तु प्रमाणत्वं धर्म इति। अथ भावस्यास्वतन्त्रत्वात् तान्यपि प्रतिषिद्धानि प्रत्यक्षादीनामप्रामाण्यमिति भावाभिधानमेतत् अस्वतन्त्रश्च भाव इति भावप्रतिषेधात् तद्वतां प्रतिषेध इत्येवमप्यनिवृत्तो व्याघातः। प्रत्यक्षादीनामभावः

प्रतिपाद्यः प्रत्यक्षादीनि च न सन्तीति केनाभावं प्रतिपादयसि न प्रत्यक्षाद्यभावेऽन्यः प्रतिपाद्नोपाधिः कश्चिदस्ति विशेषप्रतिषेधाच्च प्रमाणान्तराभ्यनुज्ञा प्रत्यक्षादीनामप्रामाण्यमित्येवं ब्रुवता प्रत्यक्षादिव्यतिरेकिप्रमाणमभ्यनुज्ञातं भवति व्यर्थं वा विशेषणं प्रत्यक्षादीनामप्रामाण्यमिति। अथ न प्रमाणान्तरमभ्यनुज्ञायते किमस्य विशेषणस्य सामर्थ्यं प्रत्यक्षादीनि न प्रमाणानीति नैव प्रमाणानि सन्तीत्येवं वक्तव्यमित्येतदपि व्याहतम् प्रमाणानि नैव सन्ति प्रतिपादयसि चेति। यदपि तत्प्रमाणान्तरमभ्यनुज्ञायते तत्रापि चैकाल्यासिद्धेरित्ययमनुपयुक्तो हेतुः यच्च त्रिष्वपि कालेषु न प्रतिपादयति कथं तस्य प्रमाणत्वमित्यनिवृत्तो व्याघातः। अथ धर्मप्रतिषेध एवायं तथापि यानि प्रामाण्यव्यतिरिक्तानि प्रत्यक्षादीन्यभ्यनुज्ञायन्ते राजपुरुषप्रतिषेधन्यायेन कस्येषां स्वभाव इत्यनुवृत्तावनुयोगो व्याघातश्च। अर्थान्तरानभ्युपगमे षष्ठ्यास्तद्धितस्य चार्थो वक्तव्यः यदि प्रत्यक्षादिव्यतिरिक्तं न प्रामाण्यमस्ति प्रत्यक्षादीनामिति षष्ठ्यर्थः कः ततोऽवश्यं विधीयमानः प्रतिषिध्यमानो वा धर्मोऽभ्युपेयः तदभ्युपगमे च प्रत्यक्षादीनां पृथक् स्वरूपं वक्तव्यमित्यनिवृत्तो व्याघातः। एतेन तद्धितार्थो व्याख्यातः। यश्चायं हेतुस्त्रैकाल्यासिद्धेरित्ययमपि व्यधिकरणस्त्रैकाल्यविषयत्वात् त्रिकालस्य भावस्त्रैकाल्यं तस्यासिद्धिरिति न प्रमाणधर्मः अथायमर्थस्त्रिष्वपि कालेषु न प्रमाणान्यर्थं(१) साधयन्तीति तथापि हेत्वर्थो नास्ति प्रतिज्ञार्थेनाच्छिन्नत्वात् य एव प्रतिज्ञार्थो न प्रमाणान्यर्थं(२) साधयन्तीति स हेत्वर्थस्त्रिषु कालेषु

(१) प्रमाणान्यत्व—पा० १ पु०। (२) प्रमाणान्यत्वमिति क्वचित्।

नार्थं साधयन्तीति। यत्पुनरेतत्प्रमाणेन प्रमीयमानोऽर्थः प्रमेयमिति भवतीति समाख्यायास्त्रैकाल्ययोगाद्प्रतिषेधः प्रमाणप्रमेयमिति चास्याः समाख्याया निमित्तं त्रिकालयोगि प्रमास्यते प्रमीयते प्रामाथि वानेन प्रमाणं प्रमास्यते प्रमीयते प्रामाथि वेति प्रमेयम्। एवं च सति प्रमास्यते अयमर्थः भविष्यत्यस्मिन् हेतुभिरुपलब्धिरिति प्रमेयमिद्मिति सिध्यति अनभ्यनुज्ञाने व्यवहारार्थानुपपत्तिरिति विरोधो दोषः। यस्तु त्रैकालिकं प्रमाणप्रमेयव्यवहारं न प्रतिपद्यते तस्य पाचकमानयेत्यादिव्यवहारो विरुध्यत इति। प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरित्येवमादिवाक्यं प्रमाणप्रतिषेधः। अथानेन प्रत्यक्षादीनां किं क्रियते किं सम्भवो निवर्त्यते अथासम्भवो ज्ञाप्यते किञ्चातः यदि तावत् सम्भवो निवर्त्यते तन्न युक्तम्। व्याघातात् प्रतिषेधार्थापरिज्ञानाच्च। सम्भवो निवर्त्यत इत्येवं ब्रुवाणेन प्रमाणान्यभ्यनुपगतानि भवन्ति न ह्यसतो वृत्तिनिवृत्तिर्भवतीति। न च प्रतिषेधस्यैतत्सामर्थ्यं यद्विद्यमानं पदार्थमन्यथा कुर्यात् ज्ञापकत्वाच्च न सम्भवनिवृत्तिः ज्ञापकोऽयं प्रतिषेधो न सम्भवनिवर्तक इति। अथासम्भवो ज्ञाप्यत इति प्रमाणलक्षणप्राप्तस्तर्हि प्रतिषेधः एवं त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरिति। अयमपि प्रतिषेधस्त्रिष्वपि कालेषु नोपपन्न इत्ययं सूत्रार्थः व्याघात इति प्रमाणानि नार्थं साधयन्तीति प्रतिषेधस्य प्रमाणलक्षणाभ्यनुज्ञानादिति त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरित्येवमभिदधानेनाभ्युपगतं भवति प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः नैष दोषः तस्य स्ववचनस्य व्याघातादेशनात् स्ववचनव्याघातो मया देश्यते नाभ्युपगम्यते कथ-

मिति। यत् खलु त्रिष्वपि कालेषु न साधकं तदसाधनमिति ब्रुवता प्रतिषेधस्यासाधकत्वं स्ववाचैवाभ्युपगतं भवति। यथा कश्चित् स्वाङ्गुलिज्वालया परं दिधक्षुः स च परं दहेदा न वा स्वाङ्गुलिदाहमनुभवति। यस्यायं प्रतिषेधः प्रत्यक्षादीनि नार्थं साधयन्तीति किमयं प्रत्यक्षादीनां सामर्थ्यप्रतिषेधः उत सत्ताप्रतिषेध इति। यदि सामर्थ्यप्रतिषेधः न प्रत्यक्षादीनि प्रतिषिद्धानि तेषां च सामर्थ्यप्रतिषेधात् प्रत्यक्षादीनां स्वरूपं व्यक्तव्यमिति पूर्ववत्प्रसङ्गः[१]। अथ सत्ताप्रतिषेधः तत्रापि कथं न सन्तीति किं सामान्यतोऽथ विशेषत इति। यदि सामान्यतः प्रत्यक्षादिग्रहणं व्यर्थम् एवं वक्तव्यं न प्रमाणानि सन्तीति। न च धर्मिणां प्रतिषेधे कश्चिन्न्याय इति। अथ विशेषप्रतिषेधः तथापि प्रमाणान्तराभ्युपगमः न ह्यनभ्युपगतसामान्यस्य विशेषप्रतिषेधोऽवकाशं लभत इति। प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेः प्रत्यक्षादीनां प्रामाण्यं चैकाल्यसिद्धेरिति वाक्ययोरेकार्थता वा स्यात् भिन्नार्थता वा। यद्येकार्थता प्रत्यक्षादीनां प्रामाण्यं चैकाल्यसिद्धेरित्येवमेव वक्तव्यम् अभिन्नार्थे च एते वाक्ये कुतः प्रतिपत्तिरिति यदि प्रमाणतोऽनिवृत्तो व्याघातः अथान्यतस्तत्प्रमाणमिति संज्ञाभेदमात्रम्। अथ भिन्नार्थे तत् केनावगतः चैकाल्यसिद्धेरिति चानयोर्वाक्ययोर्भिन्नोऽर्थ इति प्रत्यक्षादीनि न सन्तीति नास्ति नासमानाधिकरणः प्रत्यक्षादिशब्दश्च न प्रत्यक्षादीनामभावं शक्नोति वक्तुम्। न ह्ययं नास्ति नासमानाधिकरणो घटादिशब्दो घटाभावं प्रतिपादयति अपि तु गेहघटसंयोगं वा कालविशेषं वा घटस्य सामर्थ्यं वा प्रतिषेधति। एव-

(१) पूर्ववत् प्रसङ्गः प्राप्त इति क्वचित्।

Prithiráj Rásau, (Text) Part I, Fasc. I, Part II, Fasc. I—V @ /6/ each	2	4
Ditto (English) Part II, Fasc. I ... ... Rs.	0	12
Prákṛita Lakshaṇam, (Text) Fasc. I	1	8
Parásara Smṛiti, (Text) Vol. I, Fasc. 1—8; Vol. II, Fasc. 1—6; Vol. III, Fasc. 1—4 @ /6/ each	6	12
Parásara, Institutes of (English)	0	12
S'rauta Sútra of Ápastamba, (Text) Fasc. I—XII @ 6/ each ...	4	8
* Ditto Látyáyana, (Text) Fasc. II—IX @ 6 each ...	3	0
Ditto S'ánkháyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1—4 @ /6/ each...	4	2
*Sáma Veda Saṁhitá, (Text) Vols. I, Fasc. 5—10; II, 1—6; III, 1—7; IV, 1—6; V, 1—8, @ /6 each Fasc.	12	6
Sankhya Sutra Vritti, (Text) Fasc. I—IV @ /6/ each	1	8
Ditto (English) Fasc. I—III	2	4
*Sankara Vijaya, (Text) Fasc. II and III @ /6/ each	0	12
*Sánkhya Pravachana Bháshya, Fasc. III (English preface only) ...	0	6
S'ri Bháshyam, (Text) Fasc. I—III @ /6/ each	1	2
Suśruta Saṁhitá, (Eng.) Fasc. I & II @ /12/ each	1	8
Taittiríya Áraṇya, (Text) Fasc. II—XI @ 6/ each	3	12
* Ditto Saṁhita, (Text) Fasc. IX—XXXVI @ /6/ each	10	8
Táṇḍya Brahmaṇa, (Text) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámaṇi, (Text) Vol. I, Fasc. 1—9, Vol. II, Fasc. 1—10, Vol. III, Fasc. 1—2, @ /6/ each	7	14
Tul'si Sat'saí, (Text) Fasc. I—IV @ 6/ each	1	8
Uvásagadasáo, (Sanskrit and English) Fasc. I—VI @ /12/ ...	4	8
Varáha Puráṇa, (Text) Fasc. I—XIV @ 6 each	5	4
*Váyu Puráṇa, (Text) Vol I, Fasc. 2—6; Vol. II, Fasc. 1—7, @ /6/ each Fasc.	4	8
Vishṇu Smṛiti, (Text) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara, (Text) Fasc. 1—VII @ /6/ each	2	10
Vrihannáradiya Puráṇa, (Text) Fasc. 1—VI @ /6/	2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1—3 @ 1/ each	3	0
Sher-Phyin, Vol. I, Fasc. 1—5; Vol. II, Fasc. 1—3 @ 1/ each ...	8	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. I—III; Vol. II. Fasc. I—II @ 1/ each	5	0

Arabic and Persian Series.

'Alamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each ...	4	14
Ain-i-Akbari, (Text) Fasc. I—XXII @ 1/ each...	22	0
Ditto (English) Vol. I, Fasc. 1—7, Vol. II, Fasc. 1—5, Vol. III Fasc. 1—2, @ 1/12/ each	24	8
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each ...	37	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bádsháhnámah with Index, (Text) Fasc. I—XIX @ /6/ each ...	7	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. I & II	2	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each	14	0
Fihrish-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúḥ-ul-Shám Waqidí, (Text) Fasc. I—IX @ /6/ each	3	6
Ditto Ázádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Asmán, History of the Persian Mausawi, (Text) Fasc. I ...	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each ...	4	8
Iqbálnámah-i-Jahángirí, (Text) Fasc. I—III @ /6/ each	1	2
Iṣabáh, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maásir-ul-Umara, Vol. I, Fasc. 1—9, Vol. II, Fasc. 1—9; Vol III, 1-10 @ /6/ each	10	8
Magházi of Wáqidí, (Text) Fasc. I—V @ /6/ each	1	14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each	5	10

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhab-ul-Tawáríkh, (English) Vol. II, Fasc. 1—5 @ /12/ each	Rs.	3	12
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each		7	2
Mu'ásir-i-'Alamgíri, (Text). Fasc. I—VI @ /6/ each		2	4
Nokhbat-ul-Fikr, (Text) Fasc. I		0	6
Nizámi's Khiradnámah-i-Iskandari, (Text) Fasc. I and II @ /12/ each		1	8
Riyázu-s-Salatin, (Text) Fasc. I—IV @ /6/ each		1	8
*Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. VII—X @ 1/ each		4	0
Tabaqát-i-Násirí, (Text) Fasc. I—V @ /6/ each...		1	14
Ditto (English) Fasc. I—XIV @ /12/ each		10	8
Táríkh-i-Fíráz Sháhi of Zia-al-din Barni (Text) Fasc. I—VII @ /6/ each		2	10
Táríkh-i-Baihaqí, (Text) Fasc. I—IX @ /6/ each		3	6
Táríkh-i-Firozsháhi, of Shams-i-Siráj Aif, (Text) Fasc. I—VI @ /6/ each		2	4
Ten Ancient Arabic Poems, Fasc. I		1	0
Wís o Rámín, (Text) Fasc. I—V @ /6/ each		1	14
Zafarnámah, Vol. I, Fasc. 1—9, Vol. II, Fasc. 1—8 @ /6/ each ...		6	6
Tuzuk-i-Jahángirí, (Eng.) Fasc. I		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each ... ... Rs. 50 0
   Ditto Index to Vols. I—XVIII 5 0
2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1850 (7), 1851 (7), 1857 (6), 1858 (5), 1861 (4), 1862 (5), 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), @ 1/8 per No. to Subscribers and @ 2/ per No. to Non-Subscribers.

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883... 3 0
   General Cunningham's Archæological Survey Report for 1863—64 (Extra No., J. A. S. B., 1864) 2 0
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868) 2 0
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875) 4 0
   Introduction to the Maithili Language of North Bihár, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., J. A. S. B., 1882) 4 0
5. Anis-ul-Musharrahin 3 0
6. Catalogue of Fossil Vertebrata 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal 3 8
8. Istiláhat-us-Súfiyah, edited by Dr. A. Sprenger, 8vo. 1 0
9. Ináyah, a Commentary on the Hidayah, Vols. II and IV, @ 16/ each... 32 0
10. Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I ... 2 0
11. Khizánat-ul-'ilm 4 0
12. Mahábharata, Vols. III and IV, @ 20/ each 40 0
13. Modern Vernacular Literature of Hindustani by G. A. Grierson. (Extra No., J. A. S. B., 1888) 4 0
14. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—III, with 8 coloured Plates, 4to. @ 6/ each 18 0
15. Sharaya-ool-Islám 4 0
16. Tibetan Dictionary by Csoma de Körös 10 0
17. Ditto Grammar " 8 0
18. Vuttodaya, edited by Lt.-Col. G. E. Fryer 2 0

Notices of Sanskrit Manuscripts, Fasc. I—XXV @ 1/ each ... 25 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 869.



न्यायवार्त्तिकम् ।

NYÁYA-VÁRTTIKAM

EDITED BY

PANḌIT VINDHYEŚVARÎ PRASÁD DUBE.

LIBRARIAN, GOVT. SANSKRIT COLLEGE, BENARES.

FASCICULUS III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1896.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.

46 GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
*Agni Puráṇa, (Text) Fasc. 2–14 @ /6/ each	...	4	14
Aitareya Áraṇyaka of the Rig Veda, (Text) Fasc. 1–5 @ /6/ each ...	...	1	14
Aitareya Brahmana, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–2 @ /6/ ...	...	2	10
Aṇu Bháshyam, (Text) Fasc. 1–2 @ /6/ each	...	0	12
Aphorisms of Śáṇḍilya, (English) Fasc. 1	...	0	6
Ashtasáhasriká Prajṛapáramitá, (Text) Fasc. 1–6 @ /6/ each ...	...	2	4
Áśvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Avadána Kalpalatá, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–4 @ 1/ each	...	9	0
*Bhámati, (Text) Fasc. 2–8 @ /6/ each	...	2	10
Brahma Sútra, (English) Fasc. 1	...	0	12
Brihaddevata (Text) Fasc. 1–4 @ /6/ each	...	1	8
Brihadharma Puráṇa, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Brihadaranyaka Upanishad (English) Fasc. 2–3 @ /6/ each ...	...	0	12
Chaitandya-Chandrodaya Nátaka, (Text) Fasc. 2–3 @ /6/ each ...	...	0	12
*Chaturvarga Chintamani (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each	...	19	14
*Chhándogya Upanishad, (English) Fasc. 2	...	0	6
*Hindu Astronomy, (English) Fasc. 2–3 @ /6/ each	...	0	12
Kúla Mádhava, (Text) Fasc. 1–4 @ /6/ each	...	1	8
Kátantra, (Text) Fasc. 1–6 @ /12/ each	...	4	8
Kathá Sarit Ságara, (English) Fasc. 1–14 @ /12/ each	...	10	8
Kúrma Purana, (Text) Fasc. 1–9 @ /6/ each	...	3	6
*Lalita-Vistara, (Text) Fasc. 3–6 @ /6/ each	...	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	...	2	4
Madana Párijáta, (Text) Fasc. 1–11 @ /6/ each...	...	4	2
Manutiká Sangraha, (Text) Fasc. 1–3 @ /6/ each	...	1	2
*Márkaṇḍeya Puráṇa, (Text) Fasc. 4–7 @ /6/ each	...	1	8
Márkaṇḍeya Puráṇa, (English) Fasc. 1–3 @ /12/ each	...	2	4
Mimáṁsá Darśana, (Text) Fasc. 3–19 @ /6/ each	...	6	6
*Nárada Smriti, (Text) Fasc. 1–3 @ /6/	...	1	2
Nyayavártika, (Text) Fasc. 1 and 2	...	0	12
*Nirukta, (Text); Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each	...	5	4
*Nítisára, or The Elements of Polity, By Kámandaki, (Sans.) Fasc. 2–5 @ /6/ each	...	1	8
Nyayabindutika, (Text)	...	0	10
Nyaya Kusumánjali Prakarana (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	...	3	6
Parišishṭa Parvan, (Text) Fasc. 1–5 @ /6/ each...	...	1	14

मनेनापि प्रमाणसमानाधिकरणेन नास्तिना प्रमाणानां नाभावः शक्यः प्रतिपादयितुम् । अपि त्वनेनापि तन्त्रान्तराभ्युपगतानां प्रतिषेधः स्यात् सामर्थ्यप्रतिषेधो वा कालविशेषप्रतिषेधो वेति सर्वथा प्रमाणानि अभ्युपगतानि भवन्ति तानि चाभ्युपगतान्यनेन प्रतिषेधेन प्रतिषिध्यन्त इति व्याघातः । प्रमाणानां वाऽसत्त्वं प्रतिपाद्यमानं कथं कस्य(१) प्रतिपाद्यते कश्च प्रतिपादयिता अप्रतिपन्नः प्रतिपाद्यत इति । प्रतिपन्नश्च प्रतिपादयिता केन प्रतिपन्नः यदि प्रमाणेन व्याघातः प्रमाणानभ्युपगमात् अथान्यथा न दृष्टान्तोऽस्ति प्रतिपाद्यप्रतिपादकयोश्च भेदाभ्युपगमे व्याघातः यदि प्रतिपाद्यं प्रतिपादयितारं च भेदेन प्रतिपद्यसे भेदप्रतिपादकप्रमाणाभ्युपगमाद्व्याघातः । अथ भेदं न प्रतिपद्यसे क्व किं प्रतिपाद्यत इत्यनिवृत्तो व्याघातः । प्रमाणानि न सन्तीति प्रतिजानानः पर्यनुयोज्यः कथं न सन्तीति यदि प्रमाणं ब्रवीति व्याहतम् । अथ न ब्रवीति अर्थो नास्य सिध्यति(२) तदेवमेतदाक्यं यावद्यावद्विचार्यते तावत् तावत् प्रलीयत इति ॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ १३ ॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः । चैकाल्यासिद्धेरित्यस्य हेतोरुदाहरणमुपादीयते न वा यद्युपादीयते व्याघातो भवति प्रत्यक्षादीनां चाप्रामाण्यस्याभ्युपगमादुपादीयमानमपि नार्थं साधयतीति व्यर्थम् । अथ साधयतीति व्याघातः अथ नोपादीयते अप्रदर्शितं हेत्वर्थस्य साधकत्वमिति अप्रदर्शितदृष्टान्तो हेतुर्न साधक इति सोऽयं हेतुः सर्वैः प्रमाणैर्विप्रतिषिद्धो विरुद्धो भवति सिद्धान्त-

(१) कस्येति सम्भाव्यते । (२) नास्य स्यात्—पा० ६ पु० ।

मभ्युपेत्य तद्विरोधी विरुद्ध इति वाक्यार्थो ह्यस्य सिद्धान्तः स च वाक्यार्थः प्रमाणानि नार्थं साधयन्तीति। इदं च प्रमाणानामुपादानमर्थसाधनाय प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेरिति बुद्धिविवक्षाप्रयत्नवायूदीरणताल्वभिघातौष्ठ्यप्रस्पन्दादीनि अवर्ज्जयन् बुद्ध्या वाक्यमुच्चारयसि स्थाणुकण्टकसर्पादीन् परिहरन् पादविहरणादीनि करोषि ते एते वाक्यप्रवृत्तौ प्रमाणप्रतिषेधान्न संभवत इति ॥

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ १४ ॥

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः। अथ स्ववाक्याश्रितप्रमाणव्यतिरेकेण प्रमाणानि प्रतिषिध्यन्ते एवं सति न सर्वं प्रमाणं प्रतिषिद्धं भवति यश्च न्यायः स्ववाक्याश्रितप्रमाणाभ्युपगमे स एवान्याश्रितप्रमाणाभ्युपगमे ऽपीति वीत्ययमुपसर्गो विशेषप्रतिषेधे न व्याघात इति किमुक्तं भवति कानिचित्प्रमाणानि प्रतिषिध्यन्ते कानिचिदभ्यनुज्ञायन्त इति यानि स्ववाक्याश्रितानि तान्यभ्यनुज्ञायन्ते यानि परवाक्याश्रितानि तानि प्रतिषिध्यन्त इति। यच्चेदं वाक्यं प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेरिति किमिदं प्रमाणस्वरूप[१]मथ नेति यदि प्रमाणस्वरूपं[२] तदा व्याघातः अथ न तथापि नानेन कश्चिदर्थः प्रतिपाद्यत इति व्यर्थम् ॥

चैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत् तत्सिद्धेः ॥ १५ ॥

चैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवदिति सूत्रम्। यत् तत्पूर्वमुक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावा-

(१) प्रमाणरूप—पा० ६ पु०। (२) प्रमाणरूपं—पा० ६ पु०।

नियमाद्यथादर्शनं विभागवचनमिति तदुत्थानज्ञापनार्थमतः सूत्रान्तरस्योत्थानमिति। कस्मात् पुनस्तत्रैवेदं सूत्रं नोक्तमिति। अविशेषात् तत्र चाभिधीयते दृष्ट वा न कस्मिंद्विशेष इति सर्वथा तावदयमर्थः प्रकाशयितव्य इति। एकां च विधामुदाहरति शब्दादातोद्यसिद्धिवदिति शेषयोस्तु विधयोर्यथोक्ते उदाहरणे वेदितव्ये। यथा पूर्वसिद्धमातोद्यं पश्चात् सिद्धेन शब्देनानुमीयते वीणा वाद्यते वेणुः पूर्यते इति योऽसौ वीणावेणुशब्दयोरसाधारणो धर्मः वीणादिनिमित्तत्वं तदुपलभमानः शब्दस्य वीणाशब्दो वेणुशब्द इति प्रतिपद्यते पूर्वसिद्धमातोद्यं पश्चात् सिद्धः शब्द इति। सहभावस्योदाहरणम् धूमदर्शनादग्निं धूमविशेषणं प्रतिपद्यते पूर्वसिद्ध उपलब्धिहेतुरादित्यः पश्चात् सिद्धानां प्रकाशक इति प्रमाणं प्रमेयमिति चेयं समाख्या समावेशेन भवति समाख्यानिमित्तवशात् समावेशो नियमः समाख्यानिमित्तवशात् समाख्यानिमित्ततन्त्वादिति प्रमाणप्रमेयसंज्ञयोर्निमित्तमुपलब्धिहेतुत्वमुपलब्धिविषयत्वं च। यदा पुनरेकमनेकनिमित्तसम्बन्धि भवति तदा कथम् तदा निमित्ततन्त्वात् समाख्यायास्तद्वत्तु (अनेकेन निमित्तेन सम्बन्धेन सति[१]) अनेकशब्दाभिलाप्यं[२] अस्य चार्थस्य ज्ञापनार्थं सूत्रम्॥

प्रमेयता[३] च तुलाप्रामाण्यवत्॥ १९॥

प्रमेयता[४] च तुलाप्रामाण्यवदिति। किमुक्तं भवति यथा गुरुत्वपरिज्ञानसाधनं तुलाद्रव्यं समाहारगुरुत्वस्येयत्तापरिच्छेदनिमित्त-

(१) सम्बन्धे सति—इति साधुः। (२) शब्दाभिलप्यं—पा० २ पु०।
(३) प्रमेया च—इति क्वचित्। (४) प्रमेया—पा० १। ९ पु०।

त्वात् प्रमाणं सुवर्णादिना च परिच्छिद्यमानेयत्तैषा तुलेति परिच्छेदविषयत्वेन व्यवतिष्ठमाना प्रमेयम् उदाहरणं चैतत् एवमनवयवेन तन्त्रार्थो वेदितव्यः यथा च प्रमाणप्रमेयसमाख्ये तथा कारकशब्दाः सर्वे निमित्तसमावेशनियमेन[१] वर्तन्ते तथा च लौकिकमुदाहरणम् । एकमनेकेन कारकशब्देनाभिधीयते वृक्षस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् कर्ता किं पुनर्वृक्षस्य स्वस्थितौ स्वातन्त्र्यं कारकान्तरानपेक्षित्वम् न हि वृक्षस्तिष्ठन् स्वस्थितौ कारकान्तरं प्रयुङ्क्ते इति यदायं स्थितिशब्दो गतिनिषेधवचनो भवति तदैवं यदाप्यस्तेरभिधायकस्तदाप्यस्तेर्व्यक्तिनिमित्तत्वेनावतिष्ठमानोऽस्ति व्यनक्तीति कर्तेत्युच्यते यदा तु गेहसम्बन्धा[२]द्यभिधायको भवत्यस्तिशब्दो[३] यथा गेहे देवदत्तस्तिष्ठतीति प्रतिनिर्दिष्टोऽस्तीति गम्यते तदा न सत्तामाह न गतिप्रतिषेधम् । अपि तु[४] गेहसम्बन्धं तदापि देवदत्तगेहसम्बन्धानुभवक्रिया तस्यामपि न कारकान्तराणि प्रयुङ्क्ते इति स्वतन्त्रो भवति यदायमभग्नवचनः स्थितिशब्दस्तिष्ठति वृक्षो न भग्न इति तदापि स्वस्थितौ न कारकान्तराणि प्रयुङ्क्ते इति स्वतन्त्रो भवति समुदायैकदेशं वा स्वस्थितौ प्रयुङ्क्ते वृक्षो मूलैस्तिष्ठतीति प्रासादस्तम्भैर्ध्रियत इति पूर्वापरप्रत्ययैकविषयता वा स्थितिः यदस्तु प्राक् सिद्धं पुनर्निमित्तान्तरसन्निधाने सति उपलभ्यते यत् तस्यानेकायुगपत्कालप्रत्ययविषयत्वं सा स्थितिः तस्यां स्थितावस्य यत्सहकारिसाधनं चक्षुरादि तत्करणमिति चक्रभ्रान्तिप्रदीपप्रत्यय-

---

(१) समावेशनियमात्—पा० ६ पु० । (२) गेहे सम्बन्धा—पा० ६ पु० ।
(३) स्थितिशब्दो—इति गुरवः । (४) देवदत्त—इत्यधिकम् ६ पु० ।

वन्मिथ्याप्रत्यय इति चेत्। अथ मन्यसे नैकं वस्त्वयुगपत्कालानेकप्रत्ययविषयो भवति यदि न भवति कथं तर्हि स एवायं वृक्षस्तिष्ठतीति प्रत्ययः। न हि कदाचिदाद्येन च दर्शनेन स एवायं वृक्षस्तिष्ठतीति प्रत्ययो भवति दृष्टोऽन्यत्वेऽपि स्थितिप्रत्ययः चक्रं भ्रमत्तिष्ठतीति[१] प्रदीपो ज्वलंस्तिष्ठतीति अनवस्थितेषु नानाभूतेषु चक्रभ्रान्तिप्रदीपादिषु य एते तद्भावप्रत्यया अतस्मिंस्तदिति मिथ्याप्रत्यया एते यथा चैते मिथ्याप्रत्यया एवं वृक्षादिस्थितिष्वपीति न प्रमाणाभावात् नहि भवता प्रमाणं किञ्चिद्वृक्षादीनां नानात्व[२]प्रतिपादकमभिधीयते मिथ्याप्रत्ययाश्च सम्यक्प्रत्ययानुकारेण भवन्तीति क्वामी सम्यक्प्रत्यया भवन्तीति वक्तव्यम्। अथ भवतः कालान्तरावस्थाने किं प्रमाणम् उक्तं प्रमाणम् रूपरसस्पर्शप्रत्ययानामेकानेकप्रत्ययनिमित्तत्वप्रतिसन्धानादिति कार्यस्याधारत्वेन वा कारणस्य कार्यकालानुभवनमिति। यद्यस्याधारो भवति तत् तस्य सद्भावकालमनुभवति यथा क्षीरस्य कुण्डम्। कारणं कार्याधिकरणमतस्तेनापि कार्यकालोऽनुभवनीय इति। अनाधारमेवेति चेत् अथ मन्यसे ऽप्रतीत्य कारणं[३] कार्यमुत्पद्यते इति क्व किं वर्तत इति तन्न दृष्टान्ताभावात् नहि कश्चिदुभयपक्षसंप्रतिपन्नो दृष्टान्तः कार्यमनाधारमस्तीति कार्यमाधारवदित्यत्रापि न दृष्टान्तोऽस्तीति समानम्। समानमित्यनुत्तरमभ्युपगमात् अभ्युपगतं तावद्भवता नास्मत्पक्षे दृष्टान्तोऽस्ति किं तु भवत्पक्षेऽपि नास्तीति विरोध इति चेत्। अथ मन्यसे न मया-

---

(१) चक्रभ्रमस्तिष्ठतीति—इति गुरवः। (२) वृक्षादीनामसत्त्वे—पा० १ पु०।
(३) अप्रतीत्याधिकरणं—इति साधुः।

भ्युपगम्यते दृष्टान्ताभावः किं तु भवत्पचे विरोधो दृश्यते कथमिति योऽनुपपद्यमानदृष्टान्तः स पचोऽसाधीयानित्येवं ब्रुवाणः स्वसिद्धान्तं बाधते तन्नापरिज्ञानात् न भवताऽस्मत्पचो व्यज्ञायि न स्वपचः। अस्मत्पचे तावत् कार्यमाधारवदिति एतत्प्रसिद्धं[१] भवत्पचेऽपि रूपादयः कार्याश्चाधारवन्तश्चेत्यभ्युपगमविरोधः भूतभौतिकसमुदायो द्रव्यमिति यदि रूपादीननाश्रितान् मन्यसे कोऽस्य तद्धितस्यार्थो भौतिका रूपादय इति यच्चोक्तं मणिः प्रभाया आश्रयस्तद्गतिस्थिति-विकारानुविधानात् कुण्डं बदराणामाश्रयस्तद्वशेनापातात्[२] तैलस्य तिला आश्रयस्तद्वशेनास्यन्दनादित्येवमादि तद्व्याहन्यते अनाश्रिताश्च रूपादयः स्वतन्त्रा एकमुपनिबन्धनं वस्त्वन्तरेण तिलमुद्गमाषादिवद्वि-भज्येरन् न तु विभज्यन्ते तस्मात् परतन्त्रा इति तस्माद्व्यवस्थितमेतत् स्मृत्या सह पूर्वापरप्रत्ययैकविषयता वा स्थितिरिति दर्शनेनानुमि-ष्यमाणत्वात् वृचः कर्म कर्मणि कः कारकार्थः क्रियाविषयत्वं यत् खलु क्रियाविषयभावेन व्यवतिष्ठत इत्येतत्कर्म एतेन कर्मलक्षणेन तथा युक्तं यानीप्सितमिति संगृहीतम् आनन्तर्यप्रतिपत्तिः करणस्य साधकतमत्वार्थः वृचेण चन्द्रमसं ज्ञापयतीति वृचं गृहीत्वानन्तरं चन्द्रमसं प्रतिपद्यत इति वृचः करणकारकशब्दवाच्यः कर्मणाप्नुमभीष्टं सम्प्रदानम् यद्वस्तु कर्मणा प्राप्नुमभिप्रेतं भवति तत् सम्प्रदानसंज्ञकम्। वृचायोदकमासिञ्चतीति आसिच्यमानमुदकं कर्म तेन कर्मणोदकेन वृचं प्राप्नोतीति वृचः सम्प्रदानं भवतीति अपगच्छत्यवतिष्ठते[३] यत्

---

(१) एतत् सिद्धम्—पा० ६ पु०। (२) तद्वशेनापतनादिति सम्यक्।
(३) अपगच्छन्नवतिष्ठते—पा० ६ पु०।

तदपादानम् यथा वृक्षात् पततीति वृक्षोपादानसंज्ञकः। यत् पतति तदपगच्छति तस्मिन्नपगच्छति अवतिष्ठते वृक्ष इति। धृतिहेतुरधिकरणम् यस्मिन् यदाधेयं तदाधेयस्य यद्धृतिहेतुस्तदधिकरणम् वृक्षे वयांसीति वृक्षसम्बन्धो वयसां गुरुत्वप्रतिबन्धे कारणमिति वृक्षोऽधिकरणशब्दवाच्यः। एवं च सति न द्रव्यमात्रं कारकं न क्रियामात्रम् किमुक्तं भवति नायं कारकशब्दः क्रियामात्रे वर्तते न द्रव्यमात्रे नहि द्रव्यं शुद्धं[१]मुपलभमानः कारकशब्दं प्रयुङ्क्ते नापि क्रियां केवलामपि तु यदा क्रिया द्रव्यसम्बन्धमुपलभते तदा सामान्येन कारकशब्देनाभिधत्ते[२] कारकमिति। सामान्यं च कारकाणां क्रियानिमित्तत्वम् अविवक्षिते विशेषे क्रियानिमित्तत्वे केवले विवक्षिते कारकमितिशब्दः प्रवर्तते यदा तु विशेषो विवक्षितस्तदा त्वसाधारणेन कारकधर्मेणेतरेतरव्यावृत्तेन स्वातन्त्र्यादिना विशेषेण विशिष्यमाणं वस्तु कर्ता कर्म करणमिति व्यपदिश्यते सर्वस्य च कारकस्य स्वक्रियानिमित्तः कर्तृव्यपदेशः प्रधानक्रियासव्यपेक्षस्तु कारकशब्दप्रयोगः। एवं च शास्त्रं कारके जनके निर्वर्तके कस्याः क्रियाया इति तथा व्यपदेशः तस्मान्नेदं स्वक्रियामात्रमपेक्ष्योक्तम् किं तु प्रधानक्रियाम् तस्यामेव प्रधानक्रियायां किञ्चिदारादुपकारकं किञ्चिदासन्नोपकारकमिति किञ्चित्कथञ्चिदुपकरोति तदपेक्षाश्च कर्त्रादिशब्दा इति। तदुक्तं पुरस्तात्। यदि क्रियासम्बन्धनिमित्तकः कारकशब्दप्रयोगः पचत्येव पाचकशब्दः प्रवर्तेत तेनापाचीत् पाचकः पक्ष्यतीति पाचक इति न शक्तेस्त्रिकालावस्थानात्

(१) द्रव्यस्वरूप—पा० ६ पु०। (२) कारकशब्दानभिधत्ते—पा० १ पु०।

शक्तिस्त्रिष्वपि कालेष्ववतिष्ठते शक्त्यपेक्षस्त्वतीतानागतयोः कारकशब्दव्यपदेशः पचत्यपाचीत् पक्ष्यतीति शक्तेस्त्रिकालावस्थानात् त्रिकालव्यक्तिरयुक्ता यथैव द्रव्यं त्रिकालयोगि तथा शक्तिरपीति यथा द्रव्ये चैकाल्यं न व्यज्यते तथा शक्तावपीति अपचत्यपि पचतीति स्यात् पक्ष्यति पाचकोऽपाचीत् पाचक इत्येव न स्यात् नैष दोषः क्रियासम्बन्धस्य शक्तिव्यक्तिहेतुत्वात् क्रियेत्यनेन शब्देन धात्वर्थोऽभिधीयते तस्य यत् प्रधानसाधनं स कर्ता सोऽयं कर्ता यदा क्रियया सम्बध्यते तदा शक्तिं व्यनक्ति का पुनरियं शक्तिः क्रियाकर्तृव्यतिरिक्तः कर्तृधर्मः सामर्थ्यमुपायपरिज्ञानं च क्रियासम्बन्धेन व्यवतिष्ठते(१) यदोपायविज्ञानसामर्थ्यक्रियासम्बन्धास्तदा(२) मुख्यतः कारकशब्दः प्रवर्तते पचति पाचक इति यदा तु क्रियासम्बन्धमन्तरेणोपायपरिज्ञानसामर्थ्यमात्रोपादानेऽन्यतमवैकल्यात् पाचकशब्दः प्रवर्तते तदोपचारतोऽपाचीत् पाचकः पक्ष्यति पाचक इति। कारकशब्दस्त्वयं प्रमाणं प्रमेयमिति कुतः क्रियाविशेषयोगात् यथैवामी पाचकादिशब्दाः क्रियाविशेषयोगे सति प्रवर्तन्ते तथा प्रमाणप्रमेयशब्दावपीति। अथ भोः(३) कारकशब्दानां निमित्तसमावेशान्नियमः प्रत्यक्षादीनि प्रमाणानि संवेद्यमानानि प्रमेयं उपलब्धिविषयत्वात् तत्रेदं चिन्त्यते। किमेतानि प्रत्यक्षादीनि स्वोपलब्धौ प्रत्यक्षादिव्यतिरिक्तं प्रमाणान्तरम् (प्रसिद्धेर्यदि प्रमाणं साधनं प्रमाणान्तरं प्राप्नोति) प्रयोजयन्ति अथ निःसाधनैव प्रमाणेषूपलब्धिरिति॥

---

(१) व्यज्यते—पा० ६ पु०। (२) यदोपायविज्ञानं च सामर्थ्यं क्रियासम्बन्धस्तदा—पा० १ पु०। स च प्रामादिकः। (३) अस्ति भोः—पा० ६ पु०।

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धि-प्रसङ्गः ॥ १७ ॥

किं चातः प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः प्रमाणविषयायाः सिद्धेर्यदि प्रमाणं साधनं प्रमाणान्तरं प्राप्नोति प्रत्यक्षादीनां साध्यत्वान्न साध्यं साधनं भवतीति। अथ प्रमाणान्तर-मन्तरेण निःसाधनैव प्रमाणेषूपलब्धिः ॥

तद्विनिवृत्तेर्वा प्रमाणान्तरसिद्धिवत् प्रमेयसिद्धिः ॥१८॥

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः। यथा प्रमाणानि स्वोपलब्धौ निवर्तन्ते एवं प्रमेयसिद्धावपि ॥

अस्योत्तरम्।

न प्रदीपप्रकाशवत् तत्सिद्धेः ॥ १९ ॥

न प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेरिति। प्रदीपप्रकाशो घटा-द्युपलब्धिसाधनस्याङ्गत्वात् प्रमाणम् स च प्रत्यक्षादिभिरेवोपलभ्यते नासावात्मोपलब्धौ प्रत्यक्षादिव्यतिरेकिप्रमाणं प्रयोजयति तैरेव उपलभ्यते तथा प्रमाणान्यपि प्रत्यक्षादिभिरेवोपलभ्यन्त इति दृष्टा-न्तमात्रमेतत् कोऽत्र न्याय इति। अयं न्याय उच्यते। प्रत्यक्षादीनि स्वोपलब्धौ प्रमाणान्तराप्रयोजकानि परिच्छेदसाधनत्वात् प्रदीपवत् यथा प्रदीपः परिच्छेदसाधनं स्वोपलब्धौ न प्रमाणान्तरं प्रयोजय-तीति तथा प्रमाणानि तस्मात् तान्यपि प्रमाणान्तराप्रयोजकानीति सिद्धम्। सामान्यविशेषवत्त्वाच्च[१] यत् सामान्यविशेषवत् तत् स्वोपलब्धौ

(१) विशेषवद्भावाच्च—पा० १ पु०।

न प्रत्यचादिव्यतिरेकिप्रमाणं प्रयोजयति यथा प्रदीप इति संवेद्यत्वात् यत् संवेद्यं तत् प्रत्यचादिव्यतिरेकिप्रमाणान्तराप्रयोजकं यथा प्रदीप इति। आश्रितत्वात् करणत्वादित्येवमादि प्रदीपवदिन्द्रियादयोऽपि प्रत्यचाङ्गत्वात् प्रत्यचादिव्यतिरिक्तप्रमाणान्तराप्रयोजका इति समानम्। तेनैव तस्याग्रहणमिति चेत्। अथ मन्यसे प्रत्यचादिभिः प्रत्यचादीनामुपलब्धौ तेनैव तदेव गृह्यत इति प्राप्तम् न चैतदस्ति नहि साध्यं साधनं भवतीति नैष दोषः। अर्थभेदस्य लचणसामान्यात् प्रमाणलचणेनानेकोऽर्थः संगृहीतः तत्र केनचित्कस्यचिद्ग्रहणमित्यदोषः। यथोद्भूतेनोदकेनाग्नयस्यस्य यथोद्भूतमुदकं गृहीत्वा आग्नयस्यमप्येवं भूतमिति प्रतिपद्यत इति न पुनरेवमभिधीयते तेनैव तस्य ग्रहणमपि तु तथाभूतेन तथाभूतस्य न चायमेकान्तः न तेनैव तस्य ग्रहणं भवतीति भवत्यपि कदाचित् यथात्मनि स एव ज्ञाता ज्ञेयो भवति यदात्मानं जानीत इति। निमित्तभेदोऽत्रेति चेत् अथ मन्यसे यदायमात्मा ज्ञाता तदान्यन्निमित्तम् यदा ज्ञेयस्तदान्यदिति समानम् यथैव ज्ञाता सुखादिसम्बन्धापेचस्तद्विशेषणमात्मानं प्रतिपद्यते अहं सुखी अहं दुःखी चेति तथा प्रमाणमपि प्रमाणविषयत्वेनावतिष्ठमानं प्रमेयमिति प्रत्यचादीनां चाविषयस्यानुपपत्तेः। यदि कश्चिद्विषयः प्रत्यचाद्यविषयः स्यात् प्रतिपद्येमहि प्रत्यचादिव्यतिरिक्तं प्रमाणं स च न शक्यः केनचित्प्रतिपादयितुम् सर्वमिदं सच्चासच्च प्रत्यचादीनामेव विषयः तस्मात् प्रत्यचादिभिरेवोपलभ्यते। अपरे तु हेतुविशेषपरिग्रहमन्तरेण दृष्टान्तमात्रं प्रदीपप्रकाशसूत्रेणोपादत्ते यथा किल प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते तथा

प्रमाणान्यपि प्रमाणान्तरमन्तरेण ग्रहीष्यन्त इति तान् प्रतीदमुच्यते॥

क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तः।(१) यथा प्रदीपप्रकाशस्तथा प्रमाणानि न पुनर्यथा स्थाल्यादिरूपं तथा प्रमाणानीति कोऽत्र नियमहेतुः। स्थाल्यादिरूपप्रकाशने च प्रदीपप्रकाशो न निवर्तते कस्मादेवं न प्रमाणानीति अयं च प्रदीपप्रकाशदृष्टान्तः प्रमाणपक्षे भवतु माभूत् प्रमेयपक्ष इति तत्रापि(२) नियमहेतुर्वक्तव्यः प्रदीपप्रकाशो दृष्टान्तो भवतु माभूत् स्थाल्यादिदृष्टान्त इत्यत्रापि नियमहेतुर्वक्तव्यः। सोऽयमुभयथानेकान्तो विशेषहेतुमन्तरेण दृष्टान्तः प्रसक्तः विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः यदि पुनरयं प्रदीपप्रकाशो दृष्टान्तो विशेषहेतुना प्रकाशत्वादिना संगृहीतः। तत एकस्मिन् पक्षेऽभ्यनुज्ञायमानो न शक्यः प्रतिषेद्धुमित्यनेकान्त इत्ययं दोषो न भवति प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्था स्यादिति चेत् यदि प्रत्यक्षादीनि प्रत्यक्षादिभिरुपलभ्यन्ते तान्यप्यन्यैस्तान्यप्यन्यैरित्यनवस्था अनवस्थायां वाऽद्यप्रमाणाधिगमो न स्यात्। अथ व्यवस्थास्ति आद्यप्रमाणाधिगतिरप्रमाणं(३) प्रसज्येत् नैष दोषः। संवित्तिविषयनिमित्तानामुपलब्ध्या व्यवहारसिद्धेः संवित्तिविषयं संवित्तिनिमित्तं चोपलभमानस्य संवित्तेर्विषयम् प्रमेयं संवित्तिनिमित्तं प्रमाणं प्रमाणप्रमेययोरुपलब्धौ सर्वो व्यवहारः सिध्यति धर्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च न त्वनवस्थासाधनीयं किञ्चित् प्रयोजनमस्ति येनायं प्रयुक्तो-

(१) न्यायसूचीनिबन्धे इदं वाक्यं सूत्रत्वेनावधारितम्।
(२) अत्रापि—पा० ६ पु०। (३) अप्रमाणा—पा० ६ पु०।

ऽनवस्थामुपादद्दीत । तस्मात्प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धिः न चानवस्थेति ॥

एवं तावत् सामान्यतः समधिगतमेतत् सन्ति प्रमाणानि प्रमेयसाधनानि। अथेदानीं सामान्यतोऽधिगतानां विशेषपरीक्षा। तत्र प्रत्यक्षमादावुक्तम् तत्परीक्ष्यत इति ॥

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २० ॥

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् । यदिदं भवता प्रत्यक्षलक्षणमुच्यते इन्द्रियार्थसन्निकर्षोत्पन्नमिति तदसमग्रम् कस्मात् अन्यान्यपि प्रत्यक्षस्य कारणानि सन्ति तानि नोक्तानि यथात्ममनःसंयोग इत्येवमादीनि। अथेन्द्रियार्थसन्निकर्षोत्पन्नमित्येतल्लक्षणमिति लक्षणमप्येतन्न भवति कस्मादुत्पत्तिकारणापदेशात् इन्द्रियार्थसन्निकर्षोत्पन्नमित्येतत् कारणमपदिश्यते न च कारणापदेशो वस्तुनो लक्षणम् । नहि घटादेः कार्यस्य मृत्पिण्डादिक्रमोत्पत्तिस्तल्लक्षणमिति नोभयथाप्यदोषः यदि कारणं तथापि न दोषः अथ लक्षणं तथापि न दोषः कथं कारणपक्षे तावदुक्तं भवति नेदं कारणावधारणार्थं सूत्रम् । अपि तु प्रत्यक्षस्य प्रमाणस्य यदसाधारणमनुमानादिव्यवच्छेदकं तदुक्तमिति । नात्ममनःसंयोगादिषु प्रसङ्गः इन्द्रियमनःसंयोगस्तर्ह्युपसंख्येयः यद्यसाधारणत्वादिन्द्रियार्थसन्निकर्षस्य ग्रहणम् । न त्वेतस्मादेवेन्द्रियमनःसन्निकर्षोऽप्युपसंख्येय इति उक्तमत्रापि न यावदसाधारणं तत्सर्वं वक्तव्यम्[१]। अपि त्वन्यतरग्रहणेनापि विशेषित-

(१) व्यक्तम्—पा० ६ पु० ।

मेतत् । लक्षणपक्षेऽपि न दोषः असाधारणत्वादिन्द्रियार्थसन्निकर्षस्य इन्द्रियार्थसन्निकर्षः प्रत्यक्षोत्पादकत्वात् कारणं च समानासमानजातीयेभ्यो विशेषकत्वाच्च लक्षणं चेति । अर्थतो वाभिधानम् । आत्ममनःसंयोगस्य इन्द्रियमनःसंयोगस्य च कथमिति ज्ञानोत्पत्तिदर्शनात्तासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरिति मनःसंयोगानपेक्षं चेदिन्द्रियं प्रवर्तते इति युगपदनेकोपलब्धिः स्यात् न भवत्यतो मनःसन्निकर्षोऽपि कारणमिति । तदिदं सूत्रमुक्तभाष्यम् ॥

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ २१ ॥

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिरिति । आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते बुद्धिरिन्द्रियार्थसन्निकर्षाभाववदिति । नोक्तोत्तरत्वात् उक्तोत्तरमेतदिति नेदं कारणावधारणार्थं सूत्रमपि तु विशिष्टकारणवचनमिति । ये च सति भावात् कारणभावं वर्णयन्ति यस्मात् किलेन्द्रियार्थसन्निकर्षे सति ज्ञानं भवति असति न भवति तस्मादिन्द्रियार्थसन्निकर्षः कारणमिति ॥

दिग्देशकालाकाशेष्वप्येवंप्रसङ्गः ॥ २२ ॥

तेषां दिग्देशकालाकाशेष्वप्येवंप्रसङ्गः । दिग्देशकालाकाशेषु सत्स्वपि ज्ञानं सम्भवति सति भावात् तान्यपि कारणमिति प्राप्तम् । कतमेन पुनर्न्यायेन दिगाद्यकारणं सामर्थ्यानुपलब्धेः नहि ज्ञानोत्पत्तौ दिगादेः सामर्थ्यमुपलभ्यते तस्मादकारणं सन्निधिमात्रादिति चेत् अथ मन्यसे दिगादि सन्निधिमात्रेण[१] ज्ञानोत्पत्तेः कारणमिति

(१) सम्बन्धिमात्रेण—पा० १ पु० ।

तदयुक्तम् । सन्निधेरवर्ज्जनीयत्वात् । नित्यं दिगादि व्यापकं चेति । नित्यत्वाद्व्यापकत्वाच्च न शक्यः सन्निधिः परिवर्जयितुमिति । तच्च कारणभावे हेतुर्वक्तव्यः नहि सन्निधिमात्रं हेतुत्वे कारणम् । कथं रूपोपलब्धेः तेजःस्पर्शसद्भाववदिति । यथा रूपोपलब्धौ तेजसो रूपविशेषो हेतुः न पुनस्तेजःस्पर्शः सन्निधिमात्रेण सामर्थ्यादर्शनाद् रूपस्य पुनर्दृष्टं सामर्थ्यं तद्भावाभावानुविधानाद्रूपलब्धेः यस्माद्यत्र रूपं भवति तत्रोपलब्धिः यत्र न भवति न तत्रोपलभ्यते तस्माद्रूपमेवोपलब्धेः कारणं न स्पर्श इति । यथा चान्द्रमसं रूपं विना तेजःस्पर्शेनोष्णेन प्रकाशयति । अपवरकादिस्थितं चौष्णं विना रूपेण न प्रकाशयति । एवं चात्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो ज्ञानं भवन्न दिगादिभ्यो भवति सन्निधिमात्रत्वात् । इतरेषां सामर्थ्यादर्शनादिति । यद्येवमात्ममनःसंयोगस्तर्ह्युपसंख्येयः नोपसंख्येयो गम्यमानत्वात् । केन गम्यमानत्वात् ॥

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥

ज्ञानलिङ्गत्वादात्मनो नानवरोधः । ज्ञानमात्मलिङ्गमित्युक्तम् । तेनात्ममनःसंयोगोऽनुक्तोऽप्यनुमेयः कथं पुनर्ज्ञानमात्मलिङ्गं तद्गुणत्वात् । गुणभावासिद्धिरिति चेत् । अथ मन्यसे गुणभाव एव ज्ञानस्यासिद्धः कुत आत्मगुणत्वं वेत्स्यतीति न आत्मसमवायात् सुखादिवदिति । नहि द्रव्यं कर्म वात्मनि समवैति तस्मान्न द्रव्यं न कर्म आत्मनि तु समवायो ज्ञानस्य सुखादिवत् तस्मादात्मगुणो न पृथिव्यादिगुणः स्वसंवेद्यार्थत्वात् । यत्प्रत्यक्षं स्वसंवेद्यं न तत् पृथिव्यादिगुणः यथा सुखादि यच्च प्रत्यक्षं स्वपरसंवेद्यं तत् पृथिव्यादिगुणः यथा रूपादि न चैवं ज्ञानं तस्मादात्मगुण इति । उक्तं चात्र किमुक्तं

न यावत् प्रत्यक्षस्य कारणं सर्वं तद्वक्तव्यमिति। अथेन्द्रियमनः-सन्निकर्षः[१] कस्मान्नाभिधीयते ॥

तद्योगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥

तद्योगपद्यलिङ्गत्वाच्च न मनसः। युगपज्ज्ञानानुत्पत्तिः[२]र्मनसो लिङ्गमित्युक्तम्। तेन मनसोऽप्यवरोध इति न युगपदुत्पत्तिसूत्रस्यान्यार्थत्वात् यदिदमुच्यते युगपज्ज्ञानानुपपत्तिर्मनसो लिङ्गमित्यनेन ज्ञानकारणं मन इति तदयुक्तम् अन्यार्थत्वात्। अन्यार्थं सूत्रं न पुनस्तेन ज्ञानकारणत्वं मनसोऽभिधीयते गम्यते। नहि ज्ञानं स्वतन्त्रम् अन्यार्थस्यापि तदर्थप्रकाशकत्वमुपपत्तिसामर्थ्यात् यद्यपि तस्मिन् सूत्रे मनसो ज्ञानकारणत्वं न साक्षादुक्तम्। तथाप्युपपत्तिसामर्थ्यात् ज्ञानकारणं मन इति गम्यते। नहि ज्ञानं स्वतन्त्रम् न चक्षुरादि स्वतन्त्रमिति। अथ कस्मादिन्द्रियार्थसन्निकर्षोऽभिधीयते कथं च नात्ममनःसन्निकर्षोऽभिधीयते इन्द्रियमनःसन्निकर्षो वेति ॥

प्रत्यक्षनिमित्तत्वाच्च इन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम्। इन्द्रियार्थसन्निकर्षः प्रत्यक्षस्यैव निमित्तमात्ममनःसन्निकर्षः[३] प्रत्यक्षस्य चान्यस्य चेति इन्द्रियार्थसन्निकर्षेण समानत्वादिन्द्रियमनः-संयोगो वक्तव्यः यदि साधारणत्वादात्ममनःसन्निकर्षो[४] नाभिधीयते। इन्द्रियमनःसंयोगोऽसाधारणत्वादिन्द्रियार्थसन्निकर्षवदुक्तव्य इति। नेदं कारणावधारणार्थमित्युक्तम्। न यावदसाधारणं सर्वं तद्वक्तव्यमपि तु न साधारणं वक्तव्यमित्ययं सूत्रार्थः ॥

---

(१) मनःसंयोगः—पा० ६ पु०। (२) भानानुत्पत्तिः—पा० ६ पु०।
(३) संयोगः—पा० ६ पु०। (४) संयोगो—पा० ६ पु०।

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्। इन्द्रियार्थसन्निकर्षस्य प्राधान्यपरमिदं सूत्रम्(१)। शेषं भाष्ये॥

तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २५ ॥

प्राधान्ये च हेत्वन्तरम्। तैश्चापदेशो ज्ञानविशेषाणाम्। यस्मादिदं प्रत्यक्षज्ञानमुत्पद्यमानं विषयेण कारणेन वा व्यपदिश्यते यच्चासाधारणं तेन व्यपदेशो दृष्टः यथा शाल्यङ्कुर इति ॥

व्याहतत्वादहेतुः ॥ २६ ॥

व्याहतत्वादहेतुः। व्याहतत्वादित्यनेन त्रिसूत्रीं प्रत्याचष्टे प्रत्यक्षनिमित्तत्वादिन्द्रियार्थयोः सन्निकर्षस्य, सुप्तव्यासक्तमनसां च इन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्, तैश्चापदेशो ज्ञानविशेषाणामिति इयं किल त्रिसूत्री आत्ममनःसन्निकर्षस्य ज्ञानकारणत्वं प्रतिषेधतीति व्याहतमिदं भवति। ज्ञानलिङ्गत्वादात्मनो नानवबोधः(२) तदयौगपद्यलिङ्गत्वाच्च न मनस इति। मनःसंयोगानपेक्षायां युगपज्ज्ञानोत्पत्तिप्रसङ्ग इति दृष्टव्याघातः। अथ माभूद्व्याघात इति ज्ञानमात्ममनःसन्निकर्षादुत्पद्यते। देश्यावस्थमेवैतत्· कस्मादात्ममनःसंयोगो नाभिधीयते अत्रोक्तं किमुक्तम् नेदं कारणावधारणार्थं सूत्रम् अपि तु विशिष्टकारणवचनमिति। यापीयं त्रिसूत्री प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्येत्येवमादि इयमपि ॥

---

(१) वार्त्तिककारेण प्रत्यक्षनिमित्तत्वादित्यादिसूत्रं सुप्तव्यासक्तमनसामित्यादिसूत्रं चावधृतम्। वाचस्पतिमिश्रेणापि न्यायसूचीनिबन्धे सूत्रत्वेनैवावधारितम्। किं तु मुद्रितभाष्यपुस्तके तथाऽनुपलम्भान्न तयोः पृथगुपन्यासः ॥

(२) नानवरोधः—इति साधुः।

नार्थविशेषप्राबल्यात् ॥ २७ ॥

नार्थविशेषप्राबल्यात् । नानया चिन्त्या आत्ममनःसन्निकर्षस्य(१) कारणभावः प्रतिषिध्यते अपि तु प्राधान्य(२)मिन्द्रियार्थसन्निकर्षस्योपपाद्यते । प्राधान्यं चोपपाद्यत्यानात्ममनःसंयोगः प्रतिषिद्धो भवति मनसि क्रियाकारणाभिधानम् सुप्तव्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षनिमित्तत्वाद्यभिधानेन मनःसंयोगोऽपि कारणमित्युक्तम् । तत्र मनसि क्रियाकारणं वाच्यमिति । अथ(३) सुखदुःखोपभोगस्यादृष्टनिमित्तत्वाददृष्टं कारणम् यथैवात्मनि गुणान्तरमिच्छाजनितं प्रयत्नलक्षणं क्रियाहेतुस्तथात्मनि संस्कारो धर्माधर्मसमाख्यातो वर्तते तेन प्रेरितं मनः संयुज्यते विभज्यते वा तेन ह्यप्रेर्यमाणे मनसि ततोऽन्यस्य क्रियाहेतोरभावात् सर्वार्थता तस्य निवर्तते । नहि धर्माधर्मावन्तरेण मनसि च कश्चिदन्यः क्रियाहेतुरादौ सम्भवतीत्यतोऽदृष्टं कारणमिति ॥

एवं तावत्प्रत्यक्षलक्षणं समाहितम्(४) अतः परमिदानीं प्रत्यक्षानुमाने ऽन्तर्भावं कुर्वाण इदमाह ॥

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ २८ ॥

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः । यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानम् अयं वृक्ष इति एतत् किल प्रत्यक्षम् तदनुमानमेव कस्मादेकदेशग्रहणाद्वृक्षोपलब्धेः एकदेशमयं गृहीत्वा वृक्ष-

---

(१) संयोगस्य—पा० ६ पु० । (२) प्राबल्य—पा० ६ पु० ।
(३) अथेति नास्ति—पा० ६ पु० । (४) समधिगतम्—पा० ६ पु० ।

मुपलभते न चैकदेशो वृक्षः तत्र यथान्यस्य दर्शनादन्यप्रतिपत्तिरनुमानम् एवमेकदेशग्रहणाद्वृक्षप्रतिपत्तिरनुमानमिति । यथा धूमं गृहीत्वाग्निप्रतिपत्तिरेवमेकदेशं गृहीत्वा वृक्षप्रतिपत्तिरिति न विकल्पानुपपत्तेः । एकदेशग्रहणादर्थान्तरं प्रतिपद्यत इति । किं तदर्थान्तरं यदेकदेशग्रहणात् प्रतिपद्यत इति । अवयवसमूहपक्षे तावदवयवान्तराणि द्रव्यान्तरोत्पत्तिपक्षे तानि चावयवीति चेन्न यदि तावदवयवसमूहमात्रं वृक्षमधिकृत्योच्यते एतस्मिन् पक्षे गृह्यमाणावयवव्यतिरेकेण यान्यगृह्यमाणान्यवयवान्तराणि न वृक्षः । अथ द्रव्यान्तरोत्पत्तिपक्ष आश्रीयते तथाप्यर्वाग्भागव्यवहितानि अवयवान्तराणि अर्थान्तरं च न वृक्ष इति । किं पुनरत्रैकदेशग्रहणादयं प्रतिपद्यते किमवयवान्तराणि उत द्रव्यान्तरमिति । अवयवसमूहपक्षे तावद्वृक्षबुद्धेरभावः परभागस्यावृक्षत्वात् अर्वाग्भागवत् । यथैवायमर्वाग्भागो न वृक्षः एवं मध्यपरभागावपि न वृक्षः सेयमवयवसमूहपक्षे ऽवृक्षे वृक्षबुद्धिरुत्पद्यमाना निर्विषया अर्वाग्भागः परभागो मध्यभाग इत्येतच्च नास्ति । कथं भाग इत्येतदवयवस्यैतन्नाम यः पुनरर्थान्तरमवयविनं न प्रतिपद्यते तस्यावयव इति निरभिधेयं वाक्यम् अवयवश्च परभागोऽर्वाग्भागः स चावयविप्रत्याख्याने न युक्त इति । अथैकदेशो भाग इत्युच्यते कोऽयमेकदेशः एकदेशो ह्यवयविन आधारः अवयविनं च प्रत्याचक्षाणेन एकदेशोऽपि प्रत्याख्यातः । अथाकार्यकारणव्यावृत्तानां परस्परप्रत्यासत्त्युपग्रहेणैकदेशावस्थानमवयवार्थः । अहो शब्दार्थकौशलम् अकार्यकारणभूतास्च परस्परप्रत्यासत्त्युपग्रहेण वर्तन्त इति । न च परस्परोपकारं कुर्वन्त्य-

वयवाश्चाभिधीयन्त[१] इति चित्रम्। अपरे त्ववार्ग्भागदर्शनेन पर-भागानुमानं कृत्वा प्रतिसन्धानप्रत्ययजामवृत्ते वृत्तबुद्धिमध्यवस्यन्ति। एतस्मिन् पक्षे वृत्तबुद्धेरभाव एव कथम् अर्वाग्भागस्य परभागस्य चावृत्तत्वात्। न चावृत्तप्रतिसन्धानजा वृत्तबुद्धिरुत्पत्तुमर्हति। न चैतस्मिन् पक्षेऽनुमानम् भवति अर्वाग्भागमयं गृहीत्वा परभागम-नुमिमीते इति नानुमानस्य विषयो ज्ञातः कथं न ज्ञातः यदि तावदेवमनुमीयते वृत्तोऽयमर्वाग्भागवत्त्वात् कतमोऽसौ वृत्तो यस्यार्वाग्भागवत्त्वं धर्मः अनभ्युपगतार्थान्तरावयविनोऽर्वाग्भागमात्रं प्रत्यक्षम् न च धर्मिण्यनुपलब्धेऽनुमानं प्रवर्तते। न चायं जात्वपि धर्मिण-मुपलभते अविद्यमानत्वेनाभ्युपगमात् न चानुमानम् अनुमाने एवं-विधस्य प्रतिसन्धानस्याभावात् न ह्यनुमाने एवंविधं प्रतिसन्धानमस्ति नायमनुमाता पूर्वमनुपलभ्याग्निं धूमविशेषणं प्रतिपद्य प्रतिसन्धत्ते अयं धूमोऽयं चाग्निरिति न च प्रतिसन्धायानुमीयते अग्निना च भवितव्यमिति। किं कारणं वैयर्थ्यात्। व्यर्थमनुमानमेतस्यामवस्था-यामग्नेर्विशेषणभूतस्य प्रतीतत्वात् तस्मान्नानुमाने प्रतिसन्धानमस्ति प्रतिसन्धायापि च न समुदाये प्रतिसन्धानं न च वृत्ते न ह्ययमेक-देशदर्शनात् समुदायं प्रतिपद्यते न वृत्तं किन्तु शेषं समुदायिनमेव। किं कारणम् समुदायिव्यतिरेकेण समुदायस्यानभ्युपगमात्[२] न हि भवन्तः समुदायिव्यतिरिक्तं समुदायं प्रतिपद्यन्ते इति न चास-त्समुदायोऽनुमातुं शक्यः। किं चार्वाग्भागमयं गृहीत्वा किमन्यद-नुमिमीते अयमर्वाग्भागः परभागवान् न युक्तमनुमातुम् अर्वाग्-

(१) अवयवाश्च विधीयन्ते—पा० १ पु०। (२) समुदायस्यासत्त्वाभ्युपगमात्—पा० ६ पु०।

भागस्य परभागवत्त्वासम्भवात् न ह्यवाग्भागः परभागवान् भागस्य भागवत्त्वासम्भवात् न हि भागस्यापरभागो विद्यत इति। अथ भागं भागवन्तं प्रतिपद्यसे न स भागो भागवान् भाग्येवासौ भागिविषयं चानुमानमित्ययुक्तमुभयस्य प्रत्यक्षत्वात्। उभयं ह्यत्र प्रत्यक्षम् अवाग्भागो भागी च अवावाग्भागवत्त्वेन भागिनः परभागानुमानमभ्युपेत्य युक्तं भवत्पक्षे तु भागमात्रदर्शनान्न युक्तमिति। यच्च तदवाग्भागदर्शनं न तस्य लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहोऽस्ति सम्बद्धयोश्चावाग्भागपरभागयोरदृष्टत्वात् न ह्ययं द्रष्टा अवाग्भागपरभागयोः सम्बन्धं पश्यति। नावाग्भागपरभागौ सम्बद्धौ न चानुभवमन्तरेण स्मृतिः न च स्मृतिमन्तरेण लिङ्गदर्शनं केवलमनुमानम् स कथं पुनरयमवाग्भागपरभागौ सम्बद्धौ न पश्यति। नित्यमवाग्भागेन परभागस्य च व्यवधानात्[१] नित्यमवाग्भागमेव केवलमुपलभते परभागं तु न कथञ्चन अवाग्भागव्यवहितत्वात्। सत्यम्। नोभयोरुपलब्धिरस्ति उभौ च सम्बद्धौ[२] सत्यं सम्बद्धौ अनुमानं त्वग्राह्यम् उभयोरदर्शनात्। अवाग्भागपरभागयोश्च धर्मधर्मिभावानुपपत्तेर्नानुमानम् यत्र खल्वनुमानं भवति तत्र धर्मिणो धर्मप्रसिद्धौ धर्मान्तरविषयमनुमानम् न पुनरवाग्भागस्य परभागो धर्मः परभागस्य नावाग्भागः ततश्च नानुमानम्। यच्चेदमुच्यते प्रतिसन्धानप्रत्ययजा वृत्तबुद्धिरिति तदयुक्तम् वृत्तस्यासिद्धत्वेना[३]भ्युपगमात् न प्रतिसन्धानम् प्रतिसन्धानं हि नाम पूर्वप्रत्ययानुरञ्जितः प्रत्ययः पिण्डान्तरे भवति। यथा रूपं मयोपलब्धं रसश्चेति भवत्पक्षे पुनरवाग्भागं गृहीत्वा पर-

(१) व्यवहितत्वात्— पा० ३ पु०। (२) चासम्बद्धाविति साधुः; (३) वृत्तस्यासत्त्वेन—पा० ३ पु०।

भागमनुमायार्वाग्भागपरभागावित्येतावान् प्रतिसन्धानप्रत्ययो युक्तः वृक्षबुद्धिस्तु कुतः न तावदर्वाग्भागो वृक्षो न परभाग इति। अर्वाग्भाग-परभागयोश्चावृक्षभूतयोर्या वृक्षबुद्धिः सा अतस्मिँस्तदिति प्रत्ययो नानुमानाङ्गवितुमर्हतीति प्रमाणस्य यथाभूतार्थस्य परिच्छेदकत्वात्। यश्चायमतस्मिँस्तदिति प्रत्ययः स प्रधानानुकारेण भवतीति वृक्षबुद्धिः प्रधानं वक्तव्यम् न ह्यगृहीतसामान्यस्यानध्यारोपित[१]तद्विपरीत-धर्मस्य वा अतस्मिँस्तदिति प्रत्ययो भवति प्रधानं च नास्ति वृक्ष-स्यानभ्युपगमात्। तस्मान्नानुमानप्रतिसन्धानाद् वृक्षबुद्धिः। एतेना-र्वाग्भागपरभागप्रत्यया अपि प्रत्युक्ताः। अनभ्युपगतावन्त्यावयविन[२]-श्चार्वाग्भागः परभाग इत्येतदपि नास्ति कस्मात् महतो द्रव्यस्योपलब्धि-लक्षणप्राप्तस्य परभागव्यवधायकस्यैतन्नाम अर्वाग्भाग इति तथाभू-तस्य च व्यवहितस्य परभाग इति। न च भवता किञ्चिद्द्रव्यमवयवि-भूतं प्रतिपद्यते यदर्वाग्भागपरभागशब्दवाच्यं स्यादिति। परमाणुषु तथासन्निविष्टेष्वर्वाग्भागपरभागवृक्षादिप्रत्यया इति चेत् अथ मन्यसे नास्माभिरवयविद्रव्याणि कानिचित्प्रतिपद्यन्ते किन्तु तेष्वेव पर-माणुषु परस्परप्रत्यासत्त्युपसंग्रहेण संस्थानविशेषावस्थितेषु ते शब्दाः प्रवर्तन्ते अर्वाग्भागः परभाग इति वृक्ष इति च न तथाशब्दस्यार्थान्त-रानभिधानात् तथासन्निविष्टेषु[३] तथाभिधानं प्रवर्तते पूर्वप्रसिद्धौ सत्यां न च परमाणुषु पूर्वापरादिशब्दप्रवृत्तेर्बीजमस्ति यथा प्रसिद्धे गवि गवयस्तथारूप इति। एवं तावदवयवसमूहपक्षे वृक्षबुद्धेरभाव इत्युक्तम् द्रव्यान्तरोत्पत्तिपक्षे तु नावयव्यनुमेयः प्रत्यक्षत्वादर्वाग्भा-

(१) आरोपितात्—पा० १ पु०। (२) अनभ्युपगतार्थान्तरावयविन—पा० ६ पु०।
(३) इतीति पूरणीयम्।

गवदिति यथैवायमवांग्भागमिन्द्रियसम्बद्धं प्रत्यक्षत उपलभते तथा वृक्षमपीति नानुमेयो वृक्षः । अथेन्द्रियसम्बद्धमपि वृक्षमनुमेयमेव प्रतिपद्यते वृक्षवदवांग्भागोऽप्यनुमेयः स्यात् तथा च व्याहतं भवति अवांग्भागमयं गृहीत्वा वृक्षं प्रतिपद्यत इति सर्वमेवानुमानमित्येतस्मिन् पक्षे ऽनुमानाभावः प्रत्यक्षतो नाधिगतत्वाद्धर्मिणः न धर्मिणि प्रत्यक्षतोऽनधिगते ऽनुमानं प्रवर्तते । यदप्यतीन्द्रियेष्वर्थेष्वनुमानमुक्तम् तन्नास्ति न ह्यतीन्द्रियार्थोऽनुमातुं शक्यः कथमिति धर्मिणोऽनधिगतत्वादित्युक्तम् । कः पुनः सामान्यतो दृष्टस्य प्रत्यक्षपूर्वकानुमानाद्विशेषः यदि सर्वं प्रत्यक्षपूर्वकमेवानुमानमिति अयं विशेषः प्रत्यक्षपूर्वकं त्रिकप्रसिद्धौ प्रवर्तते साध्यसाधनधर्म्युपलब्धौ यत्रायं साध्यं साधनं च धर्मिणं च पूर्वं गृहीत्वा पुनर्धर्मधर्मिदर्शनेन धर्मान्तरमनुमिमीते तत् प्रत्यक्षपूर्वकम् यत् पुनः साधनधर्मं धर्मिणं चोपलभ्यात्यन्तपरोक्षं धर्मान्तरमनुमिमीते तत् सामान्यतो दृष्टमिति । भवत्पक्षे तु न सामान्यतो दृष्टादनुमानादृक्षबुद्धिर्न प्रत्यक्षपूर्वकाद्धर्मिणोऽनभ्युपगमात् प्रत्यक्षप्रतिषेधाच्चेति । विरुद्धश्चायं हेतुरेकदेशग्रहणाद् वृक्षोपलब्धेरिति । कथमिति ॥

न प्रत्यक्षेण यावत् तावदप्युपलम्भात् ॥ २९ ॥

न प्रत्यक्षेण यावत् तावदप्युपलम्भात् । प्रत्यक्षमनुमानमित्येवं ब्रुवता प्रत्यक्षमपह्नूयते प्रत्यक्षापह्नवाच्च यदेकदेशग्रहणं प्रत्यक्षं तद्व्याहतं भवति । कथमिति । यत्तदेकदेशग्रहणं भवता आश्रीयते प्रत्यक्षं तत् तावतापि च प्रत्यक्षस्य लक्षणं सिध्यति । न चैवं प्रतिज्ञायते सर्वं प्रत्यक्षस्य विषयः किन्तु यावदिन्द्रियार्थसन्निकर्षादुप-

लभ्यते[१] तावत्प्रत्यक्षस्य विषय इति अन्यथापि न प्रत्यक्षमनुमानम-प्रकारवत्त्वात् प्रकारवदनुमानम् अप्रकारवत् प्रत्यक्षम् उक्तमनुमान-सूत्रं वर्णयद्भिरिति । त्रिकालविषयत्वाच्चानुमानं न प्रत्यक्षम् त्रिकाल-विषयमनुमानम् न त्वेवं प्रत्यक्षमिति लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहा-पेक्षत्वाच्च नानुमानम् प्रत्यक्षम् लिङ्गपरामर्शज्ञानस्य लिङ्गलिङ्गिसम्बन्ध-स्मृत्यनुग्रहोऽस्ति न चैवं प्रत्यक्षस्य तस्मान्न प्रत्यक्षमनुमानम् । इतश्च प्रत्यक्षस्य नानुमानत्वप्रसङ्गः तत्पूर्वकत्वात् प्रत्यक्षपूर्वकमनुमानम् न तु प्रत्यक्षम् अयं चानयोर्विशेष इति इन्द्रियसम्बन्धाच्च । नेन्द्रिय-स्यानुमेयेनार्थेन सम्बन्धादुत्पद्यते ज्ञानम् यत्तदनुमानमित्युच्यते । सोऽयं प्रमाणदृष्टः प्रत्यक्षानुमानयोरेकत्वमासज्जयता भेदः प्रत्या-ख्यायत इति ॥

न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३० ॥

न चैकदेशोपलब्धिरवयविसद्भावात्[२] । यदिदं भवताभिधीयते एकदेशग्रहणादयं वृक्षः प्रतिपद्यत इति तदनुपपन्नम् यस्मादेकदे-शोपलब्धिश्च तत्सहचरितावयव्युपलब्धिश्च न हीन्द्रियेण सन्निकृष्यमाण एकदेशे तत्सहचरितोऽवयवी न सन्निकृष्टस्तेन यथैकदेशः सन्निकर्षा-दुपलभ्यते एवमवयव्यपि सन्निकर्षादुपलभ्यत इति । कस्मादवयवि-सद्भावात् अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी तस्यावयवस्थानस्यो-पलब्धिलक्षणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्ना किं कारणम् महदनेकद्रव्यरूपाद्युपलब्धि[३]कारणानि तान्येकदेशवदेकदेशिन्यपि

(१) उत्पद्यते—पा० ६ पु० । (२) अवयविसम्भवात्—इति पाठः क्वचित् ।
(३) रूपाण्युपलब्धि—पा० ६ पु० ।

विद्यन्ते तस्मादेकदेश उपलभ्यते नैकदेशीत्ययुक्तम् । नावयविन उपलब्धिर्युक्ता कस्माद्विकल्पानुपपत्तेः अयं खल्ववयवेषु वर्तमान एकस्मिन् कात्स्न्र्येन वा वर्तते एकदेशेन वा । यद्येकस्मिन् कात्स्न्र्येन वर्तते शेषावयववैयर्थ्यम् नहि शेषैरवयवैः किञ्चनावयविनः क्रियन्ते एकद्रव्यत्वाभावावयवी तावन्नोपलभ्यते किं कारणम् महदनेकद्रव्यवत्त्वस्योपलब्धिकारणत्वात् न चास्य विनाशः[१] प्राप्नोति कारणद्रव्यविभागासम्भवात् न ह्येकस्य विभागः सम्भवति । न चैकेनारभ्यमाणस्य महत्त्वं युक्तम् कारणबहुत्वमहत्त्वप्रचयासम्भवात् । तस्मान्नैकस्मिन् कात्स्न्र्येन वर्तत इति । नाप्येकदेशेन न ह्यस्य कारणव्यतिरेकेण अन्ये एकदेशाः सम्भवन्ति सोऽयमेकदेशोपलब्धावावयव्युपलभ्यमानो न कृत्स्न उपलभ्यते सेयमेकदेशोपलब्धिरनिवृत्तेवेति । अथोपलभ्यमानोऽवयवी कथमुपलभ्येत यदि गृह्यमाणेष्ववयवेषु कृत्स्नः परिसमाप्तः स्यात् न चायं गृह्यमाणेषु परिसमाप्तः शेषावयववैयर्थ्यप्रसङ्गादित्युक्तम् । अशेषावयवोपलब्धिरपि नास्ति मध्यभागपरभागयोरर्वाग्भागेन व्यवधानात् तेनावयविनो न ग्रहणविकल्पः सम्भवति नापि वृत्तिविकल्पः एकस्मिन् कृत्स्नैकदेशशब्दासम्भवाद्[२] प्रश्नः किमवयव्येकदेशेन वर्तते अथ कृत्स्नेनैव वर्तत इति न युक्तः प्रश्नः नावयवी कृत्स्नो नैकदेशः । कृत्स्नमिति खल्वनेकस्याशेषस्याभिधानम् । एकदेश इति चानेकत्वे सति कस्यचिदभिधानम् । ताविमौ कृत्स्नैकदेशशब्दावेकस्मिन्ननुपपन्नौ कथं तर्ह्यवयवेष्ववयवी वर्तत इति । आश्रयाश्रयिभावेन आश्रितोऽवयवी आश्रया अवयवा

(१) किं चास्याविनाशः— पा० १ पु० । (२) विकल्पासम्भवात्—पा० ६ पु० ।

इति । का पुनरियं वाचो युक्तिः नैकदेशेन वर्तते इति च न कृत्स्नो वर्तते अथ च वर्तत इति । यद्यथाभूतं तत्तथाभूतं निर्दिश्यते इत्येषैव वाचो युक्तिः । कृत्स्नैकदेशशब्दौ नावयविनि स्तः कृत्स्नस्यैकत्वादित्युक्तम्(१) । तस्मादाश्रयाश्रितधर्मिनिर्देशमात्रमवयव्यवयवेषु वर्तत इति । का पुनरियं वृत्तिः एकस्यानेकत्राश्रयाश्रितभावलक्षणा प्राप्तिः अपि चैकोऽनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः कस्मादुभयेन व्याघातात् । एकमनेकत्र वर्तत इति ब्रुवाणः किमेकदेशेन वर्तते उत सर्वात्मना इति नानुयोक्तव्यः कस्मादुभयेन व्याघातात् । यद्येकमनेकत्र वर्तमानं प्रत्यवयवं सर्वात्मना वर्तते नैकमनेकत्र वर्तते अनेकमनेकत्र वर्तत इत्यापन्नम् एवं चानुयोगेऽधिकरणव्याघातः । अथैकमनेकत्र वर्तमानं प्रत्यवयवमेकदेशेन वर्तते तथापि नैकमनेकत्र वर्तत इति प्राप्तम् अनेकमनेकत्र वर्तत इत्यापन्नम् ये च तत्र एकदेशाः प्रत्येकमवयवेषु वर्तन्ते तेऽवयविन इति प्राप्तम् । एकस्मिन्(२) पक्षे नैकमनेकत्र वर्तते किं तर्ह्यनेकमनेकत्रेति । अथ प्रत्येकं परिसमाप्त्या वर्तत इति अयमर्थो नैकत्र वर्तत इति तथाप्यनुयोगाधिकरणं निवर्तत इति । यथा खल्वयमर्थोऽनेकमनेकत्र वर्तत इति स एवार्थः प्रत्येकं परिसमाप्त्या वर्तत इति सर्वथानुयोगाधिकरणं निवर्तत इति । अनुयोगस्याधिकरणबाधकत्वादयं खलु अनुयोगः क्रियमाणोऽधिकरणं बाधते । अतो धर्मविकल्पभावेन न वर्तते । नायं विकल्पः क्वचिदाश्रयवान् इत्यतो नानुयोक्तव्य इति ।

---

(१) तस्यैकत्वादिति—पा० ६ पु० । (२) एतस्मिन्—पा० १ पु० ।

एवं सर्वेष्वनेकद्रव्यवृत्तिषु[१] संख्यापृथक्त्वसंयोगविभागसामान्यादिष्व-नुयोगाधिकरणव्यावृत्तिदोषो वक्तव्यः। ग्रहणाग्रहणभेदाद्भेदोऽवयव-वदिति चेत् यथा गृह्यमाणानामगृह्यमाणानां चावयवानां भेदः तथावयविनोऽपि गृह्यमाणागृह्यमाणावयवाश्रितस्य भेदः प्राप्तः ततश्च नैकोऽवयवी, न भेद एकस्मिन्नपि दर्शनात् एकस्मिन्नपि गृह्यमाणे ग्रहणमग्रहणं च दृष्टम् देवदत्तादिवदिति। यथा देवदत्तादिः केनचित्सह गृह्यते केनचिच्च सह न गृह्यते न तावता तस्य भेदः। तथावयविनोऽपीत्यदोषः गृहीतत्वाच्च यदिदं भवताभिधीयते एक-देशग्रहणादेतस्य ग्रहणमेकदेशाग्रहणाच्चाग्रहणमित्ययमनास्पदो वि-कल्पः अवयविनो गृहीतत्वात्। एकदेशमहचरितोऽवयवी गृहीतः किमस्यागृहीतं येनास्य ग्रहणाग्रहणविकल्प आस्पदवान् भवेत्। मध्यभागपरभागौ न गृहीताविति चेत् न तयोरवयविनोऽन्यत्वात् अन्योऽवयवी अन्यौ मध्यभागपरभागाविति। अवयविनोऽन्यत्वादव-यविनो मध्यभागपरभागौ न गृह्येते इति। किं कारणम्। ग्रहण-हेत्वभावात्। यथार्वाग्भागेन सहावयविन इन्द्रियप्राप्तिरुपलब्धि-निमित्तमस्ति[२] नैवं मध्यभागपरभागाभ्यां सह तस्मादर्वाग्भागेन सहोपलभ्यते न मध्यभागपरभागाभ्यामिति अवयवसमूहपक्षे तु सर्वथा वृक्षबुद्धेरभावः[३] कथं मूलस्कन्धशाखापलाशानां समूहो वा वृक्षः स्यात् प्राप्तिर्वा समुदायिनाम् उभयथा च वृक्षबुद्धेरभावः। अवयवैरवयवान्तरव्यवधानादशेषग्रहणं नास्ति। प्राप्तिग्रहणं चायुक्तम्।

---

(१) अनेकवृत्तिषु—पा० ६ पु०। (२) हेतुरस्ति—पा० ६ पु०।
(३) सर्ववृक्षबुद्धेरभावः—पा० ६ पु०।

प्राप्तिमतामग्रहणात् । न हि प्राप्तिमत्यगृह्यमाणे प्राप्तिग्रहणमस्ति भवति ह्योदमनेन संयुक्तमिति । सेयमेकदेशग्रहणसहचरिता वृद्धबुद्धिर्द्रव्यान्तरोत्पत्तिपक्षे कल्पते न समुदायमात्रे इति ॥

साध्यत्वाद्वयविनि सन्देहः ॥ ३१ ॥

साध्यत्वाद्वयविनि सन्देहः । कारणेभ्यो द्रव्यान्तरमुत्पद्यत इति साध्यमेतत् । किं पुनरत्र साध्यम् । किमव्यतिरेकोऽथावयवीति । यद्यवयवी न लिङ्गमस्ति धर्मिणि विप्रतिपत्तेः । नहि धर्मिणि विप्रतिपद्यमानः कुतश्चिदभ्यनुज्ञां लब्धुमर्हति । न च धर्मिणि विप्रतिपत्तेर्बीजमस्ति सादृश्याभावात् । नहि सादृश्यमन्तरेण विप्रतिपत्तेर्बीजमस्ति । किं कारणम् । विप्रतिपत्तिर्नाम विपरीता प्रतिपत्तिः तस्याश्च कारणं समानधर्मोपलब्धावनवगतविशेषस्य[१] तद्विपरीतधर्माध्यारोपो न चानभ्युपगतावयविनोऽवयविनि सादृश्यं क्वचिदस्ति नापि तद्विपरीतधर्माध्यारोपः तस्मान्न विप्रतिपत्तिः । अथाव्यतिरेकः साध्यः तत्राव्यतिरेकप्रतिपादकं प्रमाणं वक्तव्यम् । न ह्यप्रामाणिकी काचित् प्रतिपत्तिरस्ति इदं प्रमाणम् अर्थान्तरानवयवत्वम् अर्थान्तरमर्थान्तरस्यावयवो न भवति यथा न गौरश्वस्यावयवः अवयवाश्च तन्तवोऽवयवी च पटः तस्मान्नासौ तेभ्योऽर्थान्तरमिति । इदं तावद्यथाश्रुति वाक्यम् हेतुहीनम् न ह्यत्र हेतुरस्तीति । ननु चोपनयेन व्यज्यमानो हेतुरवयवत्वमस्ति नार्थान्तरं पटात्तन्तवः तदवयवत्वादिति न व्याघातात् । अर्थान्तरभावे नावयवत्वं[२] सिद्ध्यति तन्तूनामिति ।

---

(१) अनधिगतविशेषस्य—पा० ६ पु० । (२) अनर्थान्तरभावेनावयवत्वं—पा० ६ पु० ।

किं कारणम्। अवयव्यपेक्षत्वात्। अवयव्यपेक्षोऽवयवः न चावयवि-प्रत्याख्यानेऽवयवत्वे किञ्चिद्बीजमस्ति अर्थान्तरे च दर्शनात् विरुद्धः स्यात् दृष्टोऽवयवोऽर्थान्तरभावे नानर्थान्तरभाव इति। यथा तन्तवो घटादर्थान्तरमिति। षष्ठीविशेषणाद्प्रसङ्ग इति चेत् पटस्यावयवा इत्युक्ते घटादिषु कः प्रसङ्गः। नन्वत्रोक्तं किं व्याघातादिति। न ह्यनर्थान्तरभावे अवयवोऽस्ति न च षष्ठी न च तन्तुस्तन्तोरवयवः। नापि षष्ठ्यर्थः तन्तोस्तन्तुरवयव इति उत्पत्त्यावयवत्वं तन्तूनां तस्य नान्वयो न व्यतिरेक इति असाधारणत्वाद्हेतुः अनर्थान्तरं[1] पटात् तन्तव इति च तन्तून् पञ्चीकृत्य तद्वयवत्वादिति ब्रुवाणस्तन्तूनां तन्त्ववयवत्वं ब्रवीति। एतच्च विरुद्धम् न तन्तवस्तन्तूनामवयवा इति। अथ पटः पञ्चीक्रियते तथापि व्यधिकरणो हेतुः अवयवत्वस्य तन्तुधर्मत्वात् तन्तुधर्मोऽवयवत्वम् न पटधर्म इति। अवयवशब्दस्य च कारणविशेषवाचकत्वात्। असत्यवयविनि व्याघातः। यद्यवयविनमर्थान्तरं न प्रतिपद्यसे कस्य तन्तवः कारणम् नहि कारण-मात्मानं निर्वर्तयतीति नहि नः किञ्चिन्निर्वर्त्यमस्ति त एव तन्तवः संस्थानविशेषावस्थिताः पटाख्यां लभन्त इति। अपटाख्यास्तन्तवः पटशब्देनाभिधीयन्त इत्युक्तं भवति। एतच्च विरुद्धम् मुख्यासम्भ-वात् नहि तन्तूनामपटानां पटेन किञ्चित्सामान्यमस्ति। न चासति सामान्ये मिथ्याप्रत्ययस्य बीजमस्तीत्युक्तम्। यच्चेदमुच्यते संस्थानवि-शेषावस्थानमिति किं तदर्थान्तरमाहो नेति। यद्यर्थान्तरभूतं किं तदिति वक्तव्यम् अथ नोच्यते शून्यं तर्हि इदं वाक्यम् संस्थानवि-

(१) नार्थान्तरं—पा० ६ पु०।

शेषावस्थानमिति । अस्माकं तु संस्थानविशेषः संयोगः स चार्थान्तरम् नानभ्युपगमात् न मयार्थान्तरं संयोगः प्रतिपाद्यते अन्यासंयोगादिति। अन्यदन्यस्य संयोगो न भवति । यथा गौरश्वस्य न संयोगः । अङ्गुल्योऽस्तु संयोगस्तस्मान्नार्थान्तरमिति नोक्तोत्तरत्वात् उक्तोत्तरमेतत् किमिति अर्थान्तरानर्थान्तरयोर्व्यावृत्तेः संयोगोऽसाधारणः प्रतिज्ञैकदेशश्च नार्थान्तरं संयोगः संयोगत्वादिति। विशेषणभावाच्चार्थान्तरं संयोगः संयुक्ते द्रव्ये आहरेत्युक्ते ययोर्द्रव्ययोः संयोगं पश्यति ते इतरेभ्यो विशिष्य संयुक्ते आहरति न विशेषणस्यान्यथासिद्धत्वात् । यदिदं भवताभिधीयते संयुक्ते द्रव्ये आहरेति विशेषणभावादर्थान्तरं संयोग इति तदन्यथा सम्भवति कथम् प्रत्यासत्तौ प्रतीघातावसानायां संयोगव्यवहारः तावद्द्रव्याणि प्रत्यासीदन्ति यावत् प्रतिहतानि भवन्ति तस्मिन् प्रतिघाते संयोगव्यवहारो नार्थान्तर इति अनभ्युपगतार्थान्तरसंयोगेन प्रत्यासत्तिप्रतीघातौ वक्तव्यौ तच्च संयुक्तसंयोगाल्पीयस्त्वं प्रत्यासत्तिर्मूर्तस्पर्शवद्द्रव्यसंयोगः प्रतीघातः यः पुनः संयोगं न प्रतिपद्यते तेन प्रत्यासत्तेः प्रतिघातस्य चार्थो वक्तव्य इति। यदि चार्थान्तरं संयोगो न स्यात् चेत्तोदकबीजाग्नीन्धनादीनि सर्वत्रावस्थितानि सर्वत्राङ्कुरपाकादिकार्यं कुर्युः तान्येव तानीति । तस्माद्यस्तैरपेक्ष्यते सोऽर्थोऽन्यस्तस्मिन् संयोग इति संज्ञेति । चेत्तोदकबीजाग्नीन्धनानि अङ्कुरपाकादिकार्योत्पत्तौ सापेक्षाणि सर्वदा तत्कार्यानारम्भाद्दण्डादिवत् यथा दण्डाद्यनेकं कारणं संयोगादिनिमित्तान्तरापेक्षं सर्वदा न घटपटादिकार्यं करोति तथा बीजाद्यपि तस्मात् तदपि सापेक्षमिति । यत्तत्र परेणोच्यते कार्योत्पत्तिर्विना

तेन शब्दायस्कान्तकर्मवदिति। अस्यार्थः यथा किल शब्दः शब्दान्तरमारभमाणो विना संयोगमारभते यथाऽयस्कान्तोऽयः समाकर्षति विना संयोगेन यथा कर्म संयोगविभागौ करोति विना संयोगेन तथान्यापि कार्योत्पत्तिर्विना संयोगेन भविष्यतीति। न हेत्वर्थापरिज्ञानात् न ब्रूमोऽस्ति संयोगः कार्योत्पत्तेः अपि तु चेत्रोदकबीजाग्नीन्धनानि सापेचाणीति। यदि च निरपेचं किञ्चित्कारणं सर्वदारम्भकं स्यात् भवेदनैकान्तिको हेतुः(१) तत्तु न केनचिच्छक्यं प्रतिपादयितुम्, शब्दः शब्दान्तरमारभमाणः स्वकारणपरिच्छिन्नाकाशदेशप्रत्यासत्त्यपेच आरभते शब्दस्याव्यापकत्वात्। अयस्कान्तोऽप्ययः समाकर्षति स्वाश्रयप्रत्यासत्त्यपेच एव यदि च निरपेच आकर्षेत न क्वचिदयांस्यवतिष्ठेरन् तस्मान्न निरपेच इति। कर्मापि स्वाश्रयप्रत्यासत्त्याभिमुख्यापेचं संयोगं करोति न निरपेचं कर्म न प्रतिलोममिति। यद्यनपेचं संयोगं कुर्यात् पाण्डुमथुरासम्बन्धिनि देवदत्ते उत्पन्नं कर्म तच्चैत्रागारसम्बन्धिनि यज्ञदत्ते संयोगं कुर्यात् न त्विदमस्ति न चेदं प्रतिज्ञायते सर्वस्य कारणं संयोगः अपि तु सापेचमारभत इति। सूत्रव्याघात इति चेत्। अथ मनुषे यदि सापेचं कर्म संयोगं करोति ननु पारमर्षं सूत्रं व्याहन्येत एकद्रव्यमगुणं संयोगविभागयोरनपेचकारणं कर्मेति(२)। न व्याघातः सूत्रार्थापरिज्ञानात् न भवता सूत्रार्थो व्यज्ञायि नायं सूत्रार्थो निरपेचं कर्म संयोगविभागकारणमित्याश्रयाद्यपि नापेचत इति। अपि तु चरमभाविनिमित्तान्तरं नापेचत इति सूत्रार्थः। यथा द्रव्यमुत्पन्नं

(१) अनैकान्तिकत्वं हेतोः—पा० ६ पु०। (२) काणादसूत्रमिदम् १ अ० १आ० १७ सू०।

चरमभाविनं संयोगमपेक्ष्यमाणं पश्चादारभते यथा वा संयोगो गुणकर्मस्वारब्धेषु पश्चाद्भाविसंस्कारप्रयत्नादृष्टाख्यं[१] निमित्तमपेक्षते यथा वा कारणेषु वर्तमाना रूपादयः कार्यरूपादिष्वारब्धेषु द्रव्योत्पत्तिमपेक्षन्ते उत्पाद्यस्याधारभावाद्यदुत्पाद्यं द्रव्यं तत्तेषामाधार इति। न तु कर्म पश्चाद्भाविनिमित्तमपेक्षत इति अनपेक्षत्वं कर्मणः शास्त्र उक्तम्। न पुनः कर्माश्रयाद्यपि नापेक्षत इति। संयोगे सापेक्षत्वप्रसङ्ग इति चेत् यदि पश्चाद्भाविनिमित्तान्तरानपेक्षत्वं कर्मणो निरपेक्षत्वार्थः अपि तर्हि संयोगे कर्तव्ये कर्म सापेक्षं प्राप्नोति विभागापेक्षित्वात् न हि विभागमन्तरेण कर्म संयोगं करोति तस्माद्विभागापेक्षित्वं कर्मणः प्रसक्तम्। ततश्च तद्वस्थः सूत्रव्याघातदोषः न सन्देहात् किं विभागापेक्षेण कर्मणा संयोगो जन्यते उत प्रतिबन्धकं विभागेन निवर्त्यत इति सन्दिह्यते। वयं तु ब्रूमः विभाग उत्पन्नः पूर्वसंयोगनिवृत्तिं करोति निवृत्ते संयोगे कर्म प्रतिबन्धकापगमात् संयोगं करोति। यथा गुरुत्वं निरपेक्षं कर्मकारणमित्युद्दिष्टं शास्त्रे। अथ च वृन्तफलविभागान्निवृत्ते वृन्तफलसंयोगे गुरुत्वं लब्धवृत्ति तच्च पतनकर्म करोति तथा कर्मापीत्यदोषः। यथा वा संयोगः साधारणकार्यद्रव्यसंयोगविनाशोत्तरकालं द्रव्यान्तरारम्भे निरपेक्षः कारणमिति न विभागापेक्षो द्रव्यमारभते तथा कर्म संयोगमारभमाणं न विभागमपेक्षत इति। अतोऽपि न सूत्रव्याघातः। यदप्युक्तं कर्म विना संयोगेन संयोगं करोति तदपि न व्याघातात्। न संयोगोऽस्ति कर्म च संयोगं करोतीति

(१) पश्चाद्भाविसंस्कारं प्रयत्नमदृष्टं चेति व्याख्येयम्।

व्याहतम्। न ह्यमति संयोगे वाक्यमेतदर्थवत्तायां व्यवतिष्ठत इति। अथवानेन व्याघातः गतिविभागसंयोगाश्च प्रतिषिध्यन्ते। अथ च कर्म संयोगं करोतीति व्याहतम्। अथ मनुषे परमतव्यपेक्षयोक्तम्, संयोगविभागकर्मणां प्रतिषेधो नास्माभिः संयोगविभागकर्माण्यभ्युपगम्यन्ते इति। एवमप्यनिवृत्तो व्याघातः यानि तानि परमताभ्युपगतानि संयोगविभागकर्माणि तानि भवता कथं प्रतिपद्यन्ते। यदि प्रमाणतः कथं पराभ्युपगतानि। अथ प्रमाणमन्तरेण कथं प्रतिपद्यसे न हि प्रमाणमन्तरेण काचित् प्रतिपत्तिर्युक्तेति। अथ नैवं प्रतिपद्यसे व्याहतं तर्ह्येतद्भवति परपक्षप्रसिद्धानि संयोगविभागकर्माणीति। अथ मनुषे यानि भवताभ्युपगम्यन्ते संयोगविभागकर्माणि तानि न सन्ति न पुनः संयोगविभागकर्मणां प्रतिषेधः कथं देशान्तरे विरलद्रव्योत्पादे गतिव्यवहारः। यः सन्तानो विरलो देशान्तरेषूत्पद्यते तत्र गतिव्यवहारः निरन्तरोत्पादे संयोगव्यवहारः ये वस्तुनी निरन्तरमुत्पद्येते तयोर्यो निरन्तरोत्पादः स संयोगः संयोगविपर्ययाद्विभागः। अत्र तावदुक्तम् वृक्षस्थितिं भावयद्भिर्न प्रमाणाभावादिति। न हि क्षणिकत्वे प्रमाणमस्तीति सान्तरनिरन्तरबुद्धीश्च निमित्तं वक्तव्यम्। यदि संयोगं विभागं निमित्तान्तरं न प्रतिपद्यसे सान्तरमितिबुद्धेर्निरन्तरमिति च बुद्धेर्भेदहेतुर्वक्तव्यः। नहि निमित्तभेदमन्तरेण बुद्धीनां भेदो दृष्टो रूपादिवदिति। या चेयमचलति चलतीति बुद्धिर्या असंयुक्ते संयुक्तमिति अविभक्ते विभक्तमिति च सार्वप्रधानमन्तरेण न भवति सर्वा एता मिथ्याबुद्धयः प्रधानानुकारेण भवन्तीति

प्रधानं वक्तव्यम् नहि निष्प्रधानं भाक्तं दृष्टम् स्थाणुपुरुषवदिति। यथा स्थाणौ सति पुरुषे स्थाणुरिति बुद्धिः पुरुषे वा सति स्थाणौ पुरुषबुद्धिरिति। यदि चार्थान्तरं संयोगो न स्यात्। कुण्डलीत्यस्या बुद्धेः किञ्चिन्निमित्तमवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमुपादेयम्। न तावत् कुण्डलनिमित्ता नापि देवदत्तनिमित्ता न भवता निमित्तान्तरं प्रतिपाद्यते निमित्तान्तरं चान्तरेण यथा कथञ्चिद्व्यवस्थिताभ्यां देवदत्तकुण्डलाभ्यां कुण्डलीति बुद्धा भवितव्यम्। तस्मादवश्यं विधीयमानं प्रतिषिध्यमानं निमित्तान्तरमभ्युपगन्तव्यम्। यदि प्रतिषिध्यमानं यदप्यत्र भवति तदन्यत्र प्रतिषिध्यत इति प्रतिषिध्यमानस्य विषयो वक्तव्यः तस्मात्र कथञ्चन संयोगः प्रतिषेद्धुं शक्यते इहबुद्धिनिमित्तत्वाच्च इयमिहबुद्धिः प्रवर्तमाना नर्ते सम्बन्धात् प्रवर्तते यथेह कुण्डे वदराणीति। नेयं वदरमात्रनिमित्ता न कुण्डमात्रनिमित्तेति यदस्या निमित्तं स संयोग इति। इहेति बुद्धिर्यदि संयोगादनियमो न प्राप्नोति यदि संयोगादिहबुद्धिर्भवति असति संयोगे इहबुद्धिर्न स्यात् यथा सन्तीह वने तिलकाः सन्तीह वने किंशुका इति। दूराच्चान्तरमपश्यतां किंकृतेहबुद्धिः नहि तत्रास्ति संयोग इति न इहबुद्धेरुभयनिमित्तत्वात् उभयमिहबुद्धेर्निमित्तं संयोगो विभागादर्शनं च। तत्रैका मुख्या एका भाक्तो या संयोगात् सा तत्त्वबुद्धिरिति या विभागादर्शनात् सा भाक्तीति या चेयं भाक्तो सा प्रधानसामान्यदर्शनादुपजायते न प्रधानं प्रत्याचष्टे नहि प्रधानप्रत्याख्यानेन भाक्तो बुद्धिर्भवितुमर्हतीति। भाक्त्य एव सर्वा भविष्यन्तीति न युक्तम् प्रधानापेक्षित्वादित्युक्तम्। यदपीदमु-

च्यते विना संयोगेनेहबुद्धिर्दृष्टा यथा सन्तीह वने तिलकाः सन्तीह वने किंशुका इति। तत्र सम्प्रधार्यं किं सम्बन्धो नास्ति उत संयोगो नास्ति। वयं तु ब्रूमः संयोगो नास्ति न तु सम्बन्धः। सम्बन्धत्वं[१] हि वनं तिलकादिभिरिति किं पुनरिदं वनं नाम नेदं दुर्वचम्। उक्तमेतद्वृत्तत्वसंख्या सविशेषणेति ऊर्ध्वावस्थिते च द्रव्ये संयुक्तबुद्धौ सत्यामिहबुद्धिः कस्मान्न भवति तयोरेव द्रव्ययोस्तस्मिन् संयोगे सति न भवतीति किंकृतो नियमः नापरिज्ञानात् सम्बन्धमन्तरेण निर्निमित्तेहबुद्धिर्न भवतीति ब्रूमः न पुनर्भवत्येवेहबुद्धिः सति संयोग इति। न चोत्तराधरानपेक्षेण संयोगेनेहबुद्धिः क्रियत इति तत्पूर्विका न भवति। यत्पुनरेतदस्ति सम्बन्धे अस्य द्रव्यस्येह समवाय इतीहबुद्धिर्न प्राप्नोति। यथेह तन्तुषु पट इति बुद्धेः समवायो निमित्तम्, न पुनः समवायस्य समवायोऽस्ति इह समवाय इति न स्यात्। अत्रोक्तम्, किमुक्तम्, मिथ्याप्रत्यय एवैष इति किं पुनः समवायवद्भिर्द्रव्यैः[२] समवायस्य सामान्यं यदपेक्षया[३] स मिथ्याप्रत्ययः प्रवर्तते भेदादर्शनम्, यानि समवायवन्ति न तेषां भेदो दृश्यते समवाये चैतदस्तीति युक्तो मिथ्याप्रत्ययः वाक्यधर्मभेदाच्चानियमः। न चैकस्मिन् वाक्ये यो धर्मः स वाक्यान्तरेऽपि भवतीति यथा राज्ञः पुरुषो गच्छतीति त्रीणि पदानि त्रीण्यपि स्वेन स्वेनार्थेनार्थवन्ति भवन्तीति। उदकस्य भावो भवतीति नैतद्वाक्यसामान्यादेकस्मिन्नपि वाक्ये त्रीण्यपि पदानि पृथगर्थवन्ति[४]

(१) सम्बद्धमिति साधुः। (२) समवायिभिर्द्रव्यैः—पा० ६ पु०।
(३) यदपेक्ष्य—पा० ६ पु०। (४) पृथगर्थानि—पा० १ पु०॥

भवितुमर्हन्ति। कः पुनरस्य वाक्यस्यार्थः उदकस्य भावो भवतीति यावदुदकम्भवति उदकं भवति तावदुदकम्भवति उदकस्य भावो भवतीति। एवमन्यान्यपि वाक्यानि कुण्डे वदराणां वृत्तिरिति यथा वृत्तौ दर्शितायां[१] वृत्तिमत्सु वदरेषु सम्प्रत्यय एतदुक्तम्भवति कुण्डे वदराणि वर्त्तन्त इति तथेह च द्रव्ये द्रव्यस्य समवाय इति ब्रुवाणेनोक्तम्भवति अत्र द्रव्ये द्रव्यं वर्तत इति। तस्मादज्ञात्वा वाक्यार्थं विभागमुच्यते अस्य द्रव्यस्येह समवायोऽस्ति निमित्त इति। तस्मादुपपन्नमर्थान्तरं संयोग इति। उपपत्तौ च न संस्थान-विशेषेणावस्थितास्तन्तवः पटबुद्धेः कारणं भवन्तीति। अपरे पुनरन्यथा अर्थान्तरानवयवत्वादित्येतद्वाक्यं वर्णयन्ति अवयवावयविभावादिति। एतत्तु तैः कुतो लभ्यते न ह्ययमर्थोऽर्थान्तरानवयवत्वादित्येतस्मिन् वाक्ये श्रूयते उपनयेन लभ्यत इत्याह। यस्मादयमुपनयोऽवयवास्तन्तवोऽवयवी पट इति उपनयेनावयवावयवित्वादिति हेतुर्लभ्यते सत्यं लभ्यते विरुद्धस्तु भवति न हि तन्तव आत्मनो[२]ऽवयवास्त्रावयवी च न पटः आत्मनो[३]ऽवयवोऽवयवी चेति। किं कारणम्। अवयवावयविशब्दयोः सम्बन्धिशब्दत्वात् सम्बन्धिशब्दावेतौ अवयवोऽवयवीति। न चान्यतरप्रत्याख्यानेन सम्बन्धिशब्दप्रवृत्तिरस्ति तस्मादयमपि न सूत्रार्थः। दृष्टोऽनर्थान्तरेऽपि प्रदेशप्रदेशिव्यवहारो यथा आकाशस्य प्रदेश इति नोक्तोत्तरत्वात्। उक्तोत्तरमेतत्। अन्योऽवयवार्थोऽन्यस्य प्रदेशार्थ इति। कोऽवयवार्थः कारणविशेषाभिधानमवयव इति आधाराभिधानं प्रदेशः प्रदिश्यते अस्मिन्निति न

(१) दर्शितायां—पा० ६ पु०। (२) स्वात्मनो—पा० ६ पु०। (३) स्वात्मनो—पा० ६ पु०।

चाकाशं क्वचित् प्रदिश्यते न चाकाशस्य किञ्चित्कारणमस्ति तस्मान्न कारणार्थो नाधारार्थ इति। सोऽयमाकाशे प्रदेशशब्दः प्रदेशवद्द्रव्यसामान्याद्दृष्टव्यः किं पुनः प्रदेशवता द्रव्येण सामान्यं संयोगस्याव्याप्यवृत्तित्वम्। एनं चार्थमुपरिष्टाद्वक्ष्याम इति। तत्प्रदेशात्मकत्वादिति चेत्। अथ मन्यसे[१] अयमन्यो हेतुरवयविनोऽनर्थान्तरत्वसाधकः तत्प्रदेशात्मकत्वं कोऽस्यार्थोऽनर्थान्तरं पटात्तन्तवः तत्प्रदेशव्यपदेशविषयत्वादिति ये यस्य प्रदेशत्वेन व्यपदिश्यन्ते ते तस्यात्मानो भवन्ति यथाकाशस्य प्रदेशाः पटस्य च प्रदेशत्वेन व्यपदिश्यन्ते तन्तवस्तस्मात् पटात्मानस्तन्तव इति। इदं तावद्यथाश्रुति वाक्यं पूर्ववद्धेतुहीनं तत्प्रदेशात्मकत्वस्यार्थान्तरानर्थान्तरयोरदर्शनादसाधारणः प्रदेशशब्दस्य कारणपर्यायत्वाद्विरुद्धः तत्प्रदेशव्यपदेशविषयत्वस्य तन्तुभिरसम्बन्धादसिद्धः। योऽप्ययं दृष्टान्त आकाशस्य प्रदेश इति सोऽप्यसिद्धः कथमिति आकाशस्य प्रदेश इति संयोगस्याव्याप्यवृत्तित्वमुच्यते न च संयोगस्याव्याप्यवृत्तित्वमात्रमाकाशं तस्मादसिद्धो दृष्टान्तः। द्रव्यान्तरेभ्यो द्रव्यान्तरानिष्पत्तेर्नान्योऽवयव्यवयवेभ्यः। न किल द्रव्यान्तरेभ्यो द्रव्यान्तरमुत्पद्यमानं[२] दृष्टं न च गोहस्त्यश्वेभ्यः पुरुष उत्पद्यते तन्तुभ्यस्तूत्पद्यते पटस्तस्मान्नासौ तेभ्योऽर्थान्तरमित्यस्यापि पूर्ववद्धेतुन्यूनता उपनयेन व्यज्यमानस्तेभ्यस्तूत्पत्तेरिति हेतुः। अयमप्यर्थान्तरानर्थान्तरयोर्व्यावृत्तेरसाधारणः अर्थान्तराच्च तुर्यादेरर्थान्तरस्य पटस्योत्पत्तिदर्शनाद्विरुद्धः पटपचौकरणे असम्बद्धार्थौ न पटः पटादुत्पद्यत इति। अथ तच्छब्देन तन्तवः सम्बध्यन्ते तन्तुभ्यः पट उत्पद्यत इति। तथापि

(१) मन्यसे—पा० ६ पु०। (२) उत्पाद्यमानं—पा० ६ पु०।

विरुद्धो न तन्तुस्तन्तुभ्यो भवति नान्योऽवयव्यवयवेभ्योऽवयव्यन्तरावयवानामवयव्यन्तरार्थान्तरभावात् इह येऽवयविनोऽर्थान्तरं भवन्ति तेऽवयवन्तरावयवा भवन्ति यथा चक्रादयो रथावयवा इति तेऽर्थान्तरं पटात्। यदि च तन्तवोऽपि पटादर्थान्तरं स्युः तेऽपि पटव्यतिरेकेणावयव्यन्तरावयवाः स्युः न च ते तद्व्यतिरेकेणावयव्यन्तरावयवास्तस्मान्नार्थान्तरमिति वाक्यमाचे हेतून्यूनता असाधारणता च दोषः। हेतुस्तद्व्यतिरेकेणान्यानवयवत्वात् न तन्तवस्तन्नूनामवयवा इति विरुद्धः। अर्थान्तरप्रत्याख्यानाच्चावयवोऽवयवीत्येतन्न स्यात्। यदपीदमुच्यते येऽवयवा अवयविनोऽर्थान्तरं भवन्ति ते तद्व्यतिरेकेणान्यावयवा भवन्ति यथा चक्रादय इति। न उभयेन व्याघातात्। चक्रादयोऽवयवा इति ब्रुवताभ्युपगतमर्थान्तरं भवति। अनभ्युपगमे वा कोऽस्य वाक्यस्यार्थः चक्रादयो रथावयवा इति। ये च चक्रादयो रथावयवत्वेनाभ्युपगम्यन्ते तेऽप्यर्थान्तरप्रतिषेधान्न रथस्य नाप्यन्यस्यावयवा इति उच्छिन्नो[1]ऽवयवावयविशब्दस्य विषयः तस्मादहेतुरयम्, नान्योऽवयव्यवयवेभ्यो द्रव्यान्तरोत्पत्तिदेशव्यवच्छेदात् यदुभयसम्प्रतिपन्नमर्थान्तरत्वेन तत् तस्माद्भिन्नदेशमुत्पद्यमानं[2] दृष्टम् यथा गौरश्वात् न तु तन्तुभ्यो भिन्नदेशः पट उत्पद्यते[3] तस्मान्नासौ तेभ्योऽर्थान्तरमिति। अत्रापि हेतून्यूनता चासाधारणता च पूर्ववदिति तद्देशोत्पत्तेरिति हेतुः न तन्तुस्तन्तुदेश उत्पद्यत इति विरुद्धः उत्पत्तिप्रत्याख्यानं वा पटप्रतिषेधात्। यदि तन्तुभ्यः पटो नोत्पद्यते क उत्पत्तिशब्दस्यार्थो न तन्तुरुत्पद्यते न पट इति उत्पत्तिदेशव्यवच्छेदादित्युत्पत्तिशब्दस्यार्थो

(१) उच्छन्नो—पा० १ पु०। (२) उपलभ्यमानं—पा० ६ पु०। (३) उपलभ्यते—पा० ६ पु०।

वक्तव्य इति। स च निरूप्यमाणो व्यक्त्यादि[१]धर्मभेदेनापूर्व जन्माहेति विरुद्धः। नान्योऽवयव्यवयवेभ्योऽवयवान्तरावयविनोऽवयवान्तरार्थान्तरभावात्। इह योऽवयवान्तराणामवयवी भवति सोऽवयवान्तरेभ्योऽर्थान्तरं भवति यथा चक्रादिभ्यो घटः चक्रादिभ्योऽवयवेभ्योऽर्थान्तरं घट इति चक्राद्यवयवव्यतिरेकेणावयवान्तराणामवयवी भवति न तु पटस्तन्तुव्यतिरेकेणावयवान्तराणामवयवी भवति। तस्मान्नासौ तन्तुभ्योऽर्थान्तरम्। अत्राप्यसाधारणता हेतुन्यूनता च पूर्ववत्। अवयवान्तराणामवयवीति ब्रुवता अवयव्यर्थान्तरभूतोऽभ्यनुज्ञातो भवति। शून्यं वा वाक्यम्। अथ नाभ्यनुज्ञायते कोऽस्य वाक्यस्यार्थः। अवयवान्तराणामवयवीति न ह्यवयविप्रत्याख्यानादेतद्वाक्यमर्थवत्तायां शक्यं व्यवस्थापयितुम् तद्व्यतिरेकेणान्यानवयवित्वं हेतुरस्यापि प्रसङ्गः पूर्ववत्। नान्योऽवयव्यवयवेभ्यः सत्यन्यकर्तुरर्थान्तरभावात् इह ये यस्मिन् सत्यन्यत् कुर्वन्ति ते तस्मादर्थान्तरं भवन्ति यथा कटात् तन्तवः सति कटेऽर्थान्तरं पटं कुर्वन्तीति कटादर्थान्तरं भवन्ति न पुनः सति पटे तन्तवो द्रव्यान्तरं कुर्वन्ति तस्मात् ते नार्थान्तरमिति। अस्यापि हेत्वर्थः सत्यन्याकरणात्[२]। अस्याप्यसाधारणता न्यूनता च पूर्ववत्। सति कटे तन्तवः पटं कुर्वन्तीति ब्रूषे न चार्थान्तरमिति व्याहतम्। नहि तन्तव आत्मानं[३] कुर्वन्ति पटमप्यर्थान्तराभावात् न कुर्वन्तीति चेत् क्रियाविषयोच्छेदो न तन्तव आत्मानं कुर्वन्तीति नार्थान्तरं कुर्वन्तीति क्रियाविषय उच्छिन्नो[४] भवतीति। नान्योऽवयव्यवयवेभ्यः आत्मसंयोगव्यतिरेकभाव्यवयव्य[५]न्य-

(१) व्यक्त्यादि—पा० ६ पु०। (२) सत्यन्याकारणत्वात्—पा० ६ पु०। (३) स्वात्मानं—पा० ६ पु०। (४) उच्छन्नो—पा० १ पु०। एवमग्रेऽपि। (५) व्यतिरेकेण भाव्य—पा० ६ पु०।

त्वात् इह ये यस्मादर्थान्तरं भवन्ति ते आत्मसंयोगव्यतिरेकेण भवन्ति तद्यथा तन्तुसंयोगव्यतिरेकेण कटो भवति न च तन्तुसंयोगव्यतिरेकेण पटो भवति तस्मान्नासौ तेभ्योऽर्थान्तरम्। अस्यापि हेत्वर्थस्तन्तुसंयोगेभ्यस्तदुत्पत्तिरित्यस्याप्यसाधारणता हेतून्यूनता च पूर्ववदेव। तन्तुसंयोगेभ्यस्तदुत्पत्तिरिति ब्रुवता तन्तुव्यतिरिक्तः संयोगश्चावयवी चाभ्युपगतो भवति अनभ्युपगमे तन्तुसंयोगेभ्य[१]स्तदुत्पत्तेरिति वाक्यार्थो हीयते। नान्योऽवयव्यवयवेभ्यो द्रव्यान्तरगुणानां द्रव्यान्तरगुणाकारणत्वे[२] अगुणत्वप्रसङ्गात्। न किल द्रव्यान्तरगुणानां द्रव्यान्तरगुणेभ्यो दृष्ट उत्पादः। यथा न गोगुणेभ्योऽश्वगुणानाम्। तन्तुगुणेभ्यस्तु पटगुणानामुत्पत्तिस्तस्मान्नासौ तेभ्योऽर्थान्तरमिति। सोऽयमन्यायो वर्तते कोऽचान्यायः तन्तुगुणेभ्यः पटगुणानामुत्पत्तिं प्रतिपद्यसे न चार्थान्तरं पट इति। न च तन्तुगुणेभ्यस्तन्तुगुणानामुत्पत्तिरिति तन्तुगुणेभ्यस्तद्गुणोत्पत्तिरिति हेतुर्विरुद्धः। नान्योऽवयव्यवयवेभ्योऽप्रत्यक्षत्वप्रसङ्गात् प्रत्यक्षाप्रत्यक्षवृत्तिरवयवप्रत्यक्षः स्यात् यद्यवयव्यर्थान्तरं स्यात् यथा गर्भमाल्संयोगः प्रत्यक्षाप्रत्यक्षवृत्तिर्न प्रत्यक्षः प्रत्यक्षस्त्ववयवी तस्मान्नासौ तेभ्योऽर्थान्तरम्। प्रत्यक्षत्वादेव नार्थान्तरमिति विरुद्धो हेतुः। गर्भमाल्संयोगश्चाप्रत्यक्ष इति किमयं प्रत्यक्षाप्रत्यक्षाभ्यामारम्भात्प्रत्यक्ष उत प्रत्यक्षाप्रत्यक्षवृत्तित्वात्प्रत्यक्ष इति। यद्याद्यः हिमवत्परमाणुकमप्रत्यक्षं प्राप्नोति तस्य ह्येक एव[३] प्रत्यक्ष एक एवाप्रत्यक्ष इति। अथ द्वितीयः भावोऽप्रत्यक्षः प्राप्नोति स हि प्रत्यक्षाप्रत्यक्षवृत्तिरिति। न चायं पक्षोऽस्ति अवयवानामप्रत्यक्षत्वे अवयवी

(१) तन्तुभ्यः—पा० ६ पु०। (२) सतीति पूरणीयम्। (३) एकोऽवयवः—पा० ६ पु०।

न प्रत्यक्ष इति। उक्तञ्चात्र किमुक्तम्, येषामिन्द्रियार्थसन्निकर्षोऽस्ति अवयवानां तैः सहावयवी गृह्यते येषां नास्ति तैः सह न गृह्यते न चैतस्मतोऽस्ति भेदः अवयवानामप्रत्यक्षत्वादवयविनोऽप्रत्यक्षत्वं ब्रुवतः सर्वमतीन्द्रियं प्राप्नोति न हि कस्यचित् मध्यभागपरभागौ ज्ञायेते इति सोऽयं प्रत्यक्षविषय उच्छिन्नो भवति। प्रत्यक्षत्वादिति च ब्रुवाणेन अवयवातिरिक्तोऽवयव्यभ्युपगतो भवति परमाणूनामतीन्द्रियत्वात् न हि परमाणवः कदाचिदुपलभ्यन्ते न परमाणवोऽतीन्द्रिया रूपादिमतामतीन्द्रियत्वनिवृत्तेः। न हि रूपादिमत् किञ्चिदतीन्द्रियमस्ति दृष्टं च रूपादिमदैन्द्रियकं घटादि, ऐन्द्रियकाः परमाणव इति कोऽर्थः किन्तावदिन्द्रियकरणप्रत्यक्षा उत इन्द्रियसम्बद्धा इति। किं चातः यदीन्द्रियकरणप्रत्यक्षा ऐन्द्रियका इति तन्न युक्तम्, न ह्यौन्द्रियमन्यस्यान्यथार्थं प्रकाशयति। अन्यथान्यस्य इन्द्रियवृत्तीनामविकल्पितत्वात् भवतां[१] चेत् परमाणव ऐन्द्रियका अस्मदादीनामप्यैन्द्रियकाः स्युः। अथेन्द्रियसम्बद्धा ऐन्द्रियका इति तस्मिन्नविरोधः न हि परमाणव इन्द्रियेण न सम्बध्यन्त इति। तस्मादिन्द्रियसन्निकर्षे सत्यपि महत्त्वाभावान्न परमाणव उपलभ्यन्त इति। कथं पुनरेवं गम्यते[२] महत्त्वमप्युपलब्धे रूपवत्कारणमिति भावाभावयोस्तद्वत्वात् यस्मात् सति महत्त्वे रूपे चोपलब्धिर्भवति असति च न भवति। तस्मादुभयं कारणमिति। यत्त्वचोक्तम् तेजःस्पर्शवदिति। सति तेजःस्पर्शे उपलब्धिर्भवति असति च न भवति न च तेजःस्पर्शोऽपि रूपवद्रव्योपलब्धेः[३] कारणमिति। तन्न व्यभिचारात्। व्यभिचारात् स्पर्श

(१) भवतीति—पा० १ पु०। (२) अवगम्यते—पा० ६ पु०। (३) रूपोपलब्धेः—पा० ६ पु०।

उपलब्धेरकारणं न पुनारूपमहत्त्वे क्वचिद्व्यभिचरतः तस्माद्रूपमहत्त्वे एवोपलब्धेः कारणमित्ययञ्चार्थः सूत्रकारेण सूत्रद्वयेनोक्तः। अद्रव्यद्रव्यत्वात् परमाणावनुपलब्धिः, रूपसंस्काराभावाद्वायोरनुपलब्धिरिति(१)। रूपसंस्कारो रूपसमवाय इति सूत्रार्थः। अथ पुनः स्पर्शस्यापि रूपमहत्त्ववद्व्यभिचारः कस्मात् स्पर्शो न कारणमिति वक्तव्यम्। समवधार्यं चैतद्भवताभिधीयते स्पर्शवदेतत् स्यादिति येन प्रमाणेनावधृतमेतत् स्पर्शो न कारणमिति। मयापि तत एवाकारणत्वम्। अथाकारणत्वप्रतिपादकं न प्रमाणमस्ति को ह्यस्य वाक्यस्यार्थः स्पर्शवदेतत् स्यादिति तद्भावभावित्वं च व्यभिचारयता कार्यकारणभाव उच्छिन्नो भवति। इदमस्य कारणमिदमस्य कार्यमिति परेण पर्यनुयुक्तः तद्भावभावित्वव्यतिरेकेणान्येन न प्रतिपादयसि अतो विरोधादनुत्तरमेतत्। यत्पुनरेतदतीन्द्रियसंयोगातीन्द्रियत्वादिति। अतीन्द्रिययोः किलात्ममनसोः संयोगो ह्यतीन्द्रियो दृष्ट इति। यदि च परमाणवोऽतीन्द्रियाः स्युः तत्कार्यमप्यतीन्द्रियं स्यात् ऐन्द्रियकं च दृष्टम्, तस्मादैन्द्रियका इति। योऽयं दृष्टान्तप्रयोगः अतीन्द्रियसंयोगातीन्द्रियत्वादिति दृष्टान्तप्रयोगमात्रे च हेतुन्यूनता योऽप्यत्र कथञ्चिद्धेतुर्लभ्यते नातीन्द्रियकार्यं महाभूतादिव्यक्तम् ऐन्द्रियकत्वात् घटवदिति घटाद्यैन्द्रियकम् ऐन्द्रियककार्यं दृष्टम् तथा च महाभूतादिव्यक्तमैन्द्रियकम् तस्मात्तदप्यैन्द्रियककार्यमिति। अयमपि प्रत्यक्षप्रमाणविरोधादिरुद्धः अनुष्णोऽग्निः कृतकत्वादिति यथा। एके तु वातायनच्छिद्रदृश्यं त्रुटिं परमाणुं वर्णयन्ति। तन्न युक्तम्। तस्य

(१) वायावनुपलब्धिः—पा० १ पु०। काणादसूत्रमिदं ४ अ. १ आ. ७ सू.।

भेद्यत्वात्। अभेद्यः परमाणुर्भिद्यते चुटिरिति। कथमवगम्यते भिद्यते चुटिरिति। द्रव्यत्वे सत्यस्मदादिवाह्यकरणप्रत्यक्षत्वात् घटवदिति। कथं चान्यथा अभेद्यः परमाणुरित्युच्यते अनित्यत्वाच्च न परमाणुः सामान्यविशेषवतोऽस्मदादिवाह्यकरणप्रत्यक्षत्वाच्च तस्मान्नेन्द्रियकाः परमाणव इति तेषामतीन्द्रियत्वात् यत्प्रत्यक्षं तदन्यदिति विरुद्धो हेतुः। संहतानामुत्पत्तिनिरोधात् नासंहतः परमाणुरस्तीत्यपरे। अपरे तु असंहतं परमाणुं वर्णयन्ति संहता एव ह्युत्पद्यन्ते निरुह्यन्ते च असंहतास्तु परमाणवो न सन्त्येवेति। तदयुक्तम्। संहतार्थ(१)स्यानुक्तत्वात् असंहताः परमाणवो न सन्तीति ब्रुवता संहतशब्दार्थो वक्तव्यः संहतो हि नाम बह्वनामकार्यकारणभूतानां संयुक्तानामवस्थानम्। न चासंहतप्रतिषेधे संहतस्य निमित्तमस्ति संहन्यमानतन्त्वत्वात् नित्यमयं संहतः संहन्यमानतन्त्वो(२) भवति। न चासंहतप्रतिषेधे संहन्यमानमस्ति तस्माच्चासंहतोऽस्तीति विरोधाच्च किञ्चिदेतत्। एकप्रतिषेधादनेकाभ्युपगमवदिति। यथा नाम कश्चिन्मुग्ध(३) एकप्रतिषेधादनेकमभ्युपेयात् तस्य चैकप्रतिषेधादनेकं निवर्तत एकसमुदायत्वादनेकस्य तथाविधमिदं भवतीति। दृतश्च नान्योऽवयव्यवयवेभ्यः संयोगाप्राप्त्यभावात्। यत् खलु यस्मादर्थान्तरं भवति तस्य तेन संयोगो भवत्यप्राप्तिर्वा यथा गवाश्वस्य न पुनस्तन्तुभिः पटस्य संयोगो नाप्राप्तिस्तस्माच्चासौ तेभ्योऽर्थान्तरमिति। अवयविनः पञ्चीकरणे संयोगविभागाभावस्य संयोगविभागविषयत्वादसम्बद्धम्। अथासंयोगित्वाविभागित्वे हेतुभूते ते असिद्धे संयुज्यते चायं विभज्यते चेति।

(१) संघातार्थ—पा० ६ पु०। (२) असंहतः संहन्यमानतन्त्वमिति क्वचित्।
(३) मूर्ख—पा० ६ पु०।

अथ स्वावयवेनासंयोगित्वात् सोऽप्यनुपसंहार्यः नास्त्याश्रयो न व्यतिरेक इति। अथापि सर्पकुण्डलकाद्युदाहरणं स्यात् सर्पकुण्डलकादि किल स्वकारणेनासंयोगि न चार्थान्तरमिति। तदसिद्धम्। यथा चार्थान्तरं सर्पकुण्डलकादि तथोक्तं पुरस्तात्। यदपि स्वकारणेनासंयोगीति तच्च चिन्त्यम्, किं गुणत्वात् स्वकारणेनासंयोग्यथानर्थान्तरभावादिति। वयं तु ब्रूमो गुणत्वान्नानर्थान्तरभावाद्गुणश्च सर्पकुण्डलकः संयोगः स चार्थान्तरमिति प्रतिपादितमेतत् अर्थान्तरभावे च दर्शनादविरुद्धः। सत्त्वरजस्तमांसि भवतां पक्षे मिथोऽर्थान्तरभूतानि तेषां च न संयोगो नाप्राप्तिरिति प्रधानपुरुषयोर्न संयोगो नाप्राप्तिरुभयोर्व्यापकत्वादविरुद्धः। नान्योऽवयव्यवयवेभ्यो गुरुत्वान्तरकार्याग्रहणात्। गुरुत्वान्तरकार्याग्रहणादित्येतन्न कथञ्चिदपि पक्षेण सम्बध्यते क्व नान्योऽवयव्यवयवेभ्यः क्व च गुरुत्वान्तरकार्याग्रहणम् गुरुत्वान्तरकार्याग्रहणात् गुरुत्वान्तरकार्यं न स्यात् न गुरुत्वं न गुरुत्वान्तरं नावयवी नोदकप्रतिषेधात् कमण्डलोः कपालानां वा प्रतिषेधो युक्तः। एके तु गुरुत्वान्तरकार्याग्रहणादित्यनेन गुणान्तरारम्भं प्रतिषेधति उदाहरणमाचार्यत्वात् गुरुत्वान्तरारम्भप्रतिषेधस्य। कथमिति। न कार्यं कारणरूपादिपूर्वकरूपादिमद्गुरुत्वान्तरवत्त्वप्रसङ्गात्। यदि कारणगता रूपादयः कार्यरूपादीन्यारभेरन् अपि तर्हि कारणगतान्यपि गुरुत्वानि कार्ये गुरुत्वान्तरमारभेरन् ततश्च गुरुत्वान्तरवत् कार्यमुपलभ्येत न चोपलभ्यते तस्मान्न कारणरूपादिपूर्वकरूपादिमत्कार्यमिति। उपपादितः पक्षधर्मः स तु प्रत्यक्षविरोधान्न किञ्चित्। कथमिति। अभ्युपेत्य कार्ये रूपादयः कार्ये प्रतिषिद्ध्यन्ते कार्याभ्यु-

पगमाच्च प्रतिषेद्धव्यमभ्यनुज्ञातं भवति कारणरूपादयश्च कार्यरूपादीन् नारभन्ते इति ब्रुवतः कार्यमगुणं स्यात् न त्विदमगुणं दृश्यते ततश्च विरोधादयमहेतुः। अथ कार्यं नैवास्ति न कार्यं कारणरूपादिपूर्वकरूपादिमदित्यनर्थकम्, न हि कमण्डलोरभावे अनुदकः कमण्डलुरिति युक्तमुक्तम्। एतेन कार्ये रूपादिप्रतिपत्तिः प्रत्युक्ता। यश्चायं हेतुः गुरुत्वान्तरवत्त्वप्रसङ्गादिति। अयमप्यभ्युपगमान्न किञ्चित् नाभ्युपगम एव दोषत्वेन देश्यते। यदि तर्हि गुरुत्वान्तरवत् कार्यद्रव्यं रूपाद्यन्तरवच्च ततो गुरुत्वान्तरकार्यमुपलभ्येत यथा रूपाद्यन्तरकार्यं न त्वुपलभ्यते न हि तुलायां विभक्तपिण्डद्वयोपन्यासवत् सम्बद्धयोरपि कार्यभेदं पश्यामः तस्माद्विभक्तयोरिव संयुक्तयोरपि नास्ति द्रव्यान्तरारम्भ इति। केचित्तु न गुरुत्वान्तरवत्[१] कार्यद्रव्यवती तुलेति पचयित्वाऽवनमनविशेषाभावादिति हेतुं ब्रुवते सोऽयं व्यधिकरणः अवनमनविशेषाभावस्यातुलाधर्मत्वात्। न ह्यवनमनविशेषाभावस्तुलाधर्म इति एवं तु युक्तमुत्पश्यामः। अवनमनविशेषानाधारत्वान्न गुरुत्वान्तरवत् कार्यद्रव्यवती तुलेति। असिद्धस्तावदयं हेतुरवनमनविशेषानाधारत्वस्यातुलावृत्तित्वात् न तद्वत्तानुपलब्धेः अयमप्यनैकान्तिकत्वाद्हेतुः गुरुत्वान्तरवद्द्रव्यसन्निपाते सत्यवनमनविशेषानाधारत्वस्य दृष्टत्वात्। यथा गुरुत्ववति द्रव्ये उन्मीयमाने त्रुटिभूते रजसि गुरुत्ववति सन्निपतित इति महागुरुत्वे चोन्मीयमाने गुरुत्वमात्रोपहितानामवनमनविशेषं न करोति। समहीनाधिकप्रसङ्ग इति चेत् यदि तावत् कारणगुरुत्वैः समं कार्यगुरुत्वं

(१) कार्यगुरुत्वान्तरवत्—पा० १पु०।

यावद्द्विपलाभ्यामसम्बद्धेऽवनमनं द्वित्वावत्सम्बन्धे सति स्यात् । अथ कारणगुरुत्वाधिकं कार्यगुरुत्वं तथाप्यधिकं प्रसज्येत । अथ कारणगुरुत्वाद्धीनं कार्यगुरुत्वं तथापि विशेषो गृह्येत न त्विदमस्ति तस्मान्न कार्यगुरुत्वमस्ति न कार्यकारणगुरुत्वेयत्तानवधारणात् यद्येतदवधारितं स्यात् एतावत् कारणगुरुत्वमेतावत् कार्यगुरुत्वमिति। तदेतत् युज्यते वक्तुम्, समाधिकहीनकार्यप्रसङ्ग इति तत्त्वनवधारितमियत्कारणे गुरुत्वमियत्कार्यगुरुत्वमिति यदि न कार्यकारणगुरुत्वमवधारितं[१] योऽयं प्रत्ययस्तुलयोन्मीयमाने द्रव्ये द्विपलं पञ्चपलमिति न प्राप्नोति न न प्राप्नोति । द्रव्यसमाहारगुरुत्वावधारणात्। यदिदं भवता मन्यते द्विपलं पञ्चपलमिति नात्र कार्यकारणगुरुत्वे अवधार्येते किं त्वाचरमादाच परमाणोर्द्रव्यसमाहार उन्मीयते तत्र मनुष्यधर्मणो न युक्तं वक्तुमियत्कारणगुरुत्वमियत् कार्यगुरुत्वमिति । न च समाहारः कारणमपि त्वनारब्धकार्यं चरमद्रव्यम् कारणमिति। केचित्त्वारभ्यारभन्त इति प्रतिपद्यन्ते तान् प्रतीदमुच्यते न पूर्वोत्तरकार्यद्रव्ये समानदेशे मूर्तत्वात् घटादिवदिति। शेषस्त्वारभ्यारम्भकविचारो नाप्रस्तुतत्वान्निराक्रियत इति[२]। निरनुमानं तर्हि कार्यगुरुत्वं यदि गुरुत्वान्तरवद्द्रव्योपचये सति कार्यभेदो न गृह्यते कथं प्रतिपत्तव्यमिति । क एवमाह कार्यगुरुत्वं[३] न गृह्यत इति। यदि गृह्यते किं तत्पतनम्, न हि कार्यगुरुत्वमन्तरेण कार्यपाते ऽन्यो हेतुरस्ति तस्माद्गुरुत्वान्तरवत् कार्यमिति। एतेन तुलाव-

(१) कार्यकारणगुरुत्वे नावधार्येते—पा० ६ पु० ।
(२) त्वप्रस्तुतत्वान्न क्रियत इति—पा० ६ पु० । (३) कार्यगुरुत्वकार्यं—पा० १ पु०।

नतिविशेषाग्रहान्न कार्यगौरवमिति प्रत्युक्तम्। अथ मन्यसे कारण-गुरुत्वैरेव कार्यं पात्यते न कार्यगुरुत्वमस्यतः कार्यपातस्यान्यनिमित्तत्वान्न सिध्यति गुरुत्वान्तरवत् कार्यमिति। न कार्यकारणयोरसंयोगात् यच्च गुरुत्वमाश्रयान्तरे पातहेतुर्भवति तत्र संयोग उपकरणम्, यथा तुलापटलकगुरुत्वद्रव्यसंयोग इति। न तु कार्यकारणयोः संयोगोऽयुतसिद्धत्वात् युतसिद्धिरसम्बद्धस्य विद्यमानता न पुनः कार्यं कारणासम्बद्धं विद्यते जातः सम्बद्धश्चेत्येकः कालः तस्मान्न कार्यकारणे संयुक्ते समवायोपकरणं गुरुत्वं पातयिष्यतीति चेत् नासंकीर्तनात् विरोधाच्च। अथ मन्यसे मत्यं न कार्यकारणयोः संयोगोऽस्ति अस्ति च समवायः समवायो गुरुत्वापेक्षः कार्यं पातयिष्यतीति न सिध्यति कार्यगुरुत्वम् नासंकीर्तनात् न समवायः क्रियाहेतुत्वेन क्वचिदपि संकीर्तितः सूत्रकारेण यथा संयोगो नोदनाभिघातसंयुक्तसंयोगाच्च पृथिव्यां कर्मेति न केवलमसंकीर्तनादेव विरोधाच्च। यदि समवायः क्रियाहेतुः स्यात् कारणरूपादयोऽपि कार्येणैकार्थसमवायात् पतेयुः पतन्तु रूपादयोऽपि किन्नो बाध्यत इति चेत् न गुरुत्वस्यापि पातप्रसङ्गात् यथा रूपादयः कार्यद्रव्यमनुपतन्ति तथा गुरुत्वमप्यनुपतेत्। गुरुत्वं चानुपतत् कुतः पततीति वक्तव्यम्, न तु गुरुत्वस्य गुरुत्वान्तरं पातहेतुरस्ति। तस्मान्न गुरुत्वं पतति न रूपादयः पतन्तीति। यदि रूपादयो न पतन्ति द्रव्ये पतति तिष्ठेयुरित्यद्रव्या रूपादयः स्युः द्रव्यं च रूपहीनमुपलभ्येत। अथ द्रव्ये पतति पतन्ति क्रियावन्तो रूपादयः प्राप्नुवन्ति। अथ न तिष्ठन्ति न पतन्ति सोऽयं युक्तिविरोधोऽवश्यं भवताभ्युपगन्तव्यः। पतति पतन्ति तिष्ठन्ति

वेति वेद् पुनर्भवान् युक्तायुक्तयोर्नानाकारणं[१] वेद्मीति परः । युक्तं प्रमितमयुक्तमप्रमितम् । अयुक्तं तर्हीदं पतति पतन्ति तिष्ठन्तीति वा तच्चोक्तम् गुरुत्वस्य गुरुत्वान्तरप्रसङ्गात् रूपादिशून्यस्य द्रव्यस्यादर्शनात् अद्रव्याणां च रूपादीनामदर्शनादिति । यच्च पतति गच्छति वा तत्प्राप्तं जहाति अप्राप्तं चाप्नोति न पुनारूपाद्यः प्राप्तं जहत्यप्राप्तं वा प्राप्नुवन्ति रूपाद्योऽप्राप्तं न प्राप्नुवन्तीति न युक्तम् । भवतीदं द्रव्ययोः प्राप्तयोः रूपे अपि प्राप्ते इति न सन्देहात् किमयं प्राप्तिप्रत्ययः प्राप्तिनिमित्त आहो अप्राप्तेरदर्शननिमित्त इति सन्दिह्यते । वयन्तु ब्रूमः अप्राप्तेरदर्शननिमित्त इति । नहि द्रव्ययोः प्राप्तयोः रूपयोरप्राप्तिं पश्यति द्रव्ययोरप्येवमेवेति चेत् । अथ मन्यसे यथा रूपयोः प्राप्तिप्रत्ययोऽप्राप्तेरदर्शननिमित्तः एवं द्रव्ययोरप्राप्त्यदर्शननिमित्तो भविष्यति न प्राप्तिनिमित्त इति । नैष दोषः प्रत्ययद्वैतस्यानेकनिमित्तत्वात् न खलु प्रत्ययद्वैतमेकनिमित्तं दृष्टम् । तद्यथा चित्रगतासु प्रतिकृतिषु क्रोधभय[२]परिहारेऽपि क्रुद्धभीतप्रत्यया भवन्ति न तावता पुरुषेष्वपि क्रोध[३]भयाभावे क्रुद्धभीतप्रत्ययाः प्रादुर्भवितुमर्हन्तीति । एवमयं प्राप्तिप्रत्ययः क्वचित् संयोगनिमित्तः क्वचिदप्राप्त्यदर्शननिमित्त इति तस्माद्व्यवस्थितं न गुरुत्वं पतति न रूपाद्यः पतन्तीति । अपरे तु कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं ब्रुवते । कार्यगुरुत्वैः किल कारणगुरुत्वानि प्रतिबद्धानि अतोऽवनतिविशेषो न भवति एतत्तु न युक्तमिति पश्यामः । कुतः कार्यकार-

---

(१) नानाकारं न—पा० १ पु० । (२) अक्रोधभय—पा० १ पु० ।
(३) अक्रोध—इति शोधितम् ।

णयोः पातदर्शनात् यदि कार्ये पतति कारणमवतिष्ठेत प्रतिपद्येमहि[१] कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धुमिति न त्विदमस्ति अतोऽयुक्तं तत् अनाधारत्वप्रसंगाच्च यदि कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं न कारणे क्रियामारभेत् कार्ये पतति न कारणं पतेदिति कार्यमनाधारं स्यात्। एतेन कार्यगुरुत्वेन कारणगुरुत्वविनाशोऽपि व्याख्यातः। विभक्तानां च पातो न स्यादित्यधिकम्। यदि कार्यगुरुत्वेन कारणगुरुत्वं विनाश्येत कार्यद्रव्यविनाशात् कारणानां विभक्तानां पातो न स्यात् गुरुत्वमेव च न स्यात् यदि कार्यगुरुत्वेन कारणगुरुत्वं विनश्येत अपि तर्हि न क्वचिद्गुरुत्वं स्यात् नहि कस्यचित् परमाणोरतीतं कार्यं नास्ति अतोऽगुरवः परमाणवः स्युः। परमाणुषु च गुरुत्वाभावात् कार्यगुरुत्वं कुत उत्पद्येत तस्मादप्रतिषेधोऽयम् कार्यगुरुत्वैः कारणगुरुत्वानां विनाशप्रतिबन्धाविति[२] अतः पूर्व एव प्रतिषेधो नानैकान्तादिति कार्यकारणगुरुत्वानवधारणाच्च। तदेवमवयविनोऽसत्त्वाव्यतिरेकप्रतिपादकं न प्रमाणमस्तीत्यतः साध्यत्वादवयविनि सन्देह इत्ययुक्तम्। अतश्च साध्यत्वादवयविनि सन्देह इति न युक्तम् असंकीर्तनात् नहि साध्यत्वं संशयहेतुरिति कीर्तितं क्वचिदपि अतो न भवति साध्यत्वात् संशयः। क एवमाह साध्यत्वात् संशयः अपि तु साध्यत्वाद्विप्रतिपत्तिः विप्रतिपत्तेः संशय इति। साध्यत्वकार्यायां[३] विप्रतिपत्तौ साध्यत्व[४]मध्यारोप्योक्तं साध्यत्वादवयविनि सन्देहः॥

---

(१) प्रतिपद्ये तर्हि—पा० ६ पु०। (२) प्रतिबन्धनाविति शोधितम् १ पु०।
(३) साध्यकार्यायां—पा० १ पु०। (४) साध्य—पा० १ पु०। प्रामादिकः।

सर्वाग्रहणमवयव्यसिद्धेः ॥ ३२ ॥

सर्वाग्रहणमवयव्यसिद्धेः(१)। संशयापाकरणार्थं(२) सूत्रम् । सर्वाग्रहणमवयव्यसिद्धेरिति। सर्वेषामर्थानामग्रहणं प्रसज्येत । यद्यवयव्यर्थान्तरभूतोऽवयवेभ्यो नास्ति। कथमिति परमाणवस्तावत् दर्शनविषयभावं नापद्यन्ते अतीन्द्रियत्वादित्युक्तम् । अवयविद्रव्याणि च भवद्भिर्न प्रतिपद्यन्ते तदनभ्युपगमे च योऽयं द्रव्यप्रत्ययः कुम्भ इति गुणप्रत्ययश्च श्याम इति क्रियाप्रत्ययश्चलतीति सामान्यप्रत्ययोऽस्तीति विशेषप्रत्ययः कलश इति समवायप्रत्यय इह घटे रूपादय इति। तथान्येऽपि प्रत्यया एको महान् संयुक्तो विभक्तः पृथक् परोऽपर इति च न स्युः। अस्ति च सर्वस्य ग्रहणं द्रव्यगुणकर्मादिप्रपञ्चस्य वयं तेन सर्वस्य ग्रहणात् पश्यामोऽवयवातिरिक्तोऽस्त्यवयवीति । अथवा सर्वाग्रहणमिति सर्वैः प्रमाणैरग्रहणम् कथम् प्रत्यक्षस्य वर्तमानमहद्विषयत्वात् । यद्वर्तमानं महच्च तद्बाह्यकरणप्रत्यक्षं घटाद्यवयविप्रत्याख्याने च न बाह्यकरणप्रत्यक्षविषयोऽस्ति तस्याभावादनुमानादेरप्यभावः सेयं सर्वप्रमाणनिवृत्तिः उपलभ्यन्ते चार्थाः प्रत्यक्षादिभिः प्रमाणैः तैः सर्वैर्ग्रहणात् पश्यामोऽस्त्यवयवीति । तदिदं सूत्रमवयव्यनभ्युपगमे विरोधप्रदर्शनपरं सोऽयं सर्वाकारो(३) विरोधो लोकपरिदृष्टप्रत्ययोच्छेद इति ॥

धारणाकर्षणोपपत्तेश्च ॥ ३३ ॥

धारणाकर्षणोपपत्तेश्च । अवयव्यर्थान्तरभूत इति चार्थः । किमिदं

(१) अवयव्यप्रसिद्धेः—पा० ६ पु० । (२) करणाय—पा० ६ पु० ।
(३) सर्वप्रकारो—पा० ६ पु० ।

धारणं नाम एकदेशग्रहणसाहचर्ये सत्यवयविनो देशान्तरप्राप्ति-प्रतिषेधो धारणम्। यदायमवयविन एकदेशं गृह्णाति तदैकदेश-ग्रहणेन सहावयविनमपि गृह्णाति तेन च ग्रहणेन यद्वयविनो देशान्तरप्राप्तिनिवारणं तद्धारणम्। आकर्षणं नाम एकदेशग्रहण-साहचर्ये सत्यवयविनो देशान्तरप्रापणं पूर्ववत् कुत एतत् लोकतः लोकः खलु धारणाकर्षणे एवं प्रयुङ्क्ते इति। ते एते धारणाकर्षणे ऽवयविनं साधयतः कथमिति निरवयवे चावयवे चादर्शनात्। न हि धारणाकर्षणे निरवयवे अवयवे च दृष्टे दृष्टे च धारणाकर्षणे तस्मादवयविधर्माविति। यदत्रोक्तं संग्रहकारिते धारणाकर्षणे नावयविकारिते पांशुराशिप्रभृतिष्वभावात् तृणोपलकाष्ठादिषु जतु-संगृहीतेषु च दर्शनादिति। तन्नानवधारणात्। न ब्रूमः सर्वस्मि-न्नवयविनि धारणाकर्षणे भवतः अपि चान्यत्र न भवतः। न च विरोधोऽवयविष्वेव दर्शनात् यानि तृणोपलकाष्ठानि जतुसंगृही-तान्याकृष्यन्ते धार्यन्ते चेति अवयविन एवैते यदि च निरवयवे चावयवे च धारणाकर्षणे स्याताम् स्याद्विरोधः यदिदमुच्यते संग्रह-कारिते ते इति न विशेषहेत्वभावात् संग्रहकारिते धारणाकर्षणे नावयविकारिते इति। न च भवता विशेषहेतुरुपदिश्यते इति पांशुराशिप्रभृतिषु च कस्मात् संग्रहो नास्तीति वाच्यम्। य एवात्र संग्रहाभावे भवतो हेतुः स एवावयविनो विद्यमानस्य धारणाकर्ष-णयोरभाव इति(१)। कः पुनरसौ उक्तोऽसावेकदेशगृहीतस्य तत्सह-चरितस्य सम्बन्धविशेष इति। स च पांशुराशिप्रभृतिषु नास्ति

(१) कर्षणाभावेऽपीति—पा० ६ पु०।

तस्मान्न तत्र धारणाकर्षणे इति सोऽयं व्यतिरेकी हेतुः। अथेदानीमन्वयिनो हेतोः प्रयोगमुपन्यसिष्यन्निदमाह । अथावयविनं प्रत्याचक्षाणको माभूत् प्रत्यक्षलोप इति। अणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति। एकबुद्धेर्विषयं[१] पर्यनुयोज्यः येयं बुद्धिरेकमिदं द्रव्यमिदमिति किमियं नानाविषया उताभिन्नविषयेति । यदि नानाविषया बहुष्वदर्शनाद्युक्ता । न च बहुष्वेकमिदमिति युक्तः प्रत्ययः। अथाभिन्नार्थविषया योऽसावेकबुद्धेर्विषयः सोऽवयवीति एकानेकबुद्धी भिन्नविषये विशेषवत्त्वाद्रूपादिविषयबुद्धिवदिति । अथवा एकानेकबुद्धी भिन्नविषये समुच्चितासमुच्चितविषयत्वात् इदमिति यथा इदं चेदमिति यथा ॥

सेनावनवद्ग्रहणमिति[२] चेन्नातीन्द्रियत्वादणूनाम् ॥३४॥

सेनावनवद्ग्रहणमिति चेत्। अथ मन्यसे असत्यर्थान्तरभावे ऽसति चैकानेकविभेदे च दृष्टो बुद्धिविशेषः । अन्या सेनाबुद्धिः अन्या गजादिबुद्धय इति तथान्याः खदिरादिबुद्धयः[३] अन्या च वनबुद्धिरिति न च तावता सेना वनं चानर्थान्तरम्। तस्मादनैकान्तिकत्वादहेतुः। इदं तावत् सूत्रम् साधनपक्षे दृष्टान्तमात्रार्थत्वादसम्बद्धम्, अनैकान्तिकीकरणपक्षे तु न असिद्धत्वात् न केन[४] सेनावनयोरनर्थान्तरभावोऽभ्युपगम्यते यथा तु सेनावनान्यर्थान्तरभूतानि तथोक्तम्, अभेदप्रत्ययस्य चानेकनिमित्तत्वान्न युक्तम्, अस्त्ययमभेदप्रत्ययोऽभिन्न एव

---

(१) लक्षीक्रत्येत्यनुषज्यते । (२) सेनावनादिषदिति—पा० वृत्तिकारसम्मतः ।
(३) धवादिबुद्धयो—पा० ६ पु० । (४) केनचिदिति गुरुषः ।

अस्ति च भिन्न उपलभ्यमाने भेदस्यादर्शनात् अभिन्ने तावदेकप्रत्ययः यदेकमुभयपक्षसम्प्रतिपत्त्या व्यवस्थितम्, एकं नास्ति इत्यनेकप्रत्ययो ऽव्याहतः एकसमुच्चयो ह्यनेकमिति अनेकस्मिन्नप्युपलभ्यमाने भेदस्यादर्शनादभेदप्रत्ययः भेदस्यादर्शनमाराच्चिमित्तात् यथा सेनावनादिषु यानि तानि सेनावनाङ्गानि हस्त्यादीनि तान्येकत्र उपलभ्यमान[१]पृथक्त्वानि आराच्चिमित्ताद्भेदं नोपलभयन्ति भेदानुपलम्भे भिन्नवस्तुन्यभिन्नप्रत्ययः न च[२] परमाणवः केनचिदुपलभ्यन्ते कस्मादतीन्द्रियत्वादणूनामिति ॥

अतीन्द्रियाः परमाणव इति प्रतिपादितमेतत्। यस्त्वैन्द्रियकः पदार्थः स उपलभ्यमानपृथक्त्व आरात् पृथक्त्वस्याग्रहणे अभेदप्रत्ययनिमित्तं भवति। यथोपलभ्यमानजातीयानामाराच्च जातिग्रहणमुपलभ्यमानप्रस्यन्दानां च नारात् प्रस्यन्दग्रहणमिति। गृह्यमाणाग्रहणस्यान्यनिमित्तत्वात्। यच्चेदं गृह्यमाणस्य पदार्थस्याग्रहणं तदन्यनिमित्तं दृष्टम्, यथा तेषामेव सेनावनाङ्गानाम्, न तु परमाणवो गृह्यन्ते तेषामतीन्द्रियत्वात् तस्मान्न तेषामन्यनिमित्तमग्रहणमिति। अनुपजातविशेषाणां च बुद्धिभेदाहेतुत्वाद्विरोधः यस्य परमाणवो घटादिबुद्धिहेतवो भवन्ति स चेदं प्रष्टव्यः किं परमाणव उपजातविशेषा बुद्धिभेदं कुर्वन्ति उतानुपजातविशेषा इति। किं चातः यद्युपजातविशेषाः योऽसौ विशेषः सोऽवयवीति प्राप्तम्, अथानुपजातविशेषाः त एवातीन्द्रिया ऐन्द्रियकाश्चेति महान् विरोधः। विशेषः

---

(१) अनुपलभ्यमानेति साधुः।

(२) भेदानुपलब्धेर्भिन्ने वस्तुनि अभेदप्रत्ययः न तु—पा० ६ पु०।

संयोगः परमाणूनां ते परस्परप्रत्यासत्तौ सत्यां संयोगोपकरणा उपलक्ष्यन्त इति नातीन्द्रियत्वादणूनां[१] संयोगः प्रत्यक्षो भवितुमर्हति । भवति ह्यौदमनेन संयुक्तमिति । तस्मान्न संयोगो विशेषः । यश्चायमनेकस्मिन्नेकप्रत्ययः स मिथ्याप्रत्ययो मिथ्याप्रत्ययनिमित्तं च सामान्यदर्शनं विशेषानुपलब्धिः[२] न चातीन्द्रियत्वादणूनां सामान्यदर्शनमस्ति तद्भावे कुतो विशेषादर्शनम्, सामान्यदर्शने विशेषादर्शने वाऽसति न तद्विपरीतधर्माध्यारोपः । न च निमित्तमन्तरेण नैमित्तिकस्य मिथ्याप्रत्ययस्य प्रादुर्भावो युक्त इति । एतेन भाक्तश्चौपमिकश्च प्रत्ययो व्याख्यातः । भक्तिर्नामातथाभूतस्य तथाभाविभिः सामान्यम्, उभयेन भज्यत इति भक्तिः यथा वाह्लीकस्य मन्दामन्तःसञ्ज्ञामुपादाय वाह्लीको गौरिति न तदतीन्द्रियत्वात् परमाणूनामस्ति । उपमानप्रत्ययोऽपि न युक्तः । अतद्भाविनस्तद्भावि-भिरसामान्यात् यस्यातथाभूतस्य तथा भाविभिः सामान्यं तत्रोपमानप्रत्ययो युक्तः यथा सिंहो माणवक इति सिंह इव सिंहः किं पुनरत्रोपमीयते सौर्यम्, न तु परमाणूनामतीन्द्रियत्वान्मिथ्याप्रत्ययानां निमित्तमस्तीति । मिथ्याप्रत्यया अपेते न भवन्ति प्रधानाभावात् । इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेत् । अथ मन्यसे श्रोत्रादिविषयेष्वेकादिप्रत्ययाः प्रधानं भवन्ति तदभावे तु मिथ्याप्रत्यया इति विशेषहेत्वभावाद्दृष्टान्ताव्यवस्था । एवं सति दृष्टान्तोपादानं न व्यवतिष्ठते तस्मिँस्तदितिप्रत्ययः अतस्मिँस्तदिति

---

(१) नातीन्द्रियाणां—इत्यधिकम् ६ पु० ।

(२) अविद्यमानविशेषदर्शनद्वारेणाध्यारोपितनद्विपरीतधर्मारोप इत्यधिकं १ पु० ।

च प्रत्ययः। अस्ति चायं परमाणुषु सञ्चितेषु तदितिप्रत्ययः स च किमतस्मिँस्तदिति आहोस्विन्नेति[१] सन्दिह्यते शब्दादिष्वेकप्रत्ययः प्रधानम् घटादिष्वेकप्रत्ययो मिथ्याप्रत्यय इति ब्रुवाणो घटादीनभ्युपैति न ह्यनभ्युपगतेषु घटादिषु शब्दादिसामान्यमेकप्रत्ययबीजं घटस्यास्ति। अथ मन्यसे नास्माभिर्घटादयोऽप्यभ्युपगम्यन्ते किन्तु परमाणूनां सञ्चितानां शब्देन सामान्यादेकप्रत्ययोत्पत्तिनिमित्तत्वमिति। तत्रोक्तम् नातीन्द्रियत्वादणूनामिति। यांश्च शब्दादीन् प्रधानप्रत्ययनिमित्तत्वेन भवान् प्रतिपद्यते तेऽपि सञ्चिता एव सञ्चितत्वात् तेष्वप्ययमेकप्रत्ययो न युक्तः शब्दादिषु चैकप्रत्ययः समुच्चयनिवृत्तिनिमित्त एकत्ववद्द्रव्यसामान्याद्भाक्तः यान्येकत्ववन्ति द्रव्याणि तेषां समुच्चयनिवृत्तिर्धर्मः अस्ति च शब्दादिषु समुच्चयनिवृत्तिः तेनैकत्ववद्द्रव्यसामान्याच्छब्दादिष्वेकप्रत्ययो भाक्तः। सर्वत्र समुच्चयनिवृत्तिनिमित्त एवेति चेत् न द्वे इत्यत्रैकानेकमतौ सन्देहो न स्यात्। यदि सर्वत्रायं[२] समुच्चयनिवृत्तिनिमित्त एवैकप्रत्ययो भवति न द्वे इत्यत्र किमेकमनेकमिति द्विप्रतिषेधसामान्यात् सन्देहो न स्यात् सति च सन्देहे एकमिति नियमार्थम् यतो नियमस्तदेकत्वम्, यतस्त्यादिप्रत्ययास्ते त्रित्वादय इति। एवं द्वित्वादिप्रत्यया अपि शब्दादिषु समुच्चयनिमित्ता द्रष्टव्याः कस्माद्द्वित्वादिमद्द्रव्यसामान्याद्द्वित्वादिमता द्रव्येण शब्दादीनां समुच्चयः समानः। सर्वत्र समुच्चयादेवेति चेत् नैकमित्यत्र सामान्यमतौ न संशयः स्यात् यदि समुच्चयनिमित्तत्वाद् द्व्यादिप्रत्यया भवन्ति नैकमिति प्रतिषेधे द्वे

(१) आहो तस्मिन्नेति—पा० ६ पु०। (२) सर्वोऽपि—पा० ६ पु०।

चीणीति सामान्यमतौ न संशयः स्यात् तस्माद्यतो व्यवस्था ते द्वित्वादय इति । यः पुनरेकत्वं द्वित्वादींश्च न प्रतिपद्यते तस्य न समुच्चयो न समुच्चयनिवृत्तिः अनभ्युपगतैकत्वस्य समुच्चयः कस्य अनभ्युपगतद्वित्वस्य च कस्य प्रतिषेधः एकद्वित्वादींश्चार्थान्तरभूताननभ्युपगच्छत एकं शतं एकं द्वित्वमित्येकप्रत्ययो न स्यात् । भेदाग्रहाच्च शब्दादिष्वेकप्रत्ययः । यस्माच्छब्दादिषु भेदो न गृह्यते उपलभ्यमानेष्वतस्तेषु अभेदप्रत्ययः न पुनः परमाणुष्वभेदग्रहणस्य निमित्तमस्त्यतीन्द्रियत्वादणूनामित्युक्तम्, उदाहरणमात्रत्वाच्चैकप्रत्ययपर्यनुयोगस्यैकप्रत्ययवदनेकप्रत्ययमप्यनुयोक्तव्यः(१) । योऽवयविनमर्थान्तरं न प्रतिपद्यते तस्य यथैकप्रत्ययोऽनुपपन्नस्तथानेकप्रत्यया अपि न प्राप्नुवन्ति । यथा चैकानेकप्रत्ययान् एवं घटादिप्रत्ययान् पर्यनुयोज्य इति । एवं परिमाणसंयोगप्रस्पन्दजातिविशेषप्रत्ययानपि पर्यनुयोज्यः तेषु चैवं प्रसङ्गः । यद्यवयविनमर्थान्तरं न प्रतिपद्यसे महदिति संयुक्त इति वाऽश्वो गच्छतीति प्रत्यया न प्राप्नुवन्ति न ह्यतीन्द्रियेषु परमाणुषु एते प्रत्यया युज्यन्त इति । किमेते एकादिप्रत्यया अणुसञ्चयमात्रे आहोस्विदर्थान्तरभाव इति सन्दिह्यते सन्देहे सति विशेषहेतुर्वक्तव्य इति । अयं विशेषहेतुर्महत्प्रत्ययसामानाधिकरण्यादेकप्रत्ययो महति यः खलु यत्समानाधिकरणः प्रत्ययो दृष्टः स तद्धर्मयुक्तो भवति यथा नीलमुत्पलमिति उभयधर्मयोगिनि नीलोत्पलप्रत्ययः प्रवर्तते अस्ति च महत्सामानाधिकरण्यमेकप्रत्ययस्य तस्मान्महत्येकप्रत्ययः । अणुसमूहातिशयग्रहणमिति चेत् ।

(१) प्रत्ययं लक्षीकृत्येति बोध्यम् । एवमग्रेऽपि ।

अथ मन्यसे नास्माभिरर्थान्तरभूतोऽवयव्यभ्युपगम्यते अपि त्वणुसमूह-मुपलभ्याणुसमूहान्तरेऽतिशयं दृष्ट्वतो महत्प्रत्ययो भवति। सोऽय-मतस्मिँस्तदिति प्रत्यय इति पूर्ववत्प्रसङ्ग इति। अमहत्त्वाणुत्वमहत्सु चाणुसमूहेषु योऽयं महत्प्रत्ययः सोऽतस्मिँस्तदिति मिथ्याप्रत्ययः मिथ्याप्रत्ययश्च प्रधानमन्तरेण न भवतीति पूर्ववदेव प्रसङ्गः। अणुः शब्दो महानिति व्यवसायात् प्रधानसिद्धिरिति चेत्। अथ मन्यसे महान् शब्दोऽणुः शब्द इति शब्दे दृष्टो महदणुप्रत्ययः प्रधानमन्यत्र महदणुप्रत्ययस्येति न मन्दतीव्रताग्रहणमियत्तानवधारणात् न शब्दे महत्त्वं नाणुत्वं गुणत्वात् अणुमहत्प्रत्ययस्तर्हि शब्दे न प्राप्नोति। न न प्राप्नोति। अन्यनिमित्तत्वात्। किं निमित्तं मन्दता तीव्रता च कस्मादियत्तानवधारणात् न ह्ययं महान् शब्द इति व्यवस्यन्नि-यानित्यवधारयति। यथा कुवलामलकविल्वान्यवधारयन् कुवला-दामलकं महत् आमलकाच्च महद्विल्वम् तानि चेयत्तया परि-च्छिनत्ति इयत्परिमाणमेतदिति न पुनः शब्देषु तदस्ति शब्देष्वपि पूर्वावधृतं शब्दमुपलभ्य तस्माच्छब्दादयं महानणुर्वेति अवधार्यते नावधारणं प्रतिषिध्यते। इदन्तु चिन्त्यते। योऽयं शब्दे ऽणुमहत्प्रत्ययः किमयं[१] परिमाणयोगादुतान्यस्मान्निमित्तादिति। अन्यस्मान्निमि-त्तादिति युक्तम्। गुणस्य गुणान्तरसम्बन्धानुपलब्धेः। न हि गुणस्य गुणान्तरसम्बन्धो दृष्टः यतः परिमाणसम्बन्धोऽपि गम्येत महत्प्रत्ययादेव गुणवान् शब्दो द्रव्यवदिति चेत् न। अथायं महत्प्रत्ययो द्रव्येषु भवन्महत्परिमाणयोगाद्भवति। शब्देऽपि चायं महत्प्रत्ययो भवति।

(१) ब किं—पा० ६ पु०।

अतो महत्प्रत्ययविषयत्वान्महत्परिमाणयुक्तः शब्द इति । नानैकान्तात् । महत्प्रत्ययविषयत्वे सत्यपि महत्परिमाणयोगो न दृष्टः । यथा महत्परिमाण इति । द्रव्ये तर्हि महत्प्रत्ययः कथम्, यदि तावन्महत्प्रत्ययविषयत्वे सत्यपि महत्परिमाणयोगं न प्रतिपद्यसे महत्परिमाणयुक्तं द्रव्यमित्येतत् कथम्, न महत्प्रत्ययविषयत्वात् महत्परिमाणयुक्तं द्रव्यम् । अपि तु महत्परिमाणयोगे सति महत्प्रत्ययो द्रव्य इति। महत्परिमाणयोगस्तु द्रव्यस्य विशेषप्रत्ययानामनाकस्मिकत्वेन । यदि विशेषप्रत्ययानामनाकस्मिकत्वेन महत्परिमाणयोगो द्रव्ये शब्देऽप्येवम्, शब्दस्य महत्प्रत्ययोऽस्ति तेनापि नाकस्माद्भवितव्यम् । कस्यैवमाह शब्देऽप्ययमाकस्मिक इति। किंनिमित्तो मन्दतीव्रतानिमित्तः मन्दता तीव्रता च शब्दधर्मः अतोऽणुमहत्प्रत्ययः शब्दे इति । का पुनरियं मन्दता तीव्रता च अणुद्रव्यसामान्यात् सामान्यप्रत्ययविषयत्वं[१] मन्दता महद्द्रव्यसामान्याच्च सामान्यप्रत्ययविषयत्वं तीव्रता पाटवमिति । संयुक्ते इति द्वित्वसमानाश्रयं प्राप्नियद्गणमवयविनः प्रतिपादकम्, कथमिति संयुक्तमहत्प्रत्ययावेकविषयौ प्रतिसन्धानान्नीलोत्पलादिप्रत्ययवत् यथा च नीलमुत्पलं चेति प्रतिसन्धीयमानौ प्रत्ययावेकविषयौ भवतः तथा संयुक्ते महती इति च प्रतिसन्धानमस्ति तस्मात् प्रतिसन्धानादेकविषयाविति। एतेनैकं महच्चलति खदिर इति प्रत्यया व्याख्याताः। समुदायद्वयापेक्ष इति चेत् । अथ मन्यसे द्वौ समुदायावाश्रित्य संयुक्तमहत्प्रत्ययौ भवतः। तथैकादिमहत्प्रत्यया अप्येकसमुदाया[२]पेक्षा

(१) सामान्यविशेषप्रत्ययविषयत्वं—पा० १ पु० । (२) एकादिसमुदाया—पा० ६ पु० ।

इति चेन्न। विकल्पानुपपत्तेः। समुदायापेक्षाः संयुक्तमहदादिप्रत्यया इति कोयं समुदायः किमनेकः समुदायुतानेकस्य प्राप्तिरिति। अनेकस्य प्राप्तिः समुदाय इति चेत् प्राप्तौ प्राप्ते इति प्रत्ययः स्यात् किं कारणम्, समुदायस्य प्राप्तित्वेनाभ्युपगमात्। इमे वस्तुनी संयुक्ते इति न स्यात् समुदायः समुदायान्तरप्राप्तावेकीभूत इति प्राप्तिप्रत्ययो न स्यात् समुदायस्यैकत्वात्। अथानेकः समुदायी समुदायो द्वित्वेन सामानाधिकरण्यं न स्यात् संयुक्ते इमे वस्तुनी इति द्वित्वसमानाधिकरणः प्रत्ययो न स्यात् तस्मान्महती द्वित्वाश्रयभूते द्रव्ये संयोगस्य स्थानमिति। न संयोगोऽस्तीति चेत् उक्तमत्र यथार्थान्तरं संयोग इति। इदं चावयवसमुदायवादी प्रष्टव्यः। योऽयं गौरश्वः पुरुष इति जातिनिमित्तः प्रत्ययः स क्व भवतीति नैव जातिरस्ति कुतो जातिनिमित्तः प्रत्ययो भविष्यतीति। जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्याप्रत्याख्यानं न जातिविशेषमन्तरेण प्रत्ययानुवृत्तेर्निमित्तमस्ति न च निर्निमित्तः प्रत्ययो नामा स्थातुमर्हति। अस्ति चायमनुवृत्तः प्रत्ययः इमानि कुण्डलानीति(१)। अस्ति च व्यावृत्तिप्रत्ययो नेमानि कुण्डलानीति(२) तस्माज्जातिविशेषो न प्रत्याख्येयः व्यधिकरणस्यानभिव्यक्तेरधिकरणवचनम्(३) न चायं जातिविशेषो व्यधिकरणो व्यज्यत इत्यधिकरणमवश्यं वक्तव्यम्, अणुसमवस्थानमधिकरणमिति। अथ मन्यसे परमाणव एव केनचि(४)त्समवस्थानेनावतिष्ठमानास्तां तां जातिं व्यञ्जयन्त्यतो नावयवी सिध्यतीति तत्र ताव-

(१) कुण्डानीति—पा० ६ पु०। (२) कुण्डानीति—पा० ६ पु०।
(३) अधिकरणमिति चेत्—पा० ६ पु०। (४) एकेन चित्—पा०६ पु०।

दुक्तम् समवस्यानं संयोगोऽर्थान्तरमिति। यच्च तत्समवस्यानं जातिविशेषं व्यनक्तीति मन्यसे किं तच्चक्षुषा प्राप्तं व्यनक्त्याहोस्विदप्राप्तमिति। प्राप्तं व्यनक्तीति चेत् मध्यभागपरभागयोरप्राप्तत्वादनभिव्यक्तिः(१)। स यदि प्राप्ते समवस्याने जातिविशेषो व्यज्यते मध्यभागपरभागयोरर्वाग्भागव्यवधानादप्राप्तावनभिव्यक्तिः यावत्प्राप्तं तावति व्यक्तिरिति चेत् न तावतोऽधिकरणत्वम्। अथ मन्यसे यावच्चक्षुषा समवस्यानं प्राप्तं तावति भवति जातिव्यक्तिः तावदेव तर्ह्यधिकरणं जातेः प्राप्तम्, एवं सति प्रतीयमानभेदः योऽयं वृक्ष इति समुदायः प्रतीयते तस्य वृक्षस्य भेदः प्राप्नोति। किं कारणम्। यावति यावति जातिर्व्यज्यते स स वृक्ष इति प्राप्नोति ततश्चैको वृक्षोऽनेक इति प्रतीयेत इत्येकप्रत्ययो न स्यात्। अर्वाग्भागस्य चावृक्षत्वात् न क्वचिद्वृक्षत्वमिति वृक्षबुद्धेर्विषयो वक्तव्यः तस्मात् समुदिताणुस्थानार्थान्तरस्य जातिविशेषाभिव्यक्तिहेतुत्वादवयव्यर्थान्तरभूत इति। समुदिता अणवः स्थानं यस्य सोऽयं समुदिताणुस्थानः समुदिताणुस्थानञ्चासावर्थान्तरं च तस्य जातिविशेषव्यक्तिहेतुत्वं नाणूनामिति सिध्यत्यवयव्यर्थान्तरभूतः अनभ्युपगतार्थान्तरावयविना परमाणुशब्दस्यार्थो वक्तव्यः। परमाणुशब्दस्य परमापकर्षवाचित्वात्। न ह्यसति महति न चासत्यणौ परमाणुरिति विशेषणं युक्तम्। परिमाणप्रकर्षयोगे सति परमाणुरिति विशेषणमर्थवत् असत्यनर्थकमिति। स चायं परिमाणप्रकर्षयोगः सत्यवयविनि सिद्ध्यतीति

---

(१) अप्राप्तावनभिव्यक्तिः—पा० ६ पु०।

सत्त्वरजस्तमसां सर्वापकृष्टः संघातः परमाणुरिति कस्यचिद्दर्शनम् तन्न युक्तमिति पश्यामो व्याघातात् सर्वापकृष्टः संघातश्चेति व्याहतः न हि संहन्यमानमन्तरेण संघातः सम्भवति अर्थान्तरं पटात्तन्तवः तद्धेतुत्वात् तुर्यादिवदिति। तुर्यादिपटकारणमर्थान्तरमिति दृष्टम्। तथा च तन्तवस्तस्मादर्थान्तरमिति। सामर्थ्यभेदाद्विषागदवत् भिन्नप्रत्ययविषयत्वाद्रूपस्पर्शवत्। तन्तुपटरूपे भिन्नकारणे विशेषवत्त्वाद्रूपस्पर्शवत्। एके तु भिन्नरूपत्वादित्येवं हेतुं कृत्वा परमाणुना प्रत्यवतिष्ठन्ते। एकस्मिन्नपि परमाणौ रूपभेदो दृष्टः रक्तः श्याम इति च। स त्वेवं प्रत्यवस्थेयो न हेत्वर्थापरिज्ञानात्। न ब्रूमो भिन्नरूपत्वादन्योऽवयव्यवयवेभ्यः अपि तु तन्तुपटरूपे भिन्नकारणे इति पचयित्वा विशेषवत्त्वादिति हेतुं ब्रूमः। तथा चायमप्रतिषेधः बहुग्रन्थविस्तारिणी त्वेषा कथेत्युपरम्यते परम्परया परीक्षितं प्रत्यक्षम्॥

अथेदानीमवसरप्राप्तमनुमानं परीक्ष्यते। किमिदमनुमानम्। उक्तं तत्पूर्वकमनुमानमिति। अत्र च पूर्ववदादेरुदाहरणानि। नदी पूरः पिपीलिकाण्डसञ्चरणं मयूरव्यंसितमिति। उदाहरणव्यभिचारद्वारकं सूत्रम्॥

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम्॥ ३५॥

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणमिति। तत्र रोधो नाम द्रवत्वप्रतिबन्धहेतुः उपघातः पिपीलिका गृहोपद्रवः

सादृश्यं मयूरशब्दपुरुषशब्दयोः समानप्रत्ययकर्तृत्वमेभ्यो व्यभिचारादनुमानमप्रमाणमिति। शेषं भाष्ये। यत्तावदनुमानमप्रमाणमित्युक्तं तदयुक्तम्। प्रतिज्ञापदयोर्व्याघातादनुमानमिति सम्बद्धस्यातीन्द्रियार्थसाधकस्येतन्नाम। अप्रमाणमिति तस्य प्रतिषेधः। सोऽयं प्रतिज्ञापदयोर्व्याघातः अनुज्ञातप्रतिषिद्धयोरेकत्वानुपलब्धिः प्रतिज्ञाहेत्वोश्च विरोधः अनुमानमप्रमाणमिति प्रतिज्ञा रोधोपघातसादृश्येभ्यो व्यभिचारादिति हेतुः। यद्व्यभिचारि तदप्रमाणमिति। यथा गोसिद्धौ विषाणित्वं सोऽयं हेतुः प्रतिज्ञां व्याहन्ति प्रतिज्ञा च हेतुमिति। यच्चेदमुच्यते अनुमानमप्रमाणमिति तत्किमनुमानमात्रस्याप्रमाणत्वमुतानुमानविशेषस्येति। किं चातः यद्यनुमानमात्रमप्रमाणमिति पक्षः हेतोरेकदेशवृत्तित्वाद्व्यापकत्वम्। समस्तमनुमानं पक्षितं न सर्वस्मिन्ननुमाने व्यभिचारोऽस्ति। न हि व्यभिचारस्याप्रमाणत्वसाधकस्याव्यभिचारः शक्यः न हि व्यभिचारेऽव्यभिचारस्य किञ्चित् प्रमाणमस्तीत्यव्यापकत्वादहेतुः। अथ यद्व्यभिचारि तदप्रमाणमिति ब्रूषे प्रतिज्ञाविशेषणत्वाद्धेतोर्हेत्वन्तरं रचनीयम् सिद्धसाधनं चैतत् यद्व्यभिचारि तत्प्रमाणं न भवति। यान्यप्येतान्युदाहरणानि भवता व्यभिचारीणीत्युच्यन्ते तेष्वपि व्यभिचारो नास्तीत्यसिद्धतोद्भावनद्वारकं सूत्रम्॥

नैकदेशचाससादृश्येभ्योऽर्थान्तरभावात्॥ ३६॥

नैकदेशचाससादृश्येभ्योऽर्थान्तरभावात्। यत्तावद्रोधादपि नदीपूरो भवतीति नात्र नदीपूरमात्रेणोपरि वृष्टिमद्देशसम्बन्धित्वं

नद्याः साध्यते अपि तु पूरविशेषे वा तस्याव्यभिचारादसिद्धः उपघातात् पिपीलिका[१]ण्डसञ्चारमात्रस्य च व्यभिचारो न सञ्चरणविशेषस्य कः पुनरसौ विशेषः । अविच्छिन्नानां भूयसीनां भूयःसु स्थानेषु पिपीलिकापिण्डभूयस्त्वेनोर्ध्वसञ्चारणं यत्तदनागतवृष्ट्यविनाभावि शब्दव्यभिचारोऽपि नास्ति यस्मान्न शब्दमात्रमनुमानम् मयूरास्तित्वे न चात्र मयूरः साध्यते अपि तु शब्दगताद्विशेषात् पक्ष्यनुषङ्गादेः[२] शब्द एव मयूरविशिष्टोऽनुमीयते एवं हि व्यभिचारो नास्तीत्यसिद्धो हेतुः। त्रिकालविषयमनुमानंत्रैकाल्यग्रहणादित्युक्तम् तच्च तावत्काल एव नास्तीति केचित् । तच्च न प्रमाणाभावात् न हि कालासत्त्वे प्रमाणमस्तीति । ननु चानुपलब्धिः कालासत्त्वं प्रतिपादयति न प्रतिपादयति व्यभिचारात् त्रिकारणेयमनुपलब्धिः तच्चानुपलब्ध्या कारणवैकल्यं गम्येत न त्वनुपलभ्यमेव नास्तीत्येतदेव कुतः । अथोपलभ्यमानस्याभावादनुपलब्धिरित्ययं प्रतिज्ञार्थः तथा च हेतुर्नास्ति प्रतिज्ञार्थेनाविशिष्टत्वात् अविशिष्टो हेतुः प्रतिज्ञार्थो नेति । न चासति धर्मिणि धर्मः सम्भवति आश्रयाभावात् । अथ धर्मोऽपि नास्ति साधनार्थो हीयते न ह्यसतः साधनार्थं पश्यामः परापरादिप्रत्ययानां च सनिमित्तत्वात्कालप्रतिषेधो न युक्तः यश्च कालं न प्रतिपद्यते तेन परापरादिप्रत्ययानां निमित्तं वक्तव्यम् । न ह्यसति निमित्ते नैमित्तिकान् कालविशेषवतः प्रत्ययान् पश्यामो रूपादिप्रत्ययवदिति । कालैकत्वात् प्रत्ययभेदानुपपत्तिरिति चेत् ।

---

(१) पिपीडिका—पा० १ पु० । एवं सर्वत्र । (२) पक्षाङ्गादेः—पा० १ पु० ।

अथ मन्यसे कालैकत्वे सति न युक्तः परापरादिप्रत्ययभेदो नाभिन्ननिमित्तं भिन्नकार्यं करोतीति न सापेक्षत्वात् । पित्रादिप्रत्ययभेदवदिति । यथैकस्मिन् पुरुषे अनेकसम्बन्धभेदानुविधायिन्यभिन्ने पिता पुत्रो भ्रातेति प्रत्यया भवन्ति तद्वदेकः कालः कार्यकारणविशेषापेक्षः परापरादिप्रत्ययहेतुरिति । एवमुपपादितः कालः । तस्योपपन्नस्य वर्तमानकालप्रतिषेधार्थं सूत्रम् ॥

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः॥३७॥

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः । वृन्ताच्च्युतस्य फलस्य भूमिं प्रत्यासीदतः यदूर्ध्वं फलमवधिं कृत्वा यावद्वृन्तमिति स पतितोध्वा यदधस्तात् पततमवधिं कृत्वा यद्भूमिरिति स पतितव्योध्वा नेदानीं तृतीयोध्वा विद्यते यत्र पततीति स्यात् । न चाध्वानमन्तरेण काले व्यक्तिहेतुरस्ति तस्माद्वर्तमानः कालो नास्तीति वर्तमानः कालो नास्तीति ब्रुवन्नभ्युपगतौ कालौ बाधते । एतदनुज्ञापनार्थं सूत्रम् ॥

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात्॥ ३८॥

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् । वर्तमानसापेक्षावितरौ कालौ यस्य वर्तमानो नास्ति तस्य वर्तमानानभ्युपगमेऽभ्युपगतयोः कालयोरभाव इति । न चायं कालोऽध्वव्यङ्ग्यः किं तर्हि क्रियाव्यङ्ग्यः पततीति यदा द्रव्यक्रियासम्बन्धमुपलभते सोऽयं सम्बन्धविशिष्टः कालो वर्तमान उच्यते क्रियासम्बन्धातिक्रमादतीतः यदा तु क्रियाकारणान्यभिमुख्येनावस्थितान्यप्रतिबद्धशक्तिकानि तदा भवि-

ष्यति क्रियेत्यनागतः काल इति । यदि चायं वर्तमानां क्रियां न प्रतिपद्यते कस्मादतीतामनागतां च प्रतिपद्यते न कालोऽतीतः न फलमतीतम् । कालस्य सर्वदा वर्तमानत्वात् फलस्य चापतत्यतति पतिष्यतीति क्रियाविशेषणत्वेन प्रत्ययविषयत्वात् क्रियायां सम्भवो न फले इति क्रिया कालाभिव्यक्तिनिमित्तं नाध्वा गन्तव्यस्य तादवस्थ्यात् योऽसौ गन्तव्यो देशः स यथाभूत एवानुत्पन्नक्रिये फले तथा तथाभूत एवोत्पन्नक्रिय इत्यभेदान्नाध्वा कालव्यक्तिहेतुः । अथ मन्यसे वर्तमानकालानभ्युपगमेऽतीतानागतावितरेतरापेक्षौ सेत्स्येते एतत्प्रतिषेधार्थं सूत्रम् ॥

नातीतानागतयोरितरेतरापेक्षा सिद्धिः ॥ ३९ ॥

नातीतानागतयोरितरेतरापेक्षा सिद्धिरिति । न ह्यतीतानागतावितरेतरापेक्षौ सिद्ध्यतः । कथमिति वर्तमानाभावे किमतीतं कथं चेति किमनागतं कथं चेति न शक्यते वक्तुमव्याकरणीयमेतद्वर्तमानलोप इति । विशेषप्रतिषेधाच्च । वर्तमानोऽभ्युपगतः यस्मादयं प्रतिषेधः पतनः पतितपतितव्यकालोपपत्तिरिति । न च वर्तमानकालानभ्युपगमे-पतत इति पदस्यार्थोऽस्ति न चैतत्पदार्थानभ्युपगमे पतत इति युक्तं वक्तुम् । सोऽयं व्याघातो वर्तमानश्च नास्ति पतत इति च प्रयोगः न चेतरेतरापेक्षया कस्य चित् सिद्धिरिति । यस्मादेकाभावेऽन्यतराभावाद् द्वयाभावः । यदीतरेतरापेक्षया सिद्धिः स्यात् यावदितरं नास्ति तावदितरं नास्तीत्युभयोरभावः अर्थसत्ताव्यङ्ग्यश्च वर्तमानकालो विद्यते गुणो विद्यते कर्मेति यस्य चायं नास्ति तस्य ॥

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ४० ॥

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः। सूत्रार्थोऽविरोधः कथं पुनर्वर्तमानाभावे प्रत्यक्षानुपपत्तिर्यस्मादिदं प्रत्यक्षं वर्तमानाधारं कार्यत्वात् क्षीरवदिति। यत्कार्यं तद्वर्तमानाधारं दृष्टम् यथा क्षीरं कार्यं च प्रत्यक्षम् तस्माद्वर्तमानाधारमिति । वर्तमानकालानभ्युपगमादनाधारं प्रत्यक्षं प्राप्नोति । अनाधारं च कार्यं नास्तीति प्रत्यक्षानुपपत्तिः प्रत्यक्षानुपपत्तेश्च सर्वप्रमाणलोपः सर्वप्रमाणलोपे च सर्वस्य ग्रहणं न स्यात्। अस्ति च सर्वस्य ग्रहणं सर्वस्य ग्रहणात् पश्यामोऽस्ति वर्तमानः प्रत्यक्षनिमित्तं प्रत्यक्षविषयः प्रत्यक्षं चेति सोऽयं वर्तमानः काल इति उपपन्नश्च सन् द्वेधा विभिद्यते क्वचित् क्रियामात्रव्यङ्ग्यः क्वचित् क्रियासन्तानव्यङ्ग्यः क्रियामात्रव्यङ्ग्यो विद्यते द्रव्यमिति क्रियासन्तानव्यङ्ग्यः पचति छिनत्तीति । क्रियासन्तानोऽपि द्वेधा भवति एकाकारक्रियो नानाकारक्रियश्चेति । एकाकारक्रियश्छिनत्तीति । तत्र ह्युद्यम्योद्यम्य निपातक्रिया एकाकारा नानाकारक्रियश्च सन्तानः पचतीति । तत्र ह्यनेका क्रिया अनेकाकारा तद्यथेधोपसर्पणमग्न्यभिज्वालनम् स्थाल्यधिश्रयणमुदकासेचनम् तण्डुलपचनं दर्वीघटनमधश्रावणमवतारणमिति। स ह्येवंभूतः क्रियासन्तानः पचतीत्यनेनैकशब्देनाभिधीयते क्रियासन्तानस्य ह्यचाविच्छेदो विवक्षितो नानारम्भो नोपरम इति सन्तानानारम्भविवक्षायां पच्यतीत्युपरमविवक्षायामपाचीदिति । यच्चेदं छिद्यमानं पच्यमानं तत् क्रियमाणं तस्मिंश्चक्रियमाणे ॥

क्षततताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ॥ ४१ ॥

क्षततताकर्तव्यतोपपत्तेरुभयथाग्रहणम् । कस्य वर्तमानस्य । कथमुभयथा । केवलस्य चापदृक्तस्यातीतानागताभ्यां सम्पृक्तस्य च ताभ्यामिति । क्व पुनह्यपदृक्तस्य विद्यते द्रव्यमित्यत्र हि केवलः शुद्धो वर्तमानोऽभिधीयते पचति क्षिनत्तीत्यत्र सम्पृक्तः कथं काश्चिदत्र क्रिया व्यतीताः काश्चिदनागताः एका च वर्तमाना इति । अन्यस्य लोके प्रत्यासत्तिप्रभृतेरर्थस्य विवक्षायामनेकप्रकारो वर्तमानस्य प्रयोगः । कदाचिदयं वर्तमानमतीते प्रयुङ्क्ते आगतः सन् ब्रवीत्येष आगच्छामीति कदाचिदनागते प्रयुङ्क्ते यथा स्थितः सन् ब्रवीत्येष गच्छामीति । एवमन्येषु प्रयोगेषूत्प्रेक्षितव्यमिति ॥

अथेदानीमुपमानमवसरप्राप्तं परीक्ष्यते । किं पुनरुपमानं प्रसिद्धसाधर्म्यात् साध्यसाधनमित्युक्तम् तस्याक्षेपः ॥

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ ४२ ॥
प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः॥४३॥

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिरिति । नात्यन्तसाधर्म्यादुपमानं भवति यथा गौरेवं गौरिति । भूयः साधर्म्यादपि नोपमानं सिद्ध्यति न हि भवति यथा गौरेवं महिष इति । एकदेशसाधर्म्यादपि न भवति यथा मेरुस्तथा सर्षप इति । न चान्या गतिरस्ति तस्मान्नोपमानं सिद्ध्यति । अत्यन्तादिसाधर्म्यादुपमानप्रतिषेधान्नोपमानप्रतिषेधः । यदत्यन्तप्रायैकदेशसाधर्म्यादुपमानं

तत्प्रतिषिद्ध्यते तेन सूत्रेण न पुनरुपमानमात्रस्य प्रतिषेधः। एवं सत्यन्यथोपमानं तत्स्वरूपं वक्तव्यम्। अथ नैवान्यथोपमानस्य स्वरूपमस्तीति मन्यसे कथं तर्हीदं वाक्यं(१) अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिरिति। अनभ्युपगच्छता ह्युपमानमेवं वक्तव्यम्, उपमानं न प्रमाणमर्थाप्रतिपादकत्वादिति। प्रसिद्धसाधर्म्यस्य वैधर्म्यस्य चोपमानहेतुत्वाद्प्रतिषेधः। योऽयं भवता प्रतिषेधः क्रियते अत्यन्तादिसाधर्म्यादुपमानं न सिद्ध्यतीत्ययमनुपपन्नोऽनभ्युपगमात्। कः खल्वेवमाह अत्यन्तादिसाधर्म्यादुपमानमिति अपि तु प्रसिद्धसाधर्म्यादुपमानम्, साध्यसाधनभावमाश्रित्य तथा चायमप्रतिषेधः सर्वथाभावाच्चात्यन्तसाधर्म्याद्प्युपमानं सिद्ध्यति तत्क्रिययैव तत्क्रियोपमीयते। यथा रामरावणयोर्युद्धं रामरावणयोरिवेति। भूयः साधर्म्येणापि भवति यदा गोर्बलजिज्ञासा भवति तदा भूयः साधर्म्येणोपमानम् यथा महिषस्तथा गौरिति। एकदेशसाधर्म्यादपि भवति यदा तु सन्मात्रजिज्ञासानिमित्तं भवति मेरोः सत्ता किं रूपेति यथा सर्षपस्य तथा मेरोः तस्माद्प्रतिषेधोऽयमिति। अस्तु तर्ह्युपमानमनुमानम् ॥

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४४ ॥

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामइति(२) ॥४५॥

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ४६ ॥

---

(१) वाचम् — पा० १ पु०। (२) 'इति'शब्दो नास्ति द्वयोः।

प्रत्यक्षेणाप्रत्यक्षसिद्धेः। यथा प्रत्यक्षेण धूमधर्मेणोर्द्वगत्यादिनाऽप्रत्यक्षो धूमधर्मोऽग्निरनुमीयते तथा प्रत्यक्षेण गवाऽप्रत्यक्षस्य गवयस्य प्रतिपत्तिरित्यप्रत्यक्षार्थप्रतिपादकत्वादुपमानमनुमानमिति। नापरिज्ञानात्। न भवतोपमानलक्षणं व्यज्ञायि॥

न चाप्रत्यक्षे गवये उपमानार्थं पश्यामः। अथ प्रत्यक्षे गवये क उपमानार्थः यासौ सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तिः स उपमानार्थः। एवं नोपमानमागमो न प्रत्यक्षम् न ह्ययमागमात् प्रत्यक्षाच्चायं गवय इति संप्रतिपद्यते। परार्थत्वाच्च परार्थं चोपमानं भवति न हि यथा गौरेवं गवय इत्येतदागममन्तरेण सारूप्यमात्रपरिज्ञानमुपमानम्। न ह्यागममात्रं सारूप्यपरिज्ञानमन्तरेणोपमानं भवितुमर्हति। न चैवमनुमानम्। तस्माद्यथा लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहे सति लिङ्गपरामर्शोऽनुमानम्, तच्च प्रत्यक्षम्। तथागमाहितसंस्कारसम्बन्धस्मृत्यपेक्षं सारूप्यप्रत्यक्षमुपमानमिति॥

प्रतिपत्तिभेदाच्च नानुमानमेवं भवति। यथा धूमस्तथाग्निरिति। अस्त्युपमाने यथा गौरेवं गवय इति। यत्र प्रतिपत्तिभेदस्तत्प्रमाणान्तरम्। यथा प्रत्यक्षादनुमानपूर्वानधिगमादुपमानं न भवतीत्यनेन प्रत्युक्तम्॥

अथावसरप्राप्तः शब्दः परीक्ष्यते। कः पुनरयं शब्दः। आप्तोपदेशः शब्द इत्युक्तम्। तस्माच्चेपो न शब्दः प्रमाणं सत्यप्रसिद्धेः। यस्माद् विद्यमानोऽयं शब्दोऽश्रूयमाणो न प्रतिपत्तिहेतुः प्रतिपत्तिहेतुश्च प्रमाणमिति। विषयाभावाच्च न प्रत्यक्षानुमानव्यतिरेकी विषयः शब्दस्यास्ति। न चाविषयं प्रमाणमिति अविज्ञानात्मक-

लाच्च न प्रमाणम्, यद्यत्प्रमाणं तत् तद्विज्ञानात्मकं यथा प्रत्यक्षम्, अविज्ञानात्मकं च न प्रमाणं घटादिवदेव वाङ्मनःकरणप्रत्यक्षत्वाच्च घटादिवदेव न प्रमाणम्, आत्मन्यसमवायात्। न घटादिवदेव प्रमाणम्, आकाशगुणत्वात् संख्यावन्न प्रमाणं यत् तावत् सत्यप्रमितेरिति। तन्नासिद्धत्वात्। न हि कदाचिच्च उपलभ्यमानोऽप्रमाणं भवत्यनुपलभ्यमानो न भवतीति नासौ प्रमाणम्। प्रमाणं हि नाम येन प्रमीयते कदा च तेन प्रमीयते यदोपलभ्यते। यत् पुनरेतद्विषयाभावादिति क एवमाह प्रत्यक्षानुमानव्यतिरेकौ विषयौ नास्तीत्यसिद्धो हेतुः यथा प्रत्यक्षादिभ्यो भेदस्तथोक्तम्। यत्पुनरेतद्विज्ञानात्मकत्वाद् वाङ्मनःकरणप्रत्यक्षत्वात् आत्मन्यसमवायाच्चेति तन्नानेकान्तात् प्रदीपवत् प्रदीपवत् सर्वमस्ति प्रमाणं च प्रदीपः प्रत्यक्षाङ्गत्वादित्युक्तम्[१]। तस्मादनैकान्तिकत्वादहेतुरतो यत् पुनरेतदाकाशगुणत्वादयमप्यनैकान्तिक एव। यथाकाशे यत् परिमाणं तन्महत्प्रत्ययकर्तृत्वात् प्रमाणं भवति तस्मादाकाशगुणत्वादित्ययमहेतुः। अनुमानं शब्दः स्मृत्यपेक्षत्वात् यस्य स्मृत्यपेक्षित्वं तदनुमानं स्मृत्यपेक्षश्च शब्दोऽर्थप्रत्यायने तस्मादनुमानम् त्रिकालविषयत्वाच्च त्रिकालविषयमनुमानम् तथा च शब्दस्तस्मादनुमानम्। अन्वयव्यतिरेकोपपत्तेश्च यदन्वयव्यतिरेकि तदनुमानम्, यथा धूमविशेषदर्शनमग्निमत्प्रतीतौ तथा च शब्दोऽन्वयव्यतिरेकाभ्यामेवार्थं प्रतिपादयति तस्मादनुमानम्॥

---

(१) प्रत्युक्तम् — पा० १ पु०।

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ४७ ॥

इतश्चानुमानं शब्दोऽर्थस्यानुपलब्धेः । प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादिति सूत्रार्थः ॥

उपलब्धेरद्विप्रवृत्तित्वात् ॥ ४८ ॥

इतश्चानुमानमुपलब्धेरद्विप्रवृत्तित्वात् । प्रामाणान्तरभावे उपलब्धिहेतौ भेदो दृष्टः यथा प्रत्यक्षेऽनुमाने च । अन्यथा हि प्रत्यक्षे उपलब्धिरन्यथानुमाने न त्वेवं शब्दे इति । तस्मान्न प्रमाणान्तरम् ॥

सम्बन्धाच्च ॥ ४९ ॥

सम्बन्धाच्च । सम्बद्धार्थप्रतिपादकत्वाच्चेति सूत्रार्थः सम्बद्धार्थप्रतिपादकमनुमानं तथा च शब्द इति । यत्तावत् स्मृत्यपेक्षत्वादनुमानं शब्द इति तन्नानेकान्तात् । अनुमानेऽपि स्मृत्यपेक्षित्वमस्ति यथा संशये यथा तर्के यथोपमान इति । एतेन त्रिकालविषयत्वं प्रत्युक्तम् । यत् पुनरेतदन्वयव्यतिरेकोपपत्तेरिति । अन्वयव्यतिरेकोपपत्तिः प्रत्यक्षेऽपि । यथा यत्र घटस्तत्र घटज्ञानम् । यत्र नास्ति तत्र तदभाव इति । यत् पुनरेतदनुपलभ्यमानार्थविषयत्वादिति सत्यम् अनुपलभ्यमानार्थविषयमनुमानं न पुनः स्वर्गापूर्वदेवताद्यपेक्षलौकिकस्य प्रत्यक्षमनुमानं वा अपि तु आप्तोपदेशसामर्थ्याच्छब्दादर्थे संप्रत्ययः ॥

आप्तोपदेशसामर्थ्याच्छब्दार्थसम्प्रत्ययः ॥ ५० ॥

न ह्ययं शब्दमात्रात् स्वर्गादीन् प्रतिपद्यते । किं तु पुरुष-

विशेषाभिहितत्वेन प्रमाणत्वं प्रतिपद्य तथाभूताच्छब्दात् स्वर्गादि प्रतिपद्यते न चैवमनुमाने तस्मान्नानुमानं शब्द इति । एवं चोल्लिखिता प्रतिपत्तिः शब्दान्नानुमानादिति । एतेनादिप्रवृत्तित्वं व्याख्यातम् । यत् पुनरेतत् सम्बन्धाच्चेति । अस्ति शब्दार्थयोः सम्बन्धोनुज्ञातोऽस्ति च प्रतिषिद्धः वाच्यवाचकभावलक्षणः सम्बन्धोऽनुज्ञातः । अस्य शब्दस्यायमर्थो वाच्य इति । यः पुनरयं स्वाभाविकः शब्दार्थयोः सम्बन्ध इति कैश्चिदभ्युपगम्यते स प्रतिषिद्ध इति न स्वाभाविकः शब्दार्थयोः सम्बन्धोऽस्ति कथम् ॥

प्रमाणतोऽनुपलब्धेः[१] ॥ ५१ ॥

प्रमाणतोऽनुपलब्धेः । तत्र प्रत्यक्षेण तावच्छब्दार्थस्यानुपलब्धिरतीन्द्रियविषयत्वात् । यस्माच्छब्दस्यातीन्द्रियोऽप्यर्थो विषयस्तस्मान्न प्रत्यक्षेणोपलब्धिरिति । अनुमानेनोपलभ्यत इति चेत् नानुमानेन विकल्पानुपपत्तेः । शब्दो वार्थदेशमुपसम्पद्यतेऽर्थो वा शब्ददेशम् उभयं वा न तावदर्थः शब्ददेशमुपसम्पद्यते ॥

पूरणप्रदाहपाटनानुपलब्धेश्च[२] सम्बन्धाभावः ॥ ५२ ॥

पूरणप्रदाहपाटनानुपलब्धेः । आस्यैकदेशस्थानकरणोच्चारणीयः शब्द इति । अन्नाग्न्यग्निशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन् । मूर्तिमान् पदार्थो मोदकादिर्गवादिवदागच्छन्नुपलभ्येत । ततश्च लोकव्यवहार उच्छिद्येत । अथ शब्दोऽर्थान्तिकमुपसंपद्यते तस्या-

---

(१) न्यायसूचीनिबन्धे सूत्रमिदं न दृश्यते ।

(२) पूरणदाहपाटनानुपपत्तेश्च — इति दृश्यते ।

प्यनुपपत्तिर्व्याघातात्। नित्यः शब्दः सन्तानवृत्त्या चागच्छतीति व्याहतम्। अथ न गच्छत्यर्थदेश एव भवतीति नित्यश्च भवतीति चेन्नानिवृत्तो व्याघातः स्थानकरणप्रयत्नाममभवाच्चार्थदेशे न भवति। अथ न गच्छति न भवति तत्र व्यज्यते एको वितत्यावस्थित इति चेत् न सर्वार्थोपलब्धिप्रसङ्गात्। यदि सर्वशब्दा एव वितत्यावस्थिताश्च स्थानकरणादिनिमित्तसन्निधाने व्यज्यन्त इति मन्यसे सर्वार्थानामुपलब्धिः प्राप्ता यदेकस्य शब्दस्य व्यञ्जकं तच्छब्दान्तराणामपीति। वितत्यावस्थितश्च शब्दो व्यक्त इति स्वविषयं व्याप्यावस्थाने सति यत्र क्वचनावस्थितानां गोशब्दोभिव्यक्तौ ककुदादिमदर्थप्रत्यायनं स्यात् यथा सामान्यं स्वविषयं व्याप्यावस्थितं स च सर्वत्रोपलभ्यते तथा शब्दोऽपि स्वविषयं व्याप्यावस्थित इति नियमो भविष्यति। न युक्तमेवं भवितुम्, सामान्यस्याश्रयोपलब्धिर्व्यक्तिहेतुः न च पुनः शब्दस्याश्रयोपलब्धिरस्ति न च वाच्ये वृत्तिस्तस्मादसमो दृष्टान्तः। यदि च[1] वाच्यार्थवृत्तिः शब्दः स्यात् वाच्योपलब्धावकृतसमयेनापि प्रतिपाद्येत यथा सामान्यमकृतसमयोऽपि प्रतिपद्यत इति। तस्मान्नानुमानादपि प्रतिपद्यते। इतश्च स्वालयादन्येनापि न सम्बन्धी शब्दः गुणत्वात् अन्येन गवादिना शब्दं प्रति समवायोऽपि नास्ति शब्दस्याकाशवृत्तित्वात्। नापि शब्दार्थयोरेकार्थसमवायः ताभ्यामेकस्यानारम्भात्। उपमानात् प्रतिपत्स्यत इति न उपमानस्यापि नायं विषयः। आगमात् प्रतिपत्स्यत इति स एवात्र विचार्यते किं शब्दार्थौ सम्बद्धावाहोस्विदसम्बद्धाविति। यदिदं भवताभिधीयते

(१) यपि च — पा० १ पु०।

स्मृत्याद्यपेक्षत्वादनुमानमाधर्म्यादनुमानं शब्द इति। तस्मादेव नानुमानं न हि तेनैव तस्य साधर्म्यमिति। अथ स्मृत्यादिसाधर्म्याच्छब्दानुमानयोरेकत्वमेवं तर्ह्येकं प्रमाणं प्राप्नोति। अस्ति ह्यर्थपरिच्छेदकत्वं सर्वप्रमाणानां साधर्म्यमिति। भवत्वेकं प्रमाणं किन्नो बाधत इति। कथं न बाधत इति। यदभीष्टं तन्निवर्तते। किमभीष्टं प्रत्यक्षानुमाने भिन्ने इति। अथ सामान्यमाश्रित्याभेदो दृश्यते तदोपेक्षया वर्तितव्यम्, सामान्यमाश्रित्याभेदो विशेषमाश्रित्य भेद इति न किञ्चिद्बाधितम्। न चानुमानं शब्दः स्वपरात्मप्रत्यायकत्वात्। यत् स्वपरात्मप्रत्यायकं तदनुमानम् न भवति यथा प्रदीपः प्रदीपो येनापि क्रियते तस्याप्युपलब्धिसाधनं भवति अन्यस्यापि शब्दोऽप्येवं तस्मान्नानुमानमिति॥

शब्दार्थव्यवस्थानादप्रतिषेधः॥ ५३॥

शब्दार्थव्यवस्थानदर्शनादप्रतिषेधः। यदि शब्दार्थावसम्बद्धौ स्याताम्, शब्दार्थप्रत्ययव्यवस्था न स्यात्। शब्दः सम्बद्धोऽर्थं प्रतिपादयति प्रत्ययनियमहेतुत्वात् प्रदीपवत्। यः प्रत्ययनियमहेतुः स सम्बद्धोऽर्थप्रत्यायको दृष्टः यथा प्रदीपः। शब्दश्चैवंधर्मा तस्माच्छब्दोऽपि सम्बद्धोऽर्थप्रत्यायक इति। यद्वा प्रत्ययः पञ्चीकर्तव्यः सम्बद्धाभ्यां शब्दार्थाभ्यां वस्तुप्रत्ययो भवतीति नियमात् कुण्डलीति प्रत्ययवदिति॥

न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य॥ ५४॥

न सामयिकत्वाच्छब्दार्थप्रत्ययस्य। न सम्बन्धकारितं शब्दार्थ-

व्यवस्थानं किं तर्हि समयकारितं कः पुनरयं समयः। अभिधानाभिधेयनियमनियोगः समययुक्ते[१] शब्दार्थव्यवस्था भवतीति कश्चित् सम्बन्धोनुज्ञात इति यद्यवोचाम इति। सेयं शब्दार्थव्यवस्थान्यथापि भवतीत्यहेतुः। अयं च वाच्यवाचकभावलक्षणः सम्बन्धः स्वाभाविकशब्दार्थसम्बन्धवादिनाप्यनुज्ञेयः। न हि स्वाभाविकसम्बन्धवादिनोऽनुपयुक्तशब्दार्थसम्बन्धस्य शब्दाग्रहणाद्विशेषप्रत्ययो भवति। स पुनः समयः कुतः प्रत्येतव्यः पदज्ञानाल्लोकतश्चेति तदिदं शास्त्रं शब्दस्याविलोपार्थं प्रणीतम्। लोकतश्च समयो बोद्धव्यः मात्रादीँस्तेषु तेष्वर्थेषु ताँस्तान् शब्दान् प्रयुज्यमानानुपलभ्य सोऽपि तथैव शिक्षितस्तानेव शब्दाँस्तेषु तेष्वर्थेषु प्रयुङ्क्ते न पुनरेनं लिपिमिव कश्चित् शिक्षयतीति॥

जातिविशेषे चानियमात्॥ ५५॥

जातिविशेषे चानियमात्। न स्वाभाविकः शब्दार्थयोः सम्बन्धः। यदि स्वाभाविकः शब्दार्थसम्बन्धोऽभविष्यच्च जातिविशेषे शब्दार्थव्यवस्थाऽभविष्यत्। अस्ति तु यथाकामं प्रयोगो जातिविशेषे यथाकामं प्रयोगो दृष्टः न तु स्वाभाविकेन सम्बद्धानां जातिविशेषे व्यभिचारो दृष्टः न हि प्रदीपोल्काकमन्यथा प्रकाशयत्यन्यथा जातिविशेष इति। जातिविशेषशब्देन पुनर्दैशोऽभिधीयत इति॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः॥ ५६॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति सूत्रम्। तदित्यधि-

---

(१) तस्मिँस्त्वपयुक्ते-पा० १ पु०।

कृतशब्दाभिधानाच्छब्दविशेषाधिकारः यस्मात् प्राप्तमपि प्रकरणेन शब्दं तच्छब्देन पुनरभिधत्ते तज्ज्ञापयति शब्दविशेषं प्रतीयं चिन्ता न तु शब्दमात्रमन्यथैवं वक्तव्यम् । अप्रमाणं शब्दोऽनृतव्याघातपुनरुक्तदोषेभ्य इति । अप्रामाण्यमर्थस्याप्रत्यायकत्वम्, अनृतत्वमन्यथार्थाभिधानम्, व्याघातः पदयोर्वाक्ययोर्वा सहासम्भवः, पुनरुक्तं पूर्वाभिहितत्वाभिधानम् । उदाहरणानि भाष्ये । तत्रानृतत्वे हेतुः फलादर्शनम्, अग्निहोत्रं जुहुयादिति विधिवाक्यम् । अस्य व्याघातः फलासम्भवेन उदितानुदिते समयाध्युषितप्रतिषेधो न चान्यः कालो विद्यते यत्राग्निहोत्रं हवनं स्यात् । उदितानुदितसमयाध्युषितवाक्यानां वा परस्परविरोधः प्रथमोत्तमयोस्त्विरभिधाने पुनरुक्तम् । उदाहरणं भाष्ये । दृष्टान्तत्वेनैतानि वाक्यान्युपन्यस्य एककर्तृकत्वेन शेषवाक्यानामप्रमाणत्वमिति । अग्निहोत्रादिवाक्यानां वा प्रमाणत्वप्रतिषेधो वैदिकत्वेन तदन्यवाक्यवत् पुनरुक्तायां पूर्वमुत्तरं वा न वाक्यमेकेन प्रणीयमानत्वात्[१] ॥

न कर्मकर्तृसाधनवैगुण्यात् ॥ ५७ ॥

न कर्मकर्तृसाधनवैगुण्यात् । यत्तावदनृतत्वादप्रमाणानि वेदवाक्यानि फलादर्शनादिति तदत्र सम्प्रधार्यम् । किं फलादर्शनं वेदवाक्यानामप्रमाणत्वादाहो कर्मकर्तृसाधनवैगुण्यादिति । वयं तु ब्रूम न कर्मकर्तृसाधनवैगुण्यादिति फलादर्शनात् तु कारणानामसामर्थ्यं गम्यते दृष्टेः करणसाधनत्वाद्वा विरोधः । न चेयमिष्टिर्मया साक्षात्

---

(१) प्रतीयमानत्वात् — पा० १ पु० ।

पुत्रकारणत्वेनाभ्युपगम्यते अपि तु पितराविच्छा संप्रयुज्यमानौ पुत्रं जनयत इति। तत्र न ज्ञायते किं पित्रोरसामर्थ्यात् पुत्रजन्म न भवति आहोस्विदिष्टेरसामर्थ्यादिति। मन्त्राश्चेष्टिसाधनत्वेन प्रयुज्यमाना दृष्टाङ्गं भवन्ति[१] तत्रापि न ज्ञायते किंनिमित्तैर्मन्त्राणां वैगुण्यान्न सम्पन्ना आहो दर्भैन्धनादेः[२] कारणस्य वैगुण्यादिति। यथैव मन्त्राणां न्यूनाधिकभावे प्रयुज्यमानानामिष्टिर्न निर्वर्तते तथा दर्भैन्धादेरपि साधनस्य वैगुण्यादिति। न केवलं साधनवैगुण्यादेवेष्टेरनभिनिर्वृत्तिस्तथेष्टेः साधयितुः कर्मणश्चासामर्थ्यादित्युत्सृज्येष्टिसम्पदम्[३] न केवलैवेष्टिः कारणमित्युक्तम्। तत्र पुत्रजन्मादर्शनेन न युक्तं मनुष्यधर्मणो वक्तुम् मन्त्राणाममसामर्थ्यात् पुत्रानुत्पत्तिरिति। उभयथा दृष्टत्वात् सन्देह इति चेत् न अभ्युपेतहानेः। अथ मन्यसे चिकारणं पुत्रजन्म तत्रान्यतरकारणवैकल्यात् पुत्रो न भवतीति कारणवैकल्यं गम्यते। तत्र यथैव पित्रोर्वैगुण्यात् पुत्रानुत्पत्तिस्तथा मन्त्राणामप्रमाणत्वादिति सन्दिह्यते नाभ्युपेतहानेः। पूर्वं भवताभ्यधायि वेदोऽप्रमाणमिति अधुनाभिधीयते सन्दिग्धं प्रमाणत्वमित्येवं ब्रुवता पूर्वो वादस्त्यक्तो भवति। समानमिति चेत्। अथ मन्यसे समानमेतद्भवतोऽपि किं पित्रोर्वैगुण्यात् पुत्राजन्म वेदवाक्यानामप्रामाण्याच्चेति सन्दिह्यते। नासाधनात्। न मयैतत् साध्यते वेदवाक्यानि प्रमाणमप्रमाणं वेति भवता तु साध्यते। तत्र मया भवतः साधनान्यतरवैकल्यात् पुत्रजन्म न

---

(१) सम्भवन्ति — पा० १ पु०। (२) दर्भैध्मादेः — पा० १ पु०।
(३) ऽपेक्षेष्टिसम्पदम् — पा० १ पु०।

भवतीति सन्दिग्धो हेतुरपदिश्यते तत्सहकारित्वाच्चोपदेशो दारु-मन्थनवदिति । नेयमिष्टिः साक्षात्कारणं पुत्रजन्मनोऽपदिश्यते अपि तु पुत्रकाम इष्टिं कुर्वीत इति । यथाग्निकामो दारुणी मथ्नीयादिति उपदेशस्तत्र न कर्तृकर्मणोर्वैगुण्यादग्निर्भवतीति नोप-देशवैयर्थ्यं तथेहापीत्यदोषः । सामर्थ्ये फलसम्पत्तिदर्शनाच्च । यत्र समस्तानि कारणानि तत्र फलाभिनिर्वृत्तिर्दृष्टेत्यदोषः । यच्चेदं वाक्यं तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति । तदपि वेदस्य पचीकृतत्वाद्व्यापकम् । अथ यान्येवंधर्मकाणि वाक्यानि तानि पचीक्रियन्ते तेषु पचधर्माणां विशेषणत्वेनोपयुक्तत्वादप्रामाण्यप्रति-पादको हेतुर्वक्तव्यः । अनृतत्वादप्रामाण्यमिति चेत् किमिदमनृतत्वं नाम यद्यथाऽतथाभूतार्थाभिधानं न त्वयमेव प्रतिज्ञार्थोऽप्रमाण-मिति । अनृतत्वं वाऽसिद्धमित्ययुक्तमेतत् । यत् पुनरेतद्व्याघात-दोषादिति ॥

अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५८ ॥

अभ्युपेत्य कालभेदे दोषवचनाच्च व्याघातः । अग्न्याधान एवायं नियमपरिग्रहः । उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होत-व्यमिति । सोऽयमभ्युपेत्य कालं यदातिक्रामति तदाभ्युपेतकाला-न्निन्द्यते निन्दावचनेन व्याघातः उभयप्रतिषेधानभिधानान्नेदमन्यथा यदि पुनरेतदुभयप्रतिषेधाभिधानं स्यात् भवेदयं प्रसङ्गो व्याघातः न पुनरेतानि प्रतिषेधवाक्यानि उदिते होतव्यमित्येवमादीनि तस्मादप्रसङ्गोयमिति । अथ पुनरेतानि वाक्यानि होमविधेः प्रति-

षेधकानि स्युः तदोदितादिग्रहणं व्यर्थमेवं वक्तव्यम्। अग्निहोत्रं जुहुयादिति तन्न कर्तव्यमिति। एवं च संगतार्थता यथेतद्व्याख्यातमेवं पूर्वोत्तरे वाक्ये मन्यते भवतः हवनमनूद्य कालविशेषविधानादिति। एवमेतन्न पुनर्यथास्माभिर्व्याघातोऽभिधीयत इति नियमहेतुर्वक्तव्य इदमेवोदितादिवाक्यं नियमहेतुः। कथमिति। इदं पुनर्वाक्यं कामतो वा कल्प्येत अभिहितं वानूद्यत इति। अभिहितानुवादो न्याय्यः। तत्र हि प्रमाणानामविसंवादादिति न व्याघात इति यत्पुनरेतत् पुरुक्तदोषान्न पुनरुक्तदोषः॥

अनुवादोपपत्तेश्च ॥ ५९ ॥
वाक्यविभागस्य चार्थग्रहणात् ॥ ६० ॥

अनुवादोपपत्तेः। पुनरुक्तं नाम तस्यैवार्थस्यानङ्गीकृतविशेषस्य सतः पुनर्वचनम्। अनुवादस्तु पुनः श्रुतिसामान्यादङ्गीकृतविशेषस्यानुवादः। एवं सति यथोक्तो न दोषः। उदाहरणं भाष्ये। पुत्रकामेष्टिवाक्यानि प्रमा वेदैकदेशत्वात् भूमेरुपनवाक्यवत् इतश्च पदादिनियमात् द्वादशमासाः संवत्सर इति वाक्यवत्। इतश्च कर्तृविशेषाभिहितत्वात् अग्निर्हिमस्य भेषजमिति वाक्यवत्॥

समस्तानि वा वेदवाक्यानि पञ्चीकृत्याभिधीयन्ते प्रमाणं वेदवाक्यानि अर्थविभागवत्त्वात् मन्वादिवाक्यवत्। यथा मन्वादिवाक्यान्यर्थविभागवन्ति अर्थविभागवत्त्वे सति प्रामाण्यं तथा च वेदवाक्यान्यर्थविभागवन्ति तस्मात् प्रमाणं विभागश्च त्रिविधो भवति॥

विध्यर्थवादानुवादवचनविनियोगात् ॥ ६१ ॥

विध्यर्थवादानुवादवचनविनियोगात्। त्रिधा खलु ब्राह्मण-वाक्यानि भवन्ति विधिवचनानि अनुवादवचनानि अर्थवादवचनानि च ॥

विधिर्विधायकः ॥ ६२ ॥

तत्र विधिर्विधायकः। यद्वाक्यं विधायकं देशकं स विधिः। विधिस्तु नियोगोऽनुज्ञा वा यद्वाक्यं विधत्ते इदं कुर्य्यादिति स नियोगः। अनुज्ञा तु यत् कर्तारमनुजानाति तदनुज्ञावाक्यम्, यथाग्निहोत्रवाक्यमेवैतत् साधनावाप्तिपूर्वकत्वमनुजानाति ॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६३ ॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः। एषामुदाहरणानि भाष्ये ॥

विधिविहितस्यानुवचनमनुवादः ॥ ६४ ॥

विधिविहितस्यानुवचनमनुवादः। विध्यर्थवचनं तथानुवादः। विधिविहितानुवचनं च पूर्वः शब्दानुवादः परोऽर्थानुवादो यथा पुनरुक्तं द्विविधं शब्दपुनरुक्तमर्थपुनरुक्तं स शब्दपुनरुक्तमनित्यो नित्यो वेति। अर्थपुनरुक्तमनित्यो निरोधधर्मक इति ॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥ ६५ ॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः। कोऽस्य सूत्र-

स्यार्थः। प्रतीतार्थशब्दाभ्यासोऽनुवादपुनरुक्तयोः साम्यम्, पुनरुक्तोऽपि प्रतीतार्थः शब्दोऽभ्यस्यते। अनुवादेऽप्येवमतः प्रतीतार्थशब्दाभ्यासादुभयमभिधीयते ॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६६ ॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेष इति। यथा शीघ्रं गम्यतां, शीघ्रतरं गम्यतामिति। त्वरया क्रियातिशयो गम्यते तथानुवादलक्षणेनाप्यभ्यासेन क्रियातिशयोऽभिधीयत इति। अस्य प्रयोगः। अर्थवाननुवादलक्षणोऽभ्यासः प्रत्ययविशेषे हेतुत्वात् शीघ्रतरगमनोपदेशवदिति। अथ शीघ्रशब्दाच्छीघ्रतरशब्दः प्रयुज्यमानः प्रत्ययविशेषहेतुत्वान्न पुनरुक्तदोषं (न) भवति। तथानुवादलक्षणोऽप्यभ्यासः प्रत्ययविशेषहेतुत्वान्न पुनरुक्तदोषं लप्स्यत इति। कः पुनरसौ विशेषो भवतीति वक्तव्यस्तदुच्यते। आद्ये पचतुशब्दप्रयोगे पाको निर्वर्तनीय इति पक्तुः प्रत्ययो भवति द्वितीयात् तु पचतुशब्दादवधारणप्रत्ययो भवति मयैव पक्तव्यमिति सातत्यप्रत्ययो वा भवति सततं मया पक्तव्यमिति अध्येषणप्रत्ययो भवति आशु मया पक्तव्यमिति। एवं श्रोतुः। यथा च श्रोतुस्तथा वक्तुरप्येते एव प्रत्यया भवन्तीति। पुनरुक्ते तु न कश्चिद्विशेषो गम्यत इति महान् विशेषः पुनरुक्तानुवादयोः। एवमन्योऽप्यनुवादस्य प्रयोगो वाक्ये बोद्धव्य इति। किं पुनः-प्रतिषेधहेतुबोद्धारादेव प्रमाणता वेदवाक्यानां सिद्धा न। किं कारणम्। न साधनमन्तरेण सिद्धिरस्तीति श्रुतस्तर्हि प्रमाणतः किं तत् प्रमाणम् अर्थविभागवत्त्वम् ॥

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्य-माप्तप्रामाण्यात् ॥ ६७ ॥

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् । चशब्दः पूर्वहेत्वनुकर्षणार्थः । यथा मन्त्रायुर्वेदवाक्यानि पुरुषविशेषाभिहितत्वात् प्रमाणं तथा वेदवाक्यानीति पुरुषविशेषाभिहितत्वं हेतुः । किमायुर्वेदस्य प्रामाण्यं यत् तदायुर्वेदेनोपदिश्यते । इदं कृत्वेष्टमधिगच्छति इदं कृत्वानिष्टं जहाति तस्यानुष्ठीयमानस्य तथाभावोऽविपर्ययः एतत् प्रामाण्यं किंकृतम् एतदाप्तप्रामाण्यकृतम् । किं पुनराप्तानां प्रमाणत्वम् साक्षात्कृतधर्मता यं ते पदार्थमुपदिशन्ति स तैः साक्षात्कृतो भवतीति भूतदया च यस्मै चोपदिशन्ति तं प्रत्यनुकम्पा भवति यथार्थपरिज्ञानार्थं चिख्यापयिषा वास्य भवति[१] । एतेन त्रिविधेन विशेषणेन विशिष्टो वक्ता आप्तः तेन य उपदेशः क्रियते स प्रमाणमिति दृष्टवाक्याविसंवादेन चाशेषानुमानं प्रक्यं दृष्टार्थं यथा वा ग्रामकामो यजेतेत्येवमादि तेन शेषानुमानं प्रमाणमिति[२] । लौकिकमपि वाक्यमनेनैव त्रिप्रकारेण विशेषणेन[३] विशिष्टस्य वक्तुः प्रमाणं भवति । अस्य प्रयोगः । प्रमाणं वेदवाक्यानि वक्तृविशेषाभिहितत्वात् मन्त्रायुर्वेदवाक्यवदिति । एककर्तृकत्वेन वा मन्त्रायुर्वेदवाक्यानि पञ्चीकृत्यालौकिकविषयप्रतिपादकत्वेन वैधर्म्य-

---

(१) यदि भवति — पा० १ पु० । (२) प्रमाणत्वमिति — पा० १ पु० ।
(३) विशेषेण — पा० १ पु० ।

हेतुर्वक्तव्यः । पौरुषेयत्वमसिद्धं नित्यत्वादिति चेत् । अथ मन्यसे नित्यानि वेदवाक्यानि नित्यत्वाच्चैषां प्रामाण्यं तस्मात् पौरुषेयत्वमसिद्धम्। नासिद्धत्वात्। सिद्धे नित्यत्वे एतद्युक्तं तन्न न सिद्धमतो न युक्तमेतत् । यदि न नित्यानि कथं प्रमाणं प्रमेयप्रतिपादकत्वात् प्रमाणं न नित्यत्वात् । केचित्तु ब्रुवते न किञ्चिन्नित्यं प्रमाणमस्तीति प्रमाणत्वादेवानित्यानीति। तत्तु न सम्यगिति पश्यामः नित्यमपि प्रमाणं यथा मनः आत्मा च प्रमाणशब्दस्य समुदायवाचित्वात् । अयं खलु प्रमाणशब्दः समुदाये वर्तते तच्च नित्यमनित्यं चानेकं समुदायि प्रमाणस्याङ्गत्वात् प्रमाणमित्युच्यते यथा प्रदीपः एवं च नित्यमपि प्रमाणमस्तीति । यदा च परमाण्वादिनित्यमितरवस्तुसाधकत्वेनोपादीयते तदा परमाण्वादेर्नित्यस्य प्रमाणभावात् प्रमाणत्वादनित्य इत्यनैकान्तो भवतीत्यनुत्तरमेतत् । तस्माद्युक्तमर्थविभागवत्त्वादनित्यत्वम् लौकिकवाक्यवदिति। यथार्थविभागवन्ति लौकिकवाक्यानि तथा च वेदवाक्यानि तस्मान्न नित्यानीति। लौकिकान्यपि नित्यानीति चेत्। अथ मन्यसे यान्यप्येतानि लौकिकवाक्यानि अर्थविभागवन्ति तान्यपि नित्यानीति अर्थविभागो न स्यात् योऽयमर्थविभागो लौकिकवाक्ये स न स्यात् दृष्टं तु तान्यनित्यानीति चेत् विशेषहेतुर्वक्तव्यः तुल्ये चार्थविभागवत्त्वे तुल्ये चार्थप्रतिपादकत्वे लौकिकान्यनित्यानि वैदिकानि नित्यानीति विशेषहेतुर्वक्तव्यः । तुल्यं भवतोऽप्यनित्यत्वे विशेषहेतुर्वक्तव्य इति । उक्तोऽर्थविभागवत्त्वं हेतुः इतश्च वर्णवत्त्वाद्वर्णवन्ति लौकिकवाक्यानि अनित्यानि तथा च वेदवाक्यानि तस्मात् तान्यप्यनित्यानि ततश्च सामा-

न्यविशेषवत्त्वे सति श्रोत्रग्राह्यत्वात् लौकिकवाक्यवत्। दृतस्य पदवत्त्वात् लौकिकवत्। दर्शनस्य परार्थत्वादिति चेत्। अथ मन्यसे दर्शनं परार्थं दर्शनशब्द उच्चारणार्थः उच्चारणं परप्रतिपादनार्थम् न हि कश्चिदात्मप्रतिपत्तये शब्दमुच्चारयति। यदि चायं नित्यो भवति शब्दादर्थप्रत्ययो युक्तः। अथानित्य उत्पन्नः प्रध्वंसी ततोऽन्यः श्रोतुः नित्यमपूर्वः श्रोत्रविषय इति। न चापूर्वश्रवणात् प्रतिपत्तिर्युक्ता। न हि नारिकेलद्वीपवासिनोऽप्रसिद्धगोश्रवणात् ककुदादिमदर्थप्रतिपत्तिर्भवति। तथा चानित्यवादिनः सर्वे शब्दाः तथा तस्मादस्यापि शब्दात् प्रत्ययनियमो न प्राप्न इति। नानेकान्तात्। क्षणविध्वंसिषु प्रदीपादिषु अपूर्वस्य प्रत्यायनं दृष्टमिति। नोदाहरणवैधर्म्यात् प्रदीपोनाख्यातः प्रकाशनीयार्थसम्बन्धात् प्रकाशनीयार्थसम्प्रतिपत्तिं करोति न पुनरनाख्यातः शब्द इति। क एवमाहाख्यातः शब्दः प्रतिपादयति सम्बन्धस्यादर्शनादाख्यानमनुपपन्नम्। उक्तमेतद्यथा न शब्दार्थयोः प्राग्निलक्षणः सम्बन्धोऽस्तीति वाच्यवाचकलक्षणस्तु पौरुषेयः सम्बन्धः स च कृतक इति। स च संसारानादित्वात् लोकतोऽवगम्यते। ये तु संसारमादिमन्तं वर्णयन्ति त एवमुपालभ्याः। अथ योऽयमभिलापो नित्या वर्णा इति स कथं सम्प्रदायस्याविच्छेदात् तान्येव वेदवाक्यानि मन्वन्तरचतुर्वर्गेषु सम्प्रदायाभ्यासाविच्छेदेन प्रवर्तन्ते तदपेक्षया लौकिकाः शब्दा न प्रयुज्यन्ते नित्या वेदा इति। यथा नित्याः पर्वताः सरित इति तन्मन्त्रादिवाक्येषु समानम्। कुत एवं सम्प्रदायाविच्छेदात् नित्यत्वं न पुनर्नित्यत्वादेव अनित्यत्वोक्तप्रमाणाविघातात् यानि मयानित्यत्वे

प्रमाणान्युपन्यस्तानि तानि न विहन्यन्ते तेषामविघातादनित्यत्वे सति सम्प्रदायाविच्छेदो नित्योपचार इति ॥

इति—श्रीद्योतकरे न्यायवार्त्तिके द्वितीयस्याध्यायस्याद्यमाह्निकम् ॥

अथ द्वितीयमाह्निकम् ।

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥१॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रम् । तस्याक्षेपः न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् । अस्यार्थः अयथार्थोऽयं प्रमाणोद्देश इति । न चत्वार्येव प्रमाणानि ऐतिह्यार्थापत्तिसम्भवाभावा अपि प्रमाणानीति । संशयव्युदासार्थं वा ऐतिह्यादय उपदिश्य प्रतिषिध्यन्ते प्रत्यक्षादीनि च प्रमाणानि ऐतिह्यादीनि चेति मन्यन्ते तत्र श्रोतुः संशयः स्यात् किं विद्यमाना ऐतिह्यादयो नोक्ता अथोऽविद्यमाना इति विधिन्यूनतापरिहारार्थं वा प्रकरणम् । विद्यमानान्यैतिह्यादीनि नोक्तानीति विधिवाक्यहीनं शब्दशास्त्रं स्यात् दोषवतां दोषानभिधानात् दोषहीनं वा शास्त्रं स्यात् इत्यत उद्दिश्य निवर्त्स्यन्ते । दोषवन्त ऐतिह्यादय इत्यतो नाभिधीयन्त इति । दोषस्तर्हि वक्तव्यः अथ दोषो नाभिधीयते दोषहीनं शास्त्रमिति तत्परिहारार्थं प्रकरणमुपचिप्यते प्रत्यक्षादिष्वन्तर्भावप्रदर्शनार्थं वा ऐतिह्यादीनि प्रत्यक्षादिष्वन्तर्भावयता ये यत्रान्तर्भवन्ति

तत्र तेषां प्रदर्शनार्थं प्रकरणमिति सिद्धत्वादनारम्भः न त्वयमर्थः चत्वार्येव प्रमाणानीत्यस्मिन्नेव विभागोद्देशसूत्रे सिद्ध इति सिद्धत्वात् पुनरनारम्भ इति। न। अवधारणप्रयोजनस्य इतश्च सिद्धेः येन न्यायेन चत्वार्येव प्रमाणानीत्येतदवस्थाप्यते स न्याय इह प्रकरणे वर्णत इति तस्मादारभ्यमेवेति । किमिदमैतिह्यं नाम अनिर्दिष्टवक्तृकं प्रवादपारम्पर्यमिति ह्येचुर्वृद्धाः कथयन्तीति । अर्थादापत्तिरर्थापत्तिः आपत्तिः प्राप्तिः प्रसङ्गः यस्मिन् वाक्ये विधीयमानादर्थादन्योऽर्थ आपद्यते सार्थापत्तिः यथाऽसत्सु मेघेषु वृष्टिर्न भवतीति किमत्रार्थादापद्यते सत्सु भवतीति । सम्भवो नामाविनाभाववर्त्तिनोऽर्थस्य ग्रहणादन्यसत्ताविज्ञानम् । यथा द्रोणस्य ग्रहणादाढकस्य सत्तेति । अभावः प्रत्यनीकस्य ग्रहणात् तद्विरोधिनो ग्रहणम्। यथा विधारके वाय्वभ्रसंयोगे सति गुरुत्वप्रतिबन्धादपां पातः प्रतिषिद्धः तदपामपातेन विरोधिनं वाय्वभ्रसंयोगं प्रतिपद्यते इति तान्येतान्यैतिह्यादीनीति । एवम्भूतानीति लक्षणभेदादेतेष्वेवान्तर्भवन्ति न पृथगुच्यन्ते। विषयाभावाच्च न प्रत्यक्षादिप्रमाणव्यतिरेकेण विषया ऐतिह्यादीनां सम्भवन्त्यतश्च न प्रमाणान्तराणि । अथ प्रयोजनभेदात् भिद्यन्त इति मन्यसे एवं तर्ह्यनिष्टत्वं निवर्तते यदप्यभ्युपगतं प्रमाणाष्टत्वं तन्न वर्तते प्रयोजनभेदात् प्रमाणभेदमभ्युपगच्छत इति। एककरणस्य प्रयोजनभेदो दृष्ट इत्यनेकान्तः। यथैकं चक्षुरनेकनीलादिभिन्नरूपग्रहणप्रयोजनमिति इन्द्रियानेकत्वं वा अथ प्रयोजनभेदाद्भेदं मन्यसे एकमिन्द्रियमनेकं प्राप्नोति । अथ विषयसामान्यव्यतिरेकादेकमिन्द्रियमयुक्तस्तर्हि प्रतिषेधो न चतु-

ह्यमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यादिति । यद्यप्येतानि प्रमाणानि किं तर्ह्यन्तर्भवन्तीति वक्तव्यम् अन्तर्भावप्रदर्शनार्थं सूत्रम् ॥

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥ २ ॥

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः । शब्द ऐतिह्यमन्तर्भवति समानलक्षणत्वान्न शब्दलक्षणमैतिह्यान्निवर्तते सोऽयं भेदः सामान्येन संगृहीतः । अनुमानेऽर्थापत्तिसम्भवाभावानामन्तर्भावः समानलक्षणत्वात् कथमर्थापत्तिरनुमानेन संगृह्यते । द्वयोरेकतरप्रतिषेधस्य द्वितीयाभ्यनुज्ञाविषयत्वात् । यच्च यच्च द्वयोर्वस्तुनोरेकतरद्वस्तु प्रतिषिध्यते तच्च तच्च द्वितीयाभ्यनुज्ञा दृष्टा यथा दिवा न भुङ्क्ते इत्यभिधानाद्रात्रौ भुङ्क्ते इति गम्यते । एके तु ब्रुवते नेयमर्थापत्तिर्दिवा न भुङ्क्ते इति । अत्र किं त्ववधारणद्वयं दिवा न भुङ्क्ते एव दिवैव न भुङ्क्ते इति चोभयप्राप्तौ न वक्तव्यम् रात्रौ भुङ्क्ते इति । एतत् तु न सम्यगसम्भवात् दिवा न भुङ्क्ते एव इत्ययमर्थोऽसम्भवेन निराकृतः न कश्चिद्दिवाभुङ्क्त एव भुञ्जानोऽपि तावन्न भुङ्क्त एव किं पुनरभुञ्जान इति तस्मादसम्भवेनार्थस्य निराकृतत्वात् कालप्रतिषेधोऽनेन दिवा न भुङ्क्त इति । अन्यथानर्थकं स्यात् क्रियान्तरनिवृत्तेरसम्भवेन निराकृतत्वात् कालप्रतिषेधस्यानभ्युपगमात् अनर्थकं वाक्यम् भवत्वनर्थकं किं नो बाध्यते यदभ्युपगतं तन्निवर्तते किं चाभ्युपगतम् क्रियान्तरप्रतिषेधो यत्र कालप्रतिषेध इति न चेदमनर्थकम् तस्माद्वयोरेक-

तरप्रतिषेधे द्वितीयाभ्यनुज्ञानादनुमानमेवार्थापत्तिः कतमदेवानुमानं सामान्यतोदृष्टम् । एतेन सम्भवाभावौ व्याख्यातौ । सम्भवोऽनुमानम् अभावोऽप्यनुमानमेव । तच्च वर्णितम् । अनयोरपि सामान्यतोदृष्ट एवान्तर्भाव इति तदेवमन्तर्भावात् पृथगनुद्देश इति मन्यसे तानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम् तत्रार्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते ॥

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥

तथाहि इयमर्थापत्तिरप्रमाणमनैकान्तिकत्वात् । येयं भवतार्थापत्तिः प्रमाणत्वेन प्रतिपाद्यते सा न प्रमाणमिति नार्थस्यैकदापि प्रतिपादिका । यथा मेघेष्वसत्सु वृष्टिर्न भवतीति अर्थादापन्नं सत्सु भवतीति सत्स्वप्येकदा न भवतीति अनैकान्तिकी अर्थापत्तिमात्रस्य पक्षीकरणे ऽनैकान्तिकत्वमव्यापकम् यदि तावदर्थापत्तिमात्रं पक्षयसि ततोर्थापत्तेरनैकान्तिकत्वमशक्यम् । अथानैकान्तिकी या सा पक्षीक्रियते तदाभ्युपगमो वयमपि ब्रूमोनैकान्तिक्यप्रमाणमिति[१] हेतुश्च नास्ति हेतोः प्रतिज्ञाविशेषत्वात् यदनैकान्तिकं तदप्रमाणमिति प्रतिज्ञा तत्र हेतुर्नास्ति न चायमर्थः साध्य इति हेत्वभावात् व्याघातश्चाभ्युपगमात् । यानैकान्तिक्यर्थापत्तिः सा प्रमाणं न भवतीति ब्रुवता ऐकान्तिकी सा प्रमाणमित्यभ्युपगतं भवति अनर्थकं चेदमभिधानम् यानैकान्तिक्यर्थापत्तिः सा न प्रमाणमिति यामपि भवानर्थापत्तिं मन्यते सापि नानैकान्तिकी ॥

अनर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥

(१) ऐकान्तिकी प्रमाणमिति — पा० १ पु० ।

अनर्थापत्तावर्थापत्त्यभिमानात् । नेयमर्थापत्तिरनैकान्तिकी अर्थापत्तिश्च सत्सु मेघेषु वृष्टिर्भवतीति सेयमनैकान्तिकी कथं न सत्सु भवत्येवेति अपि तु सत्सु भवतीति । यत्तु सत्सु मेघेषु वृष्टिर्न भवतीति कारणप्रतिबन्धोऽसौ न तदर्थापत्तेः प्रमेयम् किं त्वस्याः प्रमेयं कारणे सति कार्यं भवतीति । सेयमनैकान्तिकी कथं स्यात् यद्यसत्यपि कारणे कार्यमुत्पद्यते तत्तु न दृष्टमिति न कदाचिदनैकान्तिकत्वम् ॥

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ॥ ५ ॥

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् । योऽयं भवता प्रतिषेधः क्रियते अर्थापत्तिर्न्न प्रमाणम् अनैकान्तिकत्वात् । अयमप्यनैकान्तिकः सत्ताप्रतिषेधात् नानेन प्रतिषेधो नार्थापत्तेः सत्ता प्रतिषिध्यते कथं न सत्ताप्रतिषेधः यस्मादर्थापत्तेर्विशेषः प्रतिषिध्यते नार्थापत्तिमात्रं तेन सत्ताप्रतिषेधादनैकान्तिको भवति । अथ मन्यसे न प्रतिषेधस्य सत्त्वं विषयः किं तु प्रमाणम् सोऽयं प्रतिषेधः स्वविषये प्रवर्तमानो नानैकान्तिको भवितुमर्हतीति । अनैकान्तिको हि नाम स ज्ञेयो यः स्वविषयतज्जातीयान्यवृत्तिः न चानैकान्तिकं प्रमाणमस्ति तस्मान्नानैकान्तिकः प्रतिषेध इति ॥

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् । यदि स्वविषयतत्सजातीयान्यवृत्तिरनैकान्तिक इति मन्यसे अर्थापत्तिरपि तर्ह्यनैकान्तिकी

न भवति न ह्रसति कारणे कार्यमुत्पद्यमानं दृष्टमिति तदिदं सूत्रं व्याघातदेशनार्थं यदुक्तं भवता स्वविषयादन्यत्र वर्तमानमनैकान्तिकं भवति अर्थापत्तिश्चानैकान्तिकीति व्याहतम्। अज्ञानं वा अर्थानुद्धैवानैकान्तिकव्यवहारेऽप्युच्यते अर्थापत्तिरप्रमाणमनैकान्तिकत्वादिति। तत्रोपेक्षया वर्तितव्यम् नोन्मत्तवाक्यानि प्रतिषन्धेयानीति। नाभावः प्रमाणं विषयाभावात्। यद्विषयं तद्प्रमाणम् यथा गोशब्दोश्वप्रतिपादने तथा चाभावस्तस्माद्प्रमाणम्। कस्यैवमाहाभावः प्रमाणम् अपि त्वभावविषया प्रतिपत्तिः प्रमाणम् तया प्रतीयत इति। कः पुनरस्या विषयोऽभाव इत्युक्तम्। तत्रानेकधाभिन्नप्रपञ्चस्योदाहरणार्थं सूत्रम्॥

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः॥ ८॥

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः। अलक्षितानि वासांस्यानयेति प्रयुक्तः उभयसन्निधौ येषु वासःसु लक्षणानि न पश्यति तानि लक्षणाभावेनैव प्रतिपद्यते प्रेषणस्मृतिपत्त्योरेकविषयत्वात् प्रतिपद्य चानयति प्रतिपत्तिहेतुश्च प्रमाणम् तस्मात् सिध्यत्यभावस्य प्रमेयम्॥

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः॥ ९॥

असत्यर्थे नाभाव इति चेत्। अथ मन्यसे यत्र यद्भवति तत्र तस्याभावो न चालक्षितेषु वासःसु लक्षणानि भवन्ति तस्मान्न तत्र न भवन्तीति नापरिज्ञानात् न भवतास्मद्भिप्रायोऽबोधि न ब्रूमो

यत्र यद्भवति तत्र तन्न भवतीति अपि तु लक्षितानि वासांस्युपलभमान इतराणि लक्षणाभावविशिष्टानि प्रतिपद्यत इति। अयमर्थोऽयमुपालम्भ इत्यत उक्तार्थसूत्रम् नान्यलक्षणोपपत्तेरिति ॥

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

तत्सिद्धेरलक्षितेष्वहेतुः। यानि तानि लक्षितेषु वासःसु लक्षणानि तानि कस्यचिन्न सन्तीति यानि च सन्ति तेषामभावो व्याहतः। अत्रोक्तम् नापरिज्ञानादिति। अस्य चार्थस्य ज्ञापनार्थं सूत्रम् ॥

न लक्षणावस्थितापेक्षसिद्धेः ॥ ११ ॥

न लक्षणावस्थितापेक्षसिद्धेः। न ब्रूमो यानि भवन्ति तेषां तत्रैवाभाव इति। अपि तु केषुचिल्लक्षणान्यवस्थितान्यपेक्ष्य येषु तानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्येत इति ॥

प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥

विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः ॥ १३ ॥[१]

प्रागुत्पत्तेरभावोपपत्तेः। अभावश्चैतं खलु भवति प्रागुत्पत्तेरविद्यमानता ऊर्ध्वं च विनाशादविद्यमानतेति। तत्र योऽयं विनाशाभावो लक्षणानामलक्षितेषु वासःसु सोऽनुपपन्नो नेतर इति। अस्त्यर्थे नाभावस्तत्सिद्धेरलक्षितेष्वहेतुरिति उभे अप्येते कलसूत्रे कलस्योक्तमुत्तरं ज्ञात्वाऽज्ञात्वा वाऽसम्बन्धमज्ञातं वेति तस्मादप्रयोज्यं कलमिति। आप्तोपदेशः शब्द इति प्रमाणभावे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते कथं नासति भेदे विशेषणमर्थवत्

(१) विश्वनाथपञ्चाननमते नेदं सूत्रं किन्तु भाष्यस्यवाक्यम्। न्यायसूचीग्रन्थे तु "त्रयोदशभिः सूत्रैः" प्रमाणचतुष्टयप्रकरणमित्युक्तं किन्त्विदं सूत्रं न दृश्यते तत्र १२ सूत्राणि वर्तन्ते ॥

न चानर्थकं विशेषणं युक्तमिति। युक्तो नानाभूतः शब्दो विशेषण-सामर्थ्यादिति तस्मिन् सामान्येन विचारो नित्योऽनित्यो वा विचारः परीक्षा॥

विमर्षहेत्वनुयोगे च विप्रतिपत्तेः संशयः। विप्रतिपत्तिशब्द-स्योक्तोऽर्थः। तत्राकाशगुणः शब्दः महत्त्ववदभिव्यक्तिधर्मेत्येके। एके तावद्ब्रुवते नित्यः शब्द इति अविनश्यदाधारैकद्रव्याकाशगुणत्वात् यदविनश्यदाधारैकद्रव्यमाकाशगुणश्च तन्नित्यं दृष्टम्, यथाकाश-महत्त्वम्, तथा शब्दस्तस्मान्नित्य इति। सोऽयं नित्यः सन्निभिव्यक्ति-धर्मा तस्याभिव्यञ्जकाः संयोगविभागनादा इति। गन्धादिसह-वृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदास्थितोऽभिव्यक्तिधर्मेत्यपरे। अपरे पुनर्ब्रुवते गन्धादिभिः सह सन्निविष्टः शब्दो गन्धादिवदेवाभिव्यज्यते तस्याभिव्यञ्जका भूतविशेषाभिघाता इति। आकाशगुणः शब्दः उत्पत्तिनिरोधधर्मेति चान्ये। अन्ये पुनर्वर्णयन्ति अनित्यः शब्द आकाशगुण उत्पत्तिनिरोधधर्मक इति। महाभूतसंघोभजः शब्दो-नाश्रित उत्पत्तिनिरोधधर्मेति चापरे। अतः संशयः किमत्र तत्त्वमिति। अनित्य इत्येतत् तत्त्वम्, किमिदमनित्यत्वं नाम यतोऽनित्य इति भवति। किं पुनः प्राक्प्रध्वंसाभावाविति केचित्। एके तावदवर्णयन्ति यस्य प्राक्प्रध्वंसाभावौ स्तस्तदनित्यमिति। नासम्ब-न्धात् न हि प्राक्प्रध्वंसाभावाभ्यां भावः सम्बद्ध्यत इति। अनुत्पन्न-विनष्टयोश्च प्रसङ्गात्। यदि च प्राक्प्रध्वंसाभावावनित्यतेति मन्यसे अनुत्पन्ने वस्तुनि प्रागभावोऽस्ति ऊर्ध्वं च वस्तुनः प्रध्वंसाभावोऽस्ति इत्यसति प्राक्प्रध्वंसाभावेऽनिमित्ततोऽनित्यप्रत्ययः स्यात्। अनि-

त्यस्य भावोऽनित्यतेति प्राक्प्रध्वंसाभावयोरभावत्वाद्भावशब्देनानभिधानम्। अनित्यं नाम यस्य नास्त्यत्यन्तं भावः तस्यानित्यस्य यो भावः साऽनित्यता प्राक्प्रध्वंसाभावौ च भावप्रतिषेधौ न चाभावौ भावाभिधानेन वक्तुं युक्तौ तस्मान्न प्राक्प्रध्वंसाभावावनित्यतेति। षष्ठ्यर्थश्च नास्ति तस्य भावस्त्वतलाविति तस्येति धर्म्यपदिश्यते भाव इति धर्मिणो धर्मः न चाभावो धर्मः न च धर्मकाले तच्छब्दवाच्यो धर्मी विद्यते न चाविद्यमानस्य षष्ठ्या योग इति। अथ यद्भवति तत्प्राङ्न भवति ऊर्ध्वं च न प्रभवतीति मन्यसे। एवमपि न किञ्चित् प्रतिषिद्धम्, वयमपि ब्रूमः यत् प्राङ्न भवति तदूर्ध्वं न भवतीति। षष्ठ्यर्थस्तु पूर्ववन्नास्ति घटस्य प्रागभावो घटस्य प्रध्वंसाभाव इति। एतत् कथम्, नात्र षष्ठ्याः सम्बन्धोऽभिधीयते अपि तु प्रागिदं वस्तु नासीत् पश्चाज्जातमित्यर्थः। ऊर्ध्वं च विनाशादिदं वस्तु न भविष्यतीति अनित्यमित्युच्यते तस्य च भावोऽनित्यतेति। वर्तमाने चाऽसम्भवात्। यदि प्राक्प्रध्वंसाभावावनित्यतेति मन्यसे वर्तमाने वस्तुनि न प्रागभावो न प्रध्वंसाभाव इति अनित्य इत्यभिलापो न स्यात्। पाचकादिशब्दवदिति चेत्। अथ मन्यसे यथामी पाचकादिशब्दास्त्रिकालविषयास्तथायमनित्यशब्दस्त्रिकालविषयो भविष्यतीति। न स्थूलस्त्रिकालविषयत्वात् स्थूलः प्रयोगः त्रिकालविषयो दृष्टः पाचको भवति पाचको भविष्यतीति पाचकोऽभूदिति। प्रत्ययस्त्रिकालविषयत्वमिति चेत्। अथ मन्यसे प्रत्ययोऽपि त्रिकालविषयत्वमिति तच्च नादर्शनात् न ह्यसत्यनित्ये अनित्य इति प्रयोगं पश्यामः। तस्मात् प्रत्ययस्त्रिकालविषयत्वमयुक्तमिति।

अतो न प्रागभावप्रध्वंसाभावावनित्यतेति। विनाशहेतुभाव इत्यन्ये। अन्ये पुनर्ब्रुवते विनाशहेतोरस्तित्वमनित्यतेति। एतत्तु न युक्तमसति भावात् प्राग्विनाशहेतुभावात् अनित्यप्रत्ययो दृष्टः। अनुपजात-कपालविभागेषु घटादिषु यदि विनाशहेतुभावोऽनित्यता स्यादृर्त-मानेषु घटादिषु न स्यात् न ह्यसति ज्वरे ज्वरितप्रत्ययो दृष्टः विनाशहेतुभावाच्च विनाशहेतुरस्तीति युक्तः प्रत्ययो नानित्य इति। न हि गोत्वादश्वप्रत्ययो भवतीति। अथ मन्यसे यस्य विनाशहेतु-रस्ति तद्विनाशवत् यद्यद्विनाशवत् तदनित्यमिति। एतदपि न बुद्ध्यामहे यस्य विनाशे हेतुरस्ति तद्विनाशवदिति किन्तु यस्य विनाशहेतुरस्ति तद्विनाशहेतुमदिति युक्तं वक्तुम् न चान्येन योगा-दन्यनिमित्तः प्रत्ययो युक्तः न हि दण्डयोगात् कुण्डलीति भवति। विनाशवच्छरीरमितिप्रयोगदर्शनादित्युक्तमिति चेत्। अथ मन्यसे विनाशवच्छरीरमिति दृष्टः प्रयोगो न चासति सम्बन्धे प्रयोगो भवितुमर्हति। न मतुपोऽसत्त्वे ऽदर्शनात्। नायं मतुप् क्वचिदसति दृष्टो न ह्यसता कुण्डलेन कुण्डलीति भवति न चासता विनाशेन सम्बन्धोऽस्ति तद्विनाशवच्छरीरमित्ययुक्तः प्रयोगः। दृष्ट इति चेत्। अथ मन्यसे दृष्टोऽयं प्रयोगो विनाशेतच्छरीरमध्रुवा ते विषया इति नोपचारात् विनाशीत्युपचारेण प्रयोगः विनाशो यस्यावश्यतया भविष्यति अध्रुवा विषया इत्यनित्यतैवोच्यते तस्माच्च विनाशहेतु-भावोऽनित्यता। उपलब्धिलक्षणप्राप्तस्य अत्यन्ततिरोभावोऽनित्यते-त्यन्ये। अन्ये पुनरनित्यताशब्दार्थमन्यथा वर्णयन्ति यदुपलब्धि-लक्षणप्राप्तं वस्तु तेनैवात्मनात्यन्तं नोपलभ्यते तिरोभूतं तदनित्य-

मित्युच्यते । एतत्तु शून्यमभिधानम्, उपलब्धिलक्षणप्राप्तमत्यन्तति-रोभूतं नोपलभ्यत इति ब्रुवाणः सिद्धान्तं बाधते । न हि किञ्चि-दुत्पन्नं नोपलभ्यत इति सिद्धान्तः । अनुपजातविशेषस्य च वस्तु-नस्तिरोभावो न युक्त इत्यनेकधा वर्णितम् । तस्मादियमनित्यता न युक्ता। ये पुनर्वर्णयन्ति स एव भावोऽभूत्वा भवन् भूत्वा वाभवन्न-नित्य इत्युच्यते सा चावस्था भावप्रत्ययेनानित्यतेत्यभिधीयते। एतत् तु न युक्तम्, स्वार्थे भावप्रत्ययस्यादर्शनात् न हि कश्चित् स्वार्थे भाव-प्रत्ययो दृष्टः। विनयादीत्यादिवदिति चेत् न अनभ्युपगमात् । ननु च विनयादिभ्यष्ठगिति स्वार्थे प्रत्ययो दृष्टः विनय एव वैनयिक-मिति नानभ्युपगमात् । नायं स्वार्थे प्रत्ययोऽपि तु विनयेन योगो वैनयिकमित्युच्यते एवं सर्वत्र द्रष्टव्यम् । अनुपलभ्यमानभेदानाम-प्यनुमानतो भेदोऽनुमेयः। याँश्चापि भवाननुपलभ्यमानभेदान् प्रत्य-यान् स्वार्थे मन्यते तेष्वप्यनुमानतो भेदोऽनुमेयः किमनुमानं षष्ठ्या भेदविषयत्वे सर्वा षष्ठी भेदविषये दृष्टेति यथा चानर्थान्तरे षष्ठी नास्ति तथोक्तं गुणगुणिभाववाद इति । तत्किमिदानीमनित्यतेत्ययं शब्दोऽनभिधेय एव नानभिधेयः अवश्यपेक्षानपेक्षाभेदात् सत्तैवो-भयथा योभयान्तपरिच्छिन्नवस्तुसत्ता साऽनित्यतेति । या त्वभया-न्तानवच्छिन्नवस्तुसत्ता सा नित्यता । यथा समवाय एकः सन् कार्येण विशिष्यमाणः कारणमभिधीयते कारणेन विशिष्यमाणः कार्यमिति च कथमिति कारणमित्ययं प्रत्ययो नानिमित्तकः कदाचिद्भावात् न च वस्तुनिमित्तोऽवस्तुप्रत्ययः व्यतिरेकित्वात् न च सत्तातो वैलक्षण्यात् सत्तातः सदिति स्यात् अयं तु सत्ताप्रत्य-

यादिलक्षणस्तस्मान्न सत्तातः इहविशेषणनिमित्तत्वाच्च सम्बन्धनिमित्त इह तन्तुषु पट इत्याधारविशिष्टः प्रत्यय उपजायते न चासति सम्बन्धे इहप्रत्ययेन शक्यं भवितुम् यतोऽयमिहप्रत्ययः स समवायः कार्यसमवाये सति कारणमित्यभिधीयते यस्य गुणस्य योगाद्यस्मिन्नर्थे शब्दनिवेशस्तद्भिधाने त्वतलौ कार्यसमवायस्य भावादेतद्भवतीति कार्यसमवायः कारणत्वम् । एतेन कार्यत्वं व्याख्यातम् । कार्यात्मलाभहेतुः समवायः कारणविशिष्टः कार्यत्वं यथा समवायः एवं सत्ताप्येका सती उभयान्तपरिच्छिन्नवस्तुसम्बन्धित्वेनानित्यतेत्युच्यते विपर्ययान्नित्यतेति । एतयाऽनित्यतया योगादनित्यः शब्द इति ॥

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च[१] ॥ १४ ॥

आदिमत्त्वादादिः योनिः कारणमिति । कारणवत्त्वादनित्य इति सूत्रार्थः । किं पुनरिदं कारणवत्त्वं नाम निमित्तकारणभेदानुविधानमुत्पत्तिधर्मकत्वं तदभिव्यङ्ग्येषु नास्ति । न हि किञ्चिदभिव्यज्यमानं निमित्तकारणभेदानुविधायि दृष्टमिति । संयोगविभागानन्तरमुपलब्धेः सन्देह इति चेत् । अथ मन्यसे संयोगविभागानन्तरमुपलभ्यते शब्दः सा च तदनन्तरोपलब्धिर्व्यज्यमानस्यापि युक्ता अतः सन्देहः किमयं संयोगविभागाभ्यां व्यज्यते अथ क्रियत इति । न व्यज्यते ऐन्द्रियकत्वात् किमिदमैन्द्रियकत्वम्, इन्द्रियप्रत्यासत्तिग्राह्यम् ऐन्द्रियकमिति ततः किं यदीन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकस्ततो न व्यज्यते । न हि व्यज्यमानस्येन्द्रियेण प्रत्यासत्तिर्युक्ता कथमिति न श्रोत्रं तावच्छब्ददेशमुपगच्छति अमूर्तत्वात् यदमूर्तं तन्निः-

(१) कृतकादुपचाराच्चेति विश्वनाथसम्मतः पाठः ।

क्रियं यथा रूपादि अमूर्तं चाकाशं तस्मान्निःक्रियमिति। क्रियाकारणगुणसमवायात् क्रियावत्त्वमिति चेत्। अथ मन्यसे यत्र क्रियाकारणं गुणो वर्तते तत् क्रियावद्दृष्टं यथा लोष्टम् तथा चाकाशं तस्मादेतदपि क्रियावदिति। नानेकान्तात्। क्रियाकारणं च गुणः आत्मनि न क्रियावानात्मा इत्यनेकान्तः विद्यमानस्यापि न क्रियाहेतुत्वं[१] महत्परिमाणप्रतिबन्धात् विद्यमानोप्याकाशेभिघातो न क्रियाहेतुः महत्परिमाणप्रतिबन्धात्। यदाकाशे महत्त्वं तेनैकार्थसमवेतेन तद्वृत्तिरभिघातः प्रतिबध्यत इति यथा लोष्टगुरुत्वम् तदेकार्थवृत्तिना संयोगेनेति संयोगप्रतिबन्धात् गुरुत्वस्य सापेक्षत्वप्रसङ्ग इति चेत्। अथ मन्यसे यदि संयोगेन प्रतिबध्यमानं गुरुत्वं न क्रियामारभते तत्प्रतिबन्धापगमापेक्षमारभत इति। नन्वेवं गुरुत्वं सापेक्षं क्रियाकारणमिति प्राप्तम्। एवं च शास्त्रव्याघातः निरपेक्षगुरुत्वं कर्मकारणमिति हि शास्त्रम्। न निरपेक्षस्यान्यथा व्याख्यानात्। नायं निरपेक्षस्यार्थो गुरुत्वं न किञ्चिदपेक्षत इति अपि तु चरमभाविनिमित्तान्तरं नापेक्षत इति निरपेक्षं गुरुत्वं कर्मकारणमिति नास्ति व्याघातः। तथा च शास्त्रं संयोगाभावे गुरुत्वात् पतनमिति। विषयाभावाच्च न क्रियाकारणगुणसमवधानमात्रम् क्रियावत्त्वे हेतुः अपि तु क्रियाकारणगुणसमवधाने सति मूर्त्तिः यदि क्रियाविषयो मूर्तिर्भवति क्रियाकारणं गुणोप्रतिबद्धो भवति तदा क्रियोत्पद्यत इति। तस्मादक्रियावत्त्वादाकाशं न गच्छति शब्दोऽपि नागच्छति निःक्रियत्वादेव न चाप्राप्तस्य ग्रहणमस्ति सर्वशब्दोपलब्धिप्रसङ्गात्। परिशेषात् तु सन्तानसिद्धिः। तत्राद्यः शब्दः संयोग-

(१) क्रियावत्त्वम्—पा० १ पु०।

(पृष्ठे १५० पङ्क्तौ २० * * * एवंचिह्नितस्थले
ऽधोलिखितस्य पाठस्य योगः कर्तव्यः)

—याभूतमेवानुपालभ्यमानं साधने ऽपि तर्हि तुल्यम् साधनमपि करणं तदपि स्वरूपं न कदाचिज्जहाति । तस्मात् साधनस्याप्युपालम्भो न युक्त इति । एवमनुपालम्भः करणे न कर्मणि कर्मणः स्वविषये सामर्थ्यात् सर्वं कर्म स्वविषये समर्थं करणमप्येवं तस्य तु विषयान्तरे न सामर्थ्यमस्ति । यच्च विषयान्तरे ऽसमर्थं न तेन कर्मणः करणस्य वा वैगुण्यम् । कस्य तर्ह्ययमुपालम्भो यो निग्टह्यते । कश्च निग्टह्यते पुरुषः । अप्रतिपत्तिविप्रतिपत्ती पुरुषस्य न कर्मणो न करणस्य सोऽयं प्रतिपादयितासमर्थयोः कर्मकरणयोरुपादानान्निग्टह्यते । प्रतिपत्तापि यथाभिहितपदार्थाप्रतिपत्त्या । सोऽयं पुरुषधर्मो वचनद्वारेणोद्भाव्यत इति वचनमुपचर्य्य पुरुषधर्मवचनमुपालभ्यत इति । कथं पुनरयमर्थः सूत्रपदेन लभ्यते लभ्यत इत्याह । कथम् प्रमाणतर्कसाधनः प्रमाणैस्तर्केण च साधनस्योपालम्भः प्रमाणतर्कसाधनश्च प्रमाणतर्कसाधनोपालम्भश्च प्रमाणतर्कसाधनोपालम्भः एकस्य साधनशब्दस्य गम्यमानार्थत्वाल्लोपः यथोष्ट्रमुखीति । अथ प्रमाणतर्कसाधनोपालम्भ इत्यनेन पदेन जल्पवितण्डाभ्यां कथं वादो विग्रिह्यते । नन्विदं पचप्रतिपचपरिग्रहवत् त्रयाणामपि समानं भवति । न समानं वादे प्रमाणं वादे प्रमाणतर्कसाधनोपालम्भस्य नियतत्वात् प्रमाणतर्कसाधनोपालम्भ एव वादः। छलादिसाधनोपालम्भे जल्पवितण्डैव । यथा विषाणित्वं गवि गवये च समानमपि संवृत्तकण्ठतया सास्नादिमत्तया च विग्रिह्यमाणमुभौ गोगवयौ विग्रिनष्टि

तथा प्रमाणतर्कसाधनोपालम्भ इति । छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इत्यभिधानाद्वादे निग्रहस्थानप्रतिषेधो विशेषविधानात् ततश्चानुपालम्भो वाद इति । प्रमाणतर्कसाधनोपालम्भ इत्यभिधानाद्वादे ऽपि निग्रहस्थानानीत्यदोषः । उपालम्भग्रहणात् समस्तनिग्रहस्थानप्रसक्तौ सञ्ज्ञाभेदमात्रम् । यद्युपालम्भग्रहणाद्वादे निग्रहस्थानानि विद्यन्ते इति मन्यसे ननु सञ्ज्ञाभेदमात्रं जल्पाद्वादस्य न विशेषः । तत्रापि निग्रहस्थानानीहापीति नोत्तरयोर्नियमार्थत्वात् । यस्मादेवोपालम्भशब्देन समस्तानि निग्र—

Prithiráj Rásau, (Text) Part I, Fasc. 1, Part II, Fasc. 1–5 @ /6/ each	Rs. 2	4
Ditto (English) Part II, Fasc. 1	0	12
Prákṛita Lakshaṇam, (Text) Fasc. 1	1	8
Parásara Smṛiti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–4 @ /6/ each	6	12
Paráśara, Institutes of (English)	0	12
S'rauta Sútra of Ápastamba, (Text) Fasc. 1–12 @ /6/ each ...	4	8
* Ditto Látyáyana, (Text) Fasc. 2–9 @ /6/ each	3	0
Ditto S'ánkháyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–3 @ /6/ each	5	4
*Sáma Veda Saṃhitá, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Saṅkhya Sutra Vritti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
*Sankara Vijaya, (Text) Fasc. 2 and 3 @ /6/ each	0	12
*Sánkhya Pravachana Bháshya, Fasc. 3 (English preface only) ...	0	6
S'ri Bháshyam, (Text) Fasc. 1–3 @ /6/ each	1	2
Suśruta Saṃhitá, (Eng.) Fasc. 1 & 2 @ /12/ each	1	8
*Taittiríya Áraṇya, (Text) Fasc. 2–11 @ /6/ each	3	12
* Ditto Saṃhita, (Text) Fasc. 9–38 @ /6/ each	11	4
Táṇḍya Brahmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Chintámaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1 @ /6/ each ...	8	10
Tul'si Sat'saí, (Text) Fasc. 1–4 @ /6/ each	1	8
Uvásagadasáo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varáha Puráṇa, (Text) Fasc. 1–14 @ /6/ each	5	4
*Váyu Puráṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	8
Vishṇu Smṛiti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivádaratnákara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vrihannáradiya Puráṇa, (Text) Fasc. 1–6 @ /6/	2	4
Vrihat Svayambhu Puran, Fasc. 1 to IV	1	8

Tibetan Series.

Pag-Sam Thi S'iṅ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1, @ 1/ each	9	0
Rtogs *brjod dpag bkhri* S'iṅ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–4 @ 1/ each	9	0

Arabic and Persian Series.

'Alamgírnámah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Ain-i-Akbarí, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III Fasc. 1–5, @ 1/12/ each	29	12
Akbarnámah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bádshánámah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1 & 3 @ 1 each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashídí, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrish-i-Ṭúsí, or, Ṭúsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futúḥ-ul-Shám Waqidí, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto Azádí, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Asmán, History of the Persian Mansawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbálnámah-i-Jahángirí, (Text) Fasc. 1 3 @ /6/ each	1	2
Iṣubáh, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maásir-ul-Umara, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol III, 1–10 Index to Vol. I Fasc. X & XI & Index to Vol. III, Fasc. XI & XII @ /6/ each	12	0
Magházi of Wáqidí, (Text) Fasc. 1–5 @ /6/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied

Muntakhab-ul-Tawáríkh, (Text) Fasc. 1–15 @ /6/ each ...	Rs.	5	10
Muntakhab-ul-Tawáríkh, (English) Vol. II, Fasc. 1–5 @ /12/ each ...		3	12
Muntakhab-ul-Lubáb, (Text) Fasc. 1–19 @ /6/ each ...		7	2
Mu'ásir-i-'Alamgírí, (Text), Fasc. 1–6 @ /6/ each ...		2	4
Nokhbat-ul-Fikr, (Text) Fasc. 1		0	6
Nizámí's Khiradnámah-i-Iskandari, (Text) Fasc. 1 and 2 @ /12/ each		1	8
Riyázu-s-Salatin, (Text) Fasc. 1–4 @ /6/ each		1	8
*Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each		4	0
Tabaqát-i-Násirí, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Táríkh-i-Fíróz Sháhi of Zia-al-din Barni (Text) Fasc. 1–7 @ /6/ each ...		2	10
Táríkh-i-Baihaqí, (Text) Fasc. 1–9 @ /6/ each		3	6
Táríkh-i-Fírozsháhi, of Shams-i-Siráj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1 & 2 @ 1/8/ each		3	0
Wís o Rámín. (Text) Fasc. 1–5 @ /6/ each		1	14
Zafarnámah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ...		6	6
Tuzuk-i-Jahángirí, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each	Rs.	50	0
Ditto Index to Vols. I—XVIII		5	0

2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.

3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1850 (7), 1851 (7), 1857 (6), 1858 (5), 1861 (4), 1862 (5), 1864 (5), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784–1883 ...		3	0
General Cunningham's Archæological Survey Report for 1863–64 (Extra No., *J. A. S. B.*, 1864)		2	0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J. A. S. B.*, 1868)		2	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J. A. S. B.*, 1875)		4	0
Introduction to the Maithili Language of North Bihár, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J. A. S. B.*, 1882)		4	0
5. Anis-ul-Musharrahin		3	0
6. Catalogue of Fossil Vertebrata		3	0
7. Catalogue of the Library of the Asiatic Society, Bengal		3	8
8. Istiláhat-us-Súfíyah, edited by Dr. A. Sprenger, 8vo.		1	0
9. Ináyah, a Commentary on the Hidayah, Vols. II and IV, @ 16/ each...		32	0
10. Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I ...		2	0
11. Khizánat-ul-'ilm		4	0
12. Mahábhárata, Vols. III and IV, @ 20/ each		40	0
13. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each		18	0
14. Sharaya-ool-Islám		4	0
15. Tibetan Dictionary, by Csoma de Körös		10	0
16. Ditto Grammar		8	0
17. Vuttodaya, edited by Lt.-Col. G. E. Fryer		2	0
Notices of Sanskrit Manuscripts, Fasc. 1–26 @ 1/ each		26	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...		5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

30–11–95.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 907.



न्यायवार्त्तिकम्।

NYĀYA-VĀRTTIKAM

EDITED BY

PANḌIT VINDHYEŚVARĪ PRASĀD DUBE.

LIBRARIAN, GOVT. SANSKRIT COLLEGE, BENARES.

FASCICULUS IV.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1897.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	...	4	2
Aitarēya Āraṇyaka of the Ṛg Veda, (Text) Fasc. 1–5 @ /6/ each ...		1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–3 @ /6/		6	12
Aṇu Bhāṣyam, (Text) Fasc. 1–4 @ /6/ each		1	8
Aphorisms of Śāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 3–8 @ /6/ each		2	4
Brahma Sūtra, (English) Fasc. 1		0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çrauta Sūtra of Āpastamba, (Text) Fasc. 1–13 @ /6/ each...	Rs.	4	14
* Ditto Lātyāyāna, (Text) Fasc. 2–9 @ /6/ each		3	0
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1 & 2...		0	12
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
*Lalita-Vistara, (Text) Fasc. 4–6 @ /6/ each		1	2
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
*Mārkaṇḍēya Purāṇa, (Text) Fasc. 4–7 @ /6/ each		1	8
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–5 @ /12 each		3	12
*Mīmāṁsā Darçana, (Text) Fasc. 4–19 @ /6/ each		6	0
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyayavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text); Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each...		5	4

विभागहेतुकः तस्माच्छब्दान्तराणि कदम्बगोलकन्यायेन सर्वदिक्कानि तेभ्यः प्रत्येकमेकैकः शब्दो मन्दतरतमादिन्यायेनाश्रया(१)प्रतिबन्धमनुविधीयमानः प्रादुरस्ति ततोऽन्त्यस्यातिमान्द्याच्छब्दान्तरोत्पत्तिशक्तिविघातो येन केनचित् प्रतिबन्धाद्भवतीति। अतः शब्दसन्तानोच्छेदः तत्र यः कर्णशष्कुलीमन्तमाकाशदेशं प्राप्नोति स उपलभ्यते नेतर इति तस्मादैन्द्रियकत्वं तच्चान्यथा न युक्तमित्यतोऽनित्य इति। एक एवेति चेत् न सर्वैरुपलब्धिप्रसङ्गात्। अथ मन्यसे नैव शब्दान्तराणि मयाभ्युपगम्यन्ते अपि त्वेक एवायं शब्दो वितत्याकाशमवतिष्ठते स संयोगविभागाभ्यामभिव्यक्तः सन्नुपलभ्यते यथा घटाद्यपवरकावस्थितं प्रदीपसंयोगेनेति। तच्च न सर्वैरुपलब्धिप्रसङ्गात् यद्येकः शब्दो वितत्यावस्थितः संयोगेन व्यक्तः श्रोत्रवतोऽर्थे प्रत्ययं करोतीति मन्यसे तदा येन केनचिद्यत्र तत्रावस्थितेन शब्दो व्यक्त इति सर्वैः श्रोत्रवद्भिरुपलभ्येत न स चोपलभ्यते तस्मात् कल्पनेयम्। एकदेशाभिव्यक्तिरिति चेत् न किमस्तादात्म्यातादात्म्यानुपपत्तेः। अथ मन्यसे सत्यं वितत्यावस्थितः तस्य त्ववस्थितस्यैकदेशो निमित्तेन व्यज्यत इति। न किमस्तादात्म्यातादात्म्यानुपपत्तेः। यांस्तानेकदेशान् शब्दस्य मन्यसे तें किं शब्दात्मका आहो नेति किञ्चातः यदि शब्दात्मकास्ततोऽनेके शब्दा इति व्याघातः अथाशब्दात्मकाः न तदा शब्दादर्थप्रत्यय इति प्राप्तम्। तेषां स्वभावश्च विमोक्तव्यः(२)। शब्दस्याकाशवृत्तित्वादेकदेशार्थानभिधानाच्च। एकदेश इति समासपदमेतत् एकश्चासौ देशश्चेति। तत्र देशशब्द आधारार्थः कार-

(१) तमादिभावेनाश्रया—पा० ६ पु०। (२) वक्तव्यः—पा० ६ पु०।

णार्थो वा। तत्राधारार्थस्तावन्न युक्तः शब्दस्याकाशवृत्तित्वात् आकाशवृत्तिः शब्दस्तद्गुणत्वात् तस्मादाकाशव्यतिरिक्तो नाधार इति। कारणार्थोऽपि नास्ति अकृतकत्वाभ्युपगमात् अकृतकः शब्द इति स्वयं प्रतिपद्यमाना भवन्तो नार्हन्ति वक्तुम् कारणमेकदेश इति न चान्य एकदेशार्थः सम्भवतीति शून्यमभिधानमेकदेशः शब्दस्य व्यज्यते एकदेशाभिव्यक्तौ चार्थप्रत्ययो न स्याद्वर्णवत् वर्णाः सर्व एव व्यापका भवन्तीति एतस्मिन् पक्षे वर्णैकदेशव्यक्तिः न च वर्णैकदेशः शक्यो निरूपयितुम् न च निरूपितादपि तस्मादर्थप्रत्ययो भवति वर्णानामर्थप्रत्यायनानभ्युपगमात्। वर्णा अपि तावदेकैकशोऽर्थप्रत्यायका न भवन्ति कुतस्तदेकदेशा इति। एतेन बहुत्वं प्रत्युक्तम्। यथैकस्य व्यक्तौ[1] दोष एवमनेकशब्दस्यापि व्यापित्वे दोषः कोलाहलश्च स्यात्। यदि चानेकशब्दा आकाशे वर्तन्ते युगपदिति प्रतिपद्यन्ते एकशब्दाभिव्यञ्जकोपादाने समानदेशानां शब्दानां[2] व्यक्तिरिति कोलाहलश्च स्यात्। यथा मल्लनटसमाजेषु प्रयोगजशङ्कारातिशया[3]वर्जितेषु नदत्सु भवति तस्मान्नानेको व्यापक इति नियमश्च न स्यात्। यदि चानेके शब्दा युगपदाकाशे वर्तन्ते इति। एवं च यत्किञ्चिद्व्यञ्जकमुपात्तम् समानदेशान् सर्वानभिव्यनक्तीति। यदा वीणा वाद्यते तदा रासभध्वनिरपि श्रूयेत न हि समानेन्द्रियग्राह्याणां समानदेशानां व्यञ्जकेषु नियमो दृष्टः। यद्यस्य व्यञ्जकं तेन तस्य व्यक्तिरिति चेत् तन्नादृष्टत्वात्। अथ मन्यसेऽनेकशब्दसन्निपाते सति व्यञ्जकानि भिद्यन्ते व्यञ्जकभेदाच्चानुविधायिन्यो व्यक्तयः

(१) व्याप्ताविति सम्भाव्यते। (२) पदानां—पा० १ पु०। (३) कारणातिशया—पा० १ पु०।

प्रतिशब्दमुपजायन्त इति तन्नादृष्टत्वात्। न हि समानदेशानामेकेन्द्रियग्राह्याणां व्यञ्जकेषु नियमो दृष्टः। न हि प्रदीप एकेन्द्रियग्राह्यमनेकमर्थं युगपत् सन्निपतितं न प्रकाशयति। सामान्यवदेतत् स्यादिति चेत् नानभ्युपगमात्। अथ मन्यसे ऽनेकार्थसन्निपाते सति सर्वाभिर्व्यक्तिभिः सामान्यानि सम्बध्यन्ते ऽनेकसम्बन्धे सति सामान्यस्य केनचिदर्थेन किञ्चित्सामान्यं व्यज्यत इति। एवमनेकार्थसन्निपाते सति किञ्चिद्व्यञ्जकं किञ्चिच्छब्दं व्यनक्तीति तन्नानभ्युपगमात्। सामान्यमनेकेन भिन्नजातीयेनार्थेन सम्बध्यते इति नाभ्युपगम्यते ऽपि तु स्वविषयसर्वगतं सामान्यं गोत्वं गोष्वेव नाश्वादिषु अश्वत्वमश्वेष्वेव न गवादिषु तस्मादसमोऽयं दृष्टान्तः व्यञ्जकाभावे चोपलब्धेर्न व्यज्यते शब्दः। यदि च संयोगविभागाभ्यां व्यक्तः शब्द उपलभ्यत इति मन्यसे सोऽपि संयोगाभावे नोपलभ्येत उपलभ्यते च दारुवृक्षे दारुपरशुसंयोगनिवृत्ताविति। अभिघातादायुरिति चेत् अत्रोक्तम् अथ मन्यसे दारुपरश्वोरभिघातादायुर्जायते स वायुः सन्तानवृत्त्या वर्तते सन्तानवृत्त्या वर्तमानः कर्णशष्कुलीमन्तमाकाशं प्राप्नोति। तत्प्राप्तौ तत्रस्थः शब्दो गृह्यत[1] इति अत्रोक्तम् यथैकः शब्दः कर्णशष्कुलीमत्याकाशदेशे वर्तते तथा सर्व एव शब्दा वर्तन्त इति यत्किञ्चिद्व्यञ्जकमुपात्तम् यस्य कस्यचिच्छब्दस्य व्यञ्जकं स्यादिति सर्वशब्दोपलब्धिप्रसङ्गः नियमश्च न स्यात् निमित्तसन्निधाने च सर्वत्रोपलब्धेः न व्यज्यते यत् खलु व्यज्यते तन्निमित्तसन्निधाने सति न सर्वत्र व्यज्यमानं दृष्टम् यथा घटार्थिनो विभ्राणाः प्रदीपं घटादिरहितानपवरकादीन् प्रविश्य न घटादीनुपलभन्त इत्यभिव्यक्त्या घटादीन्[2] प्रतिपद्यन्ते। न पुन-

(१) व्यज्यत—मा० ६ पु०। (२) अभिव्यक्तिं घटादीनां—पा० ६ पु०।

स्तान्त्याद्यभिघातसन्निपाते सति क्वचिदपि शब्दान्न पश्यामः तस्मान्न व्यज्यत इति । सर्वत्र सन्तीति चेत् नोक्तोत्तरत्वात् । अथ मन्यसे यस्यैकदेशवृत्तयः शब्दास्तं प्रत्यय(१)मुपलभ्मोऽस्माकं तु सर्व एव व्यापका(२)स्तस्मान्नेष दोष इति नोक्तोत्तरत्वात् उक्तोत्तरमेतदाक्यं न पुनः प्रतिसमाधानं प्रयोजयतीति तस्मान्न व्यज्यत इति। नादोपलब्धौ च विप्रकृष्टदेशावस्थितेन नादसमानदेशशब्दानुपलब्धेर्न व्यङ्ग्यो नादः । एते न वायवीयाः संयोगविभागा व्यङ्ग्या इति प्रत्येतव्यम्। कृतकवदुपचाराच्च तीव्रं मन्दमिति कृतकमुपचर्यते तीव्रं सुखं मन्दं सुखमिति उपचर्यते च तीव्रः शब्दो मन्दः शब्द इति । अत्र च प्रयोगः। अनित्यः शब्दः तीव्रमन्दविषयत्वात् सुखदुःखवदिति कृतकवदुपचारादित्यनेन सूत्रेण सर्वानित्यत्वसाधनधर्मसंग्रहः । कृतकवद्ग्रहणस्योदाहरणार्थत्वात् यथा सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् उपलभ्यस्यानुपलब्धिकारणाभावे सत्यनुपलब्धेः गुणस्य सतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् दृष्टेवमादि। तीव्रशब्दस्य तीव्रार्थविषयत्वात् न शब्दादिविषयत्वमिति चेत्। अथ मन्यसे तीव्रशब्देन तीव्रार्थोऽभिधीयते न शब्दः न चान्यविषयः शब्दोऽन्यस्यार्थस्य प्रतिपादक इति न शब्दशब्देन समानाधिकरणस्य तीव्रशब्दस्याभिधानात् सत्यमयं तीव्रः शब्दः केवल उच्चारितो द्रव्यगुणकर्मणां समानधर्मं प्रतिपादयति शब्देन शब्दावुच्चरतानेकधर्मयोगिनं शब्दमभिधत्ते । यदा पुनरेतौ तीव्रशब्दौ विशेषणविशेष्यभावापन्नावभिधीयेते तदा तीव्रशब्देन धर्मान्तराणि व्यवच्छिद्यन्ते शब्दशब्देन धर्मान्तराणीति

(१) प्रति त्वयमितिच्छेदः । (२) सर्वत्र व्यापकाः—पा० १ ५०।

उभयशब्दप्रयोगात् शब्दो गम्यते तस्मादुपपन्नं तीव्रशब्दविषयत्वाद्-नित्यः शब्द इति । व्यञ्जकस्य तथाभावात् ग्रहणस्य तीव्रमन्द-तारूपवदिति चेत् नाभिभवोपपत्तेः । प्रेषं भाष्ये । ग्रहणं निमित्त-भेदानुविधायीति चेत् न ग्रहणभेदस्यैकत्रादृष्टत्वात् । अथ मन्यसे न शब्दो भिद्यते शब्दे त्वभिन्ने ग्रहणं निमित्तभेदानुविधायि भवति । ग्रहणभेदाच्चाभिभव इति न ग्रहणभेदस्यैकत्रादृष्टत्वात् यद्यभिन्नः शब्दो ग्रहणभेदो न प्राप्नोति न ह्यभिन्ने ग्रहणभेदं विषये पश्यामः । अथाभिन्नेऽपि विषये ग्रहणानि भिद्यन्त इति मन्यसे नित्यं ग्रहण-भेदः स्यात् ततश्च भिन्नोऽभिन्न इति भिन्नाभिन्नप्रत्ययौ न स्याताम् । अभिभवानुपपत्तिश्च ग्रहणयोर्युगपदसम्भवात् न हि ग्रहणे युगपद्भवतः न चैकं ग्रहणमात्मन एवाभिभावकं न चायम-भिभवो नास्ति तस्माद्भिद्यते शब्दः अभिभवानुपपत्तिश्च व्यञ्जकस-मानदेशस्याभिव्यक्तौ प्राप्त्यभावात् व्यञ्जकेन समानदेशोऽभिव्यज्यत इति एतस्मिन् पक्षे नोपपद्यते ऽभिभवः कस्माद्व्यञ्जकसमानदेशत्वात् न हि व्यञ्जकसमानदेशेनाप्राप्तः शब्दोऽभिभवितुं शक्यः अप्राप्तत्वात् न ह्यप्राप्तमभिभावकं भवति । अथाप्राप्तमप्यभिभावकं भवतीति मन्यसे वीणाशब्दानामश्रवणप्रसङ्गः अथाप्राप्ताः शङ्खरासभादिशब्दाः अभिभावका इति न कदाचिद्वीणादिशब्दाः श्रूयेरन् । सर्वत्र सन्तीति चेत् न पूर्वदोषानुवृत्तेः । अथ मन्यसे यो व्यञ्जकसमानदेशं शब्दमभ्युपैति तस्यैष दोषः अस्माकं तु सर्व एव शब्दाः समानदेशाः-तस्माददोषोऽयमिति न पूर्वदोषानतिवृत्तेः समानदेशत्वे शब्दानां व्यञ्जकेषु नियमो नास्तीति यत्किञ्चिद् व्यञ्जकमुपात्तं न सर्व-

शब्दस्य व्यक्तिहेतुरिति पूर्वदोषानतिवृत्तिरिति । समानदेशत्वे च वीणावेणुशब्दानां शङ्खशब्देन वीणावेणुशब्दयोरभिभव इति वीणादिशब्दाश्रवणप्रसङ्गः तस्माच्छब्दा एव भिद्यन्त इति तेषां च भिन्नानां समानदेशत्वे सति ये कर्णशष्कुलीमत्याकाशदेशे युगपत् समवयन्ति तत्र यः पटुः शब्दः स इतरस्याभिभावक इति अभिभवश्च नाम मन्दस्य पटीयसो ग्रहणादग्रहणमिति । यदि च सन्तानवृत्तिः शब्दः कर्णशष्कुलीमदाकाशदेशं प्राप्तश्च गृह्यते दिग्देशप्रत्ययो न प्राप्नोति पूर्वेण शब्द उत्तरेण शब्द इति न हि विषयेषु प्रत्यासीदत्सु दिग्देशप्रत्ययो दृष्टः गन्धादिवदिति । नोपादाननिमित्तत्वाद्दिग्देशव्यपदेशस्य योऽयं शब्देषु दिग्देशव्यपदेशो नायं शब्दनिमित्तः पूर्वापरादिभिन्नेभ्यो निमित्तेभ्य उपजायमानानामेकदेशग्रहणात् तुल्यो दिग्देशव्यपदेशः स्यात् । तस्माच्च शब्दनिमित्तः कुतस्तर्ह्ययं भवतीति वाच्यम् निमित्तभेदात् यानि निमित्तानि शब्दकारणस्य संयोगस्यानुग्रहकारीणि दिग्देशवन्ति तेषां निमित्तानां भेदाद्दिग्देशप्रत्यया इति । य उपलभ्यमाननिमित्ताः शब्दास्तेष्वयं युक्तः येषां तु निमित्तानि नोपलभ्यन्ते तेषु दिग्देशप्रत्ययो न युक्तः न न युक्तः शब्दसन्तानस्य निमित्तभेदाभिमुख्येनादौ प्राप्तेः यः शब्दसन्तानो यस्मान्निमित्तादुपजायते स समन्तात् शब्दान्तराणि सन्तनोति तत्र यः शब्द आदौ कर्णशष्कुलीमदाकाशदेशस्य तदभिमुखेन भागेन सम्बद्धते तन्निमित्तः पूर्वापरादिशब्दव्यपदेशः यदा पुनरादिशब्दपरिच्छेदो नास्ति तदा विपर्यय इति । एके तु ब्रुवते नैव शब्देषु दिग्देशप्रत्ययाः सन्ति

कुतश्चक्षुर्विषयसिद्धौ दिग्देशाध्यवसायात्[१] । तथाहि जात्यन्धानां पूर्वापरादिप्रत्ययाः शब्दे न सन्तीति । अपरे तु दिग्देशव्यपदेशेन चक्षुःश्रोत्रे अप्राप्यकारिणी इति ब्रुवते । तेषामुक्तमुत्तरं प्रत्यक्षसूत्रं वर्णयद्भिरिति ॥

न घटाभावसामान्यनित्यत्वान्नित्येष्वनित्यव[२]दुपचाराच्च ॥ १५ ॥

न घटाभावसामान्यनित्यत्वान्नित्येष्वनित्यवदुपचाराच्च । सूत्रस्य पूर्वहेतूनामनैकान्तिकत्वज्ञापनमर्थः । शेषं भाष्ये ॥

तत्त्वभाक्तयोर्नानात्वस्य विभागाद्व्यभिचारः ॥ १६ ॥

तत्त्वभाक्तयोर्नानात्वस्य विभागाद्व्यभिचारः । नित्यत्वमित्यत्र किं तावत् तत्त्वम् । उभयान्तापरिच्छिन्नवस्तुसत्तासंसर्गः[३] इति । विपर्ययादनित्यत्वमेतच्चाभावे नास्ति । भाक्तं तु तद्भवति नित्य इव नित्यो घटाभाव इति न पुनर्नित्य एव कालद्वयाननुभवात् प्रध्वंसाभावो न प्रागस्ति न घटकाले ऽस्ति प्रागभावो न घटकाले न प्रध्वंसकाल इति । कथं तर्हि नित्य इव नित्य इत्युच्यते । भक्त्या का पुनरियं भक्तिः प्रागभावस्य कारणाभावः प्रध्वंसाभावस्य विनाशाभावः उभयं चैतन्नित्यविषय इत्येतत्सामान्यान्नित्य इव नित्यो न पुनर्नित्य एवेति इन्द्रियप्रत्यासत्तियाच्च ऐन्द्रियक इति ॥

सन्तानानुमानविशेषणात् ॥ १७ ॥

---

(१) देशयवसायात् — पा० १ पु० । (२) नित्येष्वनित्यवदिति क्वचित् ।
(३) सम्बन्धः — पा० १ पु० ।

सन्तानानुमानविशेषणाद्व्यभिचारः। न वयमेन्द्रियकत्वादित्यनेनानित्यत्वं प्रतिपादयामोऽपि तु शब्दस्याभिव्यक्तिं प्रतिषेधामः। न हि व्यज्यमानस्यैन्द्रियकत्वं युक्तमिति पुरस्तादुक्तम् ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचार इति[१] ॥ १८ ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वव्यभिचारः[२]। न हि नित्यानां द्रव्याणां प्रदेशशब्देन कारणमुच्यते। आकाशस्य प्रदेश आत्मनः प्रदेश इति नाकाशात्मनोः कारणद्रव्यमभिधीयते यथा कृतकस्य किमिति नाभिधीयते अविद्यमानत्वात् न हि विद्यमाना आकाशादेः प्रदेशा इति। कथं न विद्यन्ते प्रमाणतोऽनुपलब्धेः यद्याकाशादेः प्रदेशाः स्युः प्रमाणत उपलभ्येरन्निति कथं प्रमाणतोऽनुपलब्धिः विकल्पानुपपत्तेः प्रदेशशब्देन कारणं वाभिधीयते आधारो वा न कारणमकृतकत्वात् यस्मादकृतकमाकाशमतो न कारणार्थः प्रदेशशब्देनोच्यते नाधारोऽनाश्रितत्वात् अनाश्रितमाकाशं तस्याधारार्थोऽशक्यो वक्तुमिति। लोकविरोध इति चेत् नान्यथा तदुपपत्तेः यद्याकाशं निःप्रदेशं प्रतिपद्यसे ननु लोको विरुद्ध्यते पूर्वभागेन व्याप्त आदित्य इति। नान्यथा तदुपपत्तेः। संयोगस्याव्याप्यवृत्तित्वे प्रदेशशब्देनाभिधीयमाने न लोकविरोधो यस्माद्यत्संयोगस्याव्याप्यवृत्तित्वं तत्प्रदेशशब्देनाभिधीयते। एतच्च प्रदेशवता

(१) पाठोऽयं मुद्रितभाष्यपुस्तके स च प्रामादिकः वार्त्तिकन्यायसूचीनिबन्धविरोधात्।
(२) व्यभिचारात्—पा० ६ पु०।

द्रव्येणाकाशस्य सामान्यम् । ये खलु परिच्छिन्ने आमलकादिके भवतस्तयोर्यः संयोगो वर्तते स ते न व्याप्नोति प्रदेशवती इव ते आकाशसंयोगोऽपि नाकाशं व्याप्नोतीति प्रदेशवद्द्रव्यसामान्यात् प्रदेशवदाकाशमिति भाक्तः प्रत्ययः । का पुनरियं भक्तिः अतथाभूतस्य तथाभाविभिः सामान्यमुभयेन भज्यत इति भक्तिः । एतस्मात् सामान्यादध्यारोपितप्रदेशवृत्तिः प्रदेशशब्दः यस्मादाकाशस्य प्रदेशवद्भिर्द्रव्यैः सामान्यं संयोगस्याव्याप्यवृत्तित्वमस्त्यतः प्रदेशशब्दोऽप्याकाशे प्रयुज्यत इति । एवमेतत् न तत्त्वतः कुत इति चेत् न प्रमाणतोऽनुपलब्धेः । अथ मन्यसे आकाशप्रदेशाः प्रदेशवद्द्रव्यसामान्यादाकाश उपचर्यन्ते न पुनस्तत्त्वतस्तदस्तीति[१] न प्रमाणमस्तीति न प्रदेशस्य प्रमाणतोऽनुपलब्धेः । न ह्याकाशादेः प्रदेशप्रतिपादकं प्रत्यक्षादि प्रमाणं सम्भवतीति । स्वरूपेणानभिधानाच्च । यद्याकाशस्य प्रदेशाः स्युः ते स्वरूपेण व्यपदिश्येरन् यथा पटस्य प्रदेशाः के तन्तवः न पुनराकाशस्य प्रदेशाः के इत्युक्ते स्वरूपेण व्यपदेष्टुं शक्या इति । किमोनुपपत्तिश्च पूर्ववत् । याँश्चाकाशप्रदेशान्तरान् मन्यते ते किमाकाशात्मका उत नेति किं चातः यद्याकाशात्मका अनेकमाकाशमिति प्राप्तम् । अथ न तेषां स्वभावो वक्तव्यः कथं च ते तस्य प्रदेशा इति वक्तव्यम् । अनाकाशात्मकाः सन्तः आकाशस्य प्रदेशा इति केनार्थेनाभिधीयते तद्यथा तन्तवः पटस्य प्रदेशा इत्युक्ते कारणार्थं आधारार्थश्च गम्यते न पुनराकाशस्य प्रदेशेष्वेतदस्ति । प्रदेशाभावादनाधारः संयोग इति चेन्नानाधारः आकाशवृत्तित्वात् । अथ

(१) सन्तीति—पा० ६ पु० ।

मनुषे यद्याकाशदेशा न सन्ति आकाशदेशाश्रयः संयोगोनाधारः न अनाधारः आकाशवृत्तित्वात् । यस्मात् त्वयैवोच्यते आकाशाश्रय इति तस्मान्नानाधार इति समानदेशा इति चेत् नावाधनात् । अथ मन्यसे मूर्तिमद्द्रव्यसंयोगा ये आकाशदेशे वर्तन्ते ते प्रदेशाभावात् सर्व एव समानदेशाः प्राप्नुवन्ति एवं च समानदेशत्वे सति न किञ्चिद्बाध्यत इति तदेवं प्रदेशवद्द्रव्यसामान्यादाकाशप्रदेश इति भाक्तः प्रत्यय इति । निष्प्रदेशत्वात् सर्वेण सर्वशब्दोपलब्धिप्रसंग इति चेत् न उक्तोत्तरत्वात् । अथ मनुषे यदि निष्प्रदेशमाकाशं तेन तर्हि सर्वशब्दाः समानदेशा इति सर्वैः सर्वः शब्द उपलभ्येत न त्वुपलभ्यते तस्मादन्यान्यवृत्तयः शब्दाः सर्वैरग्रहणादङ्गुलिरूपादिव(१)दिति । एतच्च न उक्तोत्तरत्वात् । उक्तोत्तरमेतत् यथा संयोगस्याव्याप्यवृत्तित्वं तथा शब्दस्यापीति । गुणत्वाद्व्यापकमित्येके । एके गुणत्वाद्धेतोः शब्दसंयोगाद्यङ्गुलिरूपवद्व्यापकं प्रतिपद्यन्ते तएवं प्रष्टव्याः व्यापकत्वमिति कोऽर्थः यद्याश्रयवृत्तित्वं व्यापकत्वं(२) न किञ्चिद्बाध्यते अथान्यत्तन्नास्ति । वयं तु व्याप्तिमङ्गुलिरूपस्याश्रयोपलब्धावुपलब्धिं ब्रूमः न पुनः शब्दादय आश्रयोपलब्धावुपलभ्यन्ते तस्मादङ्गुलिरूपवन्न व्यापका इति समुदितस्यानानामेकसमुदाय्युपलब्धावुपलब्ध्यनुपलब्धी व्याप्यव्यापी एकाश्रयाणामाश्रयोपलब्धाविति । अथ य आकाशे मूर्तिमतां संयोगास्तेषां काँश्चित् केचित् कृतकान् प्रतिपद्यन्ते काँश्चिदकृतकानिति । तत्र कार्यद्रव्यसंयोगः कृतकः संयोगजत्वादुत्पद्यमानस्य कारणसम्बन्धिभिः कार्यस्य संयोगजः संयोग इति

(१) रूपादिव — पा० ६ पु० । (२) व्याप्तिः — पा० ६ पु० ।

क्रियाजन्यं तु केचिन्नेच्छन्ति यावद्द्रव्यभावित्वात् संयोगस्य अविभक्तस्य संयोगो नास्तीति नास्त्याकाशे क्रियाजः संयोग इति । अणाकाशसंयोगं तु कृतकमितीच्छन्ति । तत्राणाकाशसंयोगस्य तावत् कृतकत्वे ऽनुमानम् आकाशेन कृतकसम्बन्धेन सम्बन्धी परमाणुर्मूर्तिमत्त्वादिभ्यो घटादिवदिति। कार्याकाशसंयोगो विप्रतिपत्तिविषयो न यावद्द्रव्यभावी अविनश्यदाधारवत्त्वे क्रियावद्द्रव्यवृत्तित्वे सत्यप्राप्तिप्रतिद्वन्द्वित्वात्[१] मूर्तिमदितरसंयोगवत् तस्मात् कार्यद्रव्येणाकाशस्य संयोगजः संयोगः क्रियाजश्च परमाणोस्तु क्रियाज इति । विप्रतिपत्तिविषयाविभागिनः आकाशादयः क्रियावद्द्रव्यसंयोगित्वात्[२] परमाणुवत् । यथा परमाणोः क्रियावद्द्रव्यसंयोगा अयावद्द्रव्यभाविनः, संयोगवच्छब्दवद् बुद्ध्यादयश्चात्मन्यव्यापकाः संयोगस्य चाव्याप्यवृत्तित्वमात्मनः प्रदेशार्थ इति व्याख्यातम् । एकस्यानेकमूर्तिमत्प्रदेशवद्द्रव्यसम्बन्धित्वं प्रदेशार्थः । यद्वा यदाकाशस्यैकस्य सतः प्रदेशवतानेकेन सम्बन्धित्वं तत्प्रदेशवद्द्रव्यसामान्यं यथा घटादेः। कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयत इति । कतमस्मिन्नर्थे निष्प्रदेशमाकाशं निष्प्रदेश आत्मेति अर्थतोऽधिगतेर्न सूत्रं यस्मादयमर्थोऽर्थतोऽधिगम्यते ततो न सूत्रित इति । शब्दसन्तानप्रतिपादने वा न सूत्रमर्थतोऽधिगतेः । शास्त्रसिद्धान्ताद्वा तदधिगतिः शास्त्रसिद्धान्तस्तु न्यायसमाख्यातं बहुशाखमनुमानं तेनानुक्तमपि गम्यत इति न सूत्र्यते। अथापीदमस्ति इदं नास्तीति भाष्यम्। योऽयं पर्यनुयोगस्तस्य को विषय इति। अनुप-

(१) प्रतिसन्धित्वात् — पा० १ पु० । (२) संयोगात् — पा० ६ पु० ।
(३) क्रियावद्द्रव्यसंयोगित्वाद्विभागित्वं संयोगवत् — पा० ६ पु० ।

लभ्यमानास्तित्वम् ये शब्दस्य नित्यत्वं कल्पयन्ति ते इदंपर्यनुयोज्याः इदमस्ति इदं नास्तीत्येतद्भवन्तः कथं प्रतिपद्यन्त इति। एवमनुयुक्ताः सन्तः प्रतिब्रुवते प्रमाणत उपलब्धेरनुपलब्धेश्चेति अविद्यमानस्तर्हि शब्दः ॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १९ ॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्चेति। यच्चोभयपक्षसम्प्रतिपन्नं घटाद्यनित्यत्वेन तेन चानुयोज्याः यदिदमनित्यं घटादि भवद्भिः प्रतिपद्यते तत्कथमनित्यमिति। एवमनुयुक्ता यदि घटाद्यनित्यत्वन्यायं प्रतिपद्यन्ते स शब्देऽपीति सूत्रम्। सतोऽनुपलब्धिकारणाभावे कदाचिदनुपलब्धेरनित्यः शब्द इति सूत्रार्थः। शेषं भाष्ये। व्यञ्जकाभावादग्रहणमिति चेत् नोक्तोत्तरत्वात् शब्दस्योच्चारणं व्यञ्जकं तस्याभावान्नोपलभ्यत इत्यसिद्धम् विशेषणमनुपलब्धिकारणाभाव इति। किमिदमुच्चारणं नाम विवक्षाजनितेन प्रयत्नेन कौष्ठ्यस्य वायोः प्रेरितस्य कण्ठादिस्थानाभिघातः तन्नोक्तोत्तरत्वात् वायुगतवेगापेक्षो वायुना[१] तालवादिसंयोगोऽभिघातः संयोगस्य व्यञ्जकत्वं प्राक् प्रतिषिद्धमिति। एवं च तत्त्वं[२] पांशुभिरवाकिरन्निदमाह। कोऽस्यार्थः। तत्त्व उक्ते जात्या प्रत्यवतिष्ठते सा च जातिः ॥

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ २० ॥

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः। कोऽस्य वाक्यस्यार्थः आवरणाद्यनुपलब्ध्याऽनेकान्त इत्यर्थः। यथावरणाद्यनुपलब्धिरनुपलभ्यमानाप्यस्ति तथावरणमित्यनेकान्तः अथानुपलब्धिरनुपलभ्यमाना नास्ति

(१) वेगापेक्षेण वायुना—पा० ६ पु०। (२) च सति तत्त्वं—पा० ६ पु०।

तद्भावादुपलब्धिरस्ति। न चाविद्यमानस्योपलब्धिरस्तीति सिद्धमावरणम्। कथं पुनर्भवान् जानीते नावरणानुपलब्धिरुपलभ्यत इति किमत्र ज्ञेयम् प्रत्यात्मवेदनीयत्वात् प्रत्यात्ममेवायमावरणानुपलब्धिमावरणोपलब्धिं च वेदयते एवं च सत्यपह्नवविषयमुत्तरवाक्यमिति अपह्नवविषयमिति नास्योत्थानमस्तीति। अभ्यनुज्ञावादेन चोच्यते॥

अनुपलम्भाद्ध्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भात्॥ २१॥

अनुपलम्भाद्ध्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भादित्यस्य सूत्रस्यानुपलब्धेरनैकान्तिकत्वमर्थः॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः॥ २२॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः। अतथाजातीयेन प्रत्यवस्थानादनुत्तरमिति सूत्रार्थः। यथाजातीयकः शब्दोऽनित्यस्तथाजातीयकं किञ्चिन्नित्यं न दृष्टमिति। उक्तं चात्र किमुक्तम्। उभयान्तापरिच्छिन्नवस्तुसत्तासम्बन्धो नित्यतेति। तस्मादयथार्थप्रत्यवस्थानात् यत्किञ्चिदेतत्। अनित्यः शब्दो गुणत्वे सत्यस्मदादीन्द्रियविषयत्वात् बुद्धिवत्। अव्यापकस्य व्यापकद्रव्यसमवायित्वे सति प्रत्यक्षत्वात् सुखवत्। आकाशनिष्प्रदेशत्वे हेतुः निष्प्रदेशमाकाशं व्यापकत्वात् आत्मवत् द्रव्यस्य सतः सदाऽमूर्तत्वात् आत्मवदेव व्यापकत्वादेवाकृतकत्वम् व्यापकत्वं च द्रव्यव्यापकस्य सतः सदाऽमूर्तत्वात्। एतेन दिक्कालौ व्याख्यातौ। एतावत् स्वसाधनस्थित्या व्यवस्थितमनित्यः शब्द इति॥

अथ शब्दस्य नित्यत्वं प्रतिजानान इति भाष्यम् ॥

विप्रतिपत्तेः प्रमाणमूलत्वाद्धेतोः परिप्रश्नः। विप्रतिपत्तिर्नाम द्वयोरेकविषया विरुद्धधर्मसम्प्रतिपत्तिः न च विप्रतिपत्तिः प्रमाणान्तरमन्तरेण युक्तेति नित्यत्वे प्रमाणं वक्तव्यमित्यत आह। नित्यः शब्दोऽस्पर्शत्वात् ॥

अस्पर्शत्वात् ॥ २३ ॥

न कर्मानित्यत्वात् ॥ २४ ॥

अनुपलब्धविपक्षैकदेशस्य प्रयोग आकाशवदिति तस्य व्यभिचारदर्शनार्थं सूत्रम्। न कर्मानित्यत्वात्। शेषमस्य भाष्ये ॥

नाणुनित्यत्वात् ॥ २५ ॥

सम्प्रदानात् ॥ २६ ॥

अयमन्यो हेतुः शब्दनित्यत्वे सम्प्रदानात्। न हि किञ्चिन्नित्यं सम्प्रदीयमानमित्यन्वयिनो दृष्टान्तस्याभावाद्विरुद्धः। अथायं प्रतिज्ञार्थावतिष्ठते शब्दः सम्प्रदानाद् घटादिवदिति। एवमपि नित्यत्वं न सिद्धति ॥

तदन्तरालानुपलब्धेरहेतुः ॥ २७ ॥

अध्यापनादप्रतिषेधः ॥ २८ ॥

तदन्तरालानुपलब्धेरहेतुः। अवतिष्ठमानो हि दात्प्रतिग्रहीत्रोरन्तराले उपलभ्येतेति इति सूत्रार्थविरोधः। न विरोधोऽनुमानादुपलब्धेः न हि प्रत्यक्षतोऽनुपलब्धस्यानुमानेनोपलब्धिः सत्तां बाधते।

किमनुमानमध्यापनम् किमिदमध्यापनं नाम दीयमानस्य सम्प्रदानं प्राप्निः दात्प्रतिग्रहीत्रोरन्तराले शब्दोऽस्त्यध्यापनात् शरादिवदिति। उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥२९॥(१)

न शब्दस्याध्यापनं प्रतिषिध्यते अपि तु नृत्योपदेशवदनित्यस्याध्यापनमिति। यत् पुनरेतद्दात्प्रतिग्रहीत्रोरन्तराले शब्दोऽस्तीति सिद्धसाधनमेतदिति। वयमपि ब्रूमो दात्रोच्चारितः शब्दः सन्तानवृत्त्या सम्प्रदानं प्राप्नोति तस्मात् सम्प्रदानमवस्थाने न हेतुः अयं तर्हि हेतुः ॥

अभ्यासात् ॥ ३० ॥

अभ्यासात्। वीणादिवदिति। अनित्येष्वेव लङ्घनपूरणादिष्वभ्यास इति विरुद्धः। अथावस्थानमभ्यासात् साध्येत तथाप्यनवस्थितेष्वेवाभ्यास इत्यनेकान्तः अभ्यासस्वरूपानवधारणादसिद्धश्च। अभ्यासो ह्येकविषयोऽनेकज्ञानोत्पाद एकाकारविषयो वा। तत्रायमभ्यास एकविषय एकाकारविषयो वेति सन्दिग्धासिद्धः अभ्यासासिद्धावभ्यासोपचारविषयत्वेन साधनम् तस्यानेकान्तिकत्वज्ञापनार्थम् ॥

नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ ३१ ॥

नान्यत्वेऽप्यभ्यासोपचारादिति। एतत्सूत्रमन्यत्वप्रतिषेधार्थम् ॥

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ॥ ३२ ॥

(१) केचित्तु नास्य वाक्यस्य सूत्रत्वं किन्तु भाष्यत्वमिति वदन्ति।

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः । यदिदमन्यदिति मन्यसे इदमन्यस्मादनन्यद्वा स्यात् । यद्यन्यदनन्यच्च भवति यथा ब्राह्मणादन्यो न ब्राह्मण इति । अथानन्यत् तथाप्यन्यच्च भवति अनन्यत्वात् । यदनन्यत् तत् कथमन्यद्भविष्यतीति ॥

तद्भावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ॥ ३३ ॥

तद्भावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः । सूत्रस्यार्थाऽविरोधः । अनन्यत्वमभ्युपगतं तन्निवर्तत इति । कथं निवर्तते प्रतिषेधस्यान्यशब्दविषयत्वात् । अन्याभावे अनन्यन्नास्तीति न हि ब्राह्मणाभावे ऽब्राह्मणः सिद्ध्यति । अयं तर्हि हेतुः प्रत्यभिज्ञानात् तद्भावे प्रत्यभिज्ञानं न दृष्टं मण्यादिषु अस्ति च प्रत्यभिज्ञानं शब्दे तस्मात् प्रत्यभिज्ञानादवतिष्ठते शब्द इति । किमिदं प्रत्यभिज्ञानं तत्प्रत्ययविषयत्वम् तत्प्रत्ययविषयत्वमन्यत्वेऽपीत्यनेकान्तः । अथ प्रत्यभिज्ञानं तत्प्रत्ययविषयस्याव्यभिचारः न हि शब्दे कदाचित् तत्प्रत्ययविषयव्यभिचारोऽस्ति यः पुनः सदृशे तत्प्रत्ययः स विशेषदर्शनान्निवर्तते। अतो यासौ तत्प्रत्ययस्य शब्दे ऽव्यावृत्तिः तत्प्रत्यभिज्ञानमिति न तत्प्रत्ययस्याव्यावृत्तिरसिद्धा । अयं तावत् तत्प्रत्ययः पुरुषान्तरे निवर्तमानो दृष्टः । यत् पुनरेतत् विशेषदर्शनात् सदृशे तद्भावप्रत्ययो निवर्तत इति मन्यसे एवमेतत् शब्दे तु किं विशेषस्यादर्शनात् सदृशे तत्प्रत्यय उत तद्भावादेव तत्प्रत्यय इति सन्दिह्यते । अथ प्रत्यभिज्ञानं तद्भावाङ्गवतीति पक्षस्तथाप्यन्यो हेतुर्वक्तव्यः । किं कारणम् प्रत्यभि-

ज्ञानस्यापचविशेषणत्वे नोपयुक्तत्वात् । यत्पुनर्गोशब्दो गोशब्द इति प्रत्ययस्याव्यावृत्तिरस्तीति । न च गोशब्दस्य गोप्रत्ययकर्तृत्वव्यभिचार इति एतदपि सन्दिह्यते किमर्थम् किं कारणसामान्याद्गोशब्दे गोप्रत्ययस्यानिवृत्तिराहो तद्भावादिति । एतेन तत्प्रत्ययकर्तृत्वं व्याख्यातम् । युक्तं तु कारणसामान्याद्गोशब्दे गोशब्दप्रत्ययस्याव्यावृत्तिः । कथमिति गोबुद्धौ गोबुद्धिप्रत्ययो न व्यावर्तते न चास्या गोशब्दबुद्धेस्तत्प्रत्ययकर्तृत्वं निवर्तते तस्मात् तत्प्रत्ययहेतुत्वे प्रत्यभिज्ञानमहेतुः यस्मानुपलम्भविशेष एव निवर्तते तं प्रति तस्य वस्तुनः किं विशेषोऽस्ति नास्तीति भवन्त एव प्रष्टव्याः । यद्यस्ति विशेषः प्रत्ययाव्यावृत्तिरहेतुरनेकान्तात् । अथ नास्ति एकं वस्तु द्व्यात्मकमिति प्राप्तम् । विरोधादहेतुः प्रत्ययाव्यावृत्तिश्चाशेषपुरुषविषयतयाऽसिद्धा । पुरुषमात्रविषयतयानैकान्तिकीति अयं तर्हि हेतुः ॥

विनाशकारणानुपलब्धेः ॥ ३४ ॥

विनाशकारणानुपलब्धेः । यदनित्यं तस्य विनाशकारणमुपलभ्यते यथा ओष्ठस्य कारणद्रव्यविभागः न तु शब्दस्य तस्मान्नित्यः शब्द इति ॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ ३५ ॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्ग इति । शेषं भाष्ये ॥

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥ ३६ ॥

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः । अनुमानेन शब्दस्य

विनाग्रकारणमुपलभ्यते। यच्चानुमानेनोपलभ्यते न तन्नास्ति। किमनुमानम् सन्तानोपपत्तिरिति। तस्मादनपदेशोऽयं विनाग्रकारणानुपलब्धेरिति। यस्माद्विषाणी तस्मादश्व इति। किं पुनरत्रासत् विषाणमाहोस्वित् विषाणसम्बन्ध इति। उभयमित्याह यदा विषाणिनमर्थमश्वत्वेन साधयति तदा विषाणमस्त्येव न विषाणं प्रतिषिध्यते अश्वविषाणसम्बन्धाभावादनुमानमसदिति युक्तमुक्तमसत्त्वादनपदेश इति। कर्मत्ववदिति चेत् नाश्रयानित्यत्वात्। अथ मनुषे नित्यस्याप्युपलभ्यमानस्यात्यन्तमग्रहणं दृष्टम्। यथा कर्मत्वस्येति। तच्च न आश्रयानित्यत्वात् आश्रयस्य नित्यत्वादश्रवणकारणानुपपत्तिरिति ब्रूमः। कर्मत्वस्य पुनरग्रहणकारणमाश्रयानित्यत्वमस्ति। तस्मादप्रसङ्ग इति। घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदान्नानाशब्दसन्तानो ह्यविच्छेदेन श्रूयते तच्चेदं चिन्त्यते। शब्दस्य व्यज्यमानस्य यत् तद्व्यक्तिकारणं तत् किं घण्टास्थमाहोस्विदन्यवृत्तीति। यदि घण्टास्थं किमवस्थितमुत सन्तानवृत्तीति अन्यवृत्तित्वेऽपि किमवस्थितमुत सन्तानवृत्तीति। यदि घण्टास्थमवस्थितं च तदा श्रुतिभेदो न प्राप्नोति। अथ घण्टास्थं सन्तानवृत्ति युगपदनेकशब्दोपलब्धिप्रसङ्गः। यावान् घण्टास्थेनावस्थितेन सन्तानवृत्तिनावाभिव्यक्तस्तावानेव शब्द एकस्मिन् काले उपलभ्येत घण्टास्थं चाभिव्यक्तिकारणं कथमन्यत्र वर्तमानं शब्दं व्यनक्तीति वाच्यम् अथान्यागतमवस्थितं सन्तानवृत्ति वाभिव्यक्तिकारणं मनुषे तदैकस्यां घण्टायामभिहतायां शब्दान् व्यनक्ति न प्रत्यासन्नदेशवृत्तिषु घण्टान्तरेष्विति नियमहेतुर्वक्तव्यः असति शब्दभेदे श्रुतीनां

भेद उपपादयितव्यः तारो मन्द इति नादोऽभिधीयत इति चेत् न शब्दसामानाधिकरण्यग्रहणात् शब्दसमानाधिकरणोऽयं तारमन्द-शब्दः प्रवर्तते न नादसमानाधिकरणः तस्माच्छब्दोऽभिधीयत इति। न चासति शब्दविषयत्वे शब्दसामानाधिकरण्यं युक्तम् नीलोत्पलव-दिति। व्यामोहप्रत्ययः स इति चेत् न निमित्तानभिधानात्। अथ मन्यसे तारो मन्द इति शब्दसमानाधिकरणो व्यामोहप्रत्ययो भवति। यथा दीर्घः शब्दो महान् शब्द इति। न विशेषहेत्वभा-वात् व्यामोहप्रत्यय इति न हेतुरस्ति यदि चायं व्यामोहप्रत्ययो भवति व्यामोहप्रत्ययनिमित्तं वाच्यम्। यथा दीर्घशब्द इति अविरलसन्तानश्रुतौ शब्दे दीर्घप्रत्ययो भवति यानि खलु दीर्घाणि द्रव्याणि तेषामवयवोपचये सति ग्रहणसन्ततिविषयत्वं तत्सामान्यात् शब्दे दीर्घप्रत्ययः न तु नित्यशब्दवादिनो व्यामोहप्रत्ययबीजमस्ती-त्ययुक्तमेतत्। तुल्यमेतदिति चेत् न तन्निमित्तस्य कदाचिद्भावात्। अथ मन्यसे यस्यानित्यः सन्तानस्तेनापि घण्टास्थमवस्थितं सन्तान-वृत्ति चान्यस्थमवस्थितं सन्तानवृत्ति चोत्पत्तिकारणं वाच्यम् घण्टास्थमुत्पत्तिकारणं कदाचिच्छब्दानुत्पादयते कदाचिन्नेति नि-त्यवत्प्रसङ्गः न प्रसङ्गः कदाचिद्भावात् शब्दानामुत्पत्तिकारणं घण्टावृत्ति तत् कदाचिद्भवति कदाचिद्भावे सति सन्तानवृत्ति तस्मान्निमित्तभेदानुविधायिनः शब्दाः कदाचिद्भवन्ति सन्तानवृत्ति-त्वात् मन्दतरमन्दतमादिभिन्नरूपानुविधायिनं शब्दमुत्पादयन्तीति। तच्च कारणं संस्कार इति। कुतस्तदुत्पत्तिः पाणिसंश्लेषमपेक्षमाणात् कर्मणः पाणिघण्टासंश्लेषात् पाणिगतवेगापेक्षात् घण्टायां कर्म

तत्कर्म पाण्यभिघातमपेक्षमाणं विभागसमकालं संस्कारं करोति । सा चानन्त्याध्यात्मिकं वायुमुपगृह्णाति सा च वायुनाभिहता पुनः कर्म करोति ततः कर्मणः संस्कारः संस्कारेण पुनः कर्म पुनर्वायूपग्रह इत्येवमादिन्यायेन संस्कार उत्पद्यत इति तच्चान्त्यस्यातिमान्द्यात् घण्टायां महाभूतचोभग्रक्तेरभावस्ततो वायूपग्रहोच्छेदः ततः संस्कारक्षय इति । न संस्कारोऽस्त्यनुपलब्धेरिति चेत् अथ मन्यसे नैव संस्कारोऽस्त्यनुपलब्धेः तच्चासत् ॥

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥३७॥

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः । उक्तार्थं सूत्रम् । यदि संस्कारं शब्दोत्पत्तिनिमित्तं न प्रतिपद्यसे पाणिसंश्लेषाच्छब्दे सन्तानोच्छेदो न प्राप्नोति। अथ घण्टास्थः संस्कारः पाणिसंश्लेषान्निवर्तते तथापि कथं शब्दसन्तानोच्छेद इति । न ब्रूमो घण्टासंश्लेषः शब्दानुच्छिनत्ति अपि तु पाणिघण्टासंश्लेषात्तद्वृत्तिसंस्कारः स्पर्शवद्द्रव्यसंयोगविरोधित्वान्निवर्तते निवृत्ते कारणाभावात् कार्याभाव इति सन्तानोच्छेदः ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ ३८ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः । यदिदमुच्यते विनाशकारणानुपलब्धेर्नित्यः शब्द इति । यदि यस्य विनाशकारणं नोपलभ्यते तन्नित्यं यानीमानि शब्दग्रहणानि तेषां न

भवता विनाग्रकारणमुपपाद्यते अनुपपादनाद्वस्थानान्नित्यत्वमिति। अथानुपलम्भविनाग्रकारणान्यपि ग्रब्दग्रहणानि अनित्यानि ग्रब्देष्वेवमित्यनेकान्तः। अथानुमानतः ग्रब्दग्रहणविनाग्रकारणानि गम्यन्ते तत्प्रमाणं ग्रब्द इति न किञ्चिद्बाधितं भवति। व्यधिकरणत्वाद्युक्तमिति चेत् अथ मन्यसे व्यधिकरणः ग्रब्दः कथमन्यवृत्तिना संश्लेषेण निवर्त्यते। अथ व्यधिकरणोऽपि निवर्त्यते सर्वघण्टाग्रब्दोच्छेदप्रसङ्गः तस्मात् पाणिघण्टासंश्लेषसमानाधिकरणः ग्रब्दः ॥

अस्पर्शत्वाद्प्रतिषेधः ॥ ३९ ॥

अस्पर्शत्वाद्प्रतिषेधः। अस्पर्शद्रव्याश्रयः ग्रब्द इति सूत्रार्थः। कथमन्यत्र वर्तमानस्य पाणिघण्टासंश्लेषो निवर्तक इति। नोक्तोत्तरत्वात्। उक्तोत्तरमेतत् कारणाभावादन्यग्रब्दानुत्पादः। यस्त्वत्पन्नः ग्रब्दः स मन्दतरतमादिन्यायेनान्त्यस्यातिमान्द्यात् येन केनचिद्विरोधित्वात् क्षीयते योऽयं संस्कारः ग्रब्दकारणत्वेन समधिगतः स किमेकोऽनेको वेति सन्दिह्यते। अनेकः संस्कार इति तत्त्वम् ग्रब्दभेदात् कारणभेदे सति कार्यभेदो दृष्टः यस्यैकः संस्कारः तस्येषोः पातः प्राप्नोति अग्रत्वेव यावद्गन्तव्यमिति। अथाप्रतिवध्यमाने संस्कारे द्रव्यं गच्छति न कदाचित्पातः प्राप्नोति तस्मादनेकः संस्कारः ॥

विभक्त्यन्तरोपपत्तेश्च समासे ॥ ४० ॥

विभक्त्यन्तरोपपत्तेश्च समासे। नायं ग्रब्दो गन्धादिभिः सन्निवि-

ष्टो व्यज्यन्ते विभक्त्यन्तरोपपत्तेः विभागश्च विभागान्तरं चेति विभक्त्यन्तरम् प्रतिद्रव्यविधर्माणश्च शब्दाः सरूपाश्च एकद्रव्याः श्रूयन्ते। समासः समुदायः एतच्च स्पर्शवद्द्रव्यवृत्तिषु न प्राप्नोति गन्धादिवत् यथा प्रतिद्रव्यमेको गन्ध एवं प्रतिद्रव्यमेकः शब्द इति। सन्तानोत्पत्तेश्चेति चार्थः। यद्ययं गन्धादिभिः सन्निविष्टः स्यात् नान्यत्र वर्तमानः श्रोत्र उपलभ्येत तस्मात् सन्तानवृत्तित्वादाकाशाश्रयः शब्द इति॥

विकारादेशोपदेशात् संशयः॥ ४१॥

विकारादेशोपदेशात् संशय इति। संशयकारणज्ञापनार्थं सूत्रम्॥

प्रकृतिवृद्धौ विकारवृद्धेः॥ ४२॥

प्रकृतिवृद्धौ विकारवृद्धेरिति सूत्रम्। प्रकृत्यनुविधानादिति सूत्रार्थः। विकारे प्रकृत्यनुविधानं दृष्टमिति॥

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः॥ ४३॥

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुरिति साधनपक्षे दृष्टान्तभावाद्हेतुः॥

नातुल्यप्रकृतीनां विकारविकल्पात्॥ ४४॥

दूषणपक्षे नातुल्यप्रकृतीनां विकारविकल्पात् इत्यसम्बद्धम्।

अतुल्यायाः प्रकृतेः विकल्पात् ते विकारा ह्रस्वदीर्घानुविधानं तु एकारे नास्तीति ॥

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः ॥ ४५ ॥

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः। यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारो विकल्प्यते। एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्पः स्यादिति ॥

न विकारधर्मानुपपत्तेः ॥ ४६ ॥

विकारप्राप्तानामपुनरापत्तेः[१] ॥ ४७ ॥

विकारप्राप्तानामपुनरापत्तेरिति। यदि विक्रियन्ते वर्णाः पुनरापत्तिर्न प्राप्नोति ॥

सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४८ ॥

सुवर्णादीनां पुनरापत्ते[२]रहेतुः। विकारप्राप्तानां पुनरापत्तिदर्शनादनेकान्त इति सूत्रार्थः ॥

न तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ ४९ ॥

न तद्विकाराणां सुवर्णभावाव्यतिरेकात्। सर्वावस्थं सुवर्णदर्शनं न पुनरिकारयकारयोर्धर्मयोः कश्चिद्वर्णात्मा व्यवस्थितो भवति यद्वं हित्वा यत्वमापद्यत इति ॥

---

(१) ऽपुनराप्तेरिति पाठो मुद्रितभाष्यपुस्तके। (२) पुनराप्तेः—पा० १ पु०।

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः[१] ॥ ५० ॥

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः । वर्णविकारा अपि न वर्णत्वं व्यभिचरन्तीति । अस्ति वर्णत्वं सामान्यमिति ॥

सामान्यवतो धर्मयोगो न पुनः सामान्यस्य ॥ ५१ ॥

सामान्यवतो धर्मयोगो न पुनः सामान्यस्येति परिहारः । इतश्च वर्णविकारानुपपत्तिः ॥

नित्यत्वे ऽविकाराद्नित्यत्वे चानवस्थानात् ॥ ५२ ॥

नित्यत्वे ऽविकारात् अनित्यत्वे चानवस्थानात् । नित्या वर्णा इति न युक्तो विकारः व्याघाताद्नित्या वर्णा इति न युक्तो विकारोऽनवस्थितानां विकारादर्शनात् ॥

नित्यानामप्यतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ५३ ॥

नित्यानामप्यतीन्द्रियत्वदर्शनात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेध इति विकल्पसमा जातिः ॥

अनवस्थायित्वे च वर्णोपलब्धिवत् तद्विकारोपपत्तिः ॥ ५४ ॥

अनवस्थायित्वे च वर्णोपलब्धिवद्विकारोपपत्तिरिति साधर्म्यसमा जातिरुभयोरप्युत्तरम् ॥

विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५५ ॥

(१) न्यायसूचीनिबन्धे ५० । ५१ इति सूत्रद्वयं न दृश्यते ।

विकारधर्मित्वेन नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चा-प्रतिषेधः। नित्या विक्रियन्त इति व्याघातो दोषः। उपलभ्यमा-नस्य चेकारस्य यत्वानुपपत्तेः वर्णोपलब्धिवदित्यसम्बद्धम्। इतश्च वर्ण-विकारानुपपत्तिः॥

प्रकृत्यनियमाद्वर्णविकाराणाम्॥ ५६॥

प्रकृत्यनियमात्। विकारे प्रकृतीनां नियमो दृष्ट इति। इकारयकारयोस्तु नियमः तस्मादनियमान्न विक्रियन्त इति॥

अनियमे नियमान्नानियमः॥ ५७॥

अनियमे नियमान्नानियमः। सूत्रार्थोऽनियमो नास्तीति॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः॥ ५८॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः। अनुज्ञात-प्रतिषिद्धयोरेकत्वानुपपत्तेरिति विरोधः सूत्रार्थः तस्मादनुपलभ्य-मानपृथग्धर्मिविशेषाणामादेश इति। यद्येते वर्णा विक्रियेरन् ततः पृथग्विकारलक्षणेभ्यो धर्म्युपलभ्येत न त्वुपलभ्यते तस्मान्न विक्रियन्त इति। अथ विक्रियन्ते एवं विकारो भवति॥

गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषश्लेषेभ्यस्तु विकारो-पपत्तेर्वर्णविकारः॥ ५९॥

गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषश्लेषेभ्यस्तु विकारोपपत्तेः सन्ति वर्णविकाराः। सूत्रार्थो गुणान्तरापत्त्यादेरादेश इति। अयं च

विकारादेशोपदेशविचारो भाष्यकारेणैव सम्यक् निरूपित इति सूत्रार्थमात्रं निरूपितमिति ॥

ते विभक्त्यन्ताः पदम् ॥ ६० ॥

ते विभक्त्यन्ताः पदम् । ते वर्णा यथादर्शनं विहिता विभक्त्यन्ताः पदसञ्ज्ञका भवन्ति । अर्थप्रत्ययस्तर्हि न प्राप्नोति । न न प्राप्नोति । अन्त्यवर्णप्रत्ययात् । पूर्ववर्णप्रतिसन्धानप्रत्ययापेक्षादर्थप्रत्यय इति । विभक्तिर्द्वयी नामिकी चाख्यातिकी च । नामिकी सुादयः आख्यातिकी तिवादयः । तया विशिष्यमाणं पदं द्वेधा भवति । नाम च आख्यातं चाभिधेयस्य क्रियान्तरयोगात् । विशिष्यमाण-रूपः शब्दो नाम यथा ब्राह्मण इति । क्रियाकारकसमुदायः कारकसंख्याविशिष्टः क्रियाकालयोगाभिधायिक्रियाप्रधानमाख्यातम् पचतीति यथा । यदि द्वयी विभक्तिरुपसर्गनिपातास्तर्हि न पदस-ञ्ज्ञकाः[१] । न नास्त्यन्तर्भावात् उपसर्गनिपाता नाम्ना संगृहीताः[२] । यस्मादाह अव्ययाश्चोप इति ते सुबन्तत्वात्तेनैव संगृहीता इति । पदेन व्यवहार इति पदार्थश्चिन्त्यते नामपदं चाधिकृत्य व्यवहार इति नामपदं चिन्त्यते । नाम्नश्चाधिकारो व्यापकत्वात् यस्मान्नाम्ना सर्व एव पदार्था व्याप्यते तस्माद्गौरित्यस्य पदस्यार्थश्चिन्त्यते न पदा-दर्थाधिगतिर्विशेषेनवस्थानात् । न हि पदे उच्चरिते कश्चिद्विशेषो गम्यते तस्मात्पदमवाचकम् । न पदस्य विशेषाविषयत्वात् । क एव-माह पदेन विशेषो गम्यते अपि तु सामान्यवर्त्तिपदं विशेषवर्त्ति

(१) पदसञ्ज्ञाः—पा० १ पु० । (२) नामसंगृहीताः—पा० १ पु० ।

वाक्यम् न च सामान्याभिधानादनर्थकं भवितुमर्हतीति । न सामान्यस्य व्यवहारविशेषाविषयत्वात् । सर्व उपदेष्टा विशेषप्रतिपत्त्यर्थं पदमुच्चारयति । न च सामान्ये प्रैषो न सम्प्रतिपत्तिः तस्मात्पदमवाचकमेवेति । न सामान्यविषयत्वे सति विशेषश्रुतेर्नियामकत्वात् । यदि पदमवाचकं स्यात् न च पदश्रवणात् सामान्यं गम्येत । यदवाचकं न ततः सामान्यं विशेषो वा गम्यते यथार्थाद् गम्यते च पदात् तत् सामान्यं सामान्यश्रुतेर्विशेषश्रुतिर्नियामिका भवति । यथा गौरिति सामान्याधिगतौ तिष्ठति गच्छतीति विशेषश्रुत्या विशेषो गम्यत इति । कथं पुनरियं विशेषश्रुतिस्तिष्ठति गच्छतीति । नैवेयं केवलाद् विशेषश्रुतिः किं तु पूर्वपदापेक्षया विशेषप्रत्ययहेतुत्वाद्विशेषश्रुतिरित्युच्यते । भवतु वा पदादेवोभयम् एतस्मादेव वा गोशब्दादुभयं गम्यते क्रिया च तत्साधनं च प्रधानोपसर्जनभावस्यानियमेन यदायं गोशब्दो गोत्वनिमित्तो गोत्वयोगाद्गौरिति तदा गोशब्दात् प्रधानं साधनं गौर्गम्यते । क्रिया त्वङ्गभूता विशेषकत्वात् । यदा पुनः क्रियाप्रधानं पदं तदा गोर्भावो गोत्वमिति । तदा गौरङ्गभूतो विशेषकत्वाद्गम्यते प्रधानं गोत्वमिति । तदेवं प्रधानोपसर्जनभावस्यानियमेन गोत्वमिति च पदे गौरिति चोभयं गम्यत इति ॥

तत्र प्रधानोपसर्जनभावमाश्रित्य तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः[१] । यस्मादयं गोशब्दो व्यक्त्याकृतिजातिष्वविनाभावेन वर्त्तमानात् प्रयुज्यते[२] । अविनाभाववृत्तिश्च सन्निधिः । अतो न ज्ञायते किं व्यक्तिः पदार्थ उताकृतिरुत जातिरिति ॥

(१) अस्य वाक्यस्य स्खलनं क्वचिद्दृश्यते । (२) प्रवर्तमानासु प्रयुज्यते—पा० १ पु० ।

याशब्दसमूहत्यागपरिग्रहसङ्घातद्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्युक्तिः ॥ ६१ ॥

शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणमिति प्रयोगप्रदर्शनार्थं याशब्दादिसूत्रम्। नामी याशब्दादय इति जातौ प्रयुज्यन्ते कस्माद्भेदात् एका जातिस्तस्या विशेषणमनर्थकम्। या गौस्तिष्ठतीति या गौर्निषीदतीति। एवं शेषेषु। आकृतेरप्यभिधायकमेतच्च भवति। निष्क्रियत्वादाकृतेः न हि निष्क्रिया गच्छति तिष्ठति भवति चेति। एवं सर्वत्र। यस्य चानेन विशेषेण[१] तिष्ठत्यादिना योगस्तं गोशब्दोऽभिधातुमर्हतीति। कुतः विशेषणविशेष्यभावस्यैकविषयत्वात्। यदि गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयं भवति ततो गोशब्देन धर्म्यन्तराणि निराक्रियन्ते तिष्ठतिशब्देन च क्रियान्तराणीति विशेषणविशेष्यभावापन्नयोस्तिष्ठतिगोशब्दयोः सामानाधिकरण्यं युज्यते अन्यथा नेति द्रव्यं व्यक्तिरिति हि नार्थान्तरं तिष्ठतिशब्दसहितेन[२] गोशब्देन व्यक्तिरभिधीयत इति तत्प्रतिषेधार्थम्॥

न तदनवस्थानात् ॥ ६२ ॥

न तदनवस्थानादिति सूत्रम्। नानेन गोशब्देन व्यक्तिमात्रं शुद्धमुच्यते। यद्ययं व्यक्तिमात्राभिधायकोभविष्यत् तेन यस्यां कस्यां चिद्व्यक्तौ प्रत्ययोभविष्यदिति सूत्रार्थः। यदि व्यक्तिर्न पदार्थः कथं या गौस्तिष्ठतीत्यादिप्रयोगः। निमित्तादतद्भावे ऽपि

---

(१) विशेषणेन—पा० १ पु०। (२) तिष्ठतिसचितेन—पा० १ पु०।

तदुपचारः। क्व पुनर्निमित्तादतद्भावेऽपि तदुपचारो दृष्ट इति तस्योपपादनार्थं सहचरणादिसूत्रम्॥

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः॥ ६३॥

अतद्भावेऽपि तदुपचार इति। अतच्छब्दस्य तच्छब्देनाभिधानमुपचारो यथा यष्टिकाशब्देन द्रव्यविशेषोऽभिधीयत इति यष्टिकाशब्दात्तु पुनः साहचर्याद्ब्राह्मणविशेषो(१)ऽभिधीयते। यथा यष्टिकाः प्रवेशयेति। एवं सर्वत्र। किं पुनरत्रोपचारबीजं यष्टिका ब्राह्मणा इति। न ह्युपचारबीजमन्तरेणोपचारो लभ्यते। ननूक्तं साहचर्यमिति साहचर्यं नाम यष्टिकया नित्यसम्बन्धः। यष्टिकासम्बन्धाच्च यष्टिकावानिति स्यान्न यष्टिकेति। यष्टिकावानिति चायं शब्दो मुख्य एवेति। तस्मादुपचारबीजमन्यदवश्यमिति। यष्टिकायां तावदयं यष्टिकाशब्दो जातिनिमित्तः यष्टिकात्वं जातिः सा यष्टिकायां वर्त्तते तया यष्टिकात्वयुक्तया यष्टिकया ब्राह्मणस्य योगः साहचर्यात् संयुक्तसमवेतां जातिं ब्राह्मणे ऽध्यारोप्य ब्राह्मणं यष्टिकेत्याह। एवं शेषाण्युपचारबीजानि स्वयमुत्प्रेक्षणीयानीति॥

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः॥ ६४॥

यदि तर्हि गौरिति पदस्य न व्यक्तिरर्थः अस्तु तर्ह्याकृतिः (२)तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः। आकृतिः पदार्थः कस्मात्

(१) ब्राह्मणो—पा० ६ पु०। कस्मात्—इत्यधिकम् ६ पु०।

तदपेक्षत्वात् सत्त्वव्यवस्थानस्य गौरश्वः पुरुष इत्येवमादि[१]सत्त्वव्यवस्थानमाकृत्यपेक्षं सिद्धति यदपेक्षा च सत्त्वव्यवस्थानसिद्धिः स गोशब्दस्य विषय इति। अत्रापि तदेवोपस्थितं न तदनवस्थानादिति। यस्य च जात्या योगः स गोशब्दस्य विषयो नाकृतिर्जात्ययोगात् कस्य पुनर्जात्या योगः नियतावयवव्यूहस्यावयविनः नियतोवयवव्यूहो यस्य भवति स नियतावयवव्यूहः अन्यपदार्थेन बहुव्रीहिणावयव्यभिधीयत इति॥

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः॥ ६५॥

अस्तु तर्हि जातिः पदार्थः व्यक्त्याकृतियुक्तेष्वप्रसङ्गात्[२] प्रोक्षणादीनां मृद्गवके जातिः। यस्मान्मृद्गवके व्यक्त्याकृती स्तः न च तत्र प्रोक्षणादीनि प्रयुज्यन्ते। न हि गामानय गां देहीति मृद्गवके प्रैषसम्प्रतिपत्ती भवतः। यदभावात्तत्रासम्प्रत्ययः स गोशब्दस्यार्थः कस्याभावात्तत्रासम्प्रत्ययो जातेः। अथ मृद्गवके कस्माद्गोत्वं न जातिः यस्मान्मृद्गवको गौर्न भवति यश्च गौर्न भवति न तत्र गोत्वं वर्त्तते यथाश्व इति। अथ मृद्गवकः कस्माद्गौर्न भवतीति अत एव न भवति यस्मान्मृद्गवक इति। न चायं युक्तः प्रश्नो मृद्गवकः कस्माद्गौर्न भवतीति किं कारणम् प्रतिपत्तिबाधितत्वात् भवानप्येनमर्थं प्रतिपद्यते नायं गौरिति। प्रतिपत्त्या च प्रश्नो बाध्यत इति। अथ मृद्गवके गोशब्दः कुतः आकृतिसामान्यात् चित्रादिवदिति। सर्वगतेति चेत्।

---

(१) इत्यादि—पा० १ पु०। (२) व्यक्त्याकृत्योरप्यप्रसङ्गात्—पा० १ पु०।

अथ मन्यसे सर्वगता जातिः सोत्पद्यमानेन यथा गवा सम्बद्ध्यते तथा मृङ्गवकेनापीति अस्ति मृङ्गवके गोत्वं नानभ्युपगमात् केन सर्वगतत्वं जातेरभ्युपगम्यते अपि तु स्वविषये सर्वत्र वर्त्तत इति सर्वगतेत्युच्यते। कः पुनर्गोत्वस्य स्वोविषयः। यत्र गोत्वं वर्त्तते क्व पुनगोत्वं वर्त्तते यत्र गोत्वनिमित्तोऽनुवृत्तप्रत्ययो भवति। क्व पुनरनुवृत्तप्रत्ययं गोत्वं करोति यत्तस्य साधनं कः पुनर्नित्ये गोत्वे गोः साधनार्थः यत्नेन व्यज्यते। न हि ककुदादिमदर्थव्यतिरेकेण गोत्वस्य व्यक्तिरस्ति[१]। न हि पिण्डेभ्योऽर्थान्तरं गोत्वं पिण्डान्तरालेष्वदर्शनादिति केचित्। न विकल्पानुपपत्तेः पिण्डान्तरालेष्वदर्शनादिति[२]ब्रुवाणः पिण्डान्तरालं पर्यनुयोज्यः। किमिदं पिण्डान्तरालं किमाकाशम् आहो अभाव उत द्रव्यान्तरम्। यद्याकाशम् न तत्र गोत्वं न ह्याकाशं गौरिति। एतेनाभावो द्रव्यान्तरं च व्याख्यातम्। विशेषप्रत्ययानामनाकस्मिकत्वात् अयं च पिण्डप्रत्ययव्यतिरेकभाक् प्रत्यय उपजायमानो निमित्तान्तराङ्गवति दृष्टा खलु पिण्डप्रत्ययव्यतिरेकभाजां प्रत्ययानां निमित्तान्तरादुत्पत्तिः। यथा वस्त्रचर्मकम्बलेषु नीलप्रत्यय इति। आकृतिसामान्यादिति चेत्। अथ मन्यसे सत्यमयमस्तु पिण्डव्यतिरेकनिमित्तादनुवृत्तिप्रत्ययो भवति। न पुनरस्य जातिर्निमित्तं अपि तु यच्छिरःपाणिपादाकृतिसामान्यं तस्मादनुवृत्तिप्रत्यय इति। न पिण्डवदसाधारणत्वादाकृतेः यथैव पिण्डाः पिण्डान्तरवृत्तयो न भवन्ति तथाकृतिरपि एकपिण्डवर्त्तित्वात् पिण्डान्तरवर्त्तिनी न भवति।

(१) व्यक्तिरिति—पा० १ पु०। (२) अग्रहणादिति—पा० ६ पु०।

आकृतेः पिण्डान्तरवर्त्तित्वमभ्युपगम्यते नास्ति विवादेनार्थ इति। अथ पिण्डव्यतिरिक्तं सामान्यं नाभ्युपगम्यते तथाप्येकसामान्यनिराकरणात् समानप्रत्ययबीजमन्य[१]दुक्तव्यं स्यात्। न ह्यमति सामान्ये समानप्रत्ययं पश्याम इति। असत्यपि सामान्ये दृष्टः सामान्यप्रत्यय इति चेत् अथ मन्यसे यथा सामान्येष्वसति सामान्यान्तरे ऽनुवृत्तप्रत्ययो दृष्टो गोत्वादिषु इदं सामान्यमिदं सामान्यमिति। तस्मादनैकान्तिकत्वाद्-अनुवृत्तिप्रत्ययोऽसाधनमर्थान्तर[२]निमित्तप्रतिपादन इति। नानभ्युपगमात्। न मया गोत्वघटत्वाश्वत्वेषु निर्निमित्तः सामान्य[३]प्रत्ययोभ्युपगम्यते तस्मादनुत्तरमेतत्। सूत्रव्याघात इति चेत्। यदि मन्यसे सामान्येषु सामान्यमस्तीति ननु सूत्रव्याघातः सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानमिति। न सूत्रार्थापरिज्ञानात् अयं सूत्रार्थो यथा द्रव्यमिति प्रत्ययो द्रव्यत्वविशेषणाद् द्रव्ये भवति न पुनः सामान्यविशेषेष्वेवमिति। न पुनरयं सूत्रार्थो निर्निमित्तोऽनुवृत्तिप्रत्यय इति। किन्निमित्तमिति चेत् अथ मन्यसे गोत्वादिष्वनुवृत्तिप्रत्ययस्य किं निमित्तं यतः सामान्यमिति भवति कुतः सामान्यमिति भवति अनेकार्थसमवायात्। यथा गोत्वमनेकार्थसमवायि तथाश्वत्वादीत्यनेकार्थैस्तत्समवायस्य समानत्वात् गोत्वादिष्वनुवृत्तिप्रत्यय इति। पाचकादिशब्दवदिति चेत् अथ मन्यसे यथा पाचकादिशब्दा अनुवृत्तप्रत्ययाश्च भवन्ति न च पाचकत्वं नाम सामान्यविशेषोऽस्ति तथा गवादिष्वनुवृत्तप्रत्यय इति न हेत्वर्थापरिज्ञानात् विशेषप्रत्ययानामाकस्मिकत्वादित्यस्य हेतोः

(१) सामान्यमन्य—पा० १ पु०। (२) व्यसाधारणमर्थान्तर—पा० १ पु०।
(३) समान—पा० १ पु०।

पिण्डप्रत्ययव्यतिरिक्तस्य प्रत्ययस्य निमित्तान्तरादुत्पाद इत्ययमर्थः न पुनः सर्वोऽनुवृत्तिप्रत्ययः सामान्यादेव भवतीति । एवं सति पचनक्रियायां यत् प्रधानं साधनं तत्याचकशब्देनोच्यते । तस्य प्राधान्यं पाचकान्तरेऽप्यस्तीति न दोषः । यद्यनेकानुवृत्ति गोत्वं तत् किं प्रतिपिण्डं परिसमाप्या वर्त्तते अथैकदेशेनेति । किं चातः यदि प्रतिपिण्डं परिसमाप्या वर्त्तते पिण्डवदसाधारणत्वाच्च सामान्यं भवितुमर्हति अथैकदेशेन वर्त्तते तथापि नैकमनेकत्र वर्त्तते किन्त्वनेकमनेकत्रेति तस्मात्(१) प्रदेशाः सामान्यस्य वर्त्तन्त इति । ये ते(२) एकदेशाः सामान्यस्य पिण्डेषु प्रत्येकं वर्त्तन्ते ते किं सामान्यात्मका उत नेति । यदि सामान्यात्मका एकमेकत्र वर्त्तत इति प्राप्तम् न चैकमनेकत्र वर्त्तमानं सामान्यमिति युक्तं वक्तुम्(३) अथासामान्यात्मकाः शून्यमभिधानम् सामान्यस्यैकदेशाः प्रत्येकं वर्त्तन्ते इति तैरपि देशैः सामान्यं पूर्ववद्वर्त्तत इति पूर्ववत्प्रसङ्गः । न चान्या गतिरस्ति तस्माच्चानेकवृत्ति सामान्यमिति न विकल्पानभ्युपगमात् नायं विकल्पोऽस्ति गोत्वं प्रत्येकं पिण्डेषु परिसमाप्य वर्त्तते अथ प्रदेशेन वर्त्तत इति तस्माद्विकल्पानभ्युपगमादप्रश्नोयं कस्माद्गोत्वस्यावयविसमुदायत्वानभ्युपगमात् । न गोत्वमवयवि न समुदायः समुदायस्य भाग एकदेशशब्दः अवयविनस्त्ववयवे यदा न किञ्चित्परिहायाशेषमभिधीयते तदावयविनोऽवयवानपेक्ष्य कृत्स्नशब्दः समुदाये च समुदायिनोपेक्ष्य, न च गोत्वमवयवी न समुदायः तस्माच्च कृत्स्नैकदेशशब्दौ स्तः न चेत्तत्रैतौ शब्दौ स्तः तस्माद्गोत्वं

(१) यस्मात्—पा० १ पु० । (२) येनैते—पा० ६ पु० । (३) युक्तमुक्तम्—पा० १ पु० ।

किं कृत्स्नेन वर्त्तते उतैकदेशेनेति न युक्तः प्रश्नः । उक्तं चात्र एकमनेकत्र वर्त्तत इति प्रतिजानानो नानुयोक्तव्यः । कस्मादुभयेन व्याघातादिति । कथं तर्हि गोत्वं गोषु वर्त्तते आश्रयाश्रयिभावेन कः पुनराश्रयाश्रयिभावः समवायः तत्र वृत्तिमद्गोत्वम् । वृत्तिः समवाय इतीहप्रत्ययहेतुत्वादित्युक्तम् न गोत्वं गव्यगवि वृत्त्यभावादिति चेत् अथ मन्यसे यदिदं गोत्वं गोष्वनुवृत्तिप्रत्ययकारणं तत् किं गवि वर्त्तते आहोस्विदगवि यदि तावद्गवि प्राक् गोत्वयोगाद्गौरेवासाविति व्यर्थं गोत्वम् । अथागवि न अश्वादपि गोत्वयोगाद्गौः प्राप्नोति । न चान्या गतिरस्ति तस्मान्न गोत्वादनुवृत्तिप्रत्यय इति न विकल्पानभ्युपगमात् न गवि गोत्वं नागवि प्राक् गोत्वान्नासौ गौर्नाप्यगौरिति । किं कारणम् उभावेतौ विशेष्यप्रत्ययौ न विशेषणसम्बन्धमन्तरेण भवतः न च प्राक् गोत्वयोगादस्तु विद्यते न चाविद्यमानं गौरित्यगौरिति च शक्यं व्यपदेष्टुम् यदैव वस्तु तदैव गोत्वेनाभिसम्बद्धत इत्यनास्पदो विकल्पः । एतेन सत्तासम्बन्धस्य सदसद्विकल्पो व्याख्यातः । न सतः सत्तासम्बन्धः नासतः । यदैव तदस्तु तदैव सत्तया सम्बद्धुमिति सदसदाश्रयो दोषोऽनुपपन्न इति तस्मादुपपन्ना जातिः । न चासौ सदृक्वक इति यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति ॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६६ ॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः । जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षेत व्यक्त्याकृती इति प्राप्ते प्राधान्यादाकृतेः पूर्वनिपातः किं पुनः

प्राधान्यम् आकृतिविशेषणत्वं व्यक्तेः यस्माद्युक्त्या विशेष्यमाणा आकृतिर्जातेर्लिङ्गं भवति तस्मात् प्रधानमाकृतिः न चाग्टह्यमाणायामाकृतौ व्यक्तौ च जातिमात्रं शुद्धं शब्दाद्गम्यते तस्मान्न जातिरपि पदार्थः । न च वै यथार्थेन न शक्यं भवितुम् । कस्तर्हि पदार्थो व्यक्त्याकृतिजातयस्तु पदार्थः ॥

व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६७ ॥

तुशब्दो विशेषणार्थः किं विशिष्यते प्रधानोपसर्जनभावस्थानियमेन पदार्थत्वम् यदा भेदविवक्षा विशेषगतिश्च गौस्तिष्ठति गौर्निषण्णेति तदा व्यक्तिः पदार्थः अङ्गं जात्याकृतौ जातावाकृतौ च स्थानगमनादीनामभावाद्यत्र सम्भवः स पदार्थ इति । यदा पुनर्भेदो न विवक्षितः सामान्यगतिश्च तदा जातिः पदार्थः यथा गौर्न पदा स्पृष्टव्येति आकृतेश्च प्रधानभाव उत्प्रेक्षितव्य इति स्वयमुत्प्रेक्ष्य इत्ययमर्थः क्व पुनराकृतेः प्राधान्यं दृष्टं यथा पिष्टकमय्यो गावः क्रियन्तामिति । तदेतद्बालिशं प्रयोगेषु प्रधानोपसर्जनभावः स्वयमुत्प्रेक्ष्यत इति । न व्यक्त्याकृतिजातयः पदार्थ इति केचित् कुतः विकल्पानुपपत्तेः सदित्येतदेव व्यापकत्वादुपादाय चिन्त्यते सदित्यनेन पदेन पुनर्जातिरभिधीयते पिण्डो वा सम्बन्धो वा जातिमान् वार्थः । तच्च न तावज्जातिरभिधीयते भेदार्थैरभिन्नविभक्तिकत्वात् यद्ययं जातिवाचकः सच्छब्दो भवति सद्द्रव्यमिति भेदवाचिना द्रव्यशब्देन सहशब्दसामानाधिकरण्यं न प्राप्नोति न हि भिन्नार्थवाचकानां सामानाधिकरण्यं पश्यामः न हि गवाश्वमिति सामानाधिकरण्यं दृष्टम् । अथ द्रव्यादिवृत्तित्वात्सत्ताया

एव द्रव्यादिशब्दैः सह सामानाधिकरण्यम् तथापि पारतन्त्र्यात्सत्ता-या गुणत्वं गुणगुणाभिधायिनोश्च शब्दयोः सामानाधिकरण्यं न दृष्ट-मिति यथा शुक्लस्य शौक्ल्यमिति। एतेन सम्बन्धो व्याख्यातः। सच्छब्दः पिण्डानां वाचको भविष्यतीति न युक्तं पिण्डानामानन्त्यात् न ह्ये-कस्य शब्दस्यानेकद्रव्यगुणप्रपञ्चेन सम्बन्ध आख्यातुं शक्यः न चानाख्याते शब्दार्थसम्बन्धे शब्दादर्थप्रतिपत्तिर्युक्ता स्वरूपमात्रप्रतीतेः व्यभिचारा-च्च। सच्छब्दश्रवणाच्च द्रव्यगुणकर्माणीति परिप्लवमाना बुद्धिरवतिष्ठते। न च यस्माद्भिधानात् परिप्लवते बुद्धिस्तदभिधानमिति युक्तं वक्तुम् तस्मात् सच्छब्दो भेदानां न वाचक इति। जातिमन्मात्राभिधाय-कोऽपि सच्छब्दो न भवति कस्मादस्वतन्त्रत्वात् न हि सच्छब्दात्त-द्भेदा घटादयो गम्यन्त इति तद्वद्घटादिभेदानाक्षेपात् सामानाधि-करण्याभावः। अथवा अस्वतन्त्रत्वादिति सच्छब्दः प्राधान्येन सत्ता-यां वर्त्तते। तत्र वर्त्तमानस्तद्वदित्युपचर्यते यच्च यत्र वर्त्तमानमन्य-त्रोपचर्यते न तत्तस्याभिधायकं मञ्चशब्दवदिति। उक्तं चात्र किमुक्तम् तद्वतामानन्त्यात् न सच्छब्देनाभिधानं युक्तमिति तद्वति च न गुणसारूप्यात् प्रत्ययसङ्गतिः। यथाश्वाभिशब्दस्य भृत्ये न गुणोपरागात्। यथा नीलः स्फटिक इति क्रमवृत्त्यभावात् युगपदस-म्भवाच्च। अयथार्थज्ञानोत्पत्तिप्रसङ्गाच्च। तस्मान्न जातिमन्मात्रा-भिधायकोऽपि असाधारणविशेषाभिधायको भविष्यतीति न युक्तम्। अन्यच्च प्रत्ययाभावप्रसङ्गाच्च। न चान्या गतिरस्ति तस्मादन्या-पोहरूक्छुतिरिति। अन्यपदार्थान्तरा(१)पोहं हित्वार्थे कुर्वती श्रुति-

(१) अन्यशब्दार्थान्तरा—पा० १ पु०।

रभिधत्त इत्युच्यत इति । अत्रास्माभिर्व्यक्त्याकृतिजातयः पदार्थ इति प्रधानोपसर्जनभावस्थानियमेन व्यवस्थापितमेकान्तवादिनश्चैते दोषा इति । न चैते दोषाः कथमिति यत्तावत्सत्ताशब्दः सत्ताया न वाचक इति तन्न व्याघातात् सत्ताशब्दो न सत्तावाचक इति व्याहतमुच्यते । कथं वा तद्वाचकत्वे सति सत्ताशब्द इत्यभिधीयते । भवदभिप्रायेणाभिधीयत इति चेत् । अथ मन्यसे नैव नः सिद्धान्ते सत्तादिशब्दाः सन्ति किं तु भवद्भिः सत्ताशब्दो द्रव्यगुणकर्म्मशब्दा इति च परिकल्प्य व्यवहारः क्रियते । ततोऽस्माभिरपि युष्मदभिप्रायानुविधानेन सत्ताशब्दा इति वाचका उपचर्यन्त इति । न व्याघातानिवृत्तेः । सदित्येवमादीनि पदानि लोकप्रसिद्धानि केष्वर्थेषु वर्त्तन्त इत्युभयोर्विचारः । वयं तु ब्रूमः सत्ताशब्दः सत्तायां वर्त्तते त्वं पुनर्ब्रवीषि सत्ताशब्दो न सत्तायामिति । एवं ब्रुवाणो मया विरोधेन प्रत्यवस्थीयते विरोधोद्धारं वानुक्त्वा तन्मतेनाभिधीयत इति ब्रुवाणो न व्याघातमतिवर्त्तसे । यच्चेदमुच्यते त्वया परिकल्पिताः सत्ताशब्दा इति तदपि न परिकल्प्यविषयानभिधानात् परिकल्प्यस्य च विषयोऽतथाभूतस्य तथाभाविभिः सामान्ये सत्यध्यारोपिततद्धर्मणः प्रधानार्थप्रतिपत्तिः यथा स्थाणौ पुरुष इति । यदि चामी शब्दाः परिकल्पिता भवन्ति प्रधानमेषां वाच्यम् न हि निष्प्रधानं परिकल्प्यम् । यत्पुनरेतद्भेदोऽर्थैरभिन्नविभक्तिकत्वादिति । तन्न समानार्थापरिज्ञानात्[१] न ब्रूमः सत्ताशब्देन द्रव्यशब्दस्य सामानाधिकरण्यम् अपि तु सत्तायाः प्रधानसाधनवाचिना सच्छब्देन द्रव्यगुणकर्माण्यभि-

(१) सामानाधिकरण्यार्थापरिज्ञानात्—पा० १ पु० ।

धीयन्ते इत्यत्र गुणकर्मशब्दैरपीतरेतरविशेषणविशेष्यभावापन्नैस्तान्येव एवं च सति युक्तं सामानाधिकरण्यमुभयोः सद्द्रव्यशब्दयो[१]रेकविषयत्वात् यदा पुनरयं सत्ताशब्दः सत्ताप्रधान एवाङ्गभूतं साधनमभिधत्ते न तदा सामानाधिकरण्यम् द्रव्यस्य सत्तेति भवति। तस्मात् सामानाधिकरण्यानुपपत्तिरदोषः विभक्तिभेदनियमाद्गुणगुण्यभिधायिनोः सामानाधिकरण्यस्यासिद्धिः सद्द्रव्यशब्दयोरिति एतदनेन प्रत्युक्तम्। एतेन सम्बन्धो व्याख्यातः। कथमिति न सच्छब्देन सम्बन्धोऽभिधीयते अपि तु सम्बन्धिशब्देनैव सम्बन्धश्च गुणः न सच्छब्दो गुणशब्दः न च गुणशब्देन द्रव्यवाचिनः शब्दस्य सामानाधिकरण्यमस्तीति। यत्पुनरेतदानन्त्या[२]न्न जातिशब्दो भेदानां वाचक इति। कस्यैवमाह जातिशब्दो भेदानां वाचक इति स्वयमयुक्तां वाचोयुक्तिं भवान् प्रतिषेधति। यदि तर्हि भेदानां वाचकः कथं सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते[३]। न चायं भोः सच्छब्दो जातिशब्दः अपि तु भेदशब्द एवायम् भेदशब्देन च भेद एवाभिधीयत इति न किञ्चिद्बाध्यते। कथं न बाध्यते यदा सच्छब्द एको भेदानामानन्त्यं तदवश्यमेव। न चैकस्यानेकेन सम्बन्धः शक्य आख्यातुम् न चानाख्याते सम्बन्धे शब्दार्थप्रतिपत्तिर्युक्तेति न केवलानामनभिधानात्। यो हि सच्छब्देनाविशेषणानि द्रव्यगुणकर्माण्यभिधीयन्त इत्यभिधत्ते तं प्रत्येष दोषः। अस्माकं तु द्रव्यगुणकर्माणि सत्ताविशेषणान्यभिधीयन्ते। यत्र यत्र सत्तां पश्यति तत्र तत्र सच्छब्दं प्रयुङ्क्ते एका च सत्ता तत्प्रत्ययस्यानुवृत्तेः तस्माङ्गे-

(१) सच्छब्दद्रव्यशब्दयोः—पा० १ पु०। (२) पुनरेतदस्त्यानन्त्या— पा० १ पु०।
(३) उच्यन्ते—पा० १ पु०।

दानामानन्त्यं न दोषः । कस्यायमेवम्भूतः साध्यसाधनभावः शब्दं पचयसि आनन्त्यादिति वस्तुधर्मं हेतुत्वेनाभिधत्स इति । अथ भेदा एव जातिशब्दा वाच्यत्वेन पचीक्रियन्ते तथापि नान्वयी न व्यतिरेकी च दृष्टान्तोऽस्तीत्यहेतुरानन्त्यादिति । अथाप्येकदेशान् पचीकृत्यानन्त्यादिति हेतुः एकदेशो दृष्टान्त इति अयमपि न विरोधात् । एवं च सति न कश्चित्पदार्थो वाच्यः न कश्चिच्छब्दो वाचक इति वाच्यवाचकभावनिवृत्तौ विशेषणमनर्थकम् एते न वाच्या एते न वाचका इति । यत्पुनरेतद्व्यभिचारादिति न व्यभिचारविषयापरिज्ञानात् । व्यभिचारी हि नाम स ज्ञेयः यः स्वविषयतज्जातीयवृत्तित्वे सत्यन्यत्र वर्त्तते न पुनरयं सच्छब्दः स्वविषयव्यतिरेकेणासति वर्त्तते । तस्मादस्थाने व्यभिचारदेशनेति हेतुभावानभ्युपगमाच्च । केन चात्र हेतुरभिधीयते द्रव्यं गुणः कर्म सत्त्वादिति तस्मादयुक्तमेतदपि भेदवाचकत्वप्रतिषेधाद् द्रव्यसच्छब्दयोः सामानाधिकरण्यमिति न वक्तव्यम् व्याघातात् । न च कश्चिच्छब्दो द्रव्यवाचकः द्रव्यसच्छब्दयोश्च सामानाधिकरण्यमिति व्याहतम् । यत्पुनरेतत् तद्वतो नास्वतन्त्रत्वादिति न किल[१] सच्छब्देन तद्भेदा घटादयो गम्यन्ते तद्वद्घटादिभेदानाक्षेपात् सामानाधिकरण्याभाव इति । तन्न उक्तोत्तरत्वात् । उक्तोत्तरमेतत् सद्द्रव्यशब्दयोरेकविषयत्वात् सामानाधिकरण्यमिति तद्वद्घटादिभेदानाक्षेप इति वा युक्तम् सच्छब्देन सत्तासाधनानां द्रव्यगुणकर्मणामाक्षेपात् । सत्ताशब्देन द्रव्यगुणकर्माणि नाक्षिप्यन्ते न पुनः सच्छब्देन शक्यते वक्तुं[२] सत्ताशब्देनापि गुणभूतानि गम्यन्त

(१) न खलु—पा० १ पु० । (२) सत्त्वमुक्तम्—पा० १ पु० ।

इति सदिति चायं सच्छब्दः कस्तस्याभिधेयो योऽस्मात् प्रतीयते स तस्यार्थ इति कोऽस्यार्थः विभज्यते सत्ता तद्योगोऽर्थान्तरमिति चयोऽर्थाः। तत्र प्रधानोपसर्जनभावविवक्षायां प्रधानं साधनं गम्यते अङ्गं सत्ता च तद्योगश्च किंकृतः प्रधानाङ्गभावः अर्थकृतः यदा सत्ता किञ्चित्करुते तदा सत्ता विशेषणं पदार्थमुपादाय किञ्चित् करोति तत्प्रधानम् अङ्गं सत्ता प्रधानप्रत्ययहेतुत्वात्। यस्मात् सत्तया पदार्थो विशिष्यते अङ्गहीने प्रत्ययनिवृत्तेः यत्र तदङ्गं सत्तादिकं नास्ति न तत्र सदिति प्रत्ययः। तदेवं तद्वद्घटादिभेदानाचेपादित्ययुक्तम्। यत्पुनरेतत्सच्छब्दः सत्तायां प्राधान्येन वर्त्तत इति तत्र वर्त्तमानस्तदुपचर्यत इति तन्न सच्छब्दविषयापरिज्ञानात्। न भवता सच्छब्दस्य विषयो व्यज्ञायि क एवमाह सच्छब्दः सत्तायां प्राधान्येन वर्त्तत इति यथा च सच्छब्दस्य द्रव्यगुणकर्माणि सत्तासाधनभावाद्विषय इति तथा चोक्तम्। एतेन भेदानामानन्त्यं प्रत्युक्तम्। सच्छब्दस्य विषयः सत्तासाधनं विषयश्च सत्तासाधनभूत एक एवेति। यत्पुनरेतत्तदिति च न गुणसारूप्यात् प्रत्ययसङ्क्रान्तिर्यथा स्वामिशब्दस्य भृत्य इति। अस्यार्थः स्वाम्यनुकारित्वाद्भृत्ये स्वामिशब्द इति। एतत्तु न बुद्ध्यामहे प्रत्ययानां सङ्क्रान्तिरिति। यदि स्वामिप्रत्ययविषयत्वं तन्न प्रत्ययसङ्क्रान्तिः न हि स्वामिप्रत्ययो भृत्ये भवति केवलं गुरुतां प्रियतां वा सम्पश्यन् स्वामिशब्दं युगपद्भूतं तत्र प्रयुङ्क्ते। यथा च भृत्यः स्वाम्यनुकारित्वात्[१] भृत्यः स्वामीत्युपचर्यते[२] न पुनरेवं सत्ताशब्दः

(१) करणात्—पा० ६ पु०। (२) उच्यते—पा० ६ पु०।

कदाचिदपि द्रव्यादिषु वर्त्तत इति। यदा तु सतां भावः सत्तेति तदा सतां विशेषकत्वाद्गुणभूतानां सत्ताशब्देनाभिधानं विशेषकत्वमुपचारः। एतेनैव गुणोपरागाद्यथा नीलः स्फटिक इति प्रत्युक्तम्[१]। यत्पुनरेतत् क्रमवृत्त्यभावाद्युगपदसम्भवाच्चेति अस्यार्थः। सत्ताशब्दः सत्तायां किल वर्त्तित्वात् तद्वति वर्त्तत इति। न चैवं पश्यामः युगपदपि न सम्भवति सत्ताप्रत्ययश्च द्रव्यप्रत्ययश्च न युगपद्भवतः। एतदपि न उक्तोत्तरत्वात्। उक्तोत्तरमेतत्। नाच क्रमो न युगपत्प्रत्ययः सत्प्रत्ययस्य साधनविषयत्वात्। एतेनायथार्थज्ञानोत्पत्तिप्रसङ्गादिति प्रत्युक्तम्। एवं हि क्व हेतुप्रधाननिराबाद्व्यवस्थितं व्यक्त्याकृतिजातयः पदार्थ इति। न जातिशब्दो भेदानां वाचक इति विशेषणानर्थक्यम् न हि कश्चिच्छब्दो भवता भेदानां वाचकत्वेनाभ्युपगम्यते विशेषणं नाम विशेष्ये च सति सामान्यप्रतिपत्तौ च भवति नास्य किञ्चिद्विशेष्यमस्ति न च जातिशब्दस्य कश्चित्पदार्थो वाच्योऽभ्युपगम्यते तस्माद्विशेषणानर्थक्यम्। विरोधाच्च यदि चायं जातिशब्दो भेदानां वाचकोभविष्यदपि तर्हि जातिशब्द एव नाभविष्यत् न ह्यन्यपदार्थवाचकानां तच्छब्दत्वं सम्भवति कथं वा भेदवाचकत्वे सति जातिशब्द इत्युच्यते यच्चोच्यते न जातिशब्दो भेदानां वाचक इति तथा तत् को हि स्वस्थात्मा[२] जातिशब्दवाच्यान् भेदानभ्युपैति। यदि च जातिशब्दवाच्या भेदा न भवन्ति अन्यशब्दवाच्यास्तर्हि प्राप्नुवन्ति। अथान्यशब्दवाच्या अपि न भवन्ति ते न जातिशब्दवाच्या नान्यशब्दवाच्या इत्युभयावाच्यत्वे किमस्य विशेषणस्य सामर्थ्यं न जातिशब्दो भेदानां

(१) एतत् प्रत्युक्तम्—पा० १ पु०। (२) सुस्थात्मा—पा० १ पु०।

वाचक इति। अत एवं वक्तव्यं[१] न वाच्या भेदा अवाचकाः शब्दा इति। अथ मन्यसे परमतव्यपेक्षयेतदुच्यते। न जातिशब्दो भेदानां वाचक इति नानभ्युपगमात् न हि कश्चित्तान्त्रिकोऽस्ति यो जातिशब्दवाच्यान् भेदान् प्रतिपद्यते जातेरप्यवाचकत्वे व्याघातो जातिशब्द इति न हि यो यस्यावाचकः स तच्छब्द इति शक्यं वक्तुम् न जातिशब्दो भेदानां वाचक इति। कस्य तर्हि वाचकः भेदवाचकत्वप्रतिषेधादन्यवाचकत्वमायातम् अथान्यवाचकत्वमपि नेष्यते व्यर्थं विशेषणं जातिशब्दो भेदानां न वाचक इति सर्व एव शब्दा अर्थानां न वाचका इति युक्तं वक्तुम्[२]। अथावाचकाः शब्दा अवाच्या अर्था इत्ययुक्तं चैतत् व्याघातात् अवाचकाश्च शब्दा भवन्ति अवाचकत्वं च शब्दानां शब्देनैव प्रतिपाद्यत इत्यवाचकत्वे शब्दानां प्रतिज्ञाहेतोर्व्याघातः न हि जातिशब्दो भेदानां वाचक इति प्रतिज्ञाहेतुरनन्त्यादिति। उभयं च वचनात्मकमित्युभयस्यावचनात्मकत्वाद्व्याघातः[३]। शब्दांश्चावाचकान् प्रतिपद्यमानेन लोकप्रतिपादनोपायोऽन्यो वक्तव्यः। अन्यथाभ्युपगत[४] इति चेत् अथ मन्यसे न मया शब्दा अवाचका अभ्युपगम्यन्ते नाप्यर्था अवाच्याः अपि तु यो भवद्भिर्वाच्यवाचकन्यायोऽभ्युपगम्यते सोऽस्माभिर्निराक्रियते। अस्माकं तु शब्देनान्यापोहलक्षणा जातिरभिधीयत इति विशिष्य वक्तव्यम् यद्यन्यया शब्दा अर्थानामभिधायका भवन्ति विशिष्य वक्तव्यम्। अस्मत्प्रकृतजात्यादिव्यतिरेकेण जात्यादिशब्दा न जात्यादीनां वाचका इति स्वरू-

---

(१) वाच्यम्—पा० १ पु०। (२) युक्तमुक्तम्—पा० १ पु०।
(३) अवाचकत्वाद्व्याघातः—पा० ४ पु०। (४) अभ्युपगम—पा० ४ पु०।

पानभिधानाच्च । न च समानप्रत्ययकारणता[१]व्यतिरेकेण जाते: स्वरूपं निर्देष्टुं शक्यम् न चानुवृत्तिप्रत्ययः प्रत्याख्यातुं शक्यः न च विशेषप्रत्ययेनाकस्माच्छक्यं भवितुं यतोऽयं प्रत्ययः सा जातिरिति नास्ति विवादः । एतावद्यथाश्रुतिवाक्ये दोषः । अथ जातिशब्दा वाच्यत्वेन भेदा अपि[२] पचीक्रियन्ते । एतस्मिन्नपि प्रतिज्ञार्थे यावन्त एते वाक्यदोषास्ते सर्वे प्रसज्यन्ते एवमेकदेशपचीकरणेऽपि विशेषणविशेष्यभावानुपपत्तेः पूर्वदोषानुवृत्तिः । यदपीदमुच्यते द्रव्यसच्छब्दयोः सामानाधिकरण्यमिति तदपि न व्याघातात् । द्रव्यसच्छब्दयोश्च सामानाधिकरण्यं न च भेदवाचकाः शब्दा इति व्याहतम् । उपचारतो न व्याघात इति चेत् । अथ मन्यसे सद्द्रव्यशब्दावेतौ उपचारतोऽभिधीयेते कथमिति द्रव्यशब्देनाद्रव्यव्युदासः सच्छब्देनासद्व्युदासः तावेतावसद्द्रव्यव्युदासरूपेण प्रवर्त्तमानौ एकमर्थं ब्रुवाते इति समानाधिकरणावित्युच्यते मुख्यतस्तु न कश्चिद्विधानतः शब्दो वाचक इति न मुख्यासम्भवात् मुख्यतः सद्द्रव्यशब्दप्रयोगे सति तेन सामान्यादतथाभूत उपचार इति युक्तम् न त्वेवं वादिनां प्रधानमस्ति न च प्रधानमन्तरेणोपचारः सम्भवति न चान्यापोहवादे उपचारो युक्तः उभयोः प्रधानशब्दत्वात् । यथा सिंहशब्दः सिंहे वर्तते ऽसिंहरूपव्युदासेन तथा माणवकेऽपीति तुल्यवृत्तित्वात् कस्मादुपचार इति । यत्पुनरेतदन्यशब्दार्थापोहः[३] शब्दार्थ इति तदप्ययुक्तम् विधानशब्दार्थसम्भवे सत्याद्या प्रतिपत्तिः[४] यदि विधानशब्दार्थो भवति

---

(१) कारणत्व—पा० १ पु० । (२) भेदा एव—पा० १ पु० ।
(३) अन्यार्थापोहः—पा० १ पु० । (४) प्रवृत्तिः—पा० १ पु० ।

ततो विधीयमानशब्दार्थप्रतिपत्तौ सत्यां तस्मान्यत्र[१] प्रतिषेधः इत्युपपन्नः प्रतिषेधः यस्य पुनर्विधीयमानः पदार्थो नास्ति तस्माद्यां प्रतिपत्तिमन्तरेण कथं प्रतिषेधः[२] यावच्चेतरं न प्रतिपद्यते तावदितरं न प्रतिषेधतीति। यथा गौरिति पदस्यार्थोऽगौर्न भवतीति यावच्च गां न प्रतिपद्यते तावद् बहुविप्रतिपत्तिर्न युक्ता यावच्च गां न प्रतिपद्यते तावदगवीत्युभयप्रतिपत्त्यभावः। पश्चायमन्यापोहः अगौर्न भवतीति गोशब्दस्यार्थः स किं भावोऽथाभाव इति। यदि भावः किं गौरगौरिति यदि गौर्नास्ति विवादः अथागौर्गोशब्दस्यार्थः अहो शब्दार्थकौशलम्। अभावस्तु न युक्तः प्रेषसम्प्रतिपत्त्योरविषयत्वात् न हि गोशब्दश्रवणादभावे प्रेषो न सम्प्रतिपत्तिः शब्दार्थस्य प्रतिपत्त्या प्रतीयते न च गोशब्दादभावं कश्चित्प्रतिपद्यत इति अन्यापोहस्य शब्दार्थ इत्ययुक्तम् अव्यापकत्वात् यच्च द्वैराश्यं भवति तच्चेतरप्रतिषेधात्तदितरः प्रतीयते यथागौरिति पदे गौः प्रतीयमानः अगौः प्रतिषिध्यमानः न पुनः सर्वपद एतदस्ति न ह्यसर्वं नाम किञ्चिदस्ति यत्सर्वपदेन निवर्त्त्येत। एकादिव्युदासाद् व्यापकमिति चेत् अथ मन्यसे एकाद्यसर्वं तत्सर्वशब्देन निवर्त्त्यते। तन्न स्वार्थापवादद्दोषप्रसङ्गात्। एवं सत्येकादिव्युदासेन प्रवर्त्तमानः सर्वशब्दः अङ्गप्रतिषेधादङ्गव्यतिरिक्तस्य चाङ्गिनोऽनभ्युपगमात् अनर्थकः स्यात् एवं सर्वे समुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्त्तमानाः समुदायिव्यतिरिक्तसमुदायानभ्युपगमादनर्थकाः प्राप्नुवन्तीति। द्व्यादिशब्दानां च समुच्चयविषयत्वादेकादिप्रतिषेधे

(१) तस्माच्च—पा० ६ पु०।
(२) मन्तरेण कस्य प्रतिपत्तिमन्तरेण कस्य प्रतिषेधः—पा० ६ पु०।

प्रतिषिध्यमानानामसमुच्चयात् द्यादिशब्दानामनर्थकत्वम् क्रियारूपत्वाच्चापोहस्य विषयो वक्तव्यः। अगौर्न भवतीति अयमपोहः किं गोविषयोऽथागोविषय इति। यदि गोविषयः कथं गोर्गव्येवाभावः अथागोविषय इति मन्यसे कथमन्यविषयादपोहादन्यत्र प्रतिपत्तिः न हि खदिरे छिद्यमाने पलाशे छिदा भवति। अथागोर्गवि प्रतिषेधः अगौर्गौर्न भवतीति केन गोरगोत्वं प्रसक्तं यत्प्रतिषिध्यत इति कथं वा गवि गोप्रतिपत्तिमन्तरेण प्रतिषेधः न ह्युत्तरपदार्थप्रतिपत्तिमन्तरेण प्रतिषेधं पश्यामः। उक्तं चात्र आद्या प्रतिपत्तिर्न प्राप्नोतीति आदिप्रतिपत्तिं चान्तरेण न प्रतिषेध इति। इतश्च न युक्तोऽपोहः विकल्पानुपपत्तेः। योऽयमगोरपोहो गवि स किं व्यतिरिक्त आहोखिदव्यतिरिक्त इति। यदि व्यतिरिक्तः किमाश्रितोऽनाश्रितो वेति। यद्याश्रितः आश्रितत्वाद्गुण इति गोशब्देन गुणोऽभिधीयते न गौरिति गौस्तिष्ठतीति सामानाधिकरण्यं न प्राप्नम्। अथानाश्रितः केनार्थेन षष्ठी गोरपोह इति। अथाव्यतिरिक्तः गौरेवासाविति न किञ्चित्कृतं भवतीति। अयं चापोहः प्रतिवस्त्वेकोऽनेक इति वा वक्तव्यः। यद्येकोऽनेकगोसम्बन्धी तदा गोत्वं तदिति अथानेकस्ततः पिण्डवदानन्त्यादाख्यानानुपपत्तेरर्थप्रत्ययो न युक्तः। इदं च तावत्प्रष्टव्यो जायते भवान् किमयमपोहो वाच्योऽथावाच्य इति। यदि वाच्योऽनैकान्तिकः शब्दार्थः अन्यापोहः शब्दस्यार्थ इति। अनवस्था वा अथानपोहव्युदासरूपेणाभिधीयते अपोहस्तस्याप्यन्य इत्यनवस्था। अथावाच्योऽन्यशब्दार्थापोहं[१] करोतीति व्याहतम् यदि च शब्दस्यापोहो नाभिधेयार्थः

(१) शब्दार्थान्तरापोहं—पा० ६ पु०।

अभिधेयार्थव्यतिरेकेण स्वार्थो[१] वक्तव्यः अथ स एवास्य स्वार्थः तथापि व्याहतम् अन्यशब्दार्थापोहं स्वार्थे कुर्वतीश्रुतिरभिधत्त इत्युच्यते इति तस्य वाक्यस्यायमर्थः तदानीं भवत्यन्यदनभिधानोऽभिधत्त इति। अनेकमिति चास्य पदस्य द्व्यादिविषयत्वात् सामान्याधिगतौ विशेष आश्रयितव्यः न ह्यसति विशेषाश्रयणे सामान्यशब्दाद्विशेषप्रतिपत्तिर्युक्तेति नीलोत्पलशब्दयोश्च प्रधानत्वाद्विशेषणविशेष्यभावानुपपत्तौ विशेषणस्य पूर्वनिपात इत्युभयोः प्रधानत्वाच्च प्रसिद्धिः। एतेन राजपुरुषशब्दौ व्याख्यातौ। समानाधिकरणार्थश्चान्यापोहवादिनावाच्यः। यस्य चान्यापोहः शब्दार्थस्तेनानीलानुत्पलव्युदासौ कथं समानाधिकरणाविति वक्तव्यम्। यस्य पुनर्विधीयमानः शब्दार्थस्तस्य जातिगुणविशिष्टं नीलोत्पलशब्दाभ्यां द्रव्यमभिधीयते जातिगुणौ च द्रव्ये वर्त्तेते न पुनरनीलानुत्पलव्युदासौ तस्मात् समानाधिकरणार्थौ नास्तीति। तदेवमन्यापोहो यथा यथा विकल्प्यते तथा तथा प्रमाणवृत्तं[२] बाधत इति॥

कथं पुनर्ज्ञायते नाना व्यक्त्याकृतिजातय इति। अधिगतत्वात् प्रश्नानुपपत्तिरिति चेत् अधिगता व्यक्त्याकृतिजातयो याज्ञवल्क्यादिसूत्रैरधिगतत्वात् प्रश्नार्थोऽनुपपन्नः। न निमित्तवैविध्ये सति तद्विशेषविषयज्ञापनार्थत्वात् प्रश्नस्य गोशब्द उच्चरन् प्रधानोपसर्जनभावेन निमित्त एव प्रतिपादयतीति याज्ञवल्क्यादिसूत्राणामर्थः एवं च सति तद्विशेषविषयज्ञापनार्थो युक्तः प्रश्नः कतमा तत्र व्यक्तिः कतमा आकृतिः कतमा जातिरिति व्यक्त्याकृतिजातीनां भेदो लक्षणभेदात्। किं पुनर्व्यक्तेर्लक्षणमस्ति व्यक्तिलक्षणप्रतिपादनार्थं व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति सूत्रम्॥

(१) स्वार्थोऽभिधेयो वक्तव्यः—पा० १ पु०। (२) वृत्तत्वं—पा० १ पु०।

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ॥ ६८ ॥

तत्र व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति यद्द्रव्यमुपलब्धिलक्षण-प्राप्तानां स्पर्शान्तानां गुणानामाश्रयः तन्मूर्तितावयवत्वात् मूर्त्तिरिति चोच्यते व्यक्तिरिति च । एतत्तु न बुद्ध्यामहे किमिदमवयविद्रव्यस्य लक्षणम् अहो पदार्थत्वेन चयाणां प्रसक्तानां जात्याकृतिव्यवच्छेदकं व्यक्तिलक्षणमिति । वयं तु ब्रूमो नात्रावयवी व्यवच्छेद्योऽपि तु जात्या-कृतिपदव्यतिरिक्तस्य व्यक्तिपदस्यार्थो वक्तव्य इति । सा च व्यक्तिर्या न जातिर्नाकृतिस्तस्या अनेन सूत्रेण सङ्ग्रहः व्यक्तिर्गुणविशेषाश्रयो मूर्त्ति-रिति। गुणाश्च विशेषाश्च तदाश्रयश्च तच्छब्दलोपाद्गुणविशेषा आश्र-यशब्देन द्रव्यमुच्यते कर्मापि गुणविशेषशब्दाल्लभ्यते गुणेभ्यो विशेषाः गुणविशेषा इति । गुणविशेषग्रहणं किमर्थं गुणपदार्थेन सङ्गृहीताया आकृतेर्निराकरणार्थम् । आकृतिः संयोगविशेषः सा च गुणग्रहणेन सङ्गृहीतेति तन्निराकरणार्थं गुणविशेषग्रहणं गुणविशेषा इत्यत्र द्विरूपो विग्रहः गुणाश्च ते विशेषा इति च गुणेभ्यो विशेषा इति च । आश्रयशब्दसमानाधिकरणो मूर्त्तिशब्दो द्रव्ये मूर्च्छत इति मूर्त्ति-शब्देन द्रव्यमुच्यते । एवं च प्रतिपदं लक्षणं सिध्यति । एवं च रूपा-काशाद्यवरोधः यदि प्रतिपदमेतद्व्यक्तिलक्षणं भवति ततो रूपादय-श्चाकाशादयश्च व्याप्यन्ते अन्यथा तु न लक्षणमव्यापकं स्यादिति[१] । अथवा गुणविशेषाणामाश्रय इति गुणाश्च विशेषाश्च गुणविशेषाः तेषामाश्रयो द्रव्यं तत्र मूर्च्छत इति मूर्त्तिः ॥

---

(१) अव्यापकं भवति—पा० १ पु० ।

आकृतिर्जातिलिङ्गाख्या ॥ ६९ ॥

आकृतिर्जातिलिङ्गाख्या। जातिर्जातिलिङ्गानि च प्रख्यायन्ते यया तामाकृतिं विन्द्यात् सा च नान्या सत्त्वावयवानां नियताद्व्यूहात् नियतव्यूहाः खल्ववयवा जातिमनुमापयन्ति। शिरःपाण्यादिमदाकारसामान्येन गोत्वं व्यज्यते इति शिरःपाण्यादीनां वावयविशेषदर्शनेन कदाचित्पुनरियमाकृतिः पदार्थत्वं जहाति क्व पुनर्जहाति यत्राकृतिव्यक्त्या जातिर्न भवति यथा मृत्सुवर्णरजतमिति(१) आकृतौ नियमो न जातौ सर्वाकृतिर्जातिं लिङ्गयति न पुनः सर्वा जातिराकृत्या लिङ्ग्यते ॥

समानप्रसवात्मिका जातिः ॥ ७० ॥

समानप्रसवात्मिका जातिः। यया भिन्नान्यनेकानि वस्तूनि इतरेतरतोनुवृत्तिप्रत्ययहेतुत्वेन व्यवतिष्ठन्ते सा जातिः। यथेमानि कुण्डानीत्यनुवर्त्तन्ते नेमानि कुण्डानीति व्यावर्त्तन्ते तदेकं सन्निमित्तमनुवृत्तिकारणं यत्सामान्यविशेषो जातिरिति। समानप्रत्ययोत्पत्तिकारणं जातिरिति जातौ नियमो न समानप्रत्ययोत्पत्तौ जातिमन्तरेणापि दृष्टत्वात्(२)। जातिमन्तरेणापि समानप्रत्ययो दृष्टः। यथा पाचकाकिषु तस्माद्व्यवस्थितं व्यक्त्याकृतिजातयः(३) पदार्थ इति। गवादिष्वनुवृत्तिप्रत्ययो दृष्टः पिण्डव्यतिरिक्तालिङ्गाङ्गवतीति(४) विशेषवत्त्वाच्चौलादिप्रत्ययवदिति। गोतोऽर्थान्तरं गोत्वं भिन्नप्रत्ययविषय-

---

(१) मृत्सुवर्णरजतादि—पा० १ पु०। (२) अन्यथापि दृष्टत्वात्—पा० १ पु०।
(३) जात्याकृतिव्यक्तयः—पा० ६ पु०। (४) निमित्ताङ्गवतीति—पा० १ पु०।

त्वात् रूपस्पर्शप्रत्ययवदिति । गोतोऽर्थान्तरं गोत्वं व्यपदेशशब्दविषयत्वात् चैत्राश्ववत् गोगोत्वानुवृत्तिप्रत्ययाभिन्ननिमित्ताविशेषवत्(१) रूपादिप्रत्ययवदिति ॥

संशयस्य प्रमाणानां विचारस्तद्व्यवस्थितिः ।
शब्दस्य तत्त्वप्रामाण्यं पदार्थास्त्वेह कीर्त्तिताः ॥

इति—श्रीउद्द्योतकरे न्यायवार्त्तिके द्वितीयाध्यायस्य द्वितीयमाह्निकम्(२) ॥

समाप्तश्चाच द्वितीयोऽध्यायः ॥

---

(१) विशेषवत्त्वात्—पा० १ पु०। (२) उद्द्योतकरकृतं न्यायसूत्रद्वितीयाध्यायवार्त्तिकमिति क्वचित् ।

अत्र प्रथमादर्शपुस्तके लिपिकालो लेखकेन एवंरूपेण लिखितः । "इत्याचार्यश्रीउद्द्योतकरकृतौ द्वितीयोऽध्यायः समाप्तः ॥ ॥ शुभमस्तु ॥ संवत् १६०० शाके १४६५ विरोधकृतनामसंवत्सरे पुस्तक लिखितं वाराणसिमध्ये लिषापितं ब्राह्मण लिखितं धर्म्मदास कायस्थ ॥ मास माघवदी एकादशी ॥ ॥ श्रीविश्वेश्वरस्थानात् ॥ श्रि(श्री)साहि आलमराज्ये ॥ प्रवर्त्तमाने ॥"

न्यायवार्त्तिके

तृतीयोऽध्यायः ।

आनन्तर्यात् प्रमेयपरीक्षा[१]। यद्विषयोऽहङ्कारः संसारं प्रतनोति यद्विषयं च तत्त्वज्ञानं संसारनिवृत्तिहेतुर्भवति तदानन्तर्यात् परीक्ष्यते। तच्चात्मादीत्यात्मा विचार्यते। किं पुनरस्य विचार्यम् किं शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त आहो नेति न धर्म्मप्रसिद्धेः व्यतिरेकाव्यतिरेकावात्मधर्मौ सति धर्मिणि धर्मौ भवतीति धर्मौ चात्राप्रसिद्धः न चाप्रसिद्धे धर्मिणि धर्मयोर्विचारो युक्तः तस्माद्धर्म्येव तावत्प्रतिपाद्यतामिति। न इच्छादिसूत्रादात्मप्रसिद्धेः इच्छादिसूत्रे च आत्मसद्भावः प्रतिपादितः

---

(१) अत्र भाष्ये परीक्षितानि प्रमाणानि प्रमेयमिदानीं परीक्ष्यते इति इत्थानुकीर्तनम् प्रमेयपरीक्षां वक्ष्यमाणां प्रति इत्थायाः प्रमाणपरीक्षायाः हेतुभावं दर्शयितुम्। प्रमाणेन हि प्रमेयं परीक्ष्यते नान्येन। न च तदपरीक्षितं प्रमाणं प्रमेयपरीक्षायै प्रभवति। तस्मात् प्रमाणपरीक्षा हेतुः हेतुमती च प्रमेयपरीक्षेति। द्वादशविधं च प्रमेयमिति कस्मात् प्रथमत आत्मैव परीक्ष्यते न च प्रमेयान्तरमित्यत आह। तच्चात्मादीत्यत्रात्मा विचार्यते इति। आत्मैव हि प्रमेये प्रथममुद्दिष्टः लक्षितश्चेति तदनुरोधादात्मैव प्रथमं परीक्ष्यते न प्रमेयान्तरमिति। अत्र यद्यपि स्वरूपेणात्मन्येव परीक्षां प्रतिजानीते तथापि लक्षणपरीक्षाद्वारेण लक्ष्यपरीक्षणात् लक्षणपरीक्ष्येव द्रष्टव्या। यथा चेयमात्मलक्षणपरीक्षा तथोपरिष्टाद्दर्शयिष्यते तदेतद्वार्त्तिककरो व्याचष्टे। आनन्तर्यादिति। किं पुनः प्रयोजनं प्रमेयपरीक्षायाः न हि निष्प्रयोजनं परीक्षान्ने प्रेक्षावन्तइत्यत आह। यद्विषयोऽहङ्कार इतीति तात्पर्यटीकायां श्रीवाचस्पतिमिश्राः।

प्रतिपादितत्वादनन्तरो विचारो युक्त इति। अविप्रतिपत्तेः न कस्मिंश्चिदाद्यात्मसद्भावे विप्रतिपद्यते किन्तु विशेषे विप्रतिपद्यते शरीरमात्मात्मा बुद्ध्यादय आत्मा सङ्घात आत्मा व्यतिरिक्त आत्मेति । इयं च धर्मविशेषविप्रतिपत्तिरप्रतिपन्नात्मसत्त्वानां न युक्तेति युक्तो धर्मविचारः असत्त्वप्रतिपादकप्रमाणासम्भवाच्च। न चात्मासत्त्वप्रतिपादकं प्रमाणमस्तीत्यतश्च सद्भावे न विप्रतिपद्यत इति। न नास्त्यजातत्वादित्येके नास्त्यात्मा अजातत्वात् शशविषाणवदिति तच्च नास्त्यात्मेतिपदे तावद्व्याहन्यते नास्तिशब्दसमानाधिकरणोऽयमात्मशब्दो नात्मनोऽसत्त्वं प्रतिपादयति किं कारणम् आत्मेति सत्त्वमभिधीयते नास्तीति तस्य प्रतिषेधः यच्च यत्र प्रतिषिध्यते तत्तस्मादन्यत्रास्ति यथा नास्तिना समानाधिकरणो घटशब्दो न घटाभावं प्रतिपादयितुं शक्नोति अपि तु देशकालविशेषे प्रतिषेधति नास्ति घट इति। देशविशेषे वा प्रतिषेधो गेहे नास्तीति कालविशेषे वा प्रतिषेध इदानीं नास्तीति प्राङ्नास्ति ऊर्ध्वं नास्तीति सर्वश्चायं प्रतिषेधो नानभ्युपगतघटसत्त्वस्य[१] युक्तः। तथा नास्त्यात्मेति किमयं देशविशेषे प्रतिषिध्यते अथ कालविशेष इति। यदि तावद्देशविशेषे प्रतिषिद्धः[२] स आत्मनि न युक्तः अदेशत्वादात्मनः न च देशविशेषप्रतिषेधादात्मा प्रतिषिद्धो भवति[३]। अथायं भवतामभिप्रायः शरीरमात्मा न भवतीति कस्य वा शरीरमात्मा यं प्रति प्रतिषेधः शरीरे नास्त्यात्मेत्येवं[४] प्रतिषेध इति चेत् कस्य वा शरीरे आत्मा यं प्रति प्रतिषेधः क्व तर्ह्ययमात्मा न क्वचिदात्मा किमयं नास्त्येव न

(१) नालच्यगतघटसत्त्वस्य—पा० २ पु० । (२) देशविशेषे प्रतिषेधः—पा० ४ पु० ।
(३) देशविशेषे प्रतिषेधा—पा० १ पु० । (४) त्यात्मेत्ययं—पा० ४ पु० ।

नास्ति विशेषप्रतिषेधात् केयं वाचोयुक्तिः न च शरीरे न चान्यत्र न च नास्ति एषैषा वाचोयुक्तिः यद्यथाभूतं तत्तथा निर्दिश्यते न चायमात्मा क्वचिदपीति तस्मात्तथैव निर्देशः न च कालविशेषप्रतिषेधोऽपि युक्तः आत्मनि चैकाल्यस्यानभिव्यक्तेः(१) न ह्यात्मनि चैकाल्यमभिव्यज्यते नित्यत्वात् नित्य आत्मेत्येतदुपरिष्टात् पूर्वाभ्यस्तसूत्रे प्रतिपादयिष्यामः। तस्मान्न कालविशेषप्रतिषेधोऽपि आत्मप्रतिषेधं च(२) कुर्वाणेनात्मशब्दस्य विषयो वक्तव्यः। न ह्येकं पदं निरर्थकं पश्यामः। अथापि शरीरादिविषयमात्मशब्दं प्रतिपद्येथाः एवमप्यनिवृत्तो व्याघातः कथमिति नास्त्यात्मेति वाक्यस्य तदानीमयमर्थो भवति शरीरादयो न सन्तीति। अथ यं भवन्त आत्मानं कल्पयन्ति स नास्तीति न वयमात्मानं कल्पयामः कल्पना हि नामातथाभूतस्य तथाभाविभिः सामान्यात् तद्धर्मारोपेण तत्प्रत्ययविषयत्वम् न चात्मानमेवम्भूतं प्रतिपद्यामहे यं भवन्त आत्मानं कल्पयन्तीति च ब्रुवाणो भवान् प्रष्टव्यो जायते कथं वयमात्मानं कल्पयाम इति। किं सत्त्वेनाथासत्त्वेन वा यदि सत्त्वेन किमसतः सता साधर्म्यं येन कल्पनाविषय आत्मा आत्मसामान्यं चानात्मनो ब्रुवता आत्माभ्युपगतो भवतीति न ह्यसतः सता सामान्यमस्तीति(३)। अथ शरीरादिविषयमहङ्कारमात्मनि कल्पयित्वा विपर्यस्यति(४) एवं शरीरादिव्यतिरिक्ताऽहङ्कारविषयसत्त्वाभ्युपगमादनिवृत्तो व्याघातः। अथ मन्यसे एकपदस्य नावश्यमर्थेन भवितव्यमिति यथा शून्यं तम इति

(१) चैकात्यात् तस्यानभिव्यक्तेः—पा० १ पु०। (२) प्रतिषेधं च—पा० ४ पु०।
(३) सता साधर्म्यमस्तीति—पा० ४ पु०। (४) विपर्ययिष्यति—पा० १ पु०।

तस्य व्याघातानिवृत्तेः शून्यशब्दस्य तावदयमर्थः यस्य रचिता द्रव्यस्य न विद्यते तद्वयं स्वभ्योहितत्वाच्छून्यमित्युच्यते तमःशब्दस्याप्यनुपलब्धिलक्षणप्राप्तानि द्रव्यगुणकर्माणि विषयः यत्र यत्रासन्निधिस्तेजसस्तत्र तत्र द्रव्यादि तमःशब्देनोच्यते । तमःशब्दस्यानर्थक इति ब्रुवाणः स्वसिद्धान्तं बाधते चतुर्णामुपादेयरूपत्वात्तमस इति तस्मान्नानर्थकं पदमिति ॥

नास्त्यात्मेति चैवंब्रुवाणः सिद्धान्तं बाधते । कथमिति रूपं भदन्त नाहं वेदना संस्कारो[१] विज्ञानं भदन्त नाहमिति एवमेतद्भिक्षो रूपं न त्वं वेदना संस्कारो विज्ञानं वा न त्वमिति । त एते स्कन्धा रूपादयोऽहंविषयत्वेन[२] प्रतिषिद्धाः[३] विशेषप्रतिषेधश्चायं न सामान्यप्रतिषेधः आत्मानं चानभ्युपगच्छता सामान्यमेव प्रतिषेद्धव्यम् नाहं नैव त्वमसीति अथैकशः प्रतिषेधेन[४] समुदायविषयोऽहङ्कार इति । तथापि रूपादिस्कन्धपञ्चकव्यतिरेकेण समुदायो वक्तव्योऽहङ्कारविषयः तद्व्यतिरिक्तं च समुदायमहङ्कारविषयमभ्युपगच्छता[५] सञ्ज्ञा भिद्यते आत्मा समुदाय इति अथाव्यतिरिक्तमेकप्रत्ययो न प्राप्नोत्यहमिति । न हि बहुष्वेकशब्दं[६] पश्यामः । न च रूपादिस्कन्धा एकशः समुदिता वा आत्मा इत्यहङ्कारप्रत्ययोऽतस्मिंस्तदिति प्राप्तः । भवतु मिथ्याप्रत्ययः किन्नो बाध्यत इति कथं न बाध्यते यदा सम्यक्प्रत्ययानुकारिणो मिथ्याप्रत्यया भवन्ति न चात्मानमनभ्युपगच्छता तथागतदर्शनमर्थव-

---

(१) वेदना संज्ञा संस्कारो—पा० ४ पु० । (२) अहङ्कारविषयत्वेन—पा० १ पु० ।
(३) प्रसिद्धाः— पा० ४ पु० । (४) प्रतिषेधे—पा० १ पु० ।
(५) गच्छतः—पा० ४ पु० । (६) एकप्रत्ययं—पा० ४ पु० ।

त्तायां व्यवस्थापयितुं शक्यम् न चेदं वचनं नास्ति सर्वाभिधेयसूत्रे ऽभिधानात्। तस्मान्नास्त्यात्मेति ब्रुवाणः[१] सिद्धान्तं बाधत इति। तथा भारं वो भिक्षवो देशयिष्यामि भारहारं च भारः पञ्चस्कन्धा भारहारश्च पुद्गल इति। यश्चात्मा नास्तीति स मिथ्यादृष्टिको भवतीति सूत्रम् ॥

योऽप्ययं हेतुरजातत्वादिति अयमपि राश्यन्तरव्यवच्छेदहेतुत्वाद्विरुद्धः जातमजातमिति च वस्तुधर्मावेतौ किं पुनर्जातं किं चाजातमिति। यस्य कारणवतः सत्ता तज्जातम् यस्याकारणवतः सत्ता तदजातम् किं कारणम् नञो जन्मप्रतिषेधविषयत्वात् अयं खलु नञ् प्रवर्त्तमानो जन्मनः प्रतिषेधं करोति नास्य जन्म विद्यत[२] इति। तदिदमजातमित्यात्मनः प्रतिषेधो न भवति यथानुदकः कमण्डलुरिति। अथायं भावः प्रतिषेध एवाजातमिति तथापि प्रतिज्ञाहेत्वोरेकत्वम् अजातमिति चायं धर्मः न च धर्मः स्वतन्त्रो युक्तोऽन्यत्र समवायात् यत्तन्त्रोयं धर्मः स आत्मेति विरुद्धः। अथ धर्मोऽस्ति न धर्मीति तथाप्यनिवृत्तो व्याघातः स्वतन्त्रस्य धर्मस्यादर्शनात्। कश्चायमर्थोऽजातत्वादिति यदि चायमर्थो नास्य जन्मेति ततोऽसिद्धं[३] जन्मवानात्मा किं पुनरात्मनो जन्म निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिरपूर्वाभिरभिसम्बन्धः। अथाजातत्वमकारणकत्वं तथा न कश्चि[४]द्बाध्यते विरुद्धश्च हेतुरकारणकस्य नित्यत्वादसत्त्वं साधयतो नित्यतामापाद्यत इति विरुद्धो हेतुः। प्रतिज्ञाहेत्वोश्च विरोधः प्रतिज्ञाया विषयो नास्त्यात्मेति हेतोर्विषय आत्यन्तिकः सत्तासम्बन्धः तावेतौ

(१) नात्मेति ब्रुवाणः—पा० ४ पु०। (२) जन्म प्रतिषेध इति—पा० १ पु०।
(३) तदाऽसिद्धं—पा० ४ पु०। (४) किञ्चित्—पा० ४ पु०।

प्रतिज्ञाहेतू असत्त्वविषयत्वाद्विरुद्धौ । एतेन निर्हेतुकत्वाज्जन्महेत्वनुपादानादकार्यत्वादकारणत्वादित्येवमादयस्तुल्यदोषा इति प्रत्युक्ताः ॥

यदपीदमुच्यते शशविषाणवदिति अयमप्यसिद्धो दृष्टान्तः । कथमिति शशविषाणशब्दस्य सम्बन्धविषयत्वात् सम्बन्धप्रतिषेधो न विषाणप्रतिषेधः । शशविषाणसम्बन्ध उदाहरणं भविष्यतीति सोऽपि न युक्तः कदाचिद्विषाणेन शशस्य सम्बन्धोपपत्तेः । लोकविरोध इति चेत् । अथ मन्यसे यदि शशे विषाणमस्ति ननु लोको विरुद्ध्यत इति । न विरुध्यते कार्यकारणभावप्रतिषेधद्वारेण लौकिकप्रवृत्तेः । लोकस्तावत् कार्यं कारणं वा शशस्य विषाणं नास्तीत्येवं प्रतिषेधति यथा गोर्विषाणस्य च कार्यकारणभावो न चैवं शशस्य विषाणस्य च कार्यकारणभावः । न च कार्यकारणभावप्रतिषेधादसत्त्वम् न हि यद्यस्य न कार्यं न कारणं[१] तन्नास्ति । यथा देवदत्तस्य घट इति । इदं च शशविषाणं नास्तीति ब्रुवाणः प्रष्टव्यः किमयं सामान्यप्रतिषेधोऽथ विशेषप्रतिषेध इति । यदि सामान्यप्रतिषेधः तन्न युक्तमशक्यत्वात् शशस्य विषाणं नास्ति इति गवादिविषाणान्यपि शशस्य न सन्तीति प्राप्तम् एतच्चाशक्यम् न हि तानि न सन्ति । अथ विशेषप्रतिषेधः किञ्चिद्विषाणं शशस्य प्रतिषिध्यते यस्य शशो न कार्यम् तच्च[२] शशस्य न कारणमिति सोऽयं कार्यकारणसम्बन्ध एव प्रतिषिध्यते । कार्यकारणसम्बन्धश्चान्यच्च दृष्ट इह प्रतिषिध्यते इति नात्यन्तासत्त्वप्रतिपादने दृष्टान्तो भवति । एतेन खपुष्पाद्यसत्त्वं व्याख्यातं वेदितव्यम् ॥

---

(१) न हि यस्य यन्न कार्यं न कारणं—पा० ४ पु० ।

(२) यच्च—पा० १ पु० ।

नास्त्यात्मानुपलब्धेरिति चेत् अत्रापि प्रतिज्ञादिदोषो दृष्टान्तदोषश्च पूर्ववत्। यदनुपलब्धेरिति तदप्ययुक्तम्। अनुपलब्धिरसिद्धा प्रत्यक्षादिप्रमाणविषयत्वा(१)दात्मनः प्रत्यक्षेण तावदात्मा उपलभ्यते कथं लिङ्गलिङ्गिसम्बन्धस्मृत्यनपेक्षं विषयस्वभावभेदानुविधाय्यहमिति विज्ञानं(२) रूपादिज्ञानवत् प्रत्यक्षम् यत्त्वापि भवान् युक्तमंशयं प्रत्यक्षं प्रतिपद्यते तस्य कुतः प्रत्यक्षत्वमित्यवश्यं भवता विज्ञानमेव लिङ्गादिसम्बन्धनिरपेक्षं स्वात्मसंवेद्यं प्रतिपत्तव्यम्। अथ मन्यसे अस्त्ययमहंप्रत्ययो न पुनरस्यात्मा विषयः हन्त तर्हि निर्दिश्यतां विषयः। रूपादि र्विषय इति चेत्। अथ मन्यसे रूपादय एवाहङ्कारस्य विषयः तथा-चोक्तमहङ्कारालम्बनोत्पत्तिनिमित्तत्वादात्मेत्युच्यते इति तन्न असत्त्वात् प्रतिषेधाच्च। प्रतिषिद्धोऽहङ्कारो रूपादिषु रूपं नाहमेवमेतद्भिन्नो रूपं न त्वमिति। तस्माद्रूपादयः तावदहङ्कारस्य विषया न भवन्ति न चायमहङ्कारो रूपादिषु कदाचिदपि दृष्टः। न हि भवति कदाचिदहं रूपमहं वेदनादय इति। ननु भवत्यहं गौरोऽहं कृष्ण इति न भवतीति ब्रूमः कथं न ह्येतस्य द्रष्टुर्यदेतन्मम रूपं गौरमेतदहमिति प्रत्ययो भवति केवलं मतुप्लोपं कृत्वाहं गौर इति षष्ठ्यर्थं निर्दिशति। एवमेतन्न तत्त्वत इति कुत इति चेत्। अथ मन्यसे मतुप्लोपादयं षष्ठ्यर्थव्यपदेशो न तत्त्वत इति(३) को हेतुरिति ममप्रत्ययसामानाधिकरण्यस्य निर्देशात् यस्मिन्नर्थे ममप्रत्ययोऽस्य भवतितत्रैवायमहङ्कारोऽपीति ममप्रत्ययसामानाधिकरण्याद्गम्यते मतुप्लोप

(१) गोचरत्वा—पा० ४ पु०। (२) ज्ञानं—पा० ४ पु०।
(३) इति इत्र—पा० १ पु०।

इति। ममप्रत्ययसमानाधिकरणस्यायमहंप्रत्ययोऽन्यत्वे दृष्टः उपकारकत्वात् उपकारके वस्तुनि ममप्रत्ययसमानाधिकरणोऽहंप्रत्ययो दृष्टः योऽयं सोऽहमिति। उक्तं चात्र रूपादिस्कन्धेष्वहंप्रत्ययोऽतस्मिंस्तदितिप्रत्यय इति। तदेवमहंप्रत्ययविषयत्वादात्मा तावत्प्रत्यक्षः अनुमानेनापि यथात्मोपलभ्यते तथोक्तमिच्छादिसूत्र इति। आगमोऽप्यस्त्येव तान्येतानि प्रमाणानि त्रीण्येकविषयतया प्रतिसन्धीयमानान्यात्मानं प्रतिपादयन्ति। न च प्रमाणान्तरं विप्रतिपत्तिहेतुरस्ति तस्मादनुपलब्धेरित्यसिद्धो हेतुः सन्दिग्धस्यानुपलब्धेस्त्रिकारणत्वात् अनुपलब्धिकारणानि त्रीणि उपलब्धोपलम्भनमुपलभ्यमिति। तत्रेयमनुपलब्धिर्भवन्ती कस्याभावादिति(१) सन्दिह्यते। यदि ब्रूषे उपलभ्यस्याभावादिति नन्वयं प्रतिज्ञार्थ एव। न च प्रतिज्ञा प्रतिज्ञां साधयतीत्यनुपलब्धिरहेतुः या चेयमनुपलब्धिरात्मासत्त्वप्रतिपादनायोऽपादीयते तस्याः क आश्रयः। यद्यात्मानं प्रतिपद्यसे व्याहतं भवति आश्रयश्च नास्ति चेति। अथानाश्रयः कः साधनार्थः न ह्यनाश्रयो धर्मः साध्यं साधयितुं शक्नोति। अथानुपलब्धिरपि नास्ति कः साधनार्थोऽनुपलब्धेरिति न ह्यसाधनं भवितुमर्हतीति अथ कल्पितस्यानुपलब्धिर्धर्म इति कथं कल्पितस्येति वाच्यम् किं सत्वेनाथासत्त्वेन यदि सत्त्वेन नानुपलब्धिस्तस्य धर्मः न हि स्थाणोः पुरुषत्वेन कल्पितस्य स्थाणुधर्माः प्रत्यवभासन्ते अथासत्त्वेन कल्पितस्यानुपलब्धिर्धर्मः सिध्यत्यनुपलब्धिर्दुर्मेधा वृथा तु कल्पना। किं

---

(१) भावाद्भवतीति—पा० ४ पु०।

कारणम् कल्पनाया अतथाभावात् । कल्पना हि नामातथाभावः असत्त्वेन चात्मा कल्पित इत्यसत्त्वेन नास्ति असत्त्वेन चेन्नास्ति वृथा कल्पना। किमर्थं चायमात्मा असत्त्वेन कल्प्यते यदि हेत्वर्थमुपपन्नो हेतुर्यदर्थमुपात्तः स पुनरर्थो न सिध्यति न हि यः पुरुषे स्थाणुधर्मानध्यारोप्य हेतुत्वेनापदिशेत्(१) तस्यासौ स्थाणुः स्यादिति। तदेवमप्यनुपलब्धिरप्यहेतुः । रूपादिस्कन्धवाचकशब्दविषयव्यतिरिक्तविषय आत्मशब्दः रूपादिशब्देभ्योऽन्यत्वे सत्येकशब्दत्वात् घटशब्दवदिति(२)। एतेनाहंप्रत्ययो व्याख्यातः। असिद्धो दृष्टान्त इति चेत् अत्रोक्तम् यथा गुणव्यतिरिक्तो गुणीति। तमःशब्दादिभिरनैकान्तिक इति चेत्। अथ मन्यसे यथा रूपादिशब्देभ्योऽन्यत्वे सत्येकपदत्वे च तमःशब्दस्यार्थान्तराविषयत्वमेवमात्मशब्दस्यापीति तन्न विरोधात्। तमःशब्दो निर्विषय इति ब्रुवाणः सिद्धान्तं बाधते। उपादायरूपत्वात्तमस इति न चैतदस्माभिरभ्युपगम्यते तमःशब्दो निर्विषय इति तमःशब्दस्य सविषयत्वे सूत्रव्याघातो द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भावस्तम इति । न सूत्रार्थापरिज्ञानात् निराकृततेजःसम्बन्धीनि द्रव्यगुणकर्माणि तमःशब्देनाभिधीयन्त तस्मान्न सूत्रव्याघातः। अपरे तु जीवच्छरीरं निरात्मकत्वेन पक्षयित्वा सत्त्वादित्येवमादिकं हेतुं ब्रुवते तन्न विकल्पानुपपत्तेः। निरात्मकमिति(३) कोऽर्थः। यदि तावदात्मनोनुपकारकमिति न दृष्टान्तोऽस्ति न हि किञ्चिदात्मनोऽनुपकारकमस्ति। अथात्मप्रतिषेधः आत्मा शरीरं न भवति कस्या-

(१) व्यपदिशेत्—पा० ४ पु० । (२) घटादिवदिति—पा० ४ पु० ।
(३) निरात्मकत्वमिति—पा० १ पु० ।

त्मा शरीरम् उत्तरपदविषयत्वाच्च निमः किं सात्मकमिति वाच्यम् न ह्यसत्युत्तरपदे निमः प्रयोगं पश्यामः यथा निर्मशकमिति। अथ शरीरे आत्मा प्रतिषिध्यते सिद्धं साधयति कस्य वा शरीरे आत्मा विद्यते। अथ शरीरमात्मसम्बन्धि न भवतीति पुनर्दृष्टान्तो नास्तीति सर्वे चैते विशेषप्रतिषेधाः विशेषप्रतिषेधाच्च सामान्यमभ्युपगम्यते(१) एवं च सति यत् प्रतिषेद्धव्यं तदनुज्ञातं भवति। अथात्मशब्दोऽनित्यविषयो वर्णात्मकत्वात् तथापि नित्यशब्देनानैकान्तिकं शरीरादीनामात्मशब्दत्वात् सिद्धसाधनम्। अथ शरीरादिव्यतिरिक्तविषय आत्मशब्दोऽनित्यविषयः तथापि शरीरादिव्यतिरिक्तविषयाभ्युपगमे विरोधः। तदेवं यथा यथा आत्मासत्त्वं विचार्यते(२) तथा तथा न्यायं न सहत इति॥

परार्थाश्चक्षुरादयः सङ्घातत्वात् शयनासनादिवदिति सङ्घातान्तरार्था इति चेत्। अथ मन्यसे सत्यं सङ्घाताः परार्था भवन्ति ते तु सङ्घातान्तरार्थाः यथा शयनादय इति न सङ्घातस्याभ्युपगमे विरोधात् न हि रूपादिस्कन्धव्यतिरिक्तं सङ्घातं भवन्तः प्रतिपद्यन्ते न चासति सङ्घातान्तरे सङ्घातानां सङ्घातान्तरार्थता भवति। अथ प्रतिपद्यते व्याहतं भवति। अनिष्टप्रसङ्ग इति चेत्। अथ मन्यसे न मया सङ्घातान्तरं प्रतिपद्यते अपि त्वस्मिन् हेतौ सतीदमनिष्टं भवति परार्थस्य सङ्घातान्तराविनाभावित्वात्। यावत्परार्थं भवति

---

(१) सामान्यमधिगम्यते—पा० ४ पु०। (२) प्रतिज्ञायते—पा० ४ पु०।

तत्सर्वं सङ्घातान्तरार्थं दृष्टमिति। न विरोधात् अनभ्युपगमाच्च। न हि कश्चिद्धृतिरिक्तात्मवादिनः सङ्घातः सङ्घातस्य परार्थं[१] करोति। तदुभयपक्षे संप्रतिपन्ने नानिष्टापादनं दृष्टमिति विरोधाच्च। यदि विवक्षितार्थव्यतिरेकेणानुमानस्याविवक्षितमपि विषयः नन्वेतस्यां कल्पनायां सर्वमनुमानं व्याहन्येत। कथमिति यदिष्टमनुमानेन तदपि नानुमानं प्राप्नोति। यथा शब्दानित्यत्वे कृतकत्वम् किं कारणम् यथेदं कृतकत्वमनित्यत्वेनाविनाभूत[२]मनित्यत्वं साधयति। एवं दुःखशून्यानात्मकत्वमपि[३] साधयति दुःखशून्यानात्मकत्व[४]वदश्रोत्रग्राह्यत्वमपि साधयिष्यति ततश्च न श्रोत्रग्राह्यः शब्दः कृतकत्वात् घटवदिति। अथानुमानेन बाध्यते अयं प्रतिज्ञार्थ इत्यतो न हेतुः। नन्वयमपि सङ्घातान्तरार्थाश्चुरादय इत्यागमेनानुमानेन च बाध्यते यच्चापि भवान् सङ्घातान्तरं प्रतिपद्यते तच्चाप्यनिवृत्तं सङ्घातत्वमिति तेनापि सङ्घातान्तरार्थं भवितव्यमिति एवं चानवस्था। न चैनां शक्तः कश्चित् प्रतिपादयितुमिति यत एषा निवर्त्तते तदसंहतम् अथासंहतं नैवास्ति असंहता[५]नभ्युपगमे सङ्घातानुपपत्तेर्व्याघातः न हि कदाचिदसंहतप्रतिषेधे[६] सङ्घातः सिध्यति। अथानुमानं नैवास्तीति परः प्रतिपद्यते स कथं न प्रतिपद्यत इति प्रष्टव्यः यद्यनुमानबाधितत्वादनुमानं नास्ति अतिन्यायोऽनुमानेन च

(१) परस्यार्थं करोति—इति शोधितम् ४ पु०।
(२) अनित्येनाविनाभूत—पा० ४ पु०। (३) शून्यात्मकत्व—पा० ४ पु०।
(४) दुःखशून्यात्मकत्व—पा० ४ पु०। (५) असङ्घाता—पा० ४ पु०।
(६) सङ्घातप्रतिषेधे—पा० ४ पु०।

बाध्यते अनुमानं च नास्तीति अतीन्द्रियार्थाधिगतिश्च कथम्(१) यद्यनुमानं नास्ति कथमतीन्द्रियार्थो गम्यते । आगमादतीन्द्रियार्थाधिगतिर्भविष्यतीति न युक्तम् आगमव्यतिरिक्तविषयत्वात् कस्मादनुमानस्यागमव्यतिरिक्तो विषयः यथा स्तनयित्नुशब्दस्य हेतौ न हि तत्र प्रत्यक्षं नागम इति तदेवमात्मास्तीति समधिगतम् तस्मिन् व्यपदेशस्योभयथा सिद्धेः संशयः कः पुनरयं व्यपदेशः क्रियाकरणयोः कर्त्रा सम्बन्धाभिधानं व्यपदेशः दर्शनं क्रिया करणं चक्षुः करणस्य क्रियायाः कर्त्रा सम्बन्धः चक्षुषा पश्यतीति । स चायं व्यपदेशो द्वेधा भवति अवयवेन समुदायस्य यथा मूलैर्वृक्षस्तिष्ठतीत्यत्र समुदायशब्देनावयवी वृक्षोऽभिधीयत इति । एकदेशेन चैकदेशान्तराणां यद्भिन्नजातीयैरारभ्यते तत्र ह्येकदेशदर्शनादेकदेशान्तराणि प्रतिपद्यन्ते तत्रापि(२) च व्यपदेशः स्तम्भैः प्रासादो ध्रियत इति अन्येन चान्यस्य व्यपदेशः । परशुना वृश्चतीति परशुः करणं वृश्चतिः क्रिया ताभ्यां कर्त्तुरभिसम्बन्धः परशुना वृश्चतीति । अस्ति चायमिहापि व्यपदेशः चक्षुषा पश्यतीति । किमन्येनान्यस्य व्यपदेशः अथवा अवयवेनाप्यवयविनः अथैकदेशेनैकदेशान्तराणामिति क्रियाकरणकर्म्मणां वा कर्त्रा सम्बन्धो व्यपदेशः चक्षुषा वृक्षं पश्यतीति क्रियाकरणकर्म्मणां कर्त्रा सम्बन्धः अस्ति चायमिहापि व्यपदेशः शरीरेण सुखदुःखमनुभवति तत्र न ज्ञायते किं तत्त्वमिति अन्येनायमन्यस्य व्यपदेश इति तत्त्वम् ॥ कथम्

---

(१) इन्द्रियार्थाधिगतिः कथम्—पा० ४ पु० । (२) तदापि—पा० ४ पु० ।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्। दृश्यते ऽनेनेति दर्शनं चक्षुः स्पृश्यत्यनेनात्मा स्पृष्टव्यमर्थमिति(१) स्पर्शनम् त्वगिन्द्रियमुच्यते। दर्शनेन दृष्टमर्थं स्पर्शनेन प्रत्यभिजानाति यमद्राक्षं तं स्पृशामि यमस्प्राक्षं तं पश्यामीति एकविषयावेतौ प्रत्ययौ प्रतिसन्धीयेते प्रतिसन्धानं च नाम स्मृत्या सहैकविषयत्वम्। दर्शनस्पर्शनप्रत्ययथोर्घटादिविषयत्वाद्सम्बन्ध इति चेत्। अथ मन्यसे यावेतौ दर्शनस्पर्शनप्रत्ययौ तौ घटादिविषयौ न व्यतिरेकमात्मनो व्यधिकरणत्वाद्गमयत इति। न सूत्रार्थापरिज्ञानात्। दर्शनस्पर्शनप्रत्ययावेककर्तृकाविति सूत्रार्थः। यदि चानुषक्तं गुणव्यतिरेकमप्येकविषयत्वेन साधयतो न कश्चिद्दोषः। गुणव्यतिरेकोऽसिद्ध इति चेत् उक्तमेतद्यथा गुणव्यतिरिक्तो गुणीति। कार्यकारणभावात् प्रतिसन्धानमिति चेत् उक्तोत्तरमेतदिच्छादिसूत्र इति। अकार्यकारणभूतानां च प्रतिसन्धाने ऽनेकान्तः(२) भावस्य भवित्रपेक्षत्वाद्वेति सूत्रार्थः। दृष्टिर्दर्शनम् सृष्टिः स्पर्शनमिति भावरूपावेतौ प्रत्ययौ भवितारं प्रतिपादयतः। न हि भावमनाधारं पश्यामः उत्पत्तिवत् कर्माधारो भविष्यतीति न युक्तम् कर्मण्यसति दर्शनात् असत्यपि

---

(१) स्प्रष्टव्यमिति—पा० १ पु०। (२) सन्धानेनानेकान्तः—पा० ४ पु०।

कर्मणि स्मृतेर्भावो भवतीति । न च विनष्टं कर्म भावस्याधारो युक्तः ततो यदाधारो भावः स आत्मा । दर्शनस्पर्शनग्रहणयो रूपादिविषयत्वा[१]न्न घटादिविषयत्वं न रूपस्पर्शानुपलब्धौ तद्विशिष्टप्रत्ययदर्शनात् यदायमनुपलभ्यमानरूपादिकं वस्तूपलभते तदास्य तद्विशिष्टः प्रत्यय उपजायते यथा[२] नीलाद्युपरिस्थितस्फटिके प्रत्ययो रूपाद्यनुपलब्धौ भवति रात्रौ च[३] बलाकायां शुक्लादिरूपाग्रहणात् पक्षिप्रत्ययः तस्माद्रूपस्पर्शव्यतिरिक्ते घटप्रत्ययः प्रतिसन्धानाच्च व्यतिरिक्तनिमित्तत्वम् न हि नानाविषयौ प्रत्ययौ प्रतिसन्धीयेते अस्ति च प्रतिसन्धानं यमद्राक्षं तं स्पृशामीति यमस्प्राक्षं तं पश्यामीति तस्मादेकविषयत्वम् सङ्घातकर्तृकौ दर्शनस्पर्शनविषयौ प्रत्ययौ भविष्यत इति न युक्तम् सङ्घातस्य नानात्वाबाधनात् । सङ्घातः संहन्यमानतन्त्रो भवतीति संहन्यमानं चानेकम् अनेकं च प्रतिसन्धानप्रत्ययकारणं[४] न युक्तम् नानाकर्तृकाणां नानाविषयाणां च प्रत्ययानामप्रतिसन्धानात् । एकेन्द्रियप्रत्ययाविति चेत् । अथ मन्यसे यदेवेन्द्रियं दर्शनप्रत्ययस्य कारणं तदेव स्पर्शनप्रत्ययस्यापीति । तन्नाविषयत्वात् । चक्षुः खलु स्वविषयं प्रतिसन्धातुमर्हतीति यमद्राक्षं स एवायमर्थ इति न पुनः स्पर्शमिन्द्रियान्तरविषयत्वादिति । इन्द्रियान्तरवैयर्थ्यं वा एकैकमेवेन्द्रियमनेकविषयग्रहणं प्रतिसन्धत्ते इन्द्रियान्तरोत्पादो व्यर्थः[५] ॥

---

(१) रूपस्पर्शविषयत्वात्—पा० ४ पु० । (२) तदा—पा० ४ पु० ।

(३) रात्रौ तु—पा० ४ पु० । (४) अनेकप्रतिसन्धानकारणं—पा० ४ पु० ।

(५) इन्द्रियान्तरोत्पादवैयर्थ्यम्—पा० २ पु० ।

न विषयव्यवस्थानात् ॥ २ ॥

न विषयव्यवस्थानात्। चेतनानीन्द्रियाणि विषयव्यवस्थानात्। विषयव्यवस्थानादित्यस्यायमर्थः करणविषयनियमादिति। सति चक्षुषि रूपग्रहणं भवत्यसति न भवति। यच्च यस्मिन् सति भवति असति न भवति तस्य तत्। सति च चक्षुषि रूपग्रहणं भवति तस्माद्रूपग्रहणं चक्षुषः। एवं शेषेष्वपि। एवं सति किमन्येन चेतनेनेति चेत् न सन्दिग्धत्वादहेतुः। किमयमिन्द्रियाणां विषयनियमः चेतनत्वात् आहो चेतनोपकरणत्वादिति सन्दिह्यते। चेतनोपकरणत्वेऽपि सतीन्द्रियाणामेतद्भवितुमर्हति यथा प्रदीपस्य सद्भावे रूपग्रहणं भवत्यसति न भवति। न च रूपग्रहणं प्रदीपस्य विपर्ययप्रसाधकस्यायं हेतुर्विषयव्यवस्थानादिति। विपर्यय[1]साधकत्वज्ञापनार्थं च तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेध इति सूत्रम्॥

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥ ३ ॥

यस्मादेवैतानीन्द्रियाणि व्यवस्थितविषयाण्यत एवाव्यवस्थितविषयेणान्येन भवितव्यम्। यदि हि किञ्चिदिन्द्रियमनेकार्थग्राह्यव्यवस्थितविषयं स्यादिति कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात् चैतन्यं तु आत्मनः स्वातन्त्र्ये सत्यव्यवस्थानाच्चक्षुरादिवदिति नाचेतन आत्मा अस्वातन्त्र्यप्रसङ्गाच्चक्षुरादिवदिति। अन्वयाभावादयुक्तमिति चेत् अथ मन्यसे आत्मनश्चैतन्यसाधनस्याव्यवस्थानस्य नान्वयोऽस्ति न चान्वय-

(१) विपर्यास—पा० ४ पु०।

मन्तरेण हेतुः सिद्धतीति न विपर्यय(१)सम्बन्धस्याव्यभिचारात् नायमन्वयी हेतु(२)रपि तु व्यतिरेकी हेतुः(३) तत्र च व्यतिरेकसम्बन्धा(४)व्यभिचारः सामर्थ्यम् । यच्चाचेतनं तत्सर्वं व्यवस्थितविषयं दृष्टमिति । पृथिव्यादिनित्यत्वसाधने गन्धवत्त्वादिप्रसङ्ग इति चेत् अथ मन्यसे यदि व्यतिरेकी हेतुर्भवत्यन्वयमन्तरेण अथ पृथिव्यादिनित्यत्वे साध्ये गन्धवत्त्वं कस्मान्न हेतुः । न हेतुरुभयव्यावृत्तेः यस्माद्गन्धवत्त्वं नित्याच्चानित्याच्च व्यावर्त्तते न पुनरव्यवस्थानमेवं तस्माद्व्यवस्थानं हेतुर्न गन्धवत्त्वमिति ॥

इतश्च शरीरादिव्यतिरिक्त आत्मा न शरीरादिसङ्घातमात्रम् ॥

शरीरदाहे पातकाभावात् ॥ ४ ॥

शरीरदाहे पातकाभावात् । शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासङ्घातः प्राणिभूतो गृह्यते । शरीरं प्राणिभूतं दहतः प्राणिहिंसाकृतं पापं पातकमित्युच्यते तस्याभावोऽकर्त्तुः फलेन सम्बन्धः कर्त्तुश्चानभिसम्बन्ध इति । कस्मात् अनभ्युपगतार्थान्तरात्मनोऽन्यः शरीरेन्द्रियबुद्धिवेदनासंघातः कर्त्ता अन्यश्च तत्फलसम्भोक्तेति । तदेवमकृताभ्यागमविनाशदोषप्रसङ्गः अनिष्टश्च तस्मात् कर्त्ता भोक्ता च यः स आत्मेति । तदिदं सूत्रम् यस्मात्मा नास्ति तस्यायं दोष इति दोषप्रतिपादनार्थं न साधनार्थमिति हेतुफलभावात् स्मृतिवत्कर्त्रभोक्तृव्यवहारः यथा हेतुफलभावेन व्यवस्थितायां सन्ततौ

---

(१) विपर्यास—पा० ४ पु० । (२) अन्वयहेतुः—पा० १ पु० ।
(३) व्यतिरेकहेतुः—पा० १ पु० । (४) विपर्ययसम्बन्धा—पा० १ पु० ।

यस्यामेव भावनोपजायते तस्यामेव सन्ततौ स्मृतिर्भवतीति एवं यत्कायचित्तसन्तानप्रभवं कर्म्म तत्कायचित्तसन्तानप्रभवं फलमिति नास्त्यकृताभ्यागमकृतनाशप्रसङ्गः। स कथं स्यादिति यद्यन्यस्यां सन्ततौ कृतं कर्म अन्यस्यां सन्ततौ फलं दद्यात् यदि च भवानेवमर्थं(१) प्रतिपादयितुं शक्नोति य एव करोति स एव भुङ्क्ते इति उभयञ्च नास्ति तस्मादकृताभ्यागमादिरदोषः नोक्तोत्तरत्वात् न सन्तानो नानात्वं बाधते इत्युक्तोत्तरमेतत्। यत् पुनरेतदेकस्मिन्नदर्शनादिति अत्राप्युक्तमेकनिमित्तानां प्रत्ययानां प्रतिसन्धानादिति। शाल्यादि(२)बीजवदिति चेत् अथ मन्यसे यथा शालिबीजादङ्कुर उपजायते शालिबीजविमर्दोत्तरकालं नालकाण्डादिभावेन भूतानुग्रहवशाच्छालिबीजं प्रादुर्भवति न च तत्रैकं निमित्तं किञ्चिदनुबद्धमस्ति अथ च नियमः शालिबीजपूर्वादङ्कुराच्छालिबीजम् एवं हेतुफलभावेन व्यवस्थितायां सन्तावान्तरे चेतसि परिणामविशेषप्राप्तात् कर्म्मणः फलमिति। तन्न बीजावयवानुवृत्तेः शालिबीजवदित्यसिद्धो दृष्टान्तः तत्रापि ये बीजावयवास्ते पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते व्यूहान्तरापत्तौ च पृथिवीधातुरब्धातुना संगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यं निर्वर्त्तयति स रसः पूर्वावयवसहितोऽङ्कुरादिभावमापद्यते तस्माद्बीजावयवानुवृत्तेरसिद्धमिदमुच्यते यथा शालिबीजादिनष्टादङ्कुर उत्पद्यते अथ च प्रतिसन्धानमिति परमाण्ववस्थात्वाद्बीजावयवानां यथोक्तदोषापत्तिरिति चेत् अथ मन्यसे अथापि(३)

(१) एतदर्थं—पा० ४ पु०। (२) धान्यादि—पा० ४ पु०।
(३) यस्यापि—पा० ४ पु०।

बीजावयवाः पूर्वव्यूहं परित्यजन्ति व्यूहान्तरं चापद्यन्ते तस्यापि परमाणुवस्त्वाद्बीजस्य परमाणुमात्रं म्रियत इति । न च परमाणुष्वपरजातिभेदो विद्यते न च यवबीजशालिबीजपरमाणूनां कश्चिद्विशेषः यथानुपजातविशेषाः परमाणवः कार्यकारणभावनियमात् तत्पूर्वकतया शाल्यङ्कुरमभिनिर्वर्त्तयन्ति तथा ममापि कार्यकारणभावान्नियम[१] इति । नानभ्युपगमात् परमाणुवस्थानि बीजानि भवन्तीत्येतन्न प्रतिपद्यामहे सर्वावस्थोपलब्धेः यस्माच्छाल्यादिबीजमुच्छूनावस्थामादिं कृत्वा यावदुपान्त्यं शालिबीजकार्यं तावन्न कदाचित् परमाणुवस्थं भवति यदि तु स्यात् कदाचिन्नोपलभ्येत यदि तच्छापरमाणोर्विभागो नास्ति कल्पादावुत्पत्तिर्न स्यात् परमाणुवस्थत्वाज्जगतः परमाणुवस्थे च जगति न शाल्यादिजातिव्यक्तिरस्तीति पुनरुत्पादे जातिव्यक्तिहेतवः परमाणव एवेत्यभ्युपगन्तव्यम् । यथा च कल्पादावेवं परमाणुवस्थे बीजेऽपीति । नानेनैवोक्तोत्तरत्वात् । अनेनैव सर्वावस्थोपलब्धेरित्युक्तोत्तरमेतत् । सर्गादौ शालिजातिव्यक्तिहेतुरदृष्टविशेषो येनादृष्टेन प्राणिनामुपभोगाय शाल्यादयो निर्वर्त्यन्ते तमदृष्टविशेषमपेक्षमाण ईश्वरस्तांस्तान् परमाणून् तथा तथा सङ्घातयति यथा यथा शाल्यादिजातिव्यक्तिरिति । एतेन घटादिपाको व्याख्यातः । नापरमाणुन्तो विनाशः[२] सर्वावस्थोपलब्धेरिति । आमध्यात् पाकानुपपत्तिरिति चेत् अथ मन्यसे यदि कार्यकारणद्रव्ये पच्येते आमध्यात् पाको न प्राप्नोति पाचकेन तेजसा

---

(१) भावनियम—पा० १ पु० । (२) विभागः—पा० ४ पु० ।

अप्राप्तत्वात् नाप्रतिबन्धात् भवेदप्येष दोषो यदि तेजोऽनुप्रवेशमवयवी प्रतिबध्नाति[१] स तु न प्रतिबध्नाति अप्रतिबद्धं तेजोऽनुप्रविशतीति, न प्रतिबध्नातीति न हेतुरस्तीति, न नास्ति परिस्रवादिमतो घटस्योपलब्धेः यस्मात् परिस्रवादिमतो घटस्य द्रवत्वप्रतिबन्धो न दृष्टः अप्रतिबन्धेन द्रवत्वं परिस्रुतिं करोति तच्च प्रत्यक्षत उपलभ्यते। यदि चावयवानुप्रवेशो द्रव्यस्य विनाशकः स्यात् न परिस्रवादिमान् घट उपलभ्येत परिस्रवमाणत्वाद्भाजनगतानामपामवस्थानं न स्यात्[२] विनाशे च कार्यद्रव्याणां व्यवहिताव्यवहितयोस्तुल्यकालोपलब्धि[३] प्रसङ्गः। यदि चानुप्रविश्य द्रव्यं द्रव्यान्तरं व्यतिभिनत्ति तेन चाक्षुषस्य रश्मेरनुप्रवेशात् स्फटिकादिविनष्टमिति व्यवहिते चाव्यवहिते च तुल्योपलब्धिः प्राप्नोति। तस्माच्छालिबीजमदृष्टान्तः यस्य च पूर्वस्कन्धनिरोधसमकालानि स्कन्धान्तराणि प्रादुर्भवन्ति तस्य तेषां स्कन्धान्तराणां न कर्मनिमित्तः सर्गः प्राप्नोति। अकर्मनिमित्तेन सत्त्वसर्गेण शुभाशुभप्राप्त्यर्था क्रिया न प्राप्नोति सुखी स्यामिति तत्क्रियेति चेत् अथ मन्यसे स्वयं कर्माणि करोति कथमहं सुखी स्यां दुःखी न स्यामिति। तच्चाननुभूतत्वात्। येन सुखमनुभूतं सुखसाधनसम्बन्धानुस्मृतिश्च यस्य स तत्साधनमुपादत्ते यस्य पुनः प्रतिक्षणं प्रध्वंसिनः संस्कारास्तस्य सुखसाधनसम्बन्धानुस्मृतेरभावात् सुखी स्यामिति क्रियानुपपत्तिः मोक्षार्थश्च प्रयासो नोपपद्यते[४] अयत्नसिद्धत्वात् जातमात्र एवायं मुच्यत इति मुक्त्यर्थं ब्रह्मचर्यवासो व्यर्थः

(१) प्रतिबध्नीयात्—पा० ४ पु०। (२) अवस्थानमेवं न स्यात्—पा० ४ पु०।
(३) तुल्योपलब्धि—पा० ४ पु०। (४) मुक्त्यर्थश्च प्रयासो नोपयुज्यते—पा० ४ पु०।

परिपृच्छा च न प्राप्नोति। तथागतेन भिक्षवः परिपृच्यन्ते कच्चिद्यूयं मया विनीता इति ते चाऽऽर्विनीताः स्म इति। अतीतानागत-वर्त्तमानानां चानुपकार्यत्वात् ये तावदनागताः संस्कार्यास्ते तावद-सत्त्वान्नोपक्रियन्ते ये ऽप्यतीता[१]स्तेयेवं ये तु वर्त्तमानास्तेषु संस्कारा-धानमशक्यम् वर्त्तमानलक्षणस्यानुपकार्यत्वात् न हि तस्यावस्थान-कालोऽस्ति यस्मिन्नुपक्रिया स्यात्। संस्कार्यसंस्कारकयोः सहोत्पादा-द्युक्तमिदमिति चेत् न संस्कार्यसंस्कारकयोः सहोत्पादे[२] नियमानुपपत्तिरिति। इदं संस्कारकमिदं संस्कार्यमिति नियमो नोपपद्यते अथ संस्कारकमपेक्षमाणं संस्कार्यं विलक्षणकार्यं करोति विलक्षणकर्योत्पादश्च संस्कार इत्युच्यते। न संस्कार्यानभिधानात् इदं संस्कारकमिदं संस्कार्यमित्येतत् कथम् न हि यो यस्य विशेषं नाधत्ते स तत्संस्कारकः तत्संस्कार्यमिति च शक्यं व्यपदेष्टुम् अथा-प्युपदेशेन संस्काराणामनागतानामनुत्पत्तिः क्रियते। न अनागता-नामनुत्पत्तेः सत्त्वात्। यासावनागतानामनुत्पत्तिः संस्काराणां नासौ कदाचिन्नास्तीति किं तस्याः क्रियते तस्मान्मुक्त्यर्थो ब्रह्मचर्यवास इत्यनुपपन्नम्। तदेवमनभ्युपगतार्थान्तरात्मनो दोष इति॥

तद्भावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्॥ ५॥

तद्भावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्। यस्यात्मा नित्यः तस्यापि हिंसाफले न प्राप्नुतः हिंसा तावन्न प्राप्नोति नित्यत्वात्

---

(१) ये व्यतीताः—पा० १ पु०। (२) सहोत्पादात्—पा० ४ पु०।

फलमपि नात्मनो युक्तम् अनुपकार्यत्वात् अस्य चार्थस्य ज्ञापिकां कारिकामुदाहरन्ति ॥

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोर्भयम् ।
चर्मोपमश्चेत् सोनित्यः खतुल्यश्चेदसत्फलः ॥

तदेवमेकस्मिन् मते हिंसा विफला अपरस्मिंस्तु पक्षेऽनुपपन्ना निःफला चेति । इयं च हिंसा सांख्यपक्षे सम्भवति बुद्धेः परिणामित्वात् कार्यकारणभावः(१) परिणामित्वादुच्छिद्यते स एव च तत्फलानि भुङ्क्ते तत्फलस्य तत्र व्यक्तेः । न पूर्वावस्थाऽपरित्यागात् यथैवात्मा पूर्वावस्थां न जहातीति तत्र फलं नेष्यते तथा बुद्धिरपि पूर्वावस्थां न जहाति नित्यत्वादिति । अथ मन्यसे पूर्वावस्थां जहातीति नित्यत्वं विरुद्ध्यते पूर्वावस्थापरित्यागेन बुद्धिनित्यत्वं विरुद्ध्यते । अथाप्यवस्था भिद्यत इति मन्यसे तथाप्यनिवृत्तो व्याघातः अवस्थाभ्योऽवस्थावतोऽनन्यत्वात्(२) न ह्यवस्थाभ्योऽवस्थावानन्य इति अवस्थाभेदे ऽवस्थावान् भिद्यत इति । य एव बौद्धस्य प्रतिक्षणं ध्वंसिषु संस्कारेषु दोषः स एव प्रतिक्षणपरिणामिष्वपीति । ऋजुवक्रतावदिति चेत् अथ मन्यसे ऋजुवक्रतादिभेदे यथाङ्गुलिद्रव्यं न भिद्यते न चाङ्गुलीतोऽन्ये ते तथावस्थाभेदे बुद्धेरभेद इति नान्यत्वात् । अन्ये ऋजुवक्रते । युक्तं च यदन्यभेदे अन्याभेद(३) इति न पुनरवस्थाभ्योऽवस्थावतोऽन्यत्वम् तस्मादसमो दृष्टान्तः । किं पुनर्वक्रत्वं ऋजुत्वं वा गुणः आकुञ्चनजं वक्रत्वं प्रसारणजं ऋजुत्वं गुणाश्च गुणिनोऽर्थान्तरमिति प्रतिपादित-

(१) कार्यकारणसङ्घातः—पा० १ पु० । (२) व्यभेदात्—पा० ४ पु० ।
(३) भेदेनान्याभेद—पा० ४ पु० ।

मेतत् । बुद्धेरप्येवमिति चेत् अथ मन्यसे बुद्धेरपि ये ते अवस्थे भिद्येते तयोर्भेदे बुद्धिर्न भिद्यत इति (अन्यावस्थातो बुद्धिः)(१) तन्न सिद्धान्तविरोधात् न भवतां पक्षे धर्मधर्मिणोर्भेद इति भेदं चाभ्युपगच्छता सिद्धान्तस्त्यक्तो भवति । तस्माद्यथा आत्मनित्यत्वे सुखदुःखानुपभोगो दोष इति न तच्च सुखदुःखे कल्प्येते इति तथा बुद्धिनित्यत्वात् बुद्धावपि न कल्पनीये(२) समानं नित्यत्वमिति । अथात्मनो नित्यस्य पुण्यपापाभ्यां किं क्रियते सुखदुःखे ताभ्यां किं क्रियते प्रत्ययः(३) ये सुखदुःखे आत्मनि तद्विषयः(४) प्रत्यय आत्मनि भवतीत्येतावत् क्रियते स च प्रत्ययो भोगः । यत् पुनरेतद्वर्षातपाभ्यां किं व्योम्न इति यदेव चर्मणो वर्षातपाभ्यां क्रियते तद्व्योम्नः । अथ चर्मणः किं सम्बन्धः यथा चर्म वर्षातपाभ्यां सम्बद्ध्यते तथा व्योमापि वर्षातपसम्बन्धाच्चर्मवदनित्यं व्योमेति चेत् अथ मन्यसे यथा चर्म वर्षातपाभ्यां सम्बन्धाद्विक्रियते तथा व्योम वर्षातपसम्बन्धाद्विकरिष्यत(५) इति चेत् नानेकान्तात् वर्षातपसम्बन्धौ परमाणुरथ च नित्य इत्यनेकान्त इति । चर्मणश्चानित्यत्वं किं वर्षातपसम्बन्धादथ कारणविभागादथाश्रयविनाशादिति । वयं तु ब्रूमः कारणवतः तद्विभागाद्युक्तो विनाशः(६) न पुनराकाशस्य कारणमस्तीत्युभयाभाव इति तद्वतां चावस्थानान्न सम्बन्धो नाशहेतुः यदि चायं सम्बन्धो नाशहेतुरभविष्यन्न तद्वतामवस्थानमभविष्यत् अवतिष्ठन्ते तु भावाः यावन्न

(१) ( ) एतन्मध्यस्थः पाठो नास्ति ४ पु० । (२) कल्प्यते—पा० ४ पु० । (३) सुखदुःखे पुण्यपापाभ्यामात्मनो नित्यस्य क्रियते याभ्यां सुखदुःखाभ्यां नित्यस्यात्मनः किं क्रियते प्रत्ययः—पा० ४ पु० । (४) आत्मनस्तद्विषयः—पा० १ पु० । (५) वर्षातपाभ्यां विकरिष्यते—पा० ४ पु० । (६) तद्विभागात् तद्विनाशाद्युक्तो विनाशः—पा० ४ पु० ।

विनाग्निकारणसन्निपात इति। अथ मन्यसे वर्षातपाभ्यां चर्मणः सङ्कोचविकाग्नौ भवतो न त्वाकाग्नस्येति तन्न विकल्पानुपपत्तेः। सङ्कोचविकाग्नौ चर्मण इति कोऽर्थः किं तावदल्पत्वमहत्त्वे उत संयोगविभागाविति तन्न तावत् सङ्कोचविकाग्नावल्पत्वमहत्त्वे यावद्द्रव्यभावित्वात् परिमाणस्य यावद्द्रव्यं हि परिमाणं तद्द्रव्ये सति न निवर्त्तते इति। अथ चर्मणः सङ्कोचविकाग्नौ संयोगविभागाविति तदपि न युक्तमेकत्वात्। न ह्येकस्य संयोगविभागौ सम्भवत इति कथं तर्हि इदमुच्यते चर्मणः सङ्कोचश्चर्मणो विकाग्र इति चर्मकारणानामवयवानामातपसम्बन्धात्परस्परेण याः प्राप्तयः आरब्धकार्याणां द्रव्यान्तरानारम्भिकास्ता इतरेतरोपश्लेषेणावयवेषु वर्त्तमानास्तदेकार्थसमवायिनि चर्मण्युपचर्यन्ते तदपेक्षं चेदमुच्यते चर्मणः सङ्कोचो न पुनश्चर्म सङ्कुचतीति। एतेन तदवयवानामेवोदकसम्बन्धापेक्षाणामविनग्यत्कार्याणां परस्परतो विभागो विकाग्र इति। विक्रियायां च दृष्टान्ताभावात् तदेव वस्त्वविनग्यद्विक्रियामापद्यत इति न दृष्टान्तोऽस्ति। विक्रिया तु पदार्थान्तरोत्पादः यथा पूर्वरूपादिनिवृत्तौ रूपान्तरोत्पादे विकृतो घट इति। यद्येवंभूतो विकार आत्मन्यपि चकास्ति तत्रापि सुखनिवृत्तौ दुःखप्रादुर्भाव इति सुखप्रत्ययनिवृत्तौ दुःखप्रत्यय इति तस्मान्नित्यस्यात्मनः सुखदुःखोपभोग इति सिद्धम्। नित्यत्वादात्मनो हिंसादोषोऽपरिहार्यः न अन्यथा तदुपपत्तेः आत्मनित्यत्वेऽप्यन्यथा हिंसा भवति अस्यार्थस्य ज्ञापनाय न कर्त्राश्रयकर्त्रवधादिति सूत्रम्॥

न कार्याश्रयकर्तृवधात् ॥ ६ ॥

न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसेति अपि तु अनुच्छित्तिधर्मकस्य सत्त्वस्य यच्छरीरं यानि च सुखसंवित्तिसाधनानि[१] इन्द्रियाण्यसाधारणानि तेषां पीडा वैकल्यं वा प्रमापणं वा हिंसेति। कुत एतत् प्रतिपत्तव्यम् हिंसायाः फलोपभोगस्य च उभयपक्षसम्प्रतिपन्नत्वात् हिंसाफलोपभोगश्चोभयपक्षसम्प्रतिपन्नः सेयं हिंसा एकस्मिन् पक्षे सम्भवति यस्य तावत् प्रतिक्षणध्वंसिनः संस्कारास्तस्य किं हिंस्यते निर्हेतुकत्वाद्विनाशस्य कस्य व्यापारोऽस्ति। अथ विलक्षणोत्पत्तिनिमित्तत्वेन व्यवतिष्ठमानः परो हिनस्तीत्युच्यते। ननूपचारो भवति न भवतः प्रधानमस्ति येन शरीरोत्पादक उपचर्यते न समानत्वात् भवतामपि पक्षे न प्रधानं हिंस्यत इति सत्यम् ममापि कार्याश्रयकर्तृवधो हिंसेति तुल्यम्। अयं तु विशेषो यत एकस्मिन् पक्षे य एवायमात्मा शरीरादिसाधनः कर्म करोति स एव तत्फलमुपभुङ्क्ते इति अकृताभ्यागमदोषो नास्ति। भवतामकृताभ्यागमः कृतप्रणाशश्चेति[२] परिशेषादात्मनित्यत्वे हिंसेति व्यवस्थितम्। तत्र कार्याश्रयशब्देन शरीरमुच्यते तन्निमित्तत्वादुपभोगस्येति कर्तृणीन्द्रियाणि तत्साधनत्वात् अथवा समानाधिकरणसमासाच्छरीरमेव कार्याश्रयकर्तृशब्दाभ्यामुच्यत इति कर्त्ता भोक्ता चात्मा। किं पुनरिदं कर्तृत्वं भोक्तृत्वं वा किमिति ज्ञान[३]चिकीर्षाप्रयत्नानां समवायः कर्तृत्वम् सुखदुःखसंवित्स-

(१) सुखदुःखसाधनानि—पा० ४ पु०। (२) कृतज्ञानं चेति—पा० ४ पु०।
(३) ज्ञानविज्ञान—पा० १ पु०।

भवायो भोक्तृत्वम् एतत्तु न शरीरे निमित्तत्वात् कर्तृशरीरमुच्यते इतश्च देहादिव्यतिरिक्त आत्मा ॥

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात्। सव्येन चक्षुषा दृष्टमितरेण प्रत्यभिजानातीति सूत्रम्। तच्च प्रतिसन्धानं प्रत्यभिज्ञानं स्मृतिपूर्वकत्वात् प्रत्यभिज्ञानस्य प्रतिसन्धानाच्चैककर्तृत्वं प्रत्ययानां सिध्यतीति। सिद्धत्वादनारम्भ इति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतस्मिन् प्रकरणे सिद्धे आत्मव्यतिरेकः सिद्धत्वादनारभ्यं प्रकरणमिति। इन्द्रियव्यतिरेकज्ञापनार्थमित्येके। एके इदं प्रकरणमिन्द्रियव्यतिरेकज्ञापनार्थं वर्णयन्ति। तन्न तत एव सिद्धेः पूर्वप्रकरणेनैव इन्द्रियशरीरव्यतिरेकः सिद्ध इति। समुच्चयार्थमित्यपरे अपरे तु समुच्चयार्थं सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति हेतुं ब्रुवते। युक्तोऽन्यः समुच्चयः अयं तु न युक्तो विरोधात् सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति ब्रुवाणो युक्तिं बाधते। का पुनरियं युक्तिबाधा अनेकत्वादिन्द्रियस्य युगपदधिष्ठानासम्भवः अणु मनोऽनेकं चक्षुः न चाणोर्मनसो युगपदनेकेन चक्षुषा सम्बन्धः सम्भवति अथासम्बद्धमपि द्वितीयं चक्षुरर्थानालोचयति एवं च सति द्वितीयचक्षुर्वदितरचक्षुरपि मनसानधिष्ठितमेव प्रवर्त्तिष्यत इति[१] व्यर्थं मनः प्राप्तम् अनधिष्ठितं च प्रवर्त्तमानमिन्द्रियं करणत्वं बाधते न च करणमनधिष्ठितं प्रवर्त्तमानं दृष्टमिति समग्रासमग्रयोश्च तुल्योपलब्धिप्रसङ्गः न ह्यन-

(१) प्रवर्तयिष्यतीति—पा० ४ पु०।

धिष्ठितमिन्द्रियं प्रवर्त्तत इत्यणुत्वान्मनसा नित्यमेक मेव सम्बद्धत इति विकलाविकलयोस्तुल्योपलब्धिः प्राप्नोति प्रकरणविरोधश्च इन्द्रियपञ्चकत्वादितीन्द्रियपञ्चत्वप्रतिपादकं प्रकरणं विरुध्यत इति । यदि तर्ह्येकमिन्द्रियं द्वित्वोपलब्धिः कथं द्वित्वोपलब्धिप्रतिपादनार्थं नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानादिति सूत्रम् ॥

नैकस्मिन् नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥

एकमिन्द्रियं द्रव्यं द्व्यधिष्ठानमभिन्नम् कोऽधिष्ठानार्थः तैजसस्य चक्षुषः पार्थिवेन कृष्णसारेण उपकारविकारभेदानुविधानम् यस्मात् कृष्णसार उपक्रियमाणे उपक्रियते विक्रियमाणे विक्रियते तिष्ठति पश्यतीति तस्मादस्य कृष्णसारमधिष्ठानमुच्यते । एतच्च व्याख्यातं शरीरसूत्रे । तस्मान्नौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतः यथा दीर्घस्य द्रव्यस्य मध्ये व्यवहितस्यान्तावुपलभ्यमानौ द्वित्वाभिमानं प्रयोजयत इति ॥

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥

एकविनाशे द्वितीयाविनाशान्नैकत्वम् । एकस्मिन् विनष्टे उद्वृत्ते वा द्वितीयमवतिष्ठते विषयग्रहणे लिङ्गम् नान्यथा तदुपपत्तेः द्वितीयमवतिष्ठत इति नैतत् कस्यचित् प्रत्यक्षम् प्रत्ययमात्रं तु विनष्टेऽप्येकस्मिन्नधिष्ठाने यदवतिष्ठते तेन भवति। न चाधिष्ठानमिन्द्रियम् अपि तु यत्तदनुविधायि तदनुविधत्त इति[१] यथा बज्रवातायनस्य वेश्मन एकपिधानादितरेण ग्रहण[२]मिति ॥

---

(१) तदेकमनुविधत्त इति—पा० ४ पु०। (२) पिधानमपरेण ग्रहण—पा० ४ पु० ।

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥

अपरे त्ववयवनाशेऽप्यवयव्युपलब्धेरहेतुरिति परिहारं[१] वर्णयन्ति । तस्योत्तरम् ।

दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥

दृष्टान्तविरोधादप्रतिषेध इति सूत्रम् । अस्यार्थः । न कारणद्रव्यविनाशे कार्यद्रव्यमवतिष्ठते । यदि नावतिष्ठते कथं कारणद्रव्यविनाशे कार्यमुपलभ्यत इति । क एवमाह उपलभ्यत इति अपि तु वक्तव्यमवयविषु यस्य कारणानि विभक्तानि तद्विनष्टम् यस्य न विभक्तानि[२] तदुपलभ्यत इति । शेषं भाष्ये ॥

इन्द्रियान्तरविकारात् ॥ १२ ॥

अनुमीयते चायं देहादिव्यतिरिक्तश्चेतन आत्मा इन्द्रियान्तरविकारात् । कस्यचिदनुभवस्य फलस्य दृष्टस्मार्हचर्यं[३] रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनेन्द्रियविकारः कः पुनर्विकारः रसानुस्मृतौ रसगर्द्धिप्रवर्त्तितः गर्द्धिः तृष्णा रसतृष्णाप्रवर्त्तितो दन्तान्तरपरिस्रुताभिरद्भीरसनेन्द्रियस्य संप्लवः सम्बन्धो विकार इत्युच्यते सा चेयं स्मृतिरिन्द्रियचैतन्ये न प्राप्नोति । न च प्रतिक्षणध्वंसिषु[४] संस्कारेष्वन्यानुभूतस्यान्येनास्मरणादिति । इन्द्रियान्तरविकार इन्द्रियान्तरधर्म्मः स कथं व्यधिकरणत्वादात्मव्यतिरेकं प्रतिपादयति नेन्द्रियान्तरविकार आत्मव्यतिरेकप्रतिपत्तिकारणमपि तु स्मृतिः

(१) परिहारान्तरं—पा० ४ पु० । (२) न विनष्टानि—पा० ४ पु० ।
(३) गृहीतसादृश्यं—पा० ४ पु० । (४) प्रतिक्षणविनाशिषु—पा० ४ पु० ।

न ह्येकमनुभवितारमन्तरेण स्मृतिः प्राप्नोति स्मृतिश्च भावाभावविचपेक्षा उत्पत्तिवदिति न्यायः न च स्मृतिमन्तरेणेन्द्रियविकारः सम्भवतीति प्रत्यक्ष इन्द्रियान्तरविकार उपादीयते अननुभूतरसस्येन्द्रियविकाराभावादिति व्यतिरेकहेतुः ॥

न स्मृतेः स्मर्तव्यविषयत्वात् ॥ १३ ॥

न स्मृतेः स्मर्तव्यविषयत्वात् । स्मृतिर्नाम धर्मस्तस्याः स्मर्तव्योऽर्थो विषयः सेयं स्मर्तव्यार्थसन्निधानादुपजायमानाऽपरिदृष्टसामर्थ्यं न स्मर्तारं प्रतिपादयिष्यति न हि स्वकारणसन्निधानादुत्पन्नो[१]ऽङ्कुरोपरिदृष्टसामर्थ्यं कुम्भादिकमर्थं प्रतिपादयति ॥

तदात्मगुणसद्भावाद्प्रतिषेधः ॥ १४ ॥

तदात्मगुणसद्भावाद्प्रतिषेधः । न स्मर्तव्यमात्रात् स्मृतिरुत्पद्यते । यदाथमतीतमर्थं स्मरति तदा स्मृतिरनाधारा प्राप्नोति न चेयमनाधारा युक्ता गुणत्वात् न हि कश्चिद्गुणोऽनाधारो दृष्ट इति[२] न चेयमिन्द्रिये संभवत्यननुभूतत्वात् न विषये तस्यासत्त्वात् न शरीरे शरीरगुणानां प्रत्यक्षाणां स्वात्मपरात्मप्रत्यक्षत्वात् न चेयमनाधारा गुणत्वादित्युक्तम् । न चेयं नास्ति न चात्मन्यस्त्यस्याः सद्भावो युक्त इति । तेभ्योऽन्यस्य तदुत्पत्तौ[३] सामर्थ्यमवगम्यते कथमित्यनेनैव प्रत्युक्तम् । अस्त्यात्मनः सामर्थ्यं स्मृतेराधारभावः न चेयमनाधारा कार्यत्वात् सर्वं कार्यमाधारवत् चीरादि दृष्टमिति । एतेन—

---

(१) ऽपजायमानो—पा० ४ पु० । (२) युक्त इति—पा० ४ पु० ।

(३) तदुपलब्धौ—पा० ४ पु० । तदुपपत्तौ—इति च क्वचित् ।

न तच्चक्षुषि नो रूपे नान्तराले तयोः स्थितम् ।
न तदस्ति न तन्नास्ति यत्र तन्निष्ठितं भवेत् ॥

इति प्रत्युक्तम् । न तदस्ति न तन्नास्तीति व्याहतम् न चानया कारिकया विज्ञानस्याश्रयिभावः प्रतिषेद्धुं शक्यते । किं कारणम् विशेषप्रतिषेधात् । न तच्चक्षुषि नो रूप इत्यादिविशेषप्रतिषेधः । अथानाश्रितमेव विज्ञानम् व्यर्थं वाक्यं न तच्चक्षुषि नो रूप इति कस्य वा चक्षुषि रूपे वा विज्ञानं वर्तते यं प्रति प्रतिषेधः अयं च विज्ञानस्याश्रयप्रतिषेधो[१] विचार्यमाण आत्मसत्त्वं प्रतिपादयति । न हि विज्ञानस्यात्मसत्त्वमन्तरेण वाक्यमेतदर्थवत्तायां व्यवतिष्ठते । अथवा एकस्यानेकविषयोपलब्धिप्रतिसन्धानमनेन सूत्रेणोपदर्शित इत्युक्तन्यायम् । शेषं भाष्य इति ॥

अपरिसंख्यानाच्च स्मृतिविषयस्य ॥ १५ ॥

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १६ ॥

नात्मप्रतिपत्तिहेतूनां मनसि संभवात् । य एते भवता आत्मप्रतिपादका हेतव उपदिष्टाः सर्व एते मनसि सम्भवन्ति । एवं च न मनोव्यतिरिक्त आत्मा सिध्यति ॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः सञ्ज्ञाभेदमात्रम् ॥ १७ ॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः सञ्ज्ञाभेदमात्रम् । यथा ज्ञातारमभ्युपगच्छता ज्ञानसाधनानि चक्षुरादीनि प्रतिपद्यन्ते तथा मन्तारं प्रति-

(१) अचाश्रयनिषेधो—पा० ४ पु० ।

पद्यमानेन मतिसाधनमभ्युपेयम् यच्च तन्मतिसाधनं तन्मन इति सञ्ज्ञाभेदमात्रम् । अथ मन्ता निःसाधनो मतिं करोति एवमयं ज्ञाता निःसाधनो ज्ञानं करिष्यतीति सर्वेन्द्रियविलोपप्रसङ्गः ॥

नियमश्च निरनुमानः ॥ १८ ॥

नियमश्च निरनुमानः । योऽयं नियम आश्रीयते मतिरसाधना न पुनर्ज्ञप्तिरिति नियमो निरनुमानः ज्ञप्तिवत्तु[१] मतेः ससाधनत्वेऽनुमानमस्ति सुखाद्यश्च रूपादिभ्यो विषयान्तरमिति तद्विषयत्वादुपलब्धेः साधनेन भवितव्यम् न हि किञ्चित् सविषयं ज्ञानमसाधनं दृष्टं रूपादिज्ञानवदिति नियमश्च निरनुमानः सुखादिविज्ञानानि निःसाधनानि भवन्तु माभूवन्[२]रूपादिविषयाणीति यदि सर्वं विज्ञानं ससाधनमुच्यते[३] मनस्यपि करणान्तरं प्राप्नोति विषयत्वात् । ओमित्युच्यते अस्ति मनसि करणं किं पुनस्तत् येन मनोऽधिगम्यते केन च मनोऽधिगम्यते अयुगपज्ज्ञानोत्पत्त्या यस्य तु मनः प्रत्यक्षं भवति तस्य योगजधर्मानुगृहीत आत्ममनःसंयोगः करणम् योगिधर्माणां चाचिन्त्यविषयत्वात् कथं ते मनो गृह्णन्तीत्यविचारणीयमेतत् । एतेनात्मज्ञानं[४] प्रत्युक्तम् । आत्ममनःसंयोगस्य कारणभावादिति । एवं तावदात्मनोऽस्तित्वव्यतिरेकौ सिद्धौ बहुत्वं चात एव दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् नान्यदृष्टमन्यः स्मरतीति शरीरदाहे पातकाभावादिति । सेयं सर्वा व्यवस्था शरीरिभेदे सति सम्भवतीति ॥

---

(१) ज्ञप्तिवच्च—पा० ४ पु० । (२) मा भवन्तु—पा० ४ पु० ।
(३) ससाधनं मन्यते—पा० ४ पु० । (४) विज्ञानं—पा० ४ पु० ।

किं पुनरयं देहादिसङ्घातादन्यो नित्योऽथानित्य इति एतस्मिन्नर्थे उभयथा दृष्टत्वादिति संशयमुपपादयति अनुपपन्नरूपश्चायं[१] संशयः। आत्मास्तित्वव्यतिरेकहेतुभिः शरीरभेदेऽप्यभेद आत्मनि सिद्धः सिद्धत्वात् प्रकरणमनारभ्यमिति। नानारभ्यं कथं जन्मप्रभृति यावत् प्रायणमेतस्मादेकः सिध्यति न पुनर्देहविनाशादूर्ध्वं भवतीत्येतत् सिध्यत्येतस्यार्थस्य ज्ञापनार्थं पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेरिति सूत्रम्॥

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः॥ १९॥

अस्यार्थः। जातः खल्वयं कुमारको विषयाधिगमासमर्थेषु दुर्ज्ञेयेषु हर्षभयशोकान् प्रतिपद्यमानो दृष्टः स्मितकम्परुदितानुमेयान् ते च[२] स्मृत्यनुबन्धादुत्पद्यन्ते स्मृत्यनुबन्धश्च नान्तरेण पूर्वशरीरमिति। तच्च जन्म निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः सम्बन्धः। अभिप्रेतविषयप्रार्थनाप्राप्तौ सुखानुभवो हर्षः। अनिष्टविषयसाधनोपनिपाते तज्जिहासोर्हानाशक्यता भयम्। दृष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थना शोकः। तदनुभवः सम्प्रतिपत्तिः। एकविषयानेकविज्ञानोत्पादोऽभ्यासः एकाकारविषयो वा। यथा ग्रालयोऽनेनाभ्यस्ता इति। प्रत्यक्षबुद्धिनिरोधे[३] तदनुसन्धानविषयः प्रत्ययः स्मृतिः। तदनुगृहीतस्तदनुसन्धानविषयः प्रत्ययस्तद्भावविषयः प्रत्यभिज्ञानम्। अनुबन्धो भावनाख्यः स्मृतिहेतुः संस्कारः।

(१) अनुपपन्नोऽयं—पा० ४ पु०। (२) अनुमेयानि तानि च—इति क्वचित्।
(३) प्रत्यक्षविरोधे—पा० ४ पु०।

श्रीगणेशाय नमः ।

अथ न्यायसूचीनिबन्धः[१] प्रारभ्यते ।

नमामि धर्मविज्ञानवैराग्येश्वर्यशालिने ।
निधये वाग्विशुद्धीनामक्षपादाय तापिने ॥
अक्षपादप्रणीतानां सूत्राणां सारबोधिका ।
श्रीवाचस्पतिमिश्रेण मया[२] सूची विधास्यते ॥

---

(१) यद्यप्यस्य निबन्धस्य मुद्रणं न्यायवार्त्तिकमुद्रणसमाप्त्यनन्तरं समुचितं तथापि न्यायदर्शनानुरागिणां सूत्रपाठनिर्णये प्रवृत्तानां खिन्नधियां विनोदायाधुनैव प्रकाश्यते । अस्य वाचस्पतिमिश्रकृतन्यायवार्त्तिकतात्पर्यटीकया* संवादे कृते ऽध्यायाह्निकप्रकरणसूत्रसंख्यायां वैषम्यं नोपलभ्यते यदि च सूत्रपदपाठेषु वैषम्योपलब्धिस्तदा लेखकशोधकप्रमादात्तद्बोध्यम् । विस्तरस्तु भूमिकायामनुसन्धेयः ॥

(२) आदर्शपुस्तकस्याच कृमिभक्षितत्वान्नमेति पूरितम् ॥

---

* अस्मत्पुस्तकसंग्रहे न्यायवार्त्तिकतात्पर्यटीकाग्रन्थस्य पुस्तकचतुष्टयं वर्तते । तत्र प्रथमं कागजाख्याधारे देवनागराक्षरैर्वीराणस्यामेव लिखितम् । तत्र लिपिकाल एवंलिखितः ।

"इति वाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां प्रथमोऽध्यायः समाप्तः ॥ ळ् ॥ ळ् ॥ ळ् ॥ स्वस्ति संवत् १४ ५४ समये आश्विनवदि १० रविवासरे ॥ ॥ श्रीः ॥ ळ् ॥ ॐ नमो नारायणाय ॥ ॥ स्वस्ति ॥ ॥ काशी करोतु कल्याणं विश्वेशः सर्व्वसंपदः" इत्यादि ॥

द्वितीयं तु तालपत्रेषु मैथिलाक्षरैर्लिखितं तत्र लिपिकालः "ल० सं० ४२१" इत्यादि ।

तृतीयं चतुर्थमपि नातिप्राचीनम् ।

परन्तु चतुर्ष्वपि पुस्तकेषु न्यूनाधिकभावः पाठभेदाश्चोपलभ्यन्ते ते च लेखकशोधकप्रमादादेव सञ्जाताः न तु वाचस्पतिमिश्रकृताः ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥१॥ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः ॥२॥ इति द्वाभ्यां सूत्राभ्यामभिधेयप्रयोजनसम्बन्धप्रकरणम् ॥१॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥१॥ इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥२॥ अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च ॥३॥ प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥४॥ आप्तोपदेशः शब्दः ॥५॥ स द्विविधो दृष्टादृष्टार्थत्वात् ॥६॥ इति षड्भिः सूत्रैः प्रमाणलक्षणप्रकरणम् ॥२॥

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥१॥ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥२॥ चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥३॥ घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥४॥ पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥५॥ गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥६॥ बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥७॥ युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥८॥ प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥९॥ प्रवर्तनालक्षणा दोषाः ॥१०॥ पुनरुत्पत्तिः प्रेत्यभावः ॥११॥ प्रवृत्तिदोषजनितोऽर्थः फलम् ॥१२॥ बाधनालक्षणं दुःखम् ॥१३॥ तदत्यन्तविमोक्षोऽपवर्गः ॥१४॥ इति चतुर्दशभिः सूत्रैः प्रमेयलक्षणप्रकरणम् ॥३॥

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च

विशेषापेक्षो विमर्षः संशयः ॥१॥ यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥२॥ लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥३॥ इति त्रिभिः सूत्रैर्न्यायपूर्वाङ्गलक्षणप्रकरणम् ॥४॥

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥१॥ स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥२॥ सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥३॥ समानतन्त्रासिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः ॥४॥ यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥५॥ अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥६॥ इति षड्भिः सूत्रैर्न्यायाश्रयसिद्धान्तलक्षणप्रकरणम् ॥५॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥१॥ साध्यनिर्देशः प्रतिज्ञा ॥२॥ उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥३॥ तथा वैधर्म्यात् ॥४॥ साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् ॥५॥ तद्विपर्ययाद्वा विपरीतम् ॥६॥ उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥७॥ हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥८॥ इत्यष्टभिः सूत्रैर्न्यायप्रकरणम् ॥६॥

अविज्ञाततत्त्वे ऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥१॥ विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥२॥ इति द्वाभ्यां सूत्राभ्यां न्यायोत्तराङ्गलक्षणप्रकरणम् ॥७॥

इत्येकचत्वारिंशता सूत्रैः सप्तभिः प्रकरणैः प्रथमाध्यायस्य प्रथममाह्निकं समाप्तम् ॥

अथ द्वितीयमाह्निकम् ।

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥१॥ यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥२॥ स प्रतिपक्षस्थापनाहीनो वितण्डा ॥३॥ इति त्रिभिः सूत्रैः कथालक्षणप्रकरणम् ॥१॥

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः ॥१॥ अनैकान्तिकः सव्यभिचारः ॥२॥ सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥३॥ यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥४॥ साध्याविशिष्टश्च साध्यत्वात् साध्यसमः ॥५॥ कालात्ययापदिष्टः कालातीतः ॥६॥ इति षड्भिः सूत्रैः हेत्वाभासलक्षणप्रकरणम् ॥२॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥१॥ तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च ॥२॥ अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥३॥ सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ॥४॥ धर्मविकल्पनिर्देशे ऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥५॥ वाक्छलमेवोपचारच्छलं तदविशेषात् ॥६॥ न तदर्थान्तरभावात् ॥७॥ अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥८॥ इत्यष्टभिः सूत्रैश्छललक्षणप्रकरणम् ॥३॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥१॥ विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥२॥ तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥

२ ॥ इति त्रिभिः सूत्रैः पुरुषाग्रक्तिलिङ्गदोषसामान्यलक्षण-प्रकरणम् ॥ ४ ॥

इति विंशत्या सूत्रैश्चतुर्भिः प्रकरणैः प्रथमाध्यायस्य द्वितीयमाह्निकं समाप्तम् ॥

समाप्तश्च प्रथमोऽध्यायः ।

अत्र प्रकरणानि ११ सूत्राणि ६१ ॥

अथ द्वितीयोऽध्यायः ।

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥ १ ॥ विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥ विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥ ३ ॥ अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ ४ ॥ तथात्यन्तसंशय-स्तद्धर्मसातत्योपपत्तेः ॥ ५ ॥ यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥ यत्र संशयस्तत्रैवमुत्तरोत्तर-प्रसङ्गः ॥ ७ ॥ इति सप्तभिः सूत्रैः संशयपरीक्षाप्रकरणम् ॥ १ ॥

प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेः ॥ १ ॥ पूर्वं हि प्रमाण-सिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ २ ॥ पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ ३ ॥ युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रम-वृत्तित्वाभावो बुद्धीनाम् ॥ ४ ॥ चैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ ५ ॥ सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ ६ ॥ तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ ७ ॥ चैकाल्यप्रतिषेधश्च शब्दादातोद्यसिद्धि-वत् तत्सिद्धेः ॥ ८ ॥ प्रमेया च तुलाप्रामाण्यवत् ॥ ९ ॥ प्रमाणतः सिद्धेः

प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥१०॥ तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः ॥११॥ न प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेः ॥१२॥ क्वचित्तु निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ॥१३॥ इति त्रयोदशभिः सूत्रैः प्रमाणसामान्यपरीक्षाप्रकरणम् ॥२॥

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥१॥ नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥२॥ दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥३॥ ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥४॥ तद्योगपद्यलिङ्गत्वाच्च न मनसः ॥५॥ प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ॥६॥ सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ॥७॥ तैश्चापदेशो ज्ञानविशेषाणाम् ॥८॥ व्याहतत्वादहेतुः ॥९॥ नार्थविशेषप्राबल्यात् ॥१०॥ प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥११॥ न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥१२॥ इति द्वादशभिः सूत्रैः प्रत्यक्षपरीक्षाप्रकरणम् ॥३॥

साध्यत्वादवयविनि सन्देहः ॥१॥ सर्वाग्रहणमवयव्यसिद्धेः ॥२॥ धारणाकर्षणोपपत्तेश्च ॥३॥ सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥४॥ इति चतुर्भिः सूत्रैः प्रासङ्गिकमवयविपरीक्षाप्रकरणम् ॥४॥

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥१॥ नैकदेशत्वासादृश्येभ्योऽर्थान्तरभावात् ॥२॥ इति द्वाभ्यां सूत्राभ्यामनुमानपरीक्षाप्रकरणम् ॥५॥

वर्तमानाभावः पतनः पतितपतितव्यकालोपपत्तेः ॥१॥ तयोरप्य-

भावो वर्तमानाभावे तदपेक्षत्वात् ॥२॥ नातीतानागतयोरितरेतरापेक्षासिद्धिः ॥३॥ वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥४॥ कृतताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ॥५॥ इति पञ्चभिः सूत्रैरौपोद्घातिकं वर्तमानपरीक्षाप्रकरणम् ॥६॥

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥१॥ प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥२॥ प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥३॥ नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः ॥४॥ तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥५॥ इति पञ्चभिः सूत्रैरुपमानपरीक्षाप्रकरणम् ॥७॥

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥१॥ उपलब्धेरद्विप्रवृत्तित्वात् ॥२॥ सम्बन्धाच्च ॥३॥ आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्ययः ॥४॥ पूरणप्रदाहपाटनानुपपत्तेश्च सम्बन्धाभावः ॥५॥ शब्दार्थव्यवस्थानादप्रतिषेधः ॥६॥ न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य ॥७॥ जातिविशेषे चानियमात् ॥८॥ इत्यष्टभिः सूत्रैः शब्दसामान्यपरीक्षाप्रकरणम् ॥८॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥१॥ न कर्तृकर्मसाधनवैगुण्यात् ॥२॥ अभ्युपेत्य कालभेदे दोषवचनात् ॥३॥ अनुवादोपपत्तेश्च ॥४॥ वाक्यविभागस्य चार्थग्रहणात् ॥५॥ विध्यर्थवादानुवादवचनविनियोगात् ॥६॥ विधिर्विधायकः ॥७॥ स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥८॥ विधिविहितस्यानुवचनमनुवादः ॥९॥ नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥१०॥ शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥११॥ मन्त्रायुर्वेदप्रामाण्य-

वच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥१२॥ इति द्वादशभिः सूत्रैः शब्द-विशेषपरीक्षाप्रकरणम् ॥८॥

इति अष्टोत्तरषष्ट्या सूत्रैर्नवभिः प्रकरणैर्द्वितीया-ध्यायस्याद्यमाह्निकं समाप्तम् ॥

अथ द्वितीयमाह्निकम् ।

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥१॥ शब्द ऐति-ह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रति-षेधः ॥२॥ अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥३॥ अनर्थापत्ता-वर्थापत्त्यभिमानात् ॥४॥ प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ॥५॥ तत्प्रामाण्ये वा नार्थपत्त्यप्रामाण्यम् ॥६॥ नाभावप्रामाण्यं प्रमेया-सिद्धेः ॥७॥ लक्षितेष्वलक्षणलक्षितत्वाल्लक्षितानां तत्प्रमेयसिद्धिः ॥८॥ असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥९॥ तत्सिद्धे-रलक्षितेष्वहेतुः ॥१०॥ न लक्षणावस्थितापेक्षसिद्धेः ॥११॥ प्रागु-त्पत्तेरभावोपपत्तेश्च ॥१२॥ इति द्वादशभिः[१] सूत्रैश्चतुष्ट्वपरीक्षा-प्रकरणम् ॥१॥

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥१॥ न घटाभाव-सामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च ॥२॥ तत्त्वभाक्त्वयोर्नाना-त्वस्य विभागादव्यभिचारः ॥३॥ सन्तानानुमानविशेषणात् ॥४॥ कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ॥५॥ प्रागुच्चारणादनुपलब्धे-

(१) आदर्शपुस्तके "चयोदशभिः सूत्रै"रिति वर्तते किं तु १२ सूत्रादर्शनात् अन्तिमसमस्तसूत्रसंख्यावैषम्याद् द्वादशभिरिति शोधितम् ॥

रावरणाद्यनुपलब्धेश्च ॥६॥ तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥७॥ अनुपलम्भादप्यनुपलब्धिसङ्गावान्नावरणानुपपत्तिरनुपलम्भात् ॥ ८ ॥ अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ९ ॥ अस्पर्शत्वात् ॥ १० ॥ न कर्मानित्यत्वात् ॥ ११ ॥ नाणु नित्यत्वात् ॥ १२ ॥ सम्प्रदानात् ॥ १३ ॥ तदन्तरालानुपलब्धेरहेतुः ॥ १४ ॥ अध्यापनादप्रतिषेधः ॥ १५ ॥ उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥ १६ ॥ अभ्यासात् ॥ १७ ॥ नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ १८ ॥ अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ॥ १९ ॥ तद्भावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ॥ २० ॥ विनाग्रकारणानुपलब्धेश्च ॥ २१ ॥ अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ २२ ॥ उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥ २३ ॥ पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥ २४ ॥ विनाग्रकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २५ ॥ अस्पर्शत्वादप्रतिषेधः ॥ २६ ॥ विभक्त्यन्तरोपपत्तेश्च समासे ॥ २७ ॥ इति सप्तविंशत्या सूत्रैः ग्रब्दानित्यत्वप्रकरणम् ॥ २ ॥

विकारादेशोपदेशात् संशयः ॥ १ ॥ प्रकृतिविवृद्धौ विकारविवृद्धेश्च ॥ २ ॥ न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ ३ ॥ द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः ॥ ४ ॥ नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ५ ॥ द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः ॥ ६ ॥ न विकारधर्मानुपपत्तेः ॥ ७ ॥ विकारप्राप्तानामपुनरापत्तेः ॥ ८ ॥ सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ९ ॥ न तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ १० ॥ नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात् ॥ ११ ॥ नित्यानामतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥

१२। अनवस्थायित्वे च वर्णोपलब्धिवत् तद्विकारोपपत्तिः ॥१३॥ विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥१४॥ प्रकृत्यनियमात् ॥१५॥ अनियमे नियमान्नानियमः ॥१६॥ नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥१७॥ गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकारः ॥१८॥ इति अष्टादशभिः सूत्रैः शब्दपरिणामप्रकरणम् ॥३॥

ते विभक्त्यन्ताः पदम् ॥१॥ व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥२॥ यावशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ॥३॥ न तदनवस्थानात् ॥४॥ सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाकटान्नपुरुषेष्वतद्भावे ऽपि तदुपचारः ॥५॥ आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥६॥ व्यक्त्याकृतियुक्ते ऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्भवके जातिः ॥७॥ नाकृतिव्यक्त्यपेक्षत्वाज्ज्ञात्यभिव्यक्तेः ॥८॥ व्यक्त्याकृतिजातयस्तु पदार्थः ॥९॥ व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः ॥१०॥ आकृतिर्जातिर्लिङ्गाख्या ॥११॥ समानप्रसवात्मिका जातिः ॥१२॥ इति द्वादशभिः सूत्रैः शब्दशक्तिपरीक्षा(पदार्थनिरूपण)प्रकरणम् ॥४॥

इति नवोत्तरषष्ट्या सूत्रैश्चतुर्भिः प्रकरणैर्द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥

समाप्तश्च द्वितीयोऽध्यायः ॥

सर्वे च प्रकरणानि १३ सूत्राणि १३७ ॥

तृतीयोऽध्यायः ।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥१॥ न विषयव्यवस्थानात् ॥२॥ तद्व्यवस्थानादेवात्मसद्भावाद्प्रतिषेधः ॥३॥ इति त्रिभिः सूत्रैरिन्द्रियव्यतिरेकात्मप्रकरणम् ॥१॥

शरीरदाहे पातकाभावात् ॥१॥ तद्भावः सात्मकप्रदाहे ऽपि तन्नित्यत्वात् ॥२॥ न कार्याश्रयकर्तृवधात् ॥३॥ इति त्रिभिः सूत्रैः शरीरव्यतिरेकात्मप्रकरणम् ॥२॥

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥१॥ नैकस्मिन्नासाश्रित्यव-स्थिते द्वित्वाभिमानात् ॥२॥ एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥३॥ अवयवनाशे ऽप्यवयव्युपलब्धेरहेतुः ॥४॥ दृष्टान्तविरोधाद्प्रतिषेधः ॥५॥ इन्द्रियान्तरविकारात् ॥६॥ न स्मृतेः स्मर्तव्यविषयत्वात् ॥७॥ तदात्मगुणत्वसद्भावाद्प्रतिषेधः ॥८॥ इत्यष्टभिः सूत्रैः प्रासङ्गिकं चक्षुरद्वैतप्रकरणम् ॥३॥

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥१॥ ज्ञातुर्ज्ञानसाधनोपपत्तेः सञ्ज्ञाभेदमात्रम् ॥२॥ नियमश्च निरनुमानः ॥३॥ इति त्रिभिः सूत्रैर्मनोव्यतिरेकप्रकरणम् ॥४॥

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः ॥१॥ पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः ॥२॥ नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥३॥ प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् । ४॥ अयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणम् ॥५॥ नान्यत्र प्रवृत्त्यभावात् ॥६॥ वीतरागजन्मादर्शनात् ॥

७॥ सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः ॥८॥ न सङ्कल्पनिमित्तत्वाद्रागादीनाम् ॥९॥ इति नवभिः सूत्रैर्नित्यताप्रकरणम् ॥५॥

पार्थिवं गुणान्तरोपलब्धेः ॥१॥ पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥२॥ निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥३॥ गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥४॥ श्रुतिप्रामाण्याच्च ॥५॥ इति पञ्चभिः सूत्रैः शरीरपरीक्षाप्रकरणम् ॥६॥

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः ॥१॥ महद्गुणग्रहणात् ॥२॥ रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम् ॥३॥ तदनुपलब्धेरहेतुः ॥४॥ नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥५॥ द्रव्यगुणधर्मभेदाच्च उपलब्धिनियमः ॥६॥ अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥७॥ कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥८॥ मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥९॥ न रात्रावप्यनुपलब्धेः ॥१०॥ बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥११॥ अभिव्यक्तौ चाभिभवात् ॥१२॥ नक्तञ्चरनयनरश्मिदर्शनाच्च ॥१३॥ अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥१४॥ कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥१५॥ अप्रतिघातात् सन्निकर्षोपपत्तिः ॥१६॥ आदित्यरश्मेः स्फटिकान्तरिते ऽपि दाह्ये ऽविघातात् ॥१७॥ नेतरेतरधर्मप्रसङ्गात् ॥१८॥ आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः ॥१९॥ दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥२०॥ इति विंशत्या सूत्रैरिन्द्रिय(भौतिकत्व)परीक्षाप्रकरणम् ॥७॥

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥१॥ त्वग-

व्यतिरेकात् ॥२॥ न युगपदर्थानुपलब्धेः ॥३॥ विप्रतिषेधाच्च न त्वगेका ॥४॥ इन्द्रियार्थपञ्चत्वात् ॥५॥ न तदर्थबहुत्वात् ॥६॥ गन्धत्वाद्व्यतिरेकाद् गन्धादीनामप्रतिषेधः ॥७॥ विषयत्वाद्व्यतिरेकादेकत्वम् ॥८॥ न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥९॥ भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥१०॥ इति दशभिः सूत्रैरिन्द्रियनानात्वप्रकरणम् ॥८॥

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥१॥ अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥२॥ न सर्वगुणानुपलब्धेः ॥३॥ एकैकशस्तेनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥४॥ विष्टं ह्यपरस्परेण ॥५॥ न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥६॥ पूर्वपूर्वगुणोत्कर्षात् तत्तत्प्रधानम् ॥७॥ तद्भवस्थानं तु भूयस्त्वात् ॥८॥ सगुणानामिन्द्रियभावात् ॥९॥ तेनैव तस्याग्रहणाच्च ॥१०॥ न शब्दगुणोपलब्धेः ॥११॥ तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥१२॥ इति द्वादशभिः सूत्रैरर्थपरीक्षाप्रकरणम् ॥९॥

इति चिसप्तत्या सूत्रैर्नवभिः प्रकरणैस्तृतीयस्याद्यमाह्निकं समाप्तम् ॥

अथ द्वितीयमाह्निकम् ।

कर्माकाशसाधर्म्यात् संशयः ॥१॥ विषयप्रत्यभिज्ञानात् ॥२॥ साध्यसमत्वादहेतुः ॥३॥ न युगपदग्रहणात् ॥४॥ अप्रत्यभिज्ञाने च

विनाशप्रसङ्गः ॥५॥ क्रमवृत्तित्वाद्युगपद्ग्रहणम् ॥६॥ अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥७॥ न गत्यभावात् ॥८॥ स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः ॥९॥ इति नवभिः सूत्रैर्बुद्ध्यनित्यताप्रकरणम् ॥१॥

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्युक्तीनामहेतुः ॥१॥ नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ॥२॥ नोत्पत्तिविनाशकारणोपलब्धेः ॥३॥ क्षीरविनाशे कारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुपपत्तिः ॥४॥ लिङ्गतो ग्रहणान्नानुपलब्धिः ॥५॥ न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥६॥ व्यूहान्तराद्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥७॥ क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥८॥ इत्यष्टभिः सूत्रैरौपोद्घातिकं क्षणभङ्गप्रकरणम् ॥२॥

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥१॥ युगपज्ज्ञेयानुपलब्धेर्न मनसः ॥२॥ तदात्मगुणत्वेऽपि तुल्यम् ॥३॥ इन्द्रियैर्मनसः सन्निकर्षाभावात् तदनुत्पत्तिः ॥४॥ नोत्पत्तिकारणानपदेशात् ॥५॥ विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥६॥ अनित्यत्वग्रहणात् बुद्धेर्बुद्ध्यन्तरादिनाशः शब्दवत् ॥७॥ ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥८॥ नान्तःशरीरवृत्तित्वान्मनसः ॥९॥ साध्यत्वाद्धेतुः ॥१०॥ स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥११॥ न तदाशुगतित्वान्मनसः ॥१२॥ न स्मरणकालानियमात् ॥१३॥ आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥१४॥ व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥१५॥

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणम् ॥१६॥ ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥१७॥ तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥१८॥ परस्वादिष्वारम्भनिवृत्तिदर्शनात् ॥१९॥ नियमानियमौ तु तद्विशेषकौ ॥२०॥ यथोक्तहेतुत्वात् पारतन्त्र्याद्धृताभ्यागमाच्च न मनसः ॥२१॥ परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥२२॥ स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥२३॥ प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यविरोधैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥२४॥ इति चतुर्विंशत्या सूत्रैर्बुद्धेरात्मगुणत्वप्रकरणम् ॥३॥

कर्मानवस्थायियग्रहणात् ॥१॥ अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ॥२॥ हेतूपादानात् प्रतिषेधव्याभ्यनुज्ञा ॥३॥ न प्रदीपार्चिषः सन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम् ॥४॥ इति चतुर्भिः सूत्रैर्बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ॥४॥

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥१॥ यावद्द्रव्यभावित्वाद्रूपादीनाम् ॥२॥ न पाकजगुणान्तरोत्पत्तेः ॥३॥ प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥४॥ शरीरव्यापित्वात् ॥५॥ न केशनखादिष्वनुपलब्धेः ॥६॥ त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥७॥ शरीरगुणवैधर्म्यात् ॥८॥ न रूपादीनामितरेतरवैधर्म्यात् ॥९॥ ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥१०॥ इति दशभिः सूत्रैर्बुद्धेः शरीरगुणव्यतिरेकप्रकरणम् ॥५॥

ज्ञानायौगपद्यादेकं मनः ॥१॥ न युगपदनेकक्रियोपलब्धेः ॥२॥

अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात् ॥३॥ यथोक्तहेतुत्वाच्चाणु ॥४॥ इति चतुर्भिः सूत्रैर्मनःपरीक्षाप्रकरणम् ॥६॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥१॥ भूतेभ्यो मूर्त्युपादानवत् तदुपादानम् ॥२॥ न साध्यसमत्वात् ॥३॥ नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥४॥ तथाहारस्य ॥५॥ प्राप्तौ चानियमात् ॥६॥ शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ॥७॥ एतेनानियमः प्रत्युक्तः ॥८॥ तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥९॥ मनःकर्मनिमित्तत्वाच्च संयोगाद्यनुच्छेदः ॥१०॥ नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥११॥ अणुश्यामतानित्यत्ववदेतत् स्यात् ॥१२॥ नाकृताभ्यागमप्रसङ्गात् ॥१३॥ इति त्रयोदशभिः सूत्रैः प्रासङ्गिकादृष्टनिष्पाद्यत्वप्रकरणम् ॥७॥

इति द्विसप्तत्या सूत्रैः सप्तभिः प्रकरणैस्तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

समाप्तश्च तृतीयोऽध्यायः ॥

अत्र प्रकरणानि १६ सूत्राणि १४५ ।

चतुर्थोऽध्यायः ॥

प्रवृत्तिर्यथोक्ता ॥१॥ तथा दोषाः ॥२॥ इति द्वाभ्यां सूत्राभ्यां प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥१॥

तत्त्वैराग्यं रागद्वेषमोहार्थान्तरभावात् ॥१॥ नैकप्रत्यनीकत्वात् ॥२॥ व्यभिचारादहेतुः ॥३॥ तेषां मोहः पापीयान् नामूढस्येतरो-

त्पत्तेः ॥४॥ निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥५॥ न दोषलक्षणावरोधान्मोहस्य ॥६॥ निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥७॥ इति सप्तभिः सूत्रैर्दोषचैराश्यप्रकरणम् ॥२॥

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥१॥ व्यक्ताव्यक्तानां प्रत्यक्षप्रामाण्यात् ॥२॥ न घटाद् घटानिष्पत्तेः ॥३॥ व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः ॥४॥ इति चतुर्भिः सूत्रैः प्रेत्यभावपरीक्षाप्रकरणम् ॥३॥

अभावाद् भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥१॥ व्याघातादप्रयोगः ॥२॥ नातीतानागतयोः कारकशब्दप्रयोगात् ॥३॥ न विनष्टेभ्योऽनिष्पत्तेः ॥४॥ क्रमनिर्देशादप्रतिषेधः ॥५॥ इति पञ्चभिः सूत्रैः शून्यतोपादानप्रकरणम् ॥४॥

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥१॥ न पुरुषकर्माभावे फलानिष्पत्तेः ॥२॥ तत्कारितत्वादहेतुः ॥३॥ इति त्रिभिः सूत्रैरीश्वरोपादानताप्रकरणम् ॥५॥

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥१॥ अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥२॥ निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥३॥ इति त्रिभिः सूत्रैराकस्मिकत्वप्रकरणम् ॥६॥

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥१॥ नानित्यता नित्यत्वात् ॥२॥ तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥३॥ नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ॥४॥ इति चतुर्भिः सूत्रैः सर्वानित्यत्वनिराकरणप्रकरणम् ॥७॥

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥१॥ नोत्पत्तिविनाशकारणोप-

लब्धेः ॥२॥ तल्लक्षणावरोधाद्प्रतिषेधः ॥३॥ नोत्पत्तितत्कारणोपलब्धेः ॥४॥ न व्यवस्थानुपपत्तेः ॥५॥ इति पञ्चभिः सूत्रैः सर्वनित्यत्वनिराकरणप्रकरणम् ॥८॥

सर्वं पृथग् भावलक्षणपृथक्त्वात् ॥१॥ नानेकलक्षणैरेकभावनिष्पत्तेः ॥२॥ लक्षणव्यवस्थानादेवाप्रतिषेधः ॥३॥ इति त्रिभिः सूत्रैः सर्वपृथक्त्वनिराकरणप्रकरणम् ॥९॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥१॥ न स्वभावसिद्धेर्भावानाम् ॥२॥ न स्वभावसिद्धिरापेक्षिकत्वात् ॥३॥ व्याहतत्वादयुक्तम् ॥४॥ इति चतुर्भिः सर्वशून्यतानिराकरणप्रकरणम् ॥१०॥

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥१॥ न कारणावयवभावात् ॥२॥ निरवयवत्वादहेतुः ॥३॥ इति त्रिभिः सूत्रैः संख्यैकान्तवादप्रकरणम् ॥११॥

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥१॥ कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥२॥ प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात् ॥३॥ नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ॥४॥ उत्पादव्ययदर्शनात् ॥५॥ बुद्धिसिद्धं तु तदसत् ॥६॥ आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः ॥७॥ प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥८॥ न पुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादिफलनिर्देशात् ॥९॥ तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥१०॥ इति दशभिः सूत्रैः फलपरीक्षाप्रकरणम् ॥१२॥

विविधबाधनायोगात् दुःखमेव जन्मोत्पत्तिः ॥१॥ न सुखस्याप्यन्तरालनिष्पत्तेः ॥२॥ बाधनानिर्वृत्तेर्वेदयतः पर्येषणदोषादप्रति-

षेधः ॥३॥ दुःखविकल्पे सुखाभिमानाच्च ॥४॥ इति चतुर्भिः सूत्रैर्दुःखपरीक्षाप्रकरणम् ॥१३॥

क्षणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥१॥ प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥२॥ समारोपणादात्मन्यप्रतिषेधः ॥३॥ पात्रचयान्तानुपपत्तेश्च फलाभावः ॥४॥ सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः ॥५॥ न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥६॥ न क्लेशसन्ततेः स्वाभाविकत्वात् ॥७॥ प्रागुत्पत्तेरभावान्नित्यत्ववत् स्वाभाविके ऽप्यनित्यत्वम् ॥८॥ अणुश्यामतानित्यत्ववद्वा ॥९॥ न संकल्पनिमित्तत्वाच्च रागादीनाम् ॥१०॥ इति दशभिः सूत्रैरपवर्गपरीक्षाप्रकरणम् ॥१४॥

इति सप्तषष्ट्या सूत्रैः चतुर्दशभिः प्रकरणैश्चतुर्थाध्यायस्याद्यमाह्निकम् ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥१॥ दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः ॥२॥ तन्निमित्तं त्ववयव्यभिमानः ॥३॥ इति त्रिभिः सूत्रैस्तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥१॥

विद्याविद्याद्वैविध्यात् संशयः ॥१॥ तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥२॥ वृत्त्यनुपपत्तेरपि न संशयः ॥३॥ कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥४॥ तेषुचावृत्तेरवयव्यभावः ॥५॥ पृथक् चावयवेभ्योऽवृत्तेः ॥६॥ न चावयव्यवयवाः ॥७॥ एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रसः ॥८॥ अवयवान्तराभावे ऽप्यवृत्तेर-

हेतुः ॥९॥ केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः ॥१०॥ स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥११॥ अवयवावयविप्रसङ्गश्चैवमाप्रलयात् ॥१२॥ न प्रलयोऽणुसद्भावात् ॥१३॥ परं वा त्रुटेः ॥१४॥ इति चतुर्दशभिः सूत्रैः प्रासङ्गिकमवयवावयविप्रकरणम् ॥२॥

आकाशव्यतिभेदात् तदनुपपत्तिः ॥१॥ आकाशसर्वगतत्वं वा ॥२॥ अन्तर्वहिश्च कार्यद्रव्यस्य कारणान्तरवचनात्कार्ये तद्भावः ॥३॥ शब्दसंयोगविभवाच्च सर्वगतम् ॥४॥ अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥५॥ मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥६॥ संयोगोपपत्तेश्च ॥७॥ अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥८॥ इत्यष्टभिः सूत्रैरौपोद्घातिकं निरवयवप्रकरणम् ॥३॥

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तत्त्वापकर्षणे पटुसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥१॥ व्याहतत्वाद्हेतुः ॥२॥ तदाश्रयत्वादपृथग्ग्रहणम् ॥३॥ प्रमाणतश्चार्थप्रतिपत्तेः ॥४॥ प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥५॥ स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥६॥ मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥७॥ हेत्वभावादसिद्धिः ॥८॥ स्मृतिसंकल्पवच्च स्वप्नविषयाभिमानः ॥९॥ मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥१०॥ बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥११॥ तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥१२॥ इति द्वादशभिः सूत्रैः प्रासङ्गिकं वार्थाभङ्गनिराकरणप्रकरणम् ॥४॥

समाधिविशेषाभ्यासात् ॥१॥ नार्थविशेषप्राबल्यात् ॥२॥ चुदा-

दिभिः प्रवर्तनाच्च ॥३॥ पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥४॥ अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥५॥ अपवर्गेऽप्येवंप्रसङ्गः ॥६॥ न निष्पन्नावश्यम्भावित्वात् ॥७॥ तदभावश्चापवर्गे ॥८॥ तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥९॥ ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥१०॥ तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ॥११॥ प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥१२॥ इति द्वादशभिः सूत्रैस्तत्त्वज्ञानविवृद्धिप्रकरणम् ॥५॥

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥१॥ ताभ्यां विगृह्य कथनम् ॥२॥ इति द्वाभ्यां सूत्राभ्यां तत्त्वज्ञानपरिपालनप्रकरणम् ॥६॥

इति एकपञ्चाशता सूत्रैः षड्भिः प्रकरणैश्चतुर्थाध्यायस्य द्वितीयमाह्निकं समाप्तम् ॥

समाप्तश्चायं चतुर्थोऽध्यायः ॥

अत्र प्रकरणानि २० सूत्राणि ११८ ॥

अथ पञ्चमोऽध्यायः ।

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ॥१॥ साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मवि-

पर्य्योपपत्तेः साधर्म्यवैधर्म्यसमौ ॥२॥ गोत्वादेर्गोसिद्धिवत् तत्-सिद्धिः ॥३॥ इति त्रिभिः सूत्रैः सत्प्रतिपक्षदेशनाभासप्रकरणम् ॥१॥

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्य-विकल्पसाध्यसमाः ॥१॥ किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रति-षेधः ॥२॥ साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥३॥ इति त्रिभिः सूत्रैः साध्यदृष्टान्तधर्मविकल्पप्रभवोत्कर्षसमादिजातिषट्कप्रकरणम् ॥२॥

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वादप्राप्यसाधकत्वाच्च प्राप्यप्राप्तिसमौ ॥१॥ घटादिनिष्पत्तिदर्शनात् पीडने चाव्यभिचारा-दप्रतिषेधः ॥२॥ इति द्वाभ्यां सूत्राभ्यां प्राप्यप्राप्तियुगनद्धवाहिविक-ल्पोपक्रमजातिद्वयप्रकरणम् ॥३॥

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥१॥ प्रदीपोपादानप्रसङ्गविनिवृत्तिवत् तद्वि-निवृत्तिः ॥२॥ प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥३॥ इति त्रिभिः सूत्रैर्युगनद्धवाहिप्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम् ॥४॥

प्रागुत्पतेः कारणाभावादनुत्पत्तिसमः ॥१॥ तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥२॥ इति द्वाभ्यां सूत्राभ्यामनुत्प-त्तिसमप्रकरणम् ॥५॥

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संश-यसमः ॥१॥ साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशये ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥२॥ इति द्वाभ्यां सूत्राभ्यां संशयसमप्रकरणम् ॥६॥

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥१॥ प्रतिपक्षात्

प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥२॥ इति द्वाभ्यां सूत्राभ्यां प्रकरणसमप्रकरणम् ॥७॥

त्रैकाल्यानुपपत्तेर्हेतोरहेतुसमः ॥१॥ न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥२॥ प्रतिषेधानुपपत्तेश्च प्रतिषेद्व्याप्रतिषेधः ॥३॥ इति त्रिभिः सूत्रैर्हेतुसमप्रकरणम् ॥८॥

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥१॥ अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥२॥ इति द्वाभ्यां सूत्राभ्यामर्थापत्तिसमप्रकरणम् ॥९॥

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥१॥ क्वचित् तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः ॥२॥ इति द्वाभ्यां सूत्राभ्यामविशेषसमप्रकरणम् ॥१०॥

उभयकारणोपपत्तेरुपपत्तिसमः ॥१॥ उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥२॥ इति द्वाभ्यां सूत्राभ्यामुपपत्तिसमप्रकरणम् ॥११॥

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ॥१॥ कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥२॥ इति द्वाभ्यां सूत्राभ्यामुपलब्धिसमप्रकरणम् ॥१२॥

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥१॥ अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥२॥ ज्ञानविकल्पानां च भावाभावसंवेदनाद्ध्यात्मम् ॥३॥ इति त्रिभिः सूत्रैरनुपलब्धिसमप्रकरणम् ॥१३॥

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥१॥ साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसामर्थ्यात् ॥२॥ दृष्टान्ते च

साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः ॥३॥ इति त्रिभिः सूत्रैरनित्यसमप्रकरणम् ॥१४॥

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥१॥ प्रतिषेधे नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ॥२॥ इति द्वाभ्यां सूत्राभ्यां नित्यसमप्रकरणम् ॥१५॥

प्रयत्नकार्यानेकत्वात् कार्यसमः ॥१॥ कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥२॥ इति द्वाभ्यां सूत्राभ्यां कार्यसमप्रकरणम् ॥१६॥

प्रतिषेधेऽपि समानो दोषः ॥१॥ सर्वत्रैवम् ॥२॥ प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥३॥ प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥४॥ स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः॥५॥ इति पञ्चभिः सूत्रैः षट्पक्षीरूपकथाभासप्रकरणम् ॥१७॥

इति चिचत्वारिंशता सूत्रैः सप्तदशभिः प्रकरणैः पञ्चमस्याद्यमाह्निकं समाप्तम् ॥

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥१॥ प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥२॥ प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥३॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥४॥ पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥५॥ अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥६॥ इति षड्भिः सूत्रैः प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम् ॥१॥

प्रकृतादर्थादप्रतिसम्बन्धार्थमर्थान्तरम् ॥१॥ वर्णक्रमनिर्देशवच्चिरर्थकम् ॥२॥ परिषत्प्रतिवादिभ्यां चिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥३॥ पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥४॥ इति चतुर्भिः सूत्रैः प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणम् ॥२॥

अवयवविपर्यासवचनमप्राप्तकालम् ॥१॥ हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥२॥ हेतूदाहरणाधिकमधिकम् ॥३॥ इति त्रिभिः सूत्रैः स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम् ॥३॥

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥१॥ अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् ॥२॥ इति द्वाभ्यां सूत्राभ्यां पुनरुक्तनिग्रहस्थानप्रकरणम् ॥४॥

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥१॥ अविज्ञातं चाज्ञानम् ॥२॥ उत्तरस्याप्रतिपत्तिरप्रतिभा ॥३॥ कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥४॥ इति चतुर्भिः सूत्रैरुत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम् ॥५॥

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥१॥ निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥२॥ अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥३॥ इति त्रिभिः

सूत्रैर्दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानचिकप्रकरणम् ॥६॥

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥१॥ हेत्वाभासाश्च यथोक्ताः ॥२॥ इति द्वाभ्यां सूत्राभ्यां कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम् ॥७॥

इति चतुर्विंशत्या सूत्रैः सप्तभिः प्रकरणैः पञ्चमाध्यायस्य द्वितीयमाह्निकं समाप्तम् ॥

समाप्तश्च पञ्चमोऽध्यायः ॥

अत्र प्रकरणानि २४ सूत्राणि ६७ ॥

अस्मिन् न्यायशास्त्रे ऽध्यायाः ५ आह्निकानि १० प्रकरणानि ८४ सूत्राणि ५२८ पदानि १७६६ अक्षराणि ८३८५ ॥

यदलभि किमपि पुण्यं दुस्तरकुनिबन्धपङ्कमग्नानाम् ।
श्रीगोतमसुगवीनामतिजरतीनां समुद्धरणात् ॥
संसारजलधिसेतौ वृषकेतौ सकलदुःखगमहेतौ ।
एतस्य फलमखिलमर्पितमेतेन प्रीयतामीशः ॥
न्यायसूचीनिबन्धोभावकारि सुधियां मुदे ।
श्रीवाचस्पतिमिश्रेण वस्वङ्कवसुवत्सरे ॥

इति न्यायाचार्यसन्मिश्रश्रीवाचस्पतिविरचितो न्यायसूचीनिबन्धः समाप्तः ॥

॥ शुभमस्तु ॥

*Nitisāra, or The Elements of Polity, By Kámandaki, (Sans.) Fasc. 2–5 @ /6/ each	1	8
Nyayabindcutīkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati	2	0
Pariçiṣta Parvan, (Text) Fasc. 1–5 @ /6/ each	1	14
Prithivirāj Rāsa, (Text) Part I, Fasc. 1, Part II, Fasc. 1–5 @ /6/ each ...	2	4
Ditto (English) Part II, Fasc. 1	0	12
Prākṛta Lakṣṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–4 @ /6/ each	6	12
Parāçara, Institutes of (English)	0	12
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 & 2 @ /12/ each	1	8
*Taittirīya Āraṇyaka, (Text) Fasc. 2–11 @ /6/ each	3	12
* Ditto Saṁhitā, (Text) Fasc. 9–41 @ /6/ each	12	6
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5 @ /6/ each ...	10	2
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each	1	14
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each	5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	8
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1 to V	1	14
Tibetan Series.		
Pag-Sam Ṭhi S'iñ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1, @ 1/ each	9	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each ... ... Rs.	3	0
Futūḥ-ush-Shām of Waqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Azádí, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābāh, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol III, 1–10 Index to Vol. I Fasc. X & XI & Index to Vol. III, Fasc. XI & XII Index to Vol. II, Fasc. X, XI & XII @ /6/ each	13	2

*. The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each	1	14
Muntakhab-ut-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each	5	10
Muntakhab-ut-Tawārīkh, (English) Vol. I, Fasc. 1–4; Vol. II, Fasc. 1–5 @ /12/ each	6	12
Muntakhab-ul-Lubāb, (Text) Fasc. 1–19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1 and 2 @ /12/ each	1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–4 @ /6/ each	1	8
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each	4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1 & 2 @ 1/8/ each	3	0
Wís o Rāmín, (Text) Fasc. 1–5 @ /6/ each	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each	Rs. 50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members. *N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.*	3	0
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	2	0
	General Cunningham's Archæological Survey Report for 1863–64 (Extra No., *J. A. S. B.*, 1864)	2	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J. A. S. B.*, 1868)	4	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J. A. S. B.*, 1875).	4	0
	Introduction to the Maithilī Language of North Bihár, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J. A. S. B.*, 1882)	3	0
5.	Anis-ul-Musharrahin	3	0
6.	Catalogue of Fossil Vertebrata	3	8
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	1	0
8.	Iṣṭilāḥāt-uṣ-Ṣūfīyah, edited by Dr. A. Sprenger, 8vo.	32	0
9.	Ināyah, a Commentary on the Hidayah, Vols. II and IV, @ 16/ each...	2	0
10.	Jawāmi-ul-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	4	0
11.	Khizānat-ul-'ilm	40	0
12.	Mahābāhrata, Vols. III and IV, @ 20/ each	18	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	4	0
14.	Sharaya-ool-Islām	10	0
15.	Tibetan Dictionary, by Csoma de Körös	8	0
16.	Ditto Grammar ,, ,, ...	1	8
17.	Kaçmīraçabdāmrta, Part I		
	Notices of Sanskrit Manuscripts, Fasc. 1–26 @ 1/ each	26	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

10–7–97.

Books are supplied in V-P. P.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1008.



न्यायवार्त्तिकम् ।

NYĀYA-VĀRTTIKAM

EDITED BY

PAṆḌIT VINḌHYEÇVARĪ PRASĀD DUBE.

LIBRARIAN, GOVT. SANSKRIT COLLEGE, BENARES.

FASCICULUS V.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1902.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,
46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	a.
Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	1	8
Advaitachinta Kaustubhe, Fasc. 1	0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each	1	14
Aphorisms of Sāṇdilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–3	1	2
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...	6	0
Çatapatha Brāhmaṇa, Fasc. 1–5	1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each	19	14
Catasahasrika-prajna-parimita Part I Fasc. I & II @ /6/	0	12
Çlokavartika, (English) Fasc. 1–2	1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ...	4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each	5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each	1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3	1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1–4	1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each	10	6
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each	3	4
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each	2	2
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...	4	8
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–3 @ /6/ each	4	2
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each	1	8
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each	4	14
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each	4	2
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/	1	14
Nyāyavārtika, (Text) Fasc. 1–5 @ /6/	1	4
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...	5	8
Nityacarapaddhati Fasc. 1–4 (Text) @ /6/	1	10
Nyayabindutīkā, (Text	0	
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1–3 @ 2/	6	0

दृष्टविषयानुस्मरणाच्चयनादिप्रसादः स्मितम् । अनिष्टविषयानुस्मरणात् तत्साधनजिहासानुष्ठानलक्षणो हस्तादिविक्षेपवतोऽश्रुविमोचनसहितः शब्दविशेषो रुदितम् । स्मितरुदिते व्यधिकरणत्वादसाधनम् । अथ मन्यसे स्मितरुदिते बाल्यावस्थायां भवतो न च बाल्यावस्था आत्मनः तस्माद्व्यधिकरणत्वादसाधनमिति । न शोकादिमदात्मवतीति बाल्यावस्थायाः साध्यत्वात् । शोकादिमदात्मवती बाल्यावस्थेति साध्यं स्मितरुदितादिमत्त्वादिति । बाल्यावस्था वयोधर्मो यौवनावस्थावत् । एतेन स्मृतिसंस्कारानुभवपूर्वशरीरसम्बन्धवदात्मवत्त्वं व्याख्यातम् । कथमिति यथा स्मितरुदितवत्त्वेन शोकादिमदात्मवती बाल्यावस्था साध्यते एवं शोकादिमदात्मवत्त्वेन स्मृतिमदात्मवती बाल्यावस्था साध्या तथा स्मृतिमदात्मवत्त्वेन संस्कारवदात्मवती बाल्यावस्था साध्या संस्कारवदात्मवत्त्वेन पूर्वानुभववदात्मवती पूर्वानुभववदात्मवत्त्वेन पूर्वशरीरसम्बन्धवदात्मवती साध्या सर्वत्र यौवनावस्था दृष्टान्तः(१) सा हि स्मितरुदितवती भवतीति शोकादिमदात्मवती चेति सर्वत्र वक्तव्यम् ॥

पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः ॥ २० ॥

पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः । अनित्येऽपि विकारदर्शनादनेकान्त इति सूत्रार्थः । कः पुनरयं प्रबोधः किं च सम्मीलनमिति । पद्मपत्रावयवविभागोऽविनश्यत्कार्यः प्रबोधः । पद्मपत्रावयवानामारब्धकार्याणां याः पुनः(२) परस्परेण प्राप्तयः

(१) यौवनादिर्दृष्टान्तः—पा० ४ पु० । (२) यत्पुनः—पा० ४ पु०

तत्समीलनमिति। न विकल्पानुपपत्तेः। पद्मादिषु प्रबोधसमीलनविकारादिवत्तद्विकार इति किमयं दृष्टान्तः साधनपक्ष उतानैकान्तिकपक्ष[१] इति। यदि साधनपक्षे हेतुमन्तरेण दृष्टान्तमात्रं न साधनमित्यसाधनं दृष्टान्तः। अथ दूषणं तत्किं दृष्टकारणप्रत्याख्यानम् उत कारणान्तरोपपादनम् अथात्मन उत्पत्ति[२]निरोधकारणानुमानम् अथाकस्मिकत्वमिति। तद्यदि तावद्दृष्टकारणप्रत्याख्यानम् तदयुक्तम् दृष्टेन विशेषितत्वात् यौवनाद्यवस्थासु स्मितरुदितवत्त्वं शोकादिमदात्मवत्त्वं च दृष्टमिति। दृष्टेन स्मितरुदितवत्त्वेन शोकादिमदात्मवत्त्वं बाल्यावस्थायां गम्यत इति न दोषः। अथ कारणान्तरोपपादनम् तदपि न युक्तम् अत एव दृष्टेन विशेषितत्वादिति। अथात्मन उत्पत्तिनिरोधकारणानुमानम् तच्च युक्तं द्रव्यस्य सतः सर्वदा अमूर्तत्वादकारण आत्मा आकाशादिवदिति। आत्मानं च कृतकं प्रतिपद्यमानेन कारणमस्य वाच्यम् कुतः कार्यस्य कारणवत्त्वात्[३] सर्वं कार्यं कारणवद्दृष्टमिति। अथ पद्मादिप्रबोधसमीलनविकारोऽकस्माद्भवतीति तन्नोष्णशीतवर्षकाल[४]निमित्तत्वात् पञ्चात्मकविकाराणाम्॥

नोष्णशीतवर्षकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्॥ २१॥

नायमाकस्मिकः पद्मादिप्रबोधसमीलनविकार इति सूत्रार्थः।

---

(१) उतानैकान्तपक्ष—पा० ४ पु०। (२) अथात्मन उपपत्ति—पा० ४ पु०।
(३) कारणवत्त्वनियमात्—पा० ४ पु०। (४) वर्षाकाल—पा० १ पु०।

एवं च सति दृष्टान्तेन न किञ्चित् प्रतिषिध्यते पञ्चात्मकविकाराणामिति। न पञ्चात्मककारणानि[१] पञ्चानीति अपि तु पञ्चानां भूतानामनुग्रहे सति भवन्तीति पञ्चात्मकानीत्युच्यन्ते । वस्तुतस्तु न पञ्चात्मकं किञ्चिदस्तीत्युपरिष्टाद्वक्ष्यामः ॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २२ ॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् । जातमात्रस्य वत्सस्य प्रवृत्त्या स्तन्याभिलाषो गम्यते तत्र प्रवृत्त्युन्नेयः[२] स्तन्याभिलाषस्तेन स्मृतिस्तया संस्कारस्तेनानुभवस्तेन पूर्वशरीरमिति पूर्ववत् प्रयोगः। किमर्थं पुनरिदं सूत्रमारभ्यते यदायमर्थः पूर्वाभ्यस्तसूत्रे ऽवगतः। सामान्यतोऽधिगतस्य[३] विशेषज्ञापनार्थं सूत्रमित्यदोषः प्रवृत्तिमात्रस्यानैकान्तिकत्वज्ञापनार्थम् अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणमिति सूत्रम् ॥

अयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणम् ॥ २३ ॥

न विकल्पानुपपत्तेः। किमिदमयसोऽयस्कान्ताभिगमनं[४] सनिमित्तमाहो निर्निमित्तमिति । यदि सनिमित्तं तत्केन गम्यते नियमेन अयांस्ययस्कान्तमेवोपसर्पन्ति न तु लोष्टादीन् न च लोष्टादय उपसर्पन्ति सोऽयं कार्यनियमात् कारणनियमो गम्यते। एतेनाकस्मिकत्वं प्रतिषिद्धम्। तदिदमयसामुपसर्पणं किं दृष्टकारण-

---

(१) कारणानि—इति नास्ति ४ पु० । (२) प्रवृत्त्यनुमेयः—पा० ४ पु० ।
(३) सामान्यतो ज्ञातस्य—पा० ४ पु० । (४) अयस्कान्तस्याभिगमनं—पा० ४ पु० ।

प्रत्याख्यानार्थमुपन्यस्तमथवा कारणान्तरोपदर्शनार्थम् अथात्मन्युत्पत्तिनिरोधानुमानमिति[१] पूर्ववत्प्रसङ्गः ॥

नान्यत्र प्रवृत्त्यभावात् ॥ २४ ॥

आकस्मिकत्वप्रतिषेधार्थं च नान्यत्र प्रवृत्त्यभावादिति सूत्रम् ॥

वीतरागजन्मादर्शनात् ॥ २५ ॥

नित्य आत्मा वीतरागजन्मादर्शनात् । न हि कश्चिज्जातमात्रो वीतरागो जायते वीतरागाणां जन्मादर्शनात् सरागो जायत इति गम्यते । जन्म व्याख्यातम् । ततः किं रागस्य पूर्वानुभूतविषया[२]नुचिन्तनं योनिः न च विषयावगमासमर्थेषु इन्द्रियेषु रागः सम्भवति न च स्मृतिमन्तरेण विषयानुचिन्तनम्[३] युक्तम् पूर्वानुभूतविषयप्रार्थना सङ्कल्पः अदृष्टादिति चेत् । अथ मन्यसे न पूर्वशरीरयोगो रागाङ्गम्यते अपि त्वदृष्टाद्राग इति । नाभिप्रायापरिज्ञानात्[४] नैवमभिप्रायः कारणनियमेन रागोऽपि तु पूर्वशरीरसम्बन्धप्रतिपादनं सूत्रार्थः । न चादृष्टाद्राग इति ब्रुवता तत्प्रतिषिध्यत इति किञ्चिदुक्तम् तन्मयत्वाद्राग इति विषयाभ्यासः खल्वयं भावनाहेतुस्तन्मयत्वमुच्यते जातिविशेषाच्च रागविशेष इति । कर्म खल्विदं जातिविशेषस्य निर्वर्तकं तादर्थ्यात्ताच्छब्द्यं लभ्यते वीरणादिवत् ॥

सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः ॥ २६ ॥

---

(१) निरोधार्थमिति—पा० ४ पु० । (२) पूर्वानुभवविषया—पा० ४ पु० ।
(३) रागचिन्तनं—पा० ४ पु० । (४) नाभिप्रायाविज्ञानात्—पा० ४ पु० ।

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिरित्यनैकान्तिकपक्षे सूत्रम्। नोक्तोत्तरत्वात् उक्तोत्तरमेतत्॥

न सङ्कल्पनिमित्तत्वाद्रागादीनाम्॥ २७॥

न सङ्कल्पनिमित्तत्वाद्रागादीनामिति। अत्रापि पूर्ववत् सङ्कल्पस्मृतिसंस्कारपूर्वानुभवपूर्वशरीरवदात्मवत्त्वानि योज्यानीति। एवं चानादिः संसारोऽपवर्गान्तः सिध्यतीति व्यवस्थितमेतदस्त्यात्मा व्यतिरिक्तो नित्यश्चेति॥

आत्मानन्तरं शरीरमवसरप्राप्तं परीक्ष्यते। अथवा अनादिश्चेतनस्य शरीरयोग इति शरीरं परीक्ष्यते। तस्मिन् परीक्ष्यमाणे आत्माधिकारश्च परि[१]समाप्तो भवति। किं पुनरस्य परीक्ष्यं किं घ्राणादिवदेकप्रकृति अथ नानाप्रकृतीति विप्रतिपत्तेः संशयः। श्रूयते खल्वत्र विप्रतिपत्तिस्तत्रेदं तत्त्वम्॥

पार्थिवं गुणान्तरोपलब्धेः॥ २८॥

मानुषं शरीरं पार्थिवमिति। मानुषमिति किमर्थं[२] विशिष्यते लोकान्तरशरीराणि न पार्थिवानीति युक्तं विशेषणं गन्धवत्त्वात् परमाणुवत् गन्धवान् परमाणुरेकात्मको दृष्टः गन्धवच्च शरीरं तस्मादेकात्मकमेकस्वभावमिति। न त्विदमवादिभिरसंपृक्तया पृथिव्यारब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्प्यत इति भूतसंसर्गोऽविप्रतिषिद्धः।

एवं तर्हि पार्थिवाप्यतैजसं तद्गुणोपलब्धेः, निःश्वासोच्छ्वासोप-

---

(१) त्वात्माधिकार एव—पा० ४ पु०। (२) किमिति—पा० ४ पु०।

लब्धेश्चातुर्भौतिकम्, गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकमिति[१] प्रत्युक्तम्[२] ॥

तत्र सन्निहितानां तद्गुणोपलब्धेरिति तदिदमनेकभूतप्रकृति शरीरमरसमगन्धमरूपमस्पर्शं च प्रकृत्यनुविधानात् स्यादिति भाष्यम्। तस्य व्याख्यानं पृथिव्युदकाभ्यामारभ्यमाणमगन्धं कारणगन्धस्यैकस्यानारम्भकत्वात्। पृथिव्यनलाभ्यामारभ्यमाणमगन्धमरसं च कारणगन्धरसयोः केवलयोरनारम्भकत्वात्। पृथिव्यनिलाभ्यामगन्धमरसञ्चारूपं च वायोरगन्धरसरूपत्वात्। पृथिव्याकाशाभ्यामगन्धमरसमरूपमस्पर्शं च आकाशे गन्धाद्यभावात् सर्वत्र समानो न्यायः कारणगुणस्य केवलस्यानारम्भकत्वात्। जलानलाभ्यामगन्धञ्चारसं च जलवायुभ्यामगन्धं चारसञ्चारूपं च जलाकाशाभ्यामगन्धमरसमरूपमस्पर्शं च तेजोनिलाभ्यामगन्धं चारसं चारूपञ्च अनलाकाशाभ्यामगन्धमरसमरूपमस्पर्शं च अनिलाकाशाभ्यामेवमेव भूजलानलैरगन्धमेव भूजलानिलैरेवमेव भूजलाकाशैरेवमेव पृथिव्यनिलानलैरगन्धमरसं च पृथिव्यनलाकाशैरेवमेव पृथिव्यनिलाकाशैरगन्धमरसमरूपं च जलानिलानलैरगन्धमरसं च जलानलाकाशैरेवमेव जलानिलाकाशैरगन्धं चारसं चारूपं च अनलानिलाकाशैरेवमेव पृथिव्युदकतेजोवायुभिरगन्धं पृथिव्युदकज्वलनाकाशैरेवमेव अवनिजलाकाशैरेवमेव पृथिव्यनिलज्वलनाकाशैरगन्धमरूपं च[३] जलानिला-

(१) पार्थिवाप्यतैजसमिति-निःश्वासोच्छ्वासोपलब्धेरिति-गन्धक्लेदपाकेति च वाक्यत्रयं सूत्रत्वेन निर्णीतं वाचस्पतिमिश्रैर्न्यायसूचीनिबन्धे विश्वनाथपञ्चाननेन गौतमसूत्रवृत्तौ च। युक्तं चैतत् अनुपदमेव "इति भाष्य"मिति दर्शनात् ॥

(२) प्रतिषिद्धम्—पा० ४ पु०। (३) रगन्धमरसञ्च—पा० ४ पु०।

नलाकाग्नेरेवमेव पृथिव्युदकतेजोवाय्वाकाग्नेरगन्धं कारणगुणस्यैकस्यानारम्भकत्वादिति वाच्यम्[१] एककारणकत्वे[२] तु सततोत्पत्त्यनुत्पत्तौ नित्यत्वप्रसङ्गस्येत्युक्तम् ॥

श्रुतिप्रामाण्याच्च ॥ २९ ॥

श्रुतिप्रामाण्याच्च । सूर्यं ते चक्षुः स्पृणोमीत्यस्य मन्त्रस्यान्ते पृथिव्यां ते शरीरमिति सेयं स्मृतिः कारणात् कार्योत्पत्तिः । यदुक्तं भवति सूर्यश्चक्षुःकारणं पृथिवी शरीरस्येति अन्त्येष्टिकाले मन्त्रः सूर्यं ते चक्षुर्गच्छतु पृथिवीं शरीरमिति । अस्यापि मन्त्रस्यार्थो यद्यस्मादायातं तत्तस्मिन्नेव प्रलयं गच्छति प्रकृतौ विकारस्य प्रलयाभिधानम् । प्रलयशब्देन च कार्यशून्यं कारणमुच्यते न पुनः कार्यस्य कारणे लयः प्रलयः एवं चासदुत्पद्यते सन्निरुद्धात इत्ययमर्थ उक्तो भवति ॥

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः ॥ ३० ॥

अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्यन्ते । किमाव्यक्तिकान्याहंकारिकाणि आहो भौतिकानीति संशयकारणप्रतिपादनार्थं सूत्रम् ॥

कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात् संशयः । कृष्णसारं भौतिकं तस्मिन्ननुपहते विषयोपलब्धिः कृष्णसारव्यतिरेकेण विप्रकृष्टदेशावस्थितस्य विषयस्योपलब्धिः सेयं व्यतिरेकोपलब्धिरभौतिक-

(१) दिति समानम्—पा० ४ पु० । (२) एककारणगुणत्वे—पा० ४ पु० ।

धर्मः तदेवमुभयधर्मोपलब्धेः संशय इति। कृष्णसारमेव चक्षुः तस्मिन् सति भावाद्रूपग्रहणस्य यस्मादिदं रूपग्रहणं सति कृष्णसारे भवति असति न भवति। यच्च यस्मिन् सति भवत्यसति न भवति तस्य तदिति। यथा कार्यद्रव्यस्य रूपादय इति। न प्रदीपादिभिरनेकान्तात् प्रदीपे सति रूपोपलब्धिर्भवति न च प्रदीपस्य रूपोपलब्धिरित्यनेकान्तः। यस्य कृष्णसारं चक्षुः तस्य सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिप्रसङ्गः। कृष्णसारं न विषयं प्राप्नोति अप्राप्यविग्रेषात् सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिः प्राप्नोति। विषयीभावादिति चेत् अथ मन्यसे सन्निकृष्टोऽस्य विषयो भवति विप्रकृष्टो न विषयः एवं च न तुल्योपलब्धिरिति नोक्तोत्तरत्वात् प्रत्यक्षसूत्र इति। अभौतिकानीत्यपरे॥

महदणुग्रहणात् ॥ ३१ ॥

महदणुग्रहणात्। महदिति महत्तरं महत्तममुच्यते अणिति अणुतरमणुतममिति[१] तदिदमुभयं चक्षुष्युपलभ्यमानं भौतिकत्वं चक्षुषो बाधते भौतिकं हि यावद्भवति तावदेव व्याप्नोति अभौतिकं तु व्यापकत्वात् सर्वसम्बद्धं न भौतिकेषु प्रदीपादिषु दृष्टत्वात् भौतिकाः प्रदीपादयो महदणोः प्रकाशका भवन्तीत्यनेकान्तः प्रदीपाद्यनभ्युपगमे वा महदणुप्रकाशकत्वं चक्षुष एवेत्यसाधारणत्वादहेतुः भौतिकाभौतिकयोर्निवृत्तेः। ननु चाभौतिके ज्ञाने महदणुप्रकाशकत्वं दृष्टं न दृष्टं न हि बुद्धा महदणुनी प्रकाश्येते

(१) महदिति महत्तरमुच्यते अणिति अणुतरमिति—पा० ४ पु०।

अपि तु प्रकाशो बुद्धिर्न प्रकाशनमिति अवधारितस्यार्थस्य हानोपादानोपेक्षा बुद्धीनां साधनं बुद्धिरिति नाभौतिकं महदणुप्रकाशकमस्ति ननु मनो विद्यते सत्यं न पुनस्तद्भौतिकं नाप्यभौतिकमिति । एतेनात्मा व्याख्यातः । न भौतिको नाभौतिक इति यदि मनो नाभौतिकं यदुक्तं भौतिकानीन्द्रियाणि अभौतिकं मन इति तद्व्याहतं नाभौतिकार्थस्याभूतात्मकपर्यायत्वात् अभौतिकं मन इति अभूतात्मकं मन इति यावदुक्तं भवति । मुख्यतस्तु मनो न भौतिकं नाभौतिकमिति नेन्द्रियेऽपि समानत्वात् इन्द्रियमभौतिकमिति यावदुक्तं भवति अभूतात्मकमिति । अभूतात्मकं व्यापकं चेन्द्रियं प्रतिपद्यमान इदं पर्यनुयोज्यः व्यवहितार्थग्रहणं कस्मान्न भवति किं कारणम् व्यापकत्वादिन्द्रियस्य न कुड्यादेरावरणसामर्थ्यमस्तीति वृत्तिः प्रतिषिध्यत इति चेत् अथ मन्यसे सत्यं व्यापकमिन्द्रियं तस्य तु पुरुषार्थहेतुना क्षोभ्यमानस्य महाह्रदादुदुदा इव निःसरन्त्यस्ताः कुड्यादिभिः प्रतिषिध्यन्त[१] इति न वृत्तिव्यतिरेकेणेन्द्रियसत्त्वे[२] प्रमाणाभावात् येयं विषयग्रहणात्मिका वृत्तिः तां त्यक्त्वा तद्व्यतिरिक्तमिन्द्रियमिति किं प्रमाणम् न चाप्रामाणिकोऽर्थः शक्यः प्रतिपत्तुम् न च प्रतिषिध्यमानाप्रतिषिध्यमानयो[३]रेकत्वम् एकत्वे वाऽनर्थक्यं वृत्तिः प्रतिषिध्यते निश्चरतीति च । अव्यतिरेकाच्च तदुत्पत्तिविनाशधर्मकम् यदि वृत्त्यव्यतिरेकीन्द्रियं यथा वृत्तेरुत्पादविनाशावेवमिन्द्रियस्यापि प्राप्नुतः । वृत्तेर्व्यक्तिनेत्पत्तिरिति चेत्

(१) प्रतिबद्ध्यन्त—पा० ४ पु० । (२) व्यतिरेकेनेन्द्रियसत्त्वे—पा० ४ पु० ।
(३) प्रतिबद्ध्यमानाप्रतिबद्ध्यमानयोः—पा० १ पु० ।

अथ मन्यसे न मया वृत्तेरुत्पत्तिरभ्युपगम्यते ऽपि तु व्यक्तिः स निरोधो विनाशोऽपि तु तिरोभाव इति नोत्पत्तिविशेषत्वात् व्यक्तिरुत्पत्तेर्विशेषः। कथमिति नानुपजातविशेषस्य व्यक्तिरिति। अथानुपजातविशेषं व्यजत इति मन्यसे नित्यं व्यक्तिः स्यात्। एतेन विनाशो व्याख्यातः। तिरोभाव इति विद्यमानं न किञ्चिन्निरुद्धं न चानिवृत्तविशेषस्यागृहणं भवति। न च सर्वनित्यवादिना गृहणागृहणे युक्ते विशेषस्यानुपजननान्न गृहणं विशेषस्यानुपचयान्नागृहणमिति। नित्यं व्यापकञ्चेन्द्रियमभ्युपगच्छतः कारणार्थो हीयते। कारणं नाम यस्यानन्तरं यद्भवति कारणञ्च नित्यं कार्यञ्च नित्यमिति किं कस्यानन्तरं कार्यकारणभावश्च कथं तयोर्नित्यत्वात्। कारकशब्दार्थश्च वाच्यः[१]। ननु करोतीति कारकम् सत्यं करोतीति कारकम्[२] न पुनर्नित्यवादिनः किञ्चित्कर्तव्यमस्ति न चासति कर्तव्ये कारकार्थं पश्यामः। व्यक्तौ कारकार्थ इति चेत् व्यक्तौ च तुल्यं व्यक्तिरपि व्यङ्ग्यवन्नित्येति व्यक्तावपि न कारकार्थोऽस्ति[३] युगपदनेकविज्ञानप्रसङ्गाच्च यदि च वृत्तिर्वृत्तिमतो नान्या भवति वृत्तिमतोऽवस्थानाद्वृत्तीनामवस्थानमिति युगपदनेकविज्ञानप्रसङ्गः वृत्त्यनेकत्वे चैकमिन्द्रियमनेकं प्राप्नोति वृत्तिभ्योऽनन्यत्वात्। अथ माभूदिन्द्रियभेद इति वृत्तीनां तर्ह्येकत्वं प्राप्नोति वृत्तिवृत्तिमतोरनन्यत्वात्। अथ माभूदयं दोष इत्युभयं नेष्यते भेदस्तर्हि वृत्तिवृत्तिमतोरिति न चान्या गतिरस्ति तस्मादयुक्तम् व्यापकमिन्द्रियं नित्यं

(१) वाच्यः—पा० ४ पु०। (२) साधकम्—पा० ४ पु०।
(३) कारकाकोऽस्ति—पा० १ पु०।

चेति। महदणुग्रहणस्य चान्यथासिद्धेरहेतुः योऽयं हेतुर्महदणुग्रहणा(१)दभौतिकानीन्द्रियाणीत्ययमन्यथासिद्धः न महदणुग्रहणमात्राद्भौतिकत्वं व्यापकत्वमिन्द्रियाणां ग्रक्ष्यं प्रतिपत्तुं कस्मात् इदं यस्माद्रश्म्यर्थसन्निकर्षविशेषान्महदणोर्ग्रहणम्॥

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्॥ ३२॥

चक्षुरश्मेरर्थस्य च सन्निकर्षविशेषान्महदणोर्ग्रहणं भवति। तच्च सन्निकर्षमात्रात् सामान्यग्रहणं सन्निकर्षविशेषाद्विशेषग्रहणम्। कः पुनः सन्निकर्षस्य विशेषः भूयोऽवयवसन्निकर्षानुग्रहः यस्मादयं सन्निकर्षो विशेषप्रतिपत्तिहेतुर्भूयोऽवयवसंयोगैरनुगृह्यते सोऽयमवयवान्तरसंयोगापेक्षोऽवयवीन्द्रियसन्निकर्षः सन्निकर्षविशेष इत्युच्यते स च रश्म्यर्थसन्निकर्षविशेषोऽणुमहतोस्तुल्यो भवतीत्यन्यथा महदणोर्ग्रहणं सिद्धति। रश्म्यर्थसन्निकर्षस्यावरणलिङ्गः कुड्यादिव्यवहितानामप्रकाशरूपत्वात् अप्राप्यकारित्वे तु न कुड्यादेरावरणसामर्थ्यमस्तीत्यस्ति चाक्षुषो रश्मिः यथा प्रदीपरश्मिरिति आवरणानुमेयत्वे सतीदमाह॥

तदनुपलब्धेरहेतुः॥ ३३॥

तदनुपलब्धेरहेतुः। न चाक्षुषो रश्मिर्विद्यत इति सूत्रार्थः। कथमिति। उपलब्धिलक्षणप्राप्तत्वादनुमानानुपपत्तिः यत् खल्वपलब्धिलक्षणप्राप्तं नोपलभ्यते तन्नास्ति यथा घटादि घटादेर्महदनेकद्रव्यवत्त्वरूपवत्त्वानि सन्तीत्युपलभ्यन्ते घटादयः तथा महदनेकद्रव्यवत्त्वरूपवांश्चाक्षुषो रश्मिः कस्मात् प्रत्यक्षतो(२) नोपलभ्यत इति महत्त्वं तावत्

(१) महदणोर्ग्रहणा—पा० ४ पु०। (२) प्रत्यक्षतया—पा० ४ पु०।

कारणमहत्त्ववद्बहुत्वप्रचयेभ्यः अनेकद्रव्यवत्त्वमपि कारणवद्बहुत्वादेव रूपस्पर्शवद्धि तेज इति नारूपं तत्। एवमन्येषोपलब्धिकारणसन्निधाने सति यन्नोपलभ्यते[१] तेन गम्यते नास्तीति॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः॥३४॥

नानुमीयमानस्य प्रत्यक्षतोनुपलब्धिरभावहेतुः। यत् प्रत्यक्षतो नोपलभ्यते तदनुमानेनोपलभ्यमानं नास्तीत्ययुक्तम्[२] यथा चन्द्रमसः परभागः पृथिव्याश्चाधोभागः प्रत्यक्षलक्षणप्राप्तावपि न प्रत्यक्षत उपलभ्यते अनुमानेन चोपलभ्येनतौ न स्तः किं पुनरनुमानम् अर्वाग्भागवदुभयप्रतिपत्तिः तथा चाक्षुषस्य रश्मेः कुड्याद्यावरणमनुमानं सम्भवतीति। अपरे तु महदनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धिरित्युपलब्धौ नियमं वर्णयन्ति। नोपलभ्यमान इति किमुक्तं भवति न युक्तो[३] यत्र यत्र महदनेकद्रव्यवत्त्वरूपाणि सन्ति तत्तदुपलभ्यत इति अपि तु यद्यदुपलभ्यते तत्र तत्र महदनेकद्रव्यवत्त्वरूपाणि सन्तीति। एवं तर्हि इदं सूत्रं नोपलब्धेः कारणप्रतिपादकम् सत्त्वभावादिति। सत्सु महदनेकद्रव्यरूपेषु उपलब्धिर्न भवतीति नैतान्युपलब्धिकारणमिति॥

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः॥३५॥

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियम इति। अन्येषं भाष्ये। कस्मात् तर्हि चाक्षुषो रश्मिर्नोपलभ्यत इति उपलब्धिकारणाभावादिति।

---

(१) येन नोपलभ्यते—पा० ४ पु०। (२) न नास्तीत्यत उक्तम्—पा० ४ पु०।
(३) न धूमो—पा० पु०।

नेतावदेवो[१]पलब्धिकारणं यन्महदनेकद्रव्यरूपाणि अपि तु रूपग्रहणाद्रूपविशेषोऽभिधीयते न रूपमात्रं एवं च सूत्रम् ॥

अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥३६॥

अनेकद्रव्यद्रव्येण समवायाद्रूपविशेषाच्च रूपोपलब्धिरिति । अत्र रूपविशेषग्रहणेन रूपधर्म उद्भवसमाख्योऽभिधीयते न रूपत्वं रूपान्तराद्रूपं विभिनष्टि अपि तूद्भवो विशेषकत्वाद्विशेष इत्युच्यते यथा ब्राह्मणविशेष इति न ब्राह्मणत्वं ब्राह्मणविशेषः एवं समानजातीयविशेषकत्वं यत् तद्विशेष इत्युच्यते उद्भवश्च कार्यगम्यः यस्याभावाद्विषक्तावयवमाप्यं द्रव्यं हेमन्ते न गृह्यते तेजसश्च यौष्ये[२] यस्य भावात् प्रदीपरश्मिरूपलभ्यते आदित्यरश्मिश्च स उद्भवो नाम विशेषः स तस्मिन्नायने रश्मौ रूपविशेषो नास्तीत्यतश्चाक्षुषो रश्मिर्नोपलभ्यते दृष्टश्च तेजसो धर्मभेदः । चतुर्विधश्च तेजो भवति उद्भूतरूपस्पर्शं यथादित्यरश्मिः । उद्भूतरूपमनुद्भूतस्पर्शं यथा प्रदीपरश्मिः । उभयं च प्रत्यक्षम् रूपस्योद्भूतत्वात् । उद्भूतस्पर्शमनुद्भूतरूपं यथा वारिस्थितं तेजः । अनुद्भूतरूपस्पर्शं यथा नायनं तेजः[३] । उभयं चाप्रत्यक्षम् रूपस्यानुद्भूतेः ॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३७ ॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः । शेषं भाष्ये । रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रकृत्यर्था यदि नायनो रश्मिरुद्भूतस्पर्शो

---

(१) नैतदेवो—पा० ४ पु० । (२) उष्मा इत्यधिकं ४ पु० ।

(३) रूपस्पर्शो यथा नायनो रश्मिः—पा० ४ पु० ।

भवेत् तेन दृश्यविशेषे ऽनेकरश्मिसन्निधाने सति द्रव्यं दह्येत अनेकरश्मिसन्निपाते च सति[१] व्यवहितत्वाद्द्रव्यस्यानुपलब्ध्या भवितव्यम्। अथ मन्यसे यथादित्यरश्मिसम्बद्धेर्थे नायनो रश्मिर्न व्यवधीयते एवं रश्म्यन्तरसन्निपाते ऽपीति। तन्न व्यतिभिद्यार्थयाहकत्वात्[२] व्यतिभिद्यादित्यरश्मिं तत्सम्बद्धेन द्रव्येण सम्बद्ध्यते उद्भूतरूपस्पर्शवत्त्वे च चक्षुषो यस्य पूर्वं सन्निपतितं चक्षुस्तदितरेण व्यवहितमपि[३] नार्थं गृह्णीयात्। अथानेकरश्मिसन्निपाते सति समानजातीयद्रव्येभ्यो द्रव्यान्तरं रश्मिरुत्पद्यत इति। एवं सति समयासमयचक्षुषोस्तुल्योपलम्भः प्राप्नोति। न चैतदिष्टमनुपलब्धेरिति व्यवहारप्रकृत्यर्थं च नायनस्य रश्मेरनुद्भूतरूपस्पर्शवत्त्वमिति। सर्वद्रव्याणां विश्वरूपो व्यूहः पुरुषार्थकारित इति। कर्म च धर्माधर्मरूपं चेतनस्योपभोगार्थमिति॥

अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः ॥३८॥ [४]

अव्यभिचारी तु प्रतीघातो भौतिकधर्मः। भौतिकं चक्षुः कुड्यादिभिः प्रतीघातदर्शनात् घटादिवदिति। अप्रतीघातादभौतिकमिति चेत् अथ मन्यसे यदि प्रतीघाताद्भौतिकमप्रतीघाताद्भौतिकम् दृष्टस्याप्रतीघातः काचाभ्रपटस्फटिकान्तरितोपलब्धेः नानेकान्तात् प्रदीपरश्मिवत् भौतिकस्याप्रतीघातः यथा प्रदीपरश्मेरिति। स्थाल्यादिषु च पाचकस्य तेजसोऽप्रतीघातादिति उपपद्यते चानुपलब्धिः कारणभेदात्॥

---

(१) सन्निधाने सति—पा० ४ पु०। (२) ग्राह्यत्वात्—पा० १ पु०।
(३) व्यवहितमिति—पा० ४ पु०। (४) इदं सूत्रं न विश्वनाथपञ्चाननसम्मतम् नापि न्यायसूचीनिबन्धे दृश्यते।

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥३९॥

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः। यथोपलब्धिलक्षणप्राप्तस्य मध्यन्दिनोल्काप्रकाशस्य निमित्तादग्रहणमभिभवात् तथोपलब्धिलक्षणप्राप्तस्य चाक्षुषस्य रश्मेरग्रहणं निमित्ताद्रूपस्यानुद्भूतेरिति। मध्यन्दिनोल्काप्रकाशो नोपलभ्यते इति आदित्यप्रकाशात्। आदित्यप्रकाशाभिभवादित्ययुक्तम् सर्वरश्मिवत्त्वप्रसङ्गात्। एवं सति सर्वं लोष्टादिरश्मिवत् प्राप्नोति। अथ लोष्टादिरश्मयः कस्माल्लोपलभ्यन्ते इत्यनुक्तो ब्रूयादादित्यरश्म्यभिभवादित्ययुक्तं तदेतदुत्तरद्वारकं सूत्रम् ॥

न रात्रावप्यनुपलब्धेः ॥ ४० ॥

न रात्रावप्यनुपलब्धेः। यदि लोष्टादिरश्मयः स्युर्दिवादित्यप्रकाशाभिभवाच्च नोपलभ्यन्त इति रात्रौ तर्ह्युपलभ्येरन्। रात्रावपि नोपलभ्यन्ते व्यञ्जकाभावादिति चेत् न हि यद्यस्याभिभावकं तत् तस्याभिव्यञ्जकमिति। कथं न प्राप्नोति लोष्टादिरश्मीनामुपलम्भः अनुमानतश्च नोपलभ्यते लोष्टरश्मिरित्यपिशब्दात् गम्यते। तदेवं सर्वप्रमाणनिवृत्तेर्न विद्यते लोष्टरश्मिः न पुनरेवं चाक्षुषो रश्मिर्निरनुमानः कुड्यादेरावरणस्य सामर्थ्यादिति तस्य विद्यमानस्य बाह्यप्रकाशानुग्रहादिषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४१ ॥

दृष्टान्तस्यान एवैतत् सूत्रम् किमुक्तं भवति यत् खलु बाह्यप्रकाश-

मपेक्षते[१] तस्यानुपलब्धीरूपानभिव्यक्तिर इत्यनुद्भूतेर्यथाविषक्तावयवस्याप्यच द्रव्यस्य रूपानुद्भूतेरग्रहणम् तथा चाक्षुषो रश्मिर्बाह्यप्रकाशानुग्रहमपेक्षते तस्मादस्यापि रूपस्यानुद्भूतेरग्रहणमिति। कस्मात् पुनर्नायनस्य रश्मेरनुपलब्धेरभिभवो न कारणमुच्यत इति नोच्यते॥

अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥

अभिव्यक्तौ चाभिभवात्। यदुद्भूतरूपं बाह्यप्रकाशानुग्रहणं च नापेक्षते तदभिभूयते यथा मध्यन्दिनोल्काप्रकाशः अनुद्भूतरूपस्य नायनो रश्मिर्बाह्यप्रकाशानुग्रहणं चापेक्षते यदनुद्भूतरूपं तन्नाभिभूयते यथा तदेव विषक्तावयवमाप्यं द्रव्यम्। यच्च बाह्यप्रकाशानुग्रहापेक्षं उद्भूतरूपमपि तन्नाभिभूयते यथा घटादिद्रव्यमिति सोऽयमुभयविषयोऽभिभवो नायनरश्मावनुपपन्न इति विप्रतिपत्तिविषयः। कृष्णसारं रश्मिमत् द्रव्यत्वे सति रूपोपलब्धौ नियतस्य साधनाङ्गस्य निमित्तत्वात् प्रदीपवदिति। अथवा रश्मिमच्चक्षुः द्रव्यत्वे सति नियतत्वे च सति स्फटिकादिव्यवहितार्थप्रकाशकत्वात् प्रदीपवत्॥

नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥

नक्तञ्चरनयनरश्मिदर्शनाच्चेति दृष्टान्तसूचम्। मानुषं चक्षू रश्मिमत् अप्राप्तिस्वभावत्वे सति रूपाद्युपलब्धिनिमित्तत्वात् नक्तञ्चरचक्षुर्वदिति। जातिभेदादिन्द्रियप्रभेद इति चेत् अथ मन्यसे यथा विडालत्वं जातिर्दृष्टदंशे वर्त्तते न मनुष्ये एवं रश्मिमद्विडालस्येव चक्षुर्भविष्यति

(१) प्रकाशानुग्रहमपेक्षते—पा० ४ पु०।

न मानुषस्येति नावरणसामर्थ्यात् सत्येतस्मिन् जातिभेदे यथा तृण-दंशप्रभृतीनां कुड्यादिभिरप्रतिघातेन ग्रहणं भवति तथा मनुष्याणामपीति समानमेवेति दृतस्य[१] भौतिकानीन्द्रियाणि प्रतिघातित्वात् घटवदितिवत्[२] भूतं श्रोत्रं द्रव्यत्वे सति बाह्यप्राप्तार्थप्रकाशकत्वात् घ्राणादिवदिति रश्म्यर्थसन्निकर्षग्रहणात्तद्ग्रहणमयुक्तमन्यथापि ग्रहणात् ॥

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः॥ ४४ ॥

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः । तृणादिसर्वद्रव्यं काचेऽभ्रपटले वा प्रतिहन्यते । यदि चाक्षुषो रश्मिः प्राप्तार्थप्रकाशकः स्यात् काचाभ्रपटलैकान्तरिते प्रकाशको न स्यात् । अस्ति तु तस्मान्न प्राप्यकारि चक्षुरिति । अत एवाभौतिकं प्राप्यकारित्वं भौतिकधर्म इति न कुड्यान्तरितानुपलब्धेरप्रतिषेध इति ॥

कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥

अप्राप्यकारित्वे इन्द्रियस्य न कुड्याद्यावरणसामर्थ्यमस्तीत्युक्तम् । शेषं भाष्ये ॥

अप्रतिघातात् सन्निकर्षोपपत्तिः ॥ ४६ ॥

अप्रतिघातात् सन्निकर्षोपपत्तिः[३] । न काचोऽभ्रपटलं वा रश्मिं प्रतिबध्नाति सोऽप्रतिहन्यमानो व्यतिभिद्यार्थेन सम्बध्यते ।

---

(१) अतस्य—पा० ४ पु० । (२) घटादिवदिति—पा० ४ पु० ।

(३) सन्निकर्षोपलब्धिः—पा० ४ पु० ।

यच्च मन्येत न भौतिकस्यास्यप्रतीघात इति सर्वं हि भौतिकं प्रतीघातधर्मकमिति तन्न ॥

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ॥ ४७ ॥

आदित्यरश्मेः स्फटिकान्तरितेऽपि(१) दाह्येऽविघातात् । न आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघाताद्दाह्येऽप्यविघातात् । अविघातादिति(२) पदाभिसम्बन्धाद्वाक्यभेदः । नैकं वाक्यमनेकार्थं प्रतिवाक्यं चार्थभेद इति । श्रेयं भाष्ये ॥

कोऽयमविघातः अव्युह्यमानावयवद्रव्यानुप्रवेशः । यस्य द्रव्यस्यावयवा न व्युह्यन्ते तस्यान्तरावयवैरव्युह्यमानस्य योऽभिसम्बन्धः सोऽविघात इति । अन्तर्व्यवस्थितस्य वा द्रव्यस्य वाव्युह्यमानावयवद्रव्यस्य बहिरवस्थितद्रव्यप्राप्तिः दृष्टं कलशे निषक्तानामपां बहिःशीतस्पर्शग्रहणम् न हि गुणस्यास्वतन्त्रस्य(३) गुणिनमन्तरेण बहिर्निर्गमनं(४) युक्तमिति । तच्च परिस्यन्दः तिर्यग्गमनं परिस्रवः पात इति ॥

नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥

नेतरेतरधर्मप्रसङ्गात् । इतरधर्म इतरच्च प्रयुज्यते(५) इतरधर्मश्चेतरच्च यद्यविघातः चक्षूरश्मेः स्फटिकादिभिः कुड्यादिभिरपि

---

(१) स्फटिकान्तरेऽपि—पा० ४ पु० । (२) अप्रतिघातादिति—पा० ४ पु० ।
(३) गुणस्य द्रव्यतन्त्रस्य—पा० ४ पु० । (४) बहिर्गमनं—पा० ४ पु० ।
(५) प्रसज्यते—पा० ४ पु० ।

प्राप्नोति कुड्यादिभिर्वा प्रतीघातः स्फटिकादिभिरपि प्राप्नोति नैष दोषः ॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः ॥ ४९ ॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः । आदर्शोदकयोः प्रसादो रूपविशेषः स च स्वो भवति नियमात् । कः पुनरयं रूपविशेषः द्रव्यान्तरासंयुक्तद्रव्यसमवायः तस्य वा रूपोपलम्भनसामर्थ्यं स्वो धर्मः स च स्वभावतः तस्य या विद्यमानता उदकादिषु तत्स्वाभाव्यं प्रसादस्वभावत्वाद् आदर्शोदकादिषु नयनरश्मिः प्रतिहन्यते स च प्रतिहतः प्रतिनिवृत्तौ स्वमुखादिना सम्बध्यते तस्य चायसम्बन्धाद्यदभिमुखमयं तदभिमुखं मुखादि पश्यतीति यथायतोऽवस्थितस्य पुरुषस्येति आदर्शमुखग्रहणमनुक्रमेण तदप्याशुभावान्न विभाव्यते आदर्शरूपानुग्रहणात् तदनुरञ्जितः प्रत्ययः । शेषं भाष्ये ॥

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः । प्रमाणस्य तत्त्वविषयत्वाद् दृष्टानुमिताः खल्विमे द्रव्यधर्मा यथाभूता भवन्ति तथाभूता एव प्रमाणेन प्रतिपाद्यन्ते इमौ च भवता नियोगप्रतिषेधौ देशितौ क्व विषये स्याताम् न चेतद्युक्तम् न हि यथा धूमेनाग्निप्रतिपत्तिस्तथोदकप्रतिपत्तिरपि भवतीति । न चोदकप्रतिपत्तिर्धूमेन

भवतीत्यग्निप्रतिपत्तिरपि न युक्ता अर्थान्नियुञ्जानो भवानुपेक्षणीयः प्रतिघाताप्रतिघातयोः खलूपलब्ध्यनुपलब्धी व्यवस्थापिके व्यवहितोपलब्ध्यानुनीयते स्फटिकादिभिरप्रतीघातः व्यवहितानुपलब्ध्या च कुड्यादिभिः प्रतीघात इति । यदि प्राप्यकारि चक्षुर्भवति अथ कस्माद्भ्रूनग्नलाकादि नोपलभ्यते नेन्द्रियेणासम्बन्धात्[१] इन्द्रियेण सम्बद्धा अर्था उपलभ्यन्ते न चाभ्रूनग्नलाकादीन्द्रियेण सम्बद्धम् अधिष्ठानस्थानिन्द्रियत्वात् रश्मिरिन्द्रियं नाधिष्ठानं न रश्मि नाभ्रूनग्नलाका सम्बद्धेति ॥

एवं तावद् भौतिकानीन्द्रियाणीति समर्थितम् किं पुनरेकमिन्द्रियमाहोऽनेकमिति । एके तु ॥

स्थानान्यत्वे नानात्वाद्वयवविनानास्थानत्वाच्च संशयः ॥ ५१ ॥

स्थानान्यत्वे नानात्वाद्वयवविनानास्थानत्वाच्च संशयः । एके तु स्थानान्यत्वे नानात्वं दृष्टं यथा बहूनां घटानामिति । एकस्य च नानास्थानत्वं यथावयविन इति । अनुपपन्नरूपस्थायं संशयः । कथमिति यदि तावदेवं क्रियते स्थानान्यत्वे नानात्वैकत्वदर्शनादिति तदेकत्वे स्थानान्यत्वस्य[२] दर्शनान्न समानधर्मः । अथ नानास्थानत्वे सत्येकानेकत्वदर्शनात् संशय इति । तदा द्रव्यं नानास्थानमनेकं न किञ्चिद्दृष्टमिति न समानधर्मत्वम् यद् घटाद्यनेकं तच्च नाना-

---

(१) नेन्द्रियाणामसम्बन्धात्—पा० ४ पु० । (२) स्थानानानात्वस्य—पा० ४ पु० ।

स्थानम् अपि तु स्थानान्यत्वं[१] तस्य सोऽयं संशय उभयथानुपपन्न इन्द्रियेषु स्थानेषु तु युक्तः किं नानास्थानानि उत नानास्थानम् इन्द्रियेषु तु न स्थाननानात्वात् सम्भवति न च नानास्थानत्वादिति शरीरव्यतिरेकित्वात् सत्वाच्च संशयः । शरीरव्यतिरिक्तमुभयथा दृष्टमेकमनेकं च यथाकाशं घटादि च । सच्चोभयथा दृष्टमेकमनेकं च तदेवमुभयथेन्द्रियेषु[२] शरीरव्यतिरेकः सत्त्वं च तेन सन्दिह्यत एकमिन्द्रियं किं पुनस्तत् ॥

त्वगव्यतिरेकात् ॥ ५२ ॥

त्वगव्यतिरेकात् । कः पुनरयमव्यतिरेकः सर्वाधिष्ठानसम्बन्धः । नहि न किञ्चिदिन्द्रियं न त्वचा प्राप्तं सति भावो वा न ह्यसत्यां त्वचि किञ्चिदर्थग्रहणं भवति[३] तस्मात् त्वगेकमिन्द्रियम् । नेन्द्रियान्तरार्थानुपलब्धेरिति लोकविरोधः एकमिन्द्रियमिति ब्रुवाणो लोकं विरुणद्धि विद्यमाने त्वगिन्द्रिये सर्वोपलब्धिप्रसङ्गः इन्द्रियान्तरार्था रूपादयोऽन्धादिभिरुपलभ्येरन् न त्वुपलभ्यन्ते तस्मान्नैकमिन्द्रियमिति । यदप्यव्यतिरेकादिति तदपि नानेकान्तात् अनेकेनापि इन्द्रियेण सर्वाण्येन्द्रियाधिष्ठानानि पृथिव्यादिना प्राप्तानीत्यनेकान्तः । अवयवोपघातादिति चेत् अथ भवेदेतत् त्वगवयवः कश्चिदुपहतो भवति तदुपघातादन्धादिभिर्नोपलभ्यन्ते[४] रूपादय इति । यथा त्वगवयवविशेषेणैव धूमोपलब्धिः यश्चक्षुषि त्वगवयवविशेषस्त-

---

(१) स्थाननानात्वं—पा० ४ पु० । (२) उभयमिन्द्रियेषु—पा० ४ पु० ।
(३) किञ्चिदिन्द्रियग्रहणं सम्भवतीति—पा० ४ पु० । (४) नोपपद्यन्ते—पा० ४ पु० ।

दुपघाताद्धूमस्यर्गानुपलब्धिरिति[१]। न व्याघातात्। त्वगवयवविशेषेण धूमोपलब्धिवद्रूपाद्युपलब्धिरिति ब्रुवता यदुक्तमेकमिन्द्रियमिति तद्व्याहतं भवति प्रागेकमिन्द्रियं त्वगित्युपगम्येदानीं त्वगवयवविशेषा रूपादिग्राहका इति ब्रुवाणः प्रतिषेध्यमभ्यनुजानाति न ह्यवयव्यनतिरिक्ता अवयवा इति। यांस्यावयवान् रूपादिग्राहकान् त्वचो मन्यन्ते ते किमिन्द्रियात्मका उत नेति किं चातः यदीन्द्रियात्मका नैकमिन्द्रियम् अथेन्द्रियात्मका न भवन्ति न तर्ह्यौन्द्रियग्राह्या रूपादय इति सूत्रेण चाभिसम्बन्धः ॥

न युगपदर्थानुपलब्धेः ॥ ५३ ॥

न युगपदर्थानुपलब्धेः। यस्यैकमिन्द्रियं तस्य युगपदर्थानामुपलब्धिः प्रसज्यते। कथमिति आत्मा मनसा सम्बध्यते मन इन्द्रियेण इन्द्रियं सर्वार्थैः सन्निहितैरिति। आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपदुपलब्धयः प्रादुः स्युरिति। नैकेन्द्रियग्राह्याणां युगपदुपलब्धिप्रसङ्गात् यथैकेन्द्रियवादिनो युगपदनेकार्थसन्निधाने[२] सति युगपदुपलब्धिर्दोषो भवति तथानेकेन्द्रियवादिनोऽपि एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गः। य एवात्र परीहारः स एव ममापि भविष्यतीति। अथायमदुष्टः पक्षः अदेश्यं तर्ह्येतत् युगपदुपलब्धिप्रसङ्ग इति। अत्र केचित् परिहारं वर्णयन्ति बुभुत्साभेदान्न युगपदुपलब्धिरिति ममाप्येवम् यदि बुभुत्साभेदान्न युगपदुपलब्धिर्लभ्यते ममापि न बुभुत्साभेदो दण्डवारित इति। सत्यां च बुभुत्सायाम-

(१) धूमस्यानुपलब्धिरिति—पा० ४ पु०। (२) सम्बन्धे सति—पा० ४ पु०।

युगपदुपलब्धौ न्यायोऽन्यो ऽवधारणीय इति। करणत्वादित्यन्ये अन्ये तु ब्रुवते परिहारं करणत्वादिति। करणस्य किलायं धर्मः अधिष्ठितमप्यनेकां युगपत्क्रियां न शक्नोति कर्तुम् अनधिष्ठितं च न प्रवर्तत इति तुल्यम्। यस्यापेकमिन्द्रियं तस्यापि करणत्वं न निवार्यत[१] इति तस्माद्युगपदर्थानुपलब्धिरित्यदोषोऽयमिति। एवं ब्रुवाण एकेन्द्रियवादी विकल्प्य पर्यनुयोज्यः। यत्तदेकमिन्द्रियं सर्वार्थमिति मन्यसे तत् किं प्राप्यकार्याहो नेति किं चातः। यदि प्राप्यकारि किं तदिति वक्तव्यम् यदि त्वक् त्वचाप्राप्तानां रूपाणामग्रहणप्रसङ्गः। अथाप्राप्तं रूपं गृह्णाति स्पर्शादिष्वप्येवं प्रसङ्गः। अथ सामिकारीन्द्रियं किञ्चित् प्राप्तं गृह्णाति किञ्चिच्चाप्राप्तम् एवं सति करणधर्मातिक्रमः। भवतु करणधर्मातिक्रमः किन्नो बाधत इति। एतस्मिन् पक्षे न युगपदुपलब्धिप्रसङ्गादिति सूत्रम्। यथानेकेन्द्रियवादिन[२] एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गे करणत्वादिति परिहारः सोऽस्य[३] न भवति करणधर्मातिक्रमात् व्याहतं चेतत् करणं प्राप्यकार्यप्राप्यकारि चेति। असाहचर्याच्च न त्वक् साहचर्यं नाम यस्यैकं विषयग्रहणं तस्य द्वितीयमपीत्यन्यावधिराद्यभावप्रसङ्गः॥

विप्रतिषेधाच्च न त्वगेका॥ ५४॥

विप्रतिषेधाच्च न त्वगेका। शेषं भाष्ये। एकोपघाते तद्विनाशे वा सर्वानुपलब्धिप्रसङ्गः। अथैकमिन्द्रियं भवति तद्विघाते विनाशे वा

---

(१) निवर्तत—पा० ४ पु०। (२) यथा नानेन्द्रियवादिन—पा० ४ पु०।
(३) सोऽव—पा० ४ पु०।

सर्वानुपलब्धिप्रसङ्गः आवरणानुपपत्तेः। यदि त्वगेकमिन्द्रियं भवति नावरणस्य सामर्थ्यमस्तीति विप्रकृष्टावस्थितोपलब्धिप्रसङ्गः। दूरान्तिकार्थानुविधानं चोपलब्ध्यनुपलब्ध्योर्न स्यात् अप्राप्यकारित्वे त्वगिन्द्रियस्यान्तिके ग्रहणं दूरे चाग्रहणमित्येतन्न स्यात्। प्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते प्रतिषेधान्नानात्वं सिध्यतीति। तन्न बुद्धामहे प्रतिषेधादेकत्वसाधनं न स्यात् नानात्वं कथं सिध्यतीतिनासाधना क्रियेति एकत्वं च प्रतिषेद्धुं कथं शक्यते प्रतिषेधात् एकत्वसाधनमनुमानं निवर्तते न पुनरेकत्वमनेकत्वं वा निवर्तत इति। कथं तर्हि अयं ग्रन्थो ग्राह्यः प्रतिषेधाच्चानन्तरं नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते इन्द्रियार्थपञ्चत्वात्। अथवा प्रतिषेधाच्च नानात्वसिद्धाविति प्रतिषेधहेतुना एकत्वप्रतिषेधे कृते ऽर्थान्नानात्वं सिध्यतीत्ययमर्थः। कतमः पुनरसौ प्रतिषेधहेतुः युगपदर्थोपलब्धिप्रसङ्गादित्ययम् अनेनैकत्वं प्रतिषिद्धम् तदेवमवीतसिद्धौ वीतदर्शनार्थमिदमुच्यते॥

इन्द्रियार्थपञ्चत्वात् ॥ ५५ ॥

इन्द्रियार्थपञ्चत्वादिति सूत्रम्। अर्थः प्रयोजनमित्येवमादि भाष्ये। इदं च सूत्रं न कथञ्चन न्यायेन सम्बध्यते। कथमिति विधीयमानोऽर्थः साध्यः पञ्चेन्द्रियाणीति इन्द्रियार्थपञ्चत्वादित्यसम्बद्धम्(१) अथ प्रयोजनपञ्चत्वं(२) तदप्येवमेव। अथ ग्रहणानि पञ्चीक्रियन्ते तत्रापैकान्तिको हेतुर्नास्तीति। एतेन विषया व्याख्याताः।

(१) इत्यसिद्धम्—पा० ४ पु०। (२) परत्वम्—पा० ४ पु०।

इदं तु सूत्रमेवं स्यात् रूपरसगन्धस्पर्शशब्देषु नानासाधनक्रियः कर्ता एकविषयावसितौ विषयान्तरसिद्धौ करणान्तरापेक्षित्वात् यस्य कर्तुरनेको विषयः तस्यान्यतमविषयावसाये विषयान्तरसिद्धौ करणान्तरापेक्षित्वं[१] दृष्टम् यथानेकशिल्पपर्यवदातस्य पुरुषस्य क्रियावसायात् क्रियायां करणान्तरापेक्षित्वम् । तथा च रूपाद्यन्यतमविषयावसाये विषयान्तरसिद्धौ[२] साधनान्तरापेक्षित्वमस्ति तस्माद्रूपरसगन्धस्पर्शशब्देषु नानासाधनक्रियः कर्ता ॥

न तदर्थबहुत्वात् ॥ ५६ ॥

न तदर्थबहुत्वात् । अस्य यथाश्रुत्युत्थानमस्य चार्थ इन्द्रियपञ्चत्वविरोधः । न विरोधात् अर्थबहुत्वादिन्द्रियबहुत्वमिति ब्रुवाणो यदभ्युपगतमेकमिन्द्रियमिति तद्बाधते नासाधनात् न मयार्थबहुत्वादिन्द्रियबहुत्वं साध्यते यतो मे विरोधः स्याद् अपि तु भवतेन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति यत्साधनमुक्तं तस्य मया विरोधो दर्श्यते यदीन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि भवन्तीन्द्रियार्थबहुत्वाद् बह्वनीन्द्रियाणि प्रसज्यन्ते इति। अस्योद्धारकं सूत्रम्[३] ॥

गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेधः ॥ ५७ ॥

गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः । गन्धत्वादिभिः सामान्यैः कृतव्यवस्था[४] गन्धादयः न स्वकरणव्यतिरेकेण करणान्तराणि प्रयोजयन्ति यावत्सु गन्धत्वं वर्तते तावतामेकसाधनसाध्यत्वात् यः

---

(१) साधनान्तरापेक्षित्वम्—पा० ४ पु० । (२) सिद्धौ—पा० १ पु० ।
(३) अस्योत्तरद्वारकं सूत्रम्—पा० ४ पु० । (४) कृतकत्वव्यवस्था—पा० ४ पु० ।

पुनरपरो जातिभेद दृष्टानिष्टोपेक्षणीयत्वाद्विर्नामौ करणान्तरं प्रयोजयति एवं सर्वत्र। शेषं भाष्ये। यदि सामान्यं संग्राहकं प्राप्तमिन्द्रियाणां विषयत्वाव्यतिरेकादेकत्वम्[१] ॥

विषयत्वाव्यतिरेकादेकत्वम् ॥ ५८ ॥

अस्यार्थोऽविरोध एव नोक्तोत्तरत्वात् इन्द्रियार्थपञ्चत्वादित्यस्यार्थेनोक्तोत्तरमेतत्। अस्य चार्थस्य ज्ञापनार्थं न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्य इति सूत्रम् ॥

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ ५९ ॥

तत्र बुद्धय एव लक्षणानीत्यस्यार्थो वर्णित इन्द्रियार्थपञ्चत्वादिति। नानेन्द्रियं भिन्नाधिष्ठानत्वात्[२] यस्याधिष्ठानं भिन्नं तदनेकं दृष्टम् यथा घटादिष्वधिष्ठानभेदस्तथेन्द्रियाणामस्ति[३] तस्मान्नानेति। अधिष्ठानभेदोऽसिद्ध इति चेत् न अन्यवधिराद्यभावप्रसङ्गात्। यस्य पुनरधिष्ठानभेदस्तस्य भेदे एकाधिष्ठानविनाशेऽधिष्ठानान्तराश्रयस्यावस्थानमिति[४] न दोषः। गतिभेदादित्यस्य भिन्नगतित्वादिति प्रयोगः प्रसङ्गः पूर्ववत्। आकृतिः परिमाणमियत्ता। स्वस्थानपरिमाणानि घ्राणरसनस्पर्शनानि। चक्षुर्वह्निर्नःसृतं विषयव्यापि तन्महत्। श्रोत्रं त्वाकाशं तदधिष्ठाननियमेन प्रवर्तते धर्माधर्मसंहितया दृष्टानिष्टोपेक्षणीयशब्दसाधनभूतया कर्णशष्कुल्या य

(१) विषयव्यतिरेकित्वादेकत्वं—पा० १ पु०। (२) भिन्नाधिष्ठितत्वात्—पा० ४ पु०।
(३) यथा घटादि, अधिष्ठानभेदस्येन्द्रियाणामस्ति—पा० ४ पु०।
(४) भेदे एकाधिष्ठानविनाशेऽधिष्ठानान्तराश्रयस्येन्द्रियस्यावस्थानमिति—पा० ४ पु०।

आकाशस्य सम्बन्धस्तत्सम्बन्धानुविधाय्याकाशं न विवरान्तरेणा-स्यादिना शब्दमुपलक्षयति[१] नान्यथेति तदुपकारप्रतीकारभेदा-द्वोपक्रियते प्रतिक्रियते चेति न च पुनराकाशं नित्यत्वादुपक्रियते न[२] प्रतिक्रियत इति। प्रकृष्टाप्रकृष्टश्रोत्रभेदोऽप्यत एव। जाति-रिति योनिं प्रचक्षते। पञ्च खल्विमा इन्द्रिययोनयः पृथिव्यादीनि भूतानीन्द्रियाणां योनय इति योनिस्तादात्म्यं न पुनस्तत्कार्यत्व-माकाशे सम्भवति नित्यत्वात्। कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि. नाव्यक्तप्रकृतीनीति नोक्तोत्तरत्वात् नाव्यक्तप्रकृतीनीन्द्रियाणीत्यु-क्तोत्तरमेतत् ॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६० ॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम्। भूतगुणविशेषो गन्धरसरूप-स्पर्शशब्दा विशेषकत्वाद्विशेषा इत्युच्यन्ते। यथा गन्धवत्त्वादिना[३] पृथिव्यवादिभ्यो भिद्यते रसादिभिरबादय इति। दृष्टो हि बाह्या-नामुभयपक्षसम्प्रतिपन्नानां पृथिव्यादिभूतानां स्वगुणाभिव्यक्तिनियमः अस्ति च घ्राणादिभिरपि गन्धाद्यभिव्यक्तिनियमः तेन भूतगुण-विशेषोपलब्धेर्भूतप्रकृतीनीन्द्रियाणीति। किं किमात्मकमिति येन यद्गुणाभिव्यक्तिः। तच्च पार्थिवं घ्राणं गन्धाभिव्यक्तिहेतुत्वात् बाह्य-पार्थिवद्रव्यवदिति। एवं शेषेष्वपि ॥

गन्धाद्यः पृथिव्यादिगुणा इत्युद्दिष्टम् उद्देशश्च नियोगविकल्प-

---

(१) शब्दमुपलभ्यति—पा० ४ पु०। (२) न—नास्ति ४ पु०।

(३) गन्धवत्त्वेन—पा० ४ पु०।

समुच्चयेः समानः तत्र नियोग एकैकगुणत्वं विकल्पः कस्यचिदेकः कस्यचिद्द्वावित्येवमादिः समुच्चयः सर्वः(१) सर्वत्र अतो विशेषणार्थं गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः, अप्तेजोवायूनां पूर्वं-पूर्वमपोह्याकाशस्योत्तरः, नियमार्थं सूत्रे(२) ॥

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥६१॥
अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥ ६२ ॥

चत्वारः पृथिव्यामेकैकशोऽपकर्षं उत्तरेषु स्पर्शपर्यन्तानामिति विभक्तिविपरिणामः तेन किं कृतं भवति स्पर्शपर्यान्तानां विनियुक्तानां य उत्तरः स आकाशस्येति आकाशस्योत्तरः शब्दः। उत्तर इत्ययं तरब्निर्देशो न युक्तः द्वयोर्दृष्टत्वात् इह पुनः प्रकृष्टवाचित्वे सत्युत्तम इति स्यात्। नायं नोस्तरब्निर्देशः अपि तु पराभिधानमेतत् यदुक्तं भवति पर इति तदुक्तं भवत्युत्तर इति। तन्त्वं वा स्पर्शस्य विवक्षितत्वात् भवतु वा तरब्निर्देशः-ननूक्तमुत्तम इति प्राप्नोति न स्पर्शस्य विवक्षितत्वात् गन्धादिभ्यः परः स्पर्शः स्पर्शादयं पर इति यावदुक्तं भवति तावदुक्तं भवत्युत्तर इति न सर्वगुणानुपलब्धेः ॥

न सर्वगुणानुपलब्धेः ॥ ६३ ॥

नायं गुणेषु विनियोगः साधुः कस्मात् पार्थिवेन घ्राणेन पार्थिवानां गन्धादीनामुपलम्भप्रसङ्गात् एवमाप्येन रसनेन त्रयाणां तैजसेन चक्षुषा द्वयोरिति कथं तर्ह्यात्मगुणा विनियोक्तव्याः ॥

---

(१) सर्वे—पा० ४ पु०। (२) नियमार्थं सूत्रद्वयम्।

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥ ६४ ॥

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः यस्मादेकैकगुणानि भूतानि तस्मादेकगुणग्रहणमिति[१] एकैकश्येनेति सौत्रो निर्देशः[२] कथं तर्ह्येनेकगुणानि भूतानि गृह्यन्त इति ।

संसर्गात्त्वनेकगुणग्रहणमिति । संसृष्टाऽबादिभिः पृथिवी तस्मादनेकगुणा[३] गृह्यत इति एवं शेषेषु संसर्ग[४]स्त्वप्रतिषिद्धो मिथः पञ्चानां चेति । नियमस्तर्हि न प्राप्नोति पृथिव्यां चत्वारो नेतरेषु संसर्गस्यानियमादिति । न न प्राप्नोति कस्मात्[५] विष्टं ह्यपरं परेण ॥

विष्टं ह्यपरं परेण ॥ ६५ ॥

विष्टमबादिना परेणापरं नापरेण पृथिव्यादिना परमबादि । विष्टत्वं संयोगविशेषः । न पार्थिवाप्ययोः प्रत्यक्षत्वादिति[६] ।

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६६ ॥

नेति चिसूत्रीमनन्तरोक्तामनेन प्रत्याचष्टे । यस्यैकैकगुणानि भूतानि तस्य तैजसमेव द्रव्यं रूपवत्त्वात् प्रत्यक्षं प्राप्नोति ।

न पार्थिवमाप्यं वा अरूपत्वात् । अस्य सूत्रस्य विकल्पतोऽनेकः सूत्रार्थः कल्प्यत इति भाष्ये वर्णितम् तदेव न्यायविरुद्धं प्रवादं प्रतिषिध्य न सर्वगुणानुपलब्धेरिति देशितं तत्समाधीयते ॥

---

(१) तस्मादेकैकगुणग्रहणमिति—पा० ४ पु० । (२) सूत्रे निर्देशः—पा० ४ पु० ।
(३) त्वनेकगुणानि गृह्यन्ते—पा० १ पु० । (४) संयोगः—पा० ४ पु० ।
(५) कथं यस्मात्—पा० ४ पु० । (६) प्रत्यक्षविरुद्धत्वात्—पा० ४ पु० ।

पूर्वपूर्वगुणोत्कर्षात्[१] तत्तत् प्रधानम् ॥ ६७ ॥

पूर्वपूर्वगुणोत्कर्षात् तत्तत्प्रधानम् तस्माच्च सर्वगुणोपलब्धिः घ्राणादीनामिन्द्रियाणां पूर्वं पूर्वमिन्द्रियं परस्मात् परस्मात् प्रधानम्। का प्रधानता चतुर्गुणत्वादिः को गुणोत्कर्षः स्वगुणाभिव्यक्तिसामर्थ्यम् येन गुणेन यद्द्रव्यमुत्कृष्यते स तज्जातीयाभिव्यञ्जकत्वादुत्कृष्टो भवति यथा बाह्यानां द्रव्याणामिति। अस्ति चेन्द्रियाणामपि स्वगुणाभिव्यक्तिनियमः तस्माच्च सर्वगुणोपलब्धिः[२]। यः पुनर्गन्धगुणत्वाद् घ्राणं गन्धग्राहकमिति प्रतिजानीते तस्य सर्वगुणोपलब्धिप्रसङ्गः कस्मात् पुनर्न सर्वं पार्थिवं घ्राणमिति व्यवस्थानियमज्ञापनार्थम्। तद्व्यवस्थानं तु भूयस्त्वादिति सूत्रम् ॥

तद्व्यवस्थानं तु[३] भूयस्त्वात् ॥ ६८ ॥

किं पुनरिदं भूयस्त्वम् अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितो भूयस्त्वम् दृष्टो हि प्रकर्षे भूयस्त्वशब्दः[४] यथा लोके प्रकृष्टो विषयो भूयानित्युच्यते। यथा च पृथगर्थक्रियासमर्थानि पुरुषसंस्कारोपग्रहात् विषौषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्यन्त इति। स्वगुणान्नोपलभन्त इन्द्रियाणि कस्मादिति चेत् केन कारणेन स्वानि गन्धादीनि इन्द्रियाणि नोपलभन्त इति ॥

सगुणानामिन्द्रियभावात् ॥ ६९ ॥

---

(१) पूर्वपूर्वं गुणोत्कर्षात्—पा० पु०। (२) सर्वगुणोपलब्धिप्रसङ्गः—पा० ४ पु०।
(३) तद्व्यवस्थापनं तु—पा० ४ पु। (४) भूयस्त्वे प्रकर्षशब्दः—पा० पु०।

सगुणानामिन्द्रियभावात् सह गुणेनेन्द्रियं भवति निर्गुणं तु नेन्द्रियमतो न गृह्णाति यदि पुनरिन्द्रियस्य सहकारी च गन्धः स्याद् ग्राह्यश्चेति ॥

तेनैव तस्याग्रहणाच्च ॥ ७० ॥

तेनैव तस्याग्रहणाच्च यदीन्द्रियं स्वगन्धं गृह्णीयात् तेनाविन्द्रियगन्धः नेन्द्रियग्राह्यः स्यात् गन्धश्च गृह्णदिन्द्रियमात्मानं गृह्णीयात् आत्मा ह्यस्य गन्ध इति। न चात्मसाधनं करणमस्तीति दृष्टान्तविरोधः न चैतत् प्रत्यक्षं यद्वद् घ्राणगन्धो घ्राणग्राह्य इति। कस्मात् पुनरिदं न देश्यते घ्राणेन घ्राणं कस्मान्न गृह्यत इति। न देश्यते ऽदृष्टत्वात् न दृष्टं घ्राणेन घ्राणस्य ग्रहणमित्यतो न देश्यत इति तुल्यं घ्राणेन स्वस्य गन्धस्याग्रहणमित्येतदपि नादेश्यनीयम्। स्वगुणान्नोपलभन्त[१] इन्द्रियाणि कस्मादिति तुल्यो ह्युभयत्र हेत्वभावः ॥

न शब्दगुणोपलब्धेः ॥ ७१ ॥

न शब्दगुणोपलब्धेः स्वगुणान्नोपलभन्त इन्द्रियाणीत्येतदयुक्तम्। स्वगुण उपलभ्यते आकाशेन शब्द इति। न पुनः श्रोत्रं सशब्दमिन्द्रियमिति यथेतराणि सगुणानीन्द्रियाणि नैवमाकाशमिति। कस्माच्छब्दस्येतरगुणवैधर्म्यात् आकाशस्येतरद्रव्यवैधर्म्यात् अस्यार्थस्य ज्ञापनार्थं तदुपलब्धिरितरेतरधर्मवैधर्म्यादिति सूत्रम् ॥

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७२ ॥

---

(१) नोपलभन्त—पा० ४ पु०। एवमग्रेऽपि।

न शब्दः शब्दस्य व्यञ्जको नाकाशं सगुणमिन्द्रियमिति। किं पुनरिदंश्रोत्रम् आकाशं परिशेषात्। तच्चात्मा तावन्न श्रोत्रं कर्तृत्वात् श्रोता आत्मा न श्रोत्रम्। मनः श्रोत्रं[१] भविष्यतीत्यपि न मनसः श्रोत्रत्वे वधिराद्यभावः सर्वविषयत्वाच्च मनसः सर्वविषयं च श्रोत्रं प्राप्नोति। पृथिव्याद्यपि न श्रोत्रं घ्राणादिभावेन विनियोगात् घ्राणादिविनियुक्ताः पृथिव्यादयः श्रोत्रभावे च घ्राणादीनां तदैकल्ये शब्दानुपलब्धिप्रसङ्गः। त्वचः श्रोत्रभावे[२] वधिराद्यभावः सर्वोपघाते च प्रायणम्। दिक्कालयोः श्रोत्रभावे च शब्दस्यान्यगुणत्वादग्रहणप्रसङ्गः। तद्गुणत्वमेवेति चेत् नास्ति विवादः यस्य शब्दो गुणस्तदाकाशं भवता सञ्ज्ञामात्रं भिद्यते तौ दिक्कालाविति। आकाशप्रत्याख्यानं वाऽन्यगुणत्वाच्छब्दस्य यदि शब्दो दिक्कालगुणो भवति आकाशं तर्हि प्रत्याख्यातम्। न हि शब्दमन्तरेणाकाशास्तित्वे लिङ्गमिति[३] यथा दिक्कालयोः परापरादि[४] लिङ्गमिति न च द्रव्यान्तरं शिष्यते न च गुणानां श्रोत्रभावो युक्तः न च कर्मणाम् न च सामान्यविशेषसमवायानां सामर्थ्यानुपलब्धेः न चेदं श्रोत्रं नास्ति शब्दोपलब्धिलिङ्गं शिष्यते चाकाशं तस्मादाकाशं श्रोत्रमिति॥


इति—औद्योतकरे न्यायवार्त्तिके तृतीयस्याध्यायस्याद्यमाह्निकम्॥

---

(१) श्रवणं—पा० ४ पु०। (२) श्रोत्रत्वे—पा० ४ पु०।
(३) लिङ्गमस्ति—पा० ४ पु०। (४) परत्वापरत्वे—पा० ४ पु०।

तृतीयेऽध्याये

द्वितीयमाह्निकम् ।



ॐ नमः परमात्मने ।

परीक्षितानीन्द्रियाण्यर्थाश्च बुद्धेरिदानीं परीक्षाक्रमः । सा किमनित्या नित्या वेति धर्मविचारः सत्त्वस्याधिगतत्वात् तस्यां च संशयमुपपादयति[१] ॥

कर्माकाशसाधर्म्यात् संशयः ॥ १ ॥

कर्माकाशसाधर्म्यात् संशयः । उभाभ्यां साधर्म्यमस्पर्शवत्त्वम् विशेष उपजननापायधर्मकत्वं[२] विपर्ययश्च बुद्धौ नोपलभ्यते ततः संशयः । अनुपपन्नरूपः खल्वयं संशयः सर्वशरीरिणां प्रत्यात्मवेदनीयत्वात् सर्वशरीरिणां प्रत्यात्मवेदनीयमेतत् यदुता[३]नित्या बुद्धिरिति चैकाल्यव्यक्तेश्च बुद्धौ चैकाल्यं व्यज्यमानं दृष्टम् जानामि ज्ञास्याम्यज्ञासिषमिति । न चोपजननापायावन्तरेण चैकाल्यव्यक्तिः न ह्यनुपजननापायधर्मेषु आकाशादिषु चैकाल्यं व्यज्यते न च विशेषदर्शने सति युक्तः संशयः तस्मात् संशयप्रक्रियानुपपत्तिरिति । शेषं भाष्ये । दृष्टिप्रवादोपालम्भार्थं प्रकरणम् न च बुद्धेरनित्यत्वं प्रति-

---

(१) उत्पादयति—पा० ४ पु० ।

(२) उपजनापायधर्मकत्वं—पा० ४ पु० । स्वमपेऽपि ।

(३) यद्वता—पा० ४ पु० ।

पाद्यमपि तु परस्य दर्शनं निवर्तनीयमिति। एवं हि पश्यन्तः प्रवदन्ति साङ्ख्या नित्या बुद्धिरिति साधनं च प्रचक्षते विषयप्रत्यभिज्ञानादिति ॥

विषयप्रत्यभिज्ञानात् ॥ २ ॥

यं पूर्वमज्ञासिषं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धानमवस्थिताया बुद्धेरुपपन्नम्। बुद्धिनानात्वे प्रत्यभिज्ञानानुपपत्तिः यथा पुरुषान्तरबुद्धिषु ॥

साध्यसमत्वादहेतुः ॥ ३ ॥

साध्यसमत्वादहेतुः। यथैव बुद्धेर्नित्यत्वं साध्यं तथैव बुद्धौ प्रत्यभिज्ञानमपि साध्यम् कस्मात् चेतनधर्मस्य करणे ऽनुपपत्तेः पुरुषधर्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोध इति। चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानातीति तस्यैव तस्माद्धेतोर्नित्यत्वं युक्तम्। क्रियानाधारत्वाच्च करणस्य। न हि करणं क्रियाया आधारो भवति उपलब्धिश्च क्रिया सा च न करणे वर्त्तितुमर्हतीति। स्वक्रियाधारत्वादयुक्तमिति चेत् अथ मन्यसे सर्वं कारकं स्वक्रियाया आधारो भवतीत्यतोऽयुक्तं क्रियानाधार इति सत्यम् भवति स्वक्रियाधारो न पुनः स्वक्रियातः करणव्यपदेशः। स्वक्रियासु सर्वं कारकं कर्तृ भवति करणभावं चाश्रित्य बुद्धौ विचारः तस्मादयुक्तमेतत्। सर्वकर्तृत्वप्रसङ्ग इति चेत् यदि पुनः स्वक्रियानिमित्तकः कर्तृव्यपदेशः सर्वं कारकं कर्तृ प्राप्तं सत्यमेतत् नाभ्युपगमा एव दोषत्वेन देश्यन्त इति। कर्तृकरणादिव्यपदेशश्च कथं प्रधानक्रियापेक्षः कर्तृकरणादिव्यपदेशः

यदर्थं करण[1]मुपादीयते सा प्रधानक्रिया तस्यां च साधनभावे विवक्षिते भेदे वा ऽविवक्षिते कारकमित्यनेन शब्देनाभिधीयन्ते कर्त्रादयः यदा तु भेदो विवक्षितस्तदा कर्तृकरणकर्मशब्दवाच्या-नीति। कारकशब्देनापि सामान्येनाभिधीयमानेषु करकेषु यः स्वगतो विशेषः इतरेतरव्यावृत्तः सोऽभिधीयते अन्यस्याभावात् प्रधानक्रियापेक्षं तु कारकाणां कर्त्राद्यभिधानमिति[2]। तच्च यदि-तराप्रयोज्यमितरकारकप्रयोक्तृ च तत् कर्तृ एवं शेषेषु कारकशब्दाः पूर्ववद्वक्तव्याः[3]। यद्यन्यकारकाप्रयोज्यत्वं कर्तृत्वं नन्वयमपि कारको-पादानेन प्रयुज्यते न प्रयुज्यते फलस्य प्रयोजकत्वात् फलं कर्तारं प्रयोजयति न कारकं करणादि न च फलं कारकमिति तेषां तन्त्रान्तरीयकमुपादानम्। न हि करणादि कारकोपादानमन्तरेण क्रिया सम्भवतीति तन्त्रान्तरीयकत्वात् कारकाण्युपादीयन्त इति। तस्माच्चेतनधर्मः करणे न सम्भवतीति उपेत्य प्रत्यभिज्ञानमन्तःकरणे तस्यैकानेकव्यावृत्तेरसाधारणता। न हि प्रत्यभिज्ञानमेकत्वे दृष्टं न नानात्व इति प्रत्यभिज्ञानेन स्वरूपावधारणे च सति विरुद्धः यदा चेदं प्रत्यभिज्ञानं निरूप्यते तदा बुद्धिभेदं प्रतिपादयति प्रत्य-भिज्ञानं हि नामाद्यप्रत्यक्षनिरोधे द्वितीयदर्शने प्रागाहितसंस्का-राभिव्यक्तौ स्मृतिपूर्वं तृतीयं दर्शनम्। न च बुद्धभेदवादिनो द्वितीयमपि तावद्दर्शनमस्ति कुतस्तृतीयमिति। प्रत्ययभेद इति

---

(१) कारक—पा० १ पु०। (२ अभिधानादिति—पा० ४ पु० ९।
(३) पूर्ववत् प्रयोक्तव्याः—पा० ४ पु०।

चेत् अथ मन्यसे अवस्थिताया बुद्धेः प्रत्ययास्तिरोभवन्ति व्यज्यन्ते च। तचाद्यदर्शनतिरोभावे प्रत्ययान्तराविर्भावे च प्रत्यभिज्ञानमिति तन्न युक्तम् तद्व्यतिरेकेण बुद्धिस्वभावानवधारणात्। यां तां प्रत्ययव्यतिरिक्तां बुद्धिं भवन्तः कल्पयन्ति तस्याः कः स्वभाव इति वक्तव्यम्। अस्माकं तु प्रत्ययमात्रं बुद्धिः अर्थग्रहणं हि बुद्धिरिति। दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानान्नानात्वे प्रत्यभिज्ञानमिति विरुद्धः प्रदीपान्तरदृष्टस्य प्रदीपान्तरेणेति। यदि बुद्धिरध्यवस्यति अथ बुद्धौ वर्तमानेन ज्ञानेन चेतनः किं करोति चेतयत इति कस्येतयते यदि यस्याध्यवसायः स चेतयते विरुद्धमेतत्। अथात्मा चेतयते कथं बुद्धौ वर्तमानेन प्रत्ययेनात्मा चेतयते न ह्यन्यत्र वर्तमानया क्रियया अन्यस्य तद्वत्ता भवति। अथ पुरुषस्येतयते बुद्धिर्जानीत इति नेदं ज्ञानादर्थान्तरमुच्यते यावदुक्तं भवति चेतयते तावदुक्तं भवति जानीत[1] इति। बुद्धिर्ज्ञापयतीति चेत् अथ मन्यसे बुद्धिर्ज्ञापयत्यात्मा जानीत इति अद्धा जानीते च पुरुषो बुद्धिर्ज्ञापयतीति। अध्यवसायचेतनयोश्च स्वभावभेदो वक्तव्यः भवतापेकत्वं वक्तव्यम्[2] देशकालस्वभावाभेदात् यस्मादविदेशमविकालं च बुद्ध्याध्यवसितमात्माप्यध्यवस्यति। स्वभावाभेदोऽसिद्ध इति चेत् अथ मन्यसे सत्यमभिन्नकालमभिन्नदेशं च बुद्ध्याध्यवसितमात्माप्यध्यवस्यति न पुनर्यैरचेतनात्मैवाध्यवसाय इति। न प्रतिशरीरमनेकपुरुषप्रसङ्गात् यद्यन्यश्चेतयिता अन्यश्चाध्यवसाता भवति अन्यः प्रतिजानीते अन्यः पश्यत्यन्यः शृणोति मन्तेत्येवमादिषु पुरुषान्तराणि खल्विमानि द्रष्टा श्रोता

---

(१) जानातीति—पा० ४ पु०। (२) वाच्यम्—पा० ४ पु०।

मन्तेति नैकस्मैते धर्मा इति। अत्र भवता किं वक्तव्यम् अभिन्नार्था एते शब्दा इत्येतद्वक्तव्यम् अभिन्नार्थास्तदेते शब्दा भवन्ति नन्वन्यार्थो न भिद्यते चेतनोऽध्यवसाता मन्ता बोद्धेति[१] तस्मादयुक्तमेतद् बुद्धिरध्यवस्त्यात्मा चेतयत इति। यदि पुनरिदं प्रत्यभिज्ञानं मनसो नित्यत्वसाधकं[२] स्यात् न युक्तमेवं भवितुम् मनसो नित्यत्वाभ्युपगमात्[३] अभ्युपगम्यते मनसो नित्यत्वमिति तत्र साधनमनर्थकम् अनेकान्ताच्च न प्रत्यभिज्ञानात् करणैकत्वं सिध्यति दृष्टं करणभेदे ऽपि प्रत्यभिज्ञानं ज्ञातुरेकत्वात् दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानात् प्रदीपदृष्टस्य प्रदीपान्तरेणेति। यत्त्विदं मन्यते बुद्धेरवस्थिताया यथाविषयं वृत्तयः प्रादुर्भवन्ति वृत्तिश्च वृत्तिमतो नान्येति[४] तच्च न युगपदग्रहणात् ॥

न युगपदग्रहणात् ॥ ४ ॥

वृत्तिमतोऽवस्थानाद् वृत्त्यवस्थानमिति सूत्रार्थः ॥

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ५ ॥

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः वृत्तीनामपगमे वृत्तिमतोऽप्यपगम इति सूत्रार्थः। अविभु चैकं मनः पर्यायेणेन्द्रियैः सम्बद्धत इति ॥

क्रमवृत्तित्वादयुगपदग्रहणम् ॥ ६ ॥

क्रमवृत्तित्वादयुगपदग्रहणम्। वृत्तिवृत्तिमतोर्नानात्वादिति सूत्रार्थः। वृत्तिवृत्तिमतोरेकत्वे प्रादुर्भावतिरोभावयोरभाव इति ॥

---

(१) मन्ता वेति—पा० ४ पु०। (२) साधनं—पा० १ पु०।
(३) नित्यस्याभ्युपगमात्—पा० ४ पु०। (४) ऽनन्येति—पा० ४ पु०।

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥ ७ ॥

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गादिति वृत्तिवृत्तिमतोर्भेदे सत्युपपद्यत इति। एकत्वे त्वनर्थको व्यासङ्ग इति विभुत्वे चान्तःकरणस्य पर्यायेणेन्द्रियैः संयोगः ॥

न गत्यभावात् ॥ ८ ॥

न गत्यभावात्। प्राप्तान्यन्तःकरणेनेन्द्रियाणीति सूत्रार्थः। व्यापित्वे च युगपदनेकेन्द्रियसम्बन्धाद्युगपद्ग्रहणप्रसङ्गश्च दोषः। अणावपि मनस्येकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्ग इति चेत् करणत्वान्न युगपद् ग्रहणम्। ममाप्येवं कस्मान्न परिहारः न करणभेदे दृष्टत्वात्। यानि खल्वभिन्नानि करणानि तान्येकेनैवाधिष्ठायकेनाधिष्ठितानि युगपत्प्रवर्तमानानि दृष्टानि। यथोभयहस्ताधिष्ठिते वास्यौ प्रवर्तते तथेन्द्रियाणि व्यापकेनान्तःकरणेनाधिष्ठीयन्त इति युगपत्प्रवृत्तिः प्रसक्ता तत्प्रसक्तौ च युगपद्ग्रहणप्रसङ्ग इति। गत्यभावाच्च विभुनोऽन्तःकरणस्य प्राप्त्यर्थस्य गमनस्याभावात् न चायुगपत्प्रत्ययोत्पत्तौ प्रमाणमस्ति येन प्रमाणेन प्रतिषिद्धमपि प्रत्ययायौगपद्यं प्रतिपद्येत यथा कथञ्चि(१)त्प्रतिषिद्धमपि प्रतिपद्यते तथा(२) चक्षुषो गतिः प्रतिषिद्धा केनचित् सन्निकर्षविप्रकर्षयोस्तुल्यकालग्रहणात् यस्मात् सन्निकृष्टं पाणिं विप्रकृष्टं चन्द्रमसमेकस्मिन् काले चक्षुषा प्रतिपद्यते तस्मान्न गतिमच्चक्षुरिति विप्रतिषिद्धापि सती गतिर्व्यवधानप्रतिघातेनानुमीयत इति। न च युगपत्प्रत्ययो-

(१) किञ्चित्—पा० १ पु०। (२) यथा—पा० ४ पु०।

त्यत्तौ प्रमाणमस्ति सोऽयं नान्तःकरणे विवादो न तस्य नित्यत्वे। कुतस्तर्हि विवादः तस्य विभुत्वे तच्च प्रमाणतोऽनुपलब्धेर्नास्ति। न ह्यन्तःकरणस्य विभुत्वप्रतिपादकं प्रमाणमस्ति एकमन्तःकरणं नाना चेमाश्चतुर्विज्ञानाद्यात्मिका वृत्तय इति। एतच्च वृत्तिवृत्तिमतोरेकत्वेऽनुपपन्नम् यस्य पुनर्वृत्तिवृत्तिमतोर्नानात्वं तस्यान्तःकरणसाधनश्चक्षुरादिसाधनश्चात्मा अर्थानुपलभत इति युक्तम्। एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः। पुरुषो जानीते नान्तःकरणमिति कः पुनरयं व्यासङ्गः अभीष्टविषयोऽनेकविज्ञानोत्पादः स च पुरुषस्य नान्तःकरणस्य यः पुनरयं सन्निधानासन्निधानलक्षणोऽन्तःकरणस्य व्यासङ्गः सोऽनुज्ञात इति। एकमन्तःकरणं नाना वृत्तय इति नैतन्न्यायवित्सच्चाणकः प्रतिपत्तुमर्हति यथैवान्तःकरणमेकं तथा वृत्तिरिति। दृष्टविरोध इति चेत् अथ मन्यसे यदि चान्तःकरणान्न वृत्तिर्भिद्यते ननु दृष्टं विरुध्यते रूपं रसो गन्धः स्पर्श इति दृष्टः प्रत्ययभेदो न स्यात् न न स्यात् विषयभेदानुविधानात् वृत्तिरभिन्नापि विषयभेदमनुविधीयमानाभिन्नेव ख्याति यथोपधानभेदमनुविधीयमानं स्फटिकादिद्रव्यं भिन्नमिव प्रकाशते। अस्य चार्थस्य ज्ञापनार्थं स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इति सूत्रम् ॥

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः ॥ ९ ॥

नानेकान्तात्। उभयथा खल्वयं नानात्वाभिमानो दृष्टः नानाभूतेषु गन्धादिषु अभिन्ने च स्फटिक इति यथाश्रुतिसूत्रे हेत्वभावो दृष्टान्तमात्रत्वात् दृष्टान्तमात्रमेतन्नात्र हेतुरस्तीति। विकल्पानुप-

पत्तेश्च योऽयं दृष्टान्तः स्फटिकवदिति विकल्पोऽत्र किमयं स्फटिक उपधानभेदेन भिद्यते उत नेति किं चातः यदि भिद्यते न दृष्टान्तः अथ न भिद्यते नानात्वाभिमानः कथम् यद्युपधानभेदाद् भिन्नमुपधानमिति कथं प्रतिपद्यसे यदि प्रत्ययभेदाद्व्याघातः अभिन्ना वृत्तिः प्रत्ययश्च भिन्न इति व्याघातः प्रत्ययपर्यायत्वाद् वृत्तेः। अथ भवतां वृत्तीनां भेदे किं प्रमाणम् ज्ञानानां क्रमेणोपजनापायदर्शनं क्रमेण ज्ञानान्युपजायन्ते अपयन्ति चेति दृश्यते एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्य एकानेकविषयाधिगतिः कथम् एकस्मिंश्च विषये नानात्वाभिमानः स्फटिके दृष्टः[१] नानाभूतेषु च गन्धादिषु नानात्वाभिमानो दृष्टः तेन नानात्वाभिमानस्योभयथा दृष्टत्वादिदमेकमिदमनेकमिति न युक्तः प्रत्यय इति। यश्चायमभिन्ने स्फटिके भेदप्रत्ययः सोऽपि प्रत्ययभेदमन्तरेण न युक्तः। न हि प्रत्ययाभेदवादिनः स्फटिके नीलादिप्रत्ययभेदो युक्त इति स्फटिके नीलादिप्रत्ययोऽसम्बन्धान्न युक्तः न हि नीलं द्रव्यं चक्षुःसन्निकृष्टमिति। अथ सन्निकृष्टं तदेव नीलं न स्फटिक इति स्फटिकसमानाधिकरणः स्फटिके नीलप्रत्ययो न युक्तः। न नैरन्तर्यदर्शनात् नैरन्तर्येणावस्थिते स्फटिकनीलद्रव्ये चक्षुषा सन्निकृष्येते तत्सन्निकर्षान्नीलगुणाध्यारोपेण स्फटिके मिथ्याप्रत्ययो नील इति यथा सान्तरेष्वन्तरालादर्शनात् संयुक्तप्रत्यय इति। यस्य च प्रत्ययो न भिद्यते तस्य चीणि प्रमाणानीति प्राक्तं व्याहन्यते[२] न हि प्रत्ययाभेदे प्रमाणभेदः सम्भवति। विषयभेदात् चित्वमिति चेत्

(१) दृष्टान्तः—पा० ४ पु०। (२) भिद्यते—पा० ४ पु०।

अथ मन्यसे विषयस्तेधा भिन्नस्तेनानुरञ्जितः प्रत्ययस्तेधैव भवति तन्न युक्तम् प्रमाणभेदे विषयभेदानधिगतेः। न हि प्रमाणभेदमन्तरेण विषयभेदोऽधिगन्तुं शक्यत इति। विषयतादात्म्यादिति चेत् अथ मन्यसे विषय एवासौ तथा व्यवस्थितस्तादात्म्यात् तथाख्यातीति तन्न प्रमाणवैयर्थ्यात्[१] एवं सति व्यर्थं प्रमाणं न विषयभेदं प्रमाणभेदोऽवगमयति विषयस्तु तादात्म्यात् तथा व्यवतिष्ठत इति यथाध्यवस्यति तथा चेतयत इति च व्याघातः। अप्रकारवत्त्वात् प्रकारवत्त्वेतद्युक्तम् अप्रकारे न युक्तम् बुद्धिस्तं प्रत्ययमुपलभत इति च विरोधोऽधिकरणाधेययोरभेदात् यः प्रत्ययः स बुद्धिरित्यधिकरणाधेययोरभेदः। एवं च सति बुद्धिस्तं प्रत्ययमुपलभत इति व्याहतम्॥

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इत्येतदमृष्यमाणः क्षणिकवाद्याह। स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्बुद्धीनामहेतुः॥

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्बुद्धीनामहेतुः॥ १०॥

नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा॥ ११॥

स्फटिकस्याभेदेनावस्थितस्यान्यत्वाभिमान इत्ययुक्तम् क्षणिकत्वाद्बुद्धीनाम् क्षणिकत्वमुपचयापचयप्रबन्धदर्शनात्। यस्माच्छरीरादिषु पक्तिनिर्वृत्तं रसद्रव्यं[२] प्रतिक्षणमुपचीयते वापचीयते च उपचयाद्बुद्धीनामुत्पादः अपचयाद्बुद्धिनिरोधः तौ चोत्पादनिरोधौ तस्य कालान्तरेण दृष्टौ अतोऽवगम्यते प्रतिक्षणमुपचीयते चाप-

(१) वैयर्थ्यप्रसङ्गात्—पा० ४ पु०। (२) रसषद्रव्यं—पा० १ पु०।

चीयते च शरीरमिति। यस्य खलु प्रतिक्षणमुपचयापचयौ न दृष्टौ तस्य कालान्तरेणापि न भवतो[१] यथा भूमेरपच्यमानायाः पाकजानामिति। पच्यमानभूमिपाकजवच्च प्रतिक्षणं विशेष इति। अस्य प्रयोगः प्रतिक्षणं शरीरमन्यच्चान्यच्च भवति बाह्यप्रत्ययाभेदे सत्यन्ते विशेषदर्शनात् पच्यमानभूमिपाकजवत् अपच्यमानभूमिपाकजवच्चेति। तदिदमुपचयापचयप्रबन्धदर्शनं शरीरे दृष्टत्वाच्छरीरस्यान्यत्वं साधयतु न पुनरनुपलभ्यमानोपचयापचयविशेषाणां स्फटिकादीनामेतस्मादन्यत्वं सिध्यतीत्यहेतुः। यच्चोपलब्धिस्तस्यान्यत्वमिति चेत् अथ मन्यसे नैवास्माभिरुपचयापचयप्रबन्धदर्शनेन सर्वभावानां क्षणिकत्वं साध्यते अपि तु यच्च तदस्ति तस्मिन्[२] क्षणिकत्वमिति। सत्यम् यस्य यस्योपचयापचयप्रबन्ध उपलभ्यते तस्य तस्यान्यत्वमिति न तु क्षणिकत्वम् उपचयापचयप्रबन्धदर्शनं चान्यथाभवदहेतुः क्षणिकत्वे। कथमन्यथा पूर्वावयवा[३] आहारावयवसहिताः पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यमानाः शरीरान्तरमुत्पादयन्तीति युक्तो भेद इत्यहेतुरेषः। तुल्यं पचप्रतिज्ञानमिति चेत् अथ मन्यसे पूर्वाहारावयवोपचययोगे[४] सति शरीरावयवाः शरीरान्तरमारभन्ते पूर्वव्यूहपरित्यागेन न पुनः क्षणिकत्वादन्यज्ञातमित्यत्र को हेतुरिति। नासाधनात् न मयाहारोपचयापचययोगाच्छरीरस्यान्यता साध्यते अपि तु भवता विशेषदर्शनाच्छरीरस्यान्यत्वमभ्यधायि ततश्च क्षणिकत्वमिति विशेषदर्शनं क्षणिकत्व-

---

(१) न भवति—पा० ४ पु०। (२) तच्च—पा० ४ पु०।
(३) पूर्वशरीरावयवाः—पा० ४ पु०। (४) पूर्वापरावयवोपचययोगे—पा० ४ पु०।

साधनम् तदस्माभिर्विशेषदर्शनमन्यथाभवत् क्षणिकत्वेन साधनमित्येतावन्माचक्षमुच्यते न साधनमभिधीयत इति। अथावश्यं साधनं वक्तव्यम् इदं ब्रूमः नोत्पत्तिविनाशकारणोपलब्धेः।

नोत्पत्तिविनाशकारणोपलब्धेः ॥ १२ ॥

उत्पत्तिकारणं विनाशकारणं चोपचयापचयौ वल्मीकघटादीनां दृष्टाविति तदुभयं क्षणिकत्वे न स्यात्। उपचय इति च वृद्धिः उपचितो गौरिति अपचय इति ह्रासः अपचितो गौरिति उभयं चैतदवस्थितवस्तुविषयम् न ह्यपूर्वं जायमानं वर्द्धत इत्युच्यते नापि विनश्यदपचितमित्युच्यते उपचयापचयोत्पत्तिविनाशकारणोपलब्धेरिति सूत्रार्थः। अथवा कारणमित्याधारोऽभिधीयते कार्यमित्याधेयम् न च क्षणिकत्वे आधाराधेयभावः सम्भवति न चाधाराधेयभावमन्तरेण कार्यकारणभावः तस्मात् कार्यकारणभावोपलब्धेरक्षणिकत्वमिति। अस्य प्रयोगः कार्यकारणे एककालानुभाविनौ आधाराधेयभावात् क्षीरकुण्डवदिति। क्षीरं कुण्डे वर्तते तच्च कुण्डकालमनुभवति तथा च कार्यं कारणे वर्तते तस्मात् तदपि कारणकालमनुभवति नाधाराधेयभावस्यासिद्धत्वादिति चेत् अथ मन्यसे ऽसिद्धः कार्यकारणयोराधाराधेयभावः कार्यस्यानाधारत्वात्। नैव हि नः किञ्चित् कार्यमाधारवद्दृष्टमिति। नानेकान्तात् नायमेकान्तः सर्वं कार्यमनाधारमिति। यथोभयपक्षसम्प्रतिपत्त्या रूपं कार्यं चाधारवच्च स्पर्शस्तदाश्रय इति च व्याघातः। यदि च रूपमनाश्रितं भवति स्पर्शस्तदाश्रय इति व्याहतम्। अनेन च

रूपदृष्टान्तेन यावद्यावत् समानकालतया साध्यते सर्वं तदेक-कालानुभावि भवतीति सिद्धः कार्यकारणभावः। क्षणिकेष्वपि नाशोत्पादयोरेककालत्वात् तुलान्तयोरुन्नमनावनमनवदिति चेत् अथ मन्यसे कार्यकारणभावः क्षणिकेष्वपि सम्भवतीति कारण-विनाशसमकालं कार्यभावात्। यदा कारणं विनश्यति तदा कार्यमुत्पद्यते विनश्यच्च कारणमस्ति कारणविनाशेनाभिन्नकालः कार्योत्पादः यथा तुलान्तयोर्नामोन्नामाविति। न हेत्वर्थापरि-ज्ञानात्। न ब्रूमः क्षणिकत्वे[१] कार्यकारणभावो नास्ति अपि त्वाधाराधेयभावो भिन्नकालत्वात् कार्यकारणयोर्न युक्त इति कार्यं चाधारमिति न दृष्टान्तोऽस्ति अस्मत्पक्षे तु कार्यमाधारवदित्यस्ति दृष्टान्तो रूपादिरिति। तुलाधारस्य च व्यापारे[२] नामोन्नाम-भावानभ्युपगमाद्[३] युगपद्भावानुपपत्तिः[४] रेकत्वात्। यदि तुला-मधिकृत्य ब्रवीषि तदेकं कर्म भ्रमणाख्यमेकत्वाद् युगपद्भावो न युक्तः न ह्येकं युगपद्भवतीति। अथावयवकर्मणी तयोरपि कार्यकारणभावेनानभ्युपगमात् किं केन सम्बध्यते अथ युगपद्भाव-मात्रं विवक्षितमिति युगपद्भावः कारणयौगपद्यात् यावतामर्थानां कारणानि युगपद्भवन्ति तावतामेकस्मिन् काले भाव इति नामो-न्नामावसम्बद्धौ कारणयौगपद्यं तु गुरुत्वप्रयत्नसंयोगा उन्नतेः अवन-तेरपि गुरुत्ववद्द्रव्यसंयोगानुग्रहीतो रज्जुतुलासंयोगः अथापि न कर्मार्थान्तरं संयोगं वा परः प्रतिपद्यते तस्याप्युक्तमुत्तरं संयोगो-

---

(१) क्षणिके—पा० ४ पु०। (२) कर्मणः—पा० ४ पु०।
(३) भावेनाभ्युपगमात्—पा० ४ पु०। (४) भावानुत्पत्ति—पा० ४ पु०।

ऽप्यर्थान्तरमिति संयोगकारणत्वेन च कर्माप्यर्थान्तरमिति । यथा च भावानामुत्पत्तिविनाशकारणमुपलभ्यते नैवं स्फटिकस्य न चानुपलभ्यमानं शक्यमभ्यनुज्ञातुमिति । क्षीरविनाशे कारणानुपलब्धिवद्ध्युत्पत्तिवच्च तदुपपत्तिः[१] ॥

क्षीरविनाशे कारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुपपत्तिः ॥ १३ ॥

यथा क्षीरस्य विनाशकारणमनुपलभ्यमानमभ्यनुज्ञायते दध्न-श्चोत्पत्तिकारणमेवं स्फटिकादिव्यक्तीना[२]मनुपलभ्यमाने उत्पत्ति-विनाशकारणे अभ्यनुज्ञेये इति ॥

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १४ ॥

लिङ्गितो ग्रहणान्नानुपलब्धिः । यल्लिङ्गत उपलभ्यते न तन्ना-स्तीति । विपर्ययश्च स्फटिकादौ न हि स्फटिकादिव्यक्तीनामपराप-रोत्पत्तौ लिङ्गमस्तीति । न नास्ति शीतोष्णस्पर्शभेदस्य नानात्वे साधनत्वात्[३] शीतोष्णस्पर्शभेदो नानात्वे दृष्टो यथाग्नौ उदके च अस्त्ययं शीतोष्णस्पर्शभेदः स्फटिके सत्यमस्ति स तु निमित्तान्तराङ्भवति किं पुनर्निमित्तम् अग्नेजोऽवयवानुप्रवेशः उदकावयवानुप्रवेशाच्छीतः तेजोऽवयवानुप्रवेशाच्चोष्ण इति । अग्नेजोऽवयवानुप्रवेशो न युक्तः अल्पतरबहुतरानुप्रवेशे हेत्वभावात् । हेमन्ते ह्याकाशे पर्युषितानां काष्ठभूम्यश्मलोष्टानां शैत्यस्योत्तरोत्तरो विशेषो दृष्टः तथा पुन-

(१) क्षीरविनाशकारणानुपलब्धिर्दध्युत्पत्तिवच्च तदुत्पत्तिः—पा० ४ पु० ।

(२) स्फटिकादीनां—पा० ४ पु० । (३) साधनात्—पा० ४ पु० ।

र्यौष्ण्यातपसन्तापितानां तेषामेवौष्ण्यस्य। न हि तेष्वल्पतरबहुतरप्रवेशे कारणं पश्यामः तस्मात् स्वगतमहाभूतविशेषापेक्षाण्यासादितबाह्यनिमित्तानि भूतान्येव तथा तथोत्पद्यन्त इति युक्तम्। न युक्तम् न ह्यग्नेजोऽवयवानुप्रवेशेन भूतस्वभावो निवार्यत इति भूतस्वभावस्योभयपक्षसाम्यादसाधनं भूतस्वभाव इति विरुद्धश्चायं हेतुः[1] यद्यवयवानुप्रवेशं न प्रतिपद्यसे स्वरूक्षोष्णेरणात्मकानि भूतानीति व्याहन्यते। कथमिति यत् कठिनं तदेकस्मिन् काले उष्णमपि भवतीति यच्चोष्णं तत् कठिनं गच्छतीति तदेकस्वभावकं वस्तु द्विस्वभाकं त्रिस्वभावकं च प्राप्नोति। यस्य पुनरवयवानुप्रवेशस्तस्यैष दोषो नास्ति अन्यचावस्थितस्य संयुक्तसमवेतस्य औष्ण्यस्य ग्रहणादिति। विरुद्धश्चायं हेतुः कथम् एकस्य विशेषस्याभ्युपगमात् एकं वस्त्वेकस्मिन् काले कठिनमुष्णं गच्छति चेति त्रिस्वभावकं ततश्च विशेषदर्शनादित्ययं हेतुः सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति विरुद्धो भवति। अथ मन्यसे न विशेषमात्रं नानात्वं प्रतिपाद्यत्यपि तु विरोधी विशेषो नानात्वे साधनमिति। नाभिप्रायापरिज्ञानात् वयमपि न ब्रूमो विशेषमात्रं नानात्वसाधनमपि तु विरोधीविशेष इतरेतरव्यावृत्तो लक्षणत्वेनोपपन्नः स विरुद्धः यद्यविरुद्धः स्यान्न लक्षणं स्यात् एकवृत्तित्वे वा लक्षणत्रयस्य तत्तद्वस्तु किमभिधीयते। यदि तावत् पृथिवी तन्न युक्तमौष्ण्यस्य दर्शनात् अथ तेजः तदपि न युक्तं काठिन्यदर्शनात्। एतेन वायुर्व्याख्यातः। सोऽयं हेतुर्भूतलक्षणं बाधते नानात्वसाधनं वा न भवति। एतेन जले तापग्रहणं

(१) स्वभावहेतुः—पा० ४ पु०।

प्रत्युक्तम् । तत्राप्योष्ण्यस्निग्धतेरणता च युगपद्भवतीति । जलेऽग्नि-रूपग्रहणप्रसङ्गस्तु न युक्तोऽभिभवात् । तत्र सिद्धान्तापरिज्ञानात् नायं सिद्धान्तो जलरूपेणाग्निरूपमभिभूयत इति अपि तु तेजसश्चातु-र्विध्यात् तत्र न रूपग्रहणम् चतुर्विधं तेज इत्येतत् प्रसाधित(१)मि-न्द्रियप्रकरण इति । या चेयं प्रतिज्ञा अन्यश्चान्यश्च स्फटिक इति, अस्याश्च कोऽर्थः यदि तावदन्यत्वमात्रं तदा सिद्धसाधनं भवति कुम्भादिभ्योऽन्यः(२) स्फटिक इति । अथ स्फटिकान्तरादन्य इति तदपि तादृगेव । अथ पूर्वस्फटिकादन्य इति कतमोऽसौ पूर्वस्फ-टिको यातोऽयमन्य इति । व्यवच्छेदस्याग्रक्यत्वादनभिधानम् यथो-भयपक्षसम्प्रतिपन्ना रूपादयः तेभ्योऽन्योनन्यविचारो घटादेर्युक्तः न पुनरिह पूर्वस्फटिकान्तरमुभयपक्षसम्प्रतिपन्नं यतो वर्तमानमन्यत्वेन साध्यते अथोभयपक्षसम्प्रतिपन्नं पूर्वस्फटिकान्तरं व्यर्थं साधनम् अथ वर्तमानं स्फटिकमभ्युपगम्य यदतीतं स्फटिकान्तरं तदन्यदिति साध्यते । एवं सति शीतोष्णस्पर्शभेदो न तद्धर्मः वर्तमानस्फटिक-धर्मत्वात् वर्तमानाच्च स्फटिकादन्यदतीतमिति केनैतन्न प्रतिपन्नम् । अथ तदेवान्यदिति व्याघातः तदेवान्यच्चेति । एवं यथायथान्यत्वं विचार्यते तथातथा सिद्धसाधनं भवति सिद्धान्तं च बाधते । अथायुगपत्कालप्रत्ययानामालम्बनं स्फटिको न भवतीति प्रतिज्ञार्थः । एतस्मिन्नपि प्रतिज्ञार्थे न दृष्टान्तोऽस्ति । प्रदीपो दृष्टान्तः प्रदीपो-ऽयुगपत्कालप्रत्ययानामनालम्बनं सदादिधर्मा चेति विद्यते दृष्टान्तः । नासिद्धत्वात् असिद्धमेतत् अयुगपत्कालप्रत्ययानालम्बनाः प्रदीपा-

(१) प्रतिपादितम्—पा० १ पु० । (२) स्तम्भादिभ्योऽन्यः—पा० १ पु० ।

दयः तेषामनेकक्षणावस्थानात् प्रदीपस्य तावत् स्वकारणसत्तासम्बन्धकालः सामान्याभिव्यक्तिकालः अवयवकर्मकालः तदनन्तरं विभागकालः तदनन्तरं तत्संयोगविनाशकालः ततो द्रव्यनाश इति। यथा प्रदीप एवं सर्वे भावाः स्वकारणसत्तासम्बन्धा[१]भिव्यक्तितद्विरोध्याश्रयविनाशानुविधानेन विनश्यन्ति। अकारणस्य विनाशानभ्युपगमात् न हि नः किञ्चिन्निःकारणं विनश्यति। विनश्यद्वस्तुद्रव्यकर्मवदेतत् स्यात् न कर्मणोभ्युपगमे विरोधात् अनभ्युपगमाच्च। विनाशहेत्वभावादिति चेत् अथ मन्यसे न विनाशकारणमस्ति तस्मादुत्पन्नमात्र एवायं भावो विनश्यतीति न विकल्पानुपपत्तेः। विनाशहेतुर्नास्तीति ब्रुवाणः पर्यनुयोक्तव्यः[२] किमकारणत्वाद्विनाशो नास्ति उताकारणत्वान्नित्य इति। भवतां पक्षे ऽकारणं द्वेधा नित्यमसच्च[३] अस्माकं तु नित्यमेव। यद्यकारणत्वान्नित्यो विनाशः कार्यस्योत्पादो न प्राप्नोति उत्पन्नस्य च भावस्य विनाशेन सद्भावस्थानमिति च दोषः। ततश्च भावानामभावाविरोधादत्यन्तमवस्थानमिति। अथासन्विनाश एवमपि सर्वनित्यत्वं विनाशाभावात्। यदि चासन्विनाशो विनश्यतीत्यसति विनाशे प्रत्ययो न प्राप्नोति नास्त्यां गतौ गच्छतीति भवति। अथाविनाशित्वादकारणो विनाश इति मन्यसे विनाशो न विनश्यतीति कुत एतत्। विनष्टानां पुनरनुत्पत्तेरिति चेत् अथ मन्यसे यदि विनाशो विनश्येत विनष्टः पुनरुत्पद्येत। न युक्तमेतत् न हि विनाशाभावाभावो यतोऽस्य विनाशा-

---

(१) सम्बन्धेति नास्ति ४ पु०। (२) पर्यनुयोज्यः—पा० ४ पु०।
(३) ऽकारणं द्विधा भवति नित्यमसच्च—पा० ४ पु०।

ब्रूवेत्[१] अपि तु कारणवान् भावस्तस्य यदा कारणं भवति तदोत्पाद इति अपि च विनाशः कारणवाँश्च न विनश्यत्यभावत्वात् भावधर्म एषः[२] यत् कारणवत् तद्विनश्यतीति अभावस्त्वकारणोऽपि विनश्यतीति यथा प्रागभावः कारणवानपि न विनश्यति यथा प्रध्वंसाभावः। यदि कारणवान् विनाशो ननु जनकं विनाशकं प्राप्नोति य एवाग्निसंयोगः पाकजानामुत्पादयिता[३] स एव पाकजान्तरोत्पादे पूर्वपाकजानुच्छिनत्तीति जनकं विनाशकं प्राप्तम्[४] नानवरोधात्[५] नेदं भवता काश्यपीयं दर्शनं व्याख्यायि न हि नो य एवाग्निसंयोगः पाकजानुत्पादयति स एवोच्छिनत्ति अपि त्वग्निसंयोगान्तरं पूर्वरूपाद्युच्छिनत्ति समनन्तरकालाद्रूपादीना[६]रभते ततस्तान्यप्यन्यस्तान्यप्यन्य इत्येवं जनकस्य विनाशकत्वप्रसङ्गो नास्ति। अथ मन्यसे जनकसरूपमपि विनाशकं न भवति न न भवति दृष्टो ह्यवादिसंयोगादङ्कुरस्योत्पादः स एवावादिसंयोगस्तद्विनाशक इति। न हि दृष्टेऽनुपपन्नं नाम यश्चाकारणविनाशे दोषः सोऽपरिहार्य इत्यत एवमुच्यते जनकसरूपं विनाशकमिति। एवं तावदन्यत्वे साध्ये दोष उक्तः। ये तु क्षणिकत्वं साधयन्ति विशेषदर्शनादविनाशहेत्वभावाच्च तान् प्रतीदमुच्यते क्षणिकाः संस्कारा इति ब्रुवाणः क्षणिकशब्दार्थं प्रष्टव्यः किमुक्तं भवति क्षणिका इति। यदि विनाशिन इति सिद्धसाधनम् अथाशुविनाशिन इति तदा

---

(१) यतो विनाशविनाशाद्भवेत्—पा० ४ पु०। (२) एव—पा० ४ पु०।
(३) उत्पादकः—पा० ४ पु०। (४) प्राप्नोति—पा० ४ पु०।
(५) नानवबोधात्—पा० १ पु०। (६) समनन्तरकालाद्रूपादीना—पा०४ पु०।

विशेषणं सिद्धान्तविरोधि। अथोत्पन्नप्रध्वंसिन इति एतदपि तादृगेव। उत्पन्नाः प्रध्वंसिन इति सिद्धसाधनम्। अथोत्पन्नो विनष्ट इत्येकः कालः। उत्पत्तिविनाशावेककालाविति। तेन यथानुत्पन्नस्योत्पत्तिरेवमनुत्पन्नस्य विनाश इति प्राप्तम्। अथोत्पन्नं विनश्यतीति एतस्मिन्नपि पक्षे उत्पत्तिवद्विनाशः कारणवान् यथोत्पत्तिः क्रियात्वात् कादाचित्कत्वात् सकारणा तथा विनाशकारणमनुभवति[१] ततो विनश्यतीति अकारणे च विनाशे दोष उक्तः। यश्चायं मत्वर्थीयः क्षणिका इति स कथं यदि निरुक्तन्यायेन क्षयः क्षण इति क्षणोऽस्यास्तीति क्षणिक इति तन्न युक्तं कालभेदात् यदा क्षयो न तदा क्षयीति भिन्नकालयोर्न मत्वर्थीयो दृष्टः अथ पुनर्भाव एवानन्तरेण विनाशेन विशिष्यमाणः क्षणिक[२] इत्युच्यते तथापि तेनैव तदेव तदन्न भवतीति न युक्तो मत्वर्थीयः। अथ क्षणावस्थितिकालाः क्षणिका इति सर्वान्त्यं कालं क्षणत्वेन प्रतिपद्य तत्र ये ऽवतिष्ठन्ते ते क्षणिका इति। एतदपि न युक्तम्। सञ्ज्ञामात्रत्वेन कालस्याभ्युपगमात्। पञ्चभिश्चवः सञ्ज्ञाभेदमात्रमिति शास्त्रम्। न हि सञ्ज्ञामात्रं वस्तुविशेषणत्वेन युक्तम्। क्षणिका इति च प्रतिज्ञां कृत्वा न दृष्टान्तोऽस्तीत्युक्तम् प्रदीपादेरसिद्धत्वात्। ये ऽपि हेतवोऽन्ते विशेषदर्शनादित्येवमादयस्तेऽसिद्धाः अन्यथासिद्धा विरुद्धा वा भवन्तीत्यहेतवः उपेत्य वा विशेषवत्त्वं

---

(१) तथा विनाशिन इत्युत्पद्य विनाशकारणमनुभवति—पा० ४ पु०। 'तथा विनाश इत्युपेत्य विनाशकारणं' इति क्वचित् पा०।

(२) क्षण इत्युच्यते—पा० ४ पु०।

वर्तमानैकक्षणविशेषवत्त्वेनानैकान्तिकम् उभयपक्षसम्प्रतिपत्त्या य एव क्षणो वर्तमानः स विशेषवान् भवत्येकस्येत्यनेकान्तः । अन्ते विशेषदर्शनादिति च विशेषणानर्थक्यम् अन्तार्थानभिधानात् कतमस्मिन्नन्ते विशेषदर्शनादिति च वक्तव्यम् अथान्तो विनाशः नैतस्मिन् विशेषदर्शनमस्ति अथान्तिमं वस्त्वेवान्तशब्दवाच्यम् एवं सत्येकस्मिन् विशेषदर्शनमिति विरुद्धो हेतुः योऽप्ययं हेतुर्दर्शनादर्शनादिति अस्यार्थः नीयमानस्य किल प्रदीपादेर्द्रव्यस्य देशान्तरे उत्पादो देशान्तरे निरोधः तत्कृते दर्शनादर्शने स्तः अतश्च देवदत्तादेर्गच्छतो दर्शनादर्शनादतस्तस्यापि प्रतिक्षणमुत्पादविनाशाविति । नैतन्न्याय्यम् देवदत्तादेर्दर्शनादर्शनयोरन्यनिमित्तत्वात् संयोगविभागकृते[१] दर्शनादर्शने नोत्पादविनाशकृते यस्मिन् देशे संयोगो विनष्टः तस्मिन् संयोगी न गच्छते यस्मिन्नुत्पन्नस्तस्मिन् गच्छत इति यद्योगाद्धि द्रव्ये दृढबुद्धिर्भवति तद्भावाभावयोस्तद्वादिति । अथ संयोगविभागौ न विद्येते तस्यापि संयोगोऽर्थान्तरं भवतीति प्रतिपादितम् । एतेन विभागो व्याख्यातः । तदेवं संयोगविभागोत्पत्तेर्द्रव्यस्य दर्शनादर्शने भवतो नान्यथेति । यत्पुनरेतत् प्रदीपस्य देशान्तर उत्पाद इत्येतदपि न बुध्यामहे । कथमिति यत्तावद्भवतां पक्षे वस्तूत्पन्नं[२] यत्र तत्रैव तद् ध्वंसते यदुत्पित्सु तदनाहितसंस्कारमसत्त्वाद्देशान्तरेणोत्पत्तुमर्हतीति । अथानाहितसंस्कारस्यापि देशान्तरे उत्पादो न किञ्चिदस्तु स्वभिन्नदेशमुत्पद्यते । अथ कारणं संस्कृतमिति

---

(१) संयोगविनाशकृते—पा० ४ पु० । (२) वस्तूपपन्नं—पा० १ पु० ।

तदाधेयवशात् कार्यमपि तथाभूतमेवोत्पद्यत इति तुल्यम् कार्येण यथैव कार्ये संस्कार आधातुमशक्यः तथा कारणेऽपीति तुल्यम् नित्यं भवतां पक्षे भिन्नदेशेन कार्येणोत्पत्तव्यमभिन्नदेशेन वा। एतेनैवातुल्यपातो व्याख्यातः। अतुल्यपातात् क्षणिकत्वमिति न किलाकाशे पतनो लोष्टादेः प्रतिबन्धकं किञ्चिदस्ति यदनुविधानेन लोष्टादिकं किञ्चिच्चिरेण पतति किञ्चिदाशिति तस्मात् क्षणिकत्वात् काश्चिदवस्थास्तादृश्य उत्पद्यन्ते यासां न भवत्यधः सन्तानोत्पत्तौ सामर्थ्यं पुनश्च तादृश्य उत्पद्यन्ते यासां भवतीति एतदप्यन्यथासिद्धमेव तुल्यानां गुरुत्ववतां द्रव्याणामेकस्य गुरुत्वप्रयत्नक्षेपाः कारणम् एकस्य गुरुत्वमात्रमेकस्य गुरुत्वप्रयत्नाविति। तदेवं कारणभेदानुविधायीनि गुरुत्ववन्ति द्रव्याणि चिराशुपातानुविधानभाञ्जि भवन्तीत्यहेतु[१]रतुल्यपातः। यदपीदमिषोश्चापतनं भवेदिति संस्कारैकत्ववादिनो दोषः अयमपि संस्कारैकत्वानभ्युपगमेन प्रत्युक्तः। यथा चानेकः संस्कार इति तथोक्तं पाणिनिमित्तप्रश्लेषसूत्र इति। एकश्च संस्कारः यदा कदाचिन्निमित्तभेदात् पटूनि कर्माणि करोति कदाचिन्मन्दानीति गुरुत्ववद्द्रष्टव्यम् यथैकं गुरुत्वं सहकारिसंयोगात् मन्दं पातं करोति तदेव प्रतिबन्धापगमे पटुं करोति। दृष्टो हि यावण आकाशे मुक्तस्य पटुः पातो मन्दोऽपामिति तदेवमतुल्यपातोऽप्यहेतुः। अथाक्षणिकत्वे किं प्रमाणम् उक्तमाधाराधेयभावादेककालानुभावीनि कार्यकारणे कुण्डे बदरवदिति

---

(१) चिराशुपाताच्चाशुतरपातानुविधानभाञ्जि भवन्तीति न हेतुः—पा० ४ पु०।

अतश्च विप्रतिपन्ना अयुगपत्कालाः प्रत्यया एकविषयाः अव्युत्थायि तत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यत्वात् वर्तमानैकक्षणानेकपुरुषप्रत्ययवत् यथा वर्तमानक्षणविषयाणामनेकपुरुषप्रत्ययानामव्युत्थायितप्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यानामेकविषयत्वम् तथा चाव्युत्थायितप्रत्ययसमानाधिकरणाः समानशब्दवाच्याश्च विप्रतिपन्ना अयुगपत्कालाः प्रत्ययास्तेऽप्येकविषया इति प्रत्यात्मं नानेककर्तृकाः प्रत्यया अप्रतिसन्धानप्रसङ्गादेवदत्तादिप्रत्ययवदिति। रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः मयेतिप्रतिसन्धानात् कृतसमयानां बह्वनां वर्तमानैकक्षणानेकविज्ञानवदिति श्वस्तनाद्यतनविज्ञानान्येकसन्ततौ एकानेकनिमित्तानि मयेतिप्रतिसन्धानात् पूर्ववत् शास्त्रार्थप्रत्यया एकानेकनिमित्ताः प्रतिसन्धानात् पूर्ववत् नानाविषयाणां च नानाकर्तृकाणां च प्रत्ययानामप्रतिसन्धानादिति पूर्ववदेव न्याय इति ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १५ ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात्। नैव क्षीरं विनश्यति नापि दध्युत्पद्यते अपि त्ववस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरमुत्पद्यत इत्येके वर्णयन्ति। अपरे त्ववस्थितस्य द्रव्यस्य गुणनिवृत्तौ गुणान्तरमुत्पद्यत इति। स खल्वयमेकपक्षीभाव इति(१) क उपमानार्थः उभयत्र द्रव्यमवतिष्ठते एकस्य तिरोभावाभिव्यक्ती एकस्य विनाशप्रादुर्भावावित्युपमानार्थः उभयत्रोत्तरं व्यूहान्तराद्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥

(१) भाव इव—पा० ४ पु०।

व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १६ ॥

शेषं भाष्ये। यत्पुनरेतदेकस्य तिरोभावाभिव्यक्ती एकस्य विनाशप्रादुर्भावाविति तच्च पूर्वावस्थापरित्यागात्। यदि विनाशोत्पादौ निवृत्तिप्रादुर्भावावथाप्यभिव्यक्त्यनभिव्यक्ती सर्वथा पूर्वावस्थां जहाति द्रव्यमिति न ह्यनपवृक्तस्य पूर्वावस्थातोभिव्यक्त्यनभिव्यक्ती भवतो विनाशप्रादुर्भावौ वेति। तस्मादयुक्तमवस्थितस्य परिणाम इति। अभ्यनुज्ञाय च निःकारणं क्षीरविनाशं निष्कारणं च दध्युत्पादम्॥

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ १७ ॥

क्वचिद्विनाशकारणानुपलब्धेः[१] क्वचिच्चोपलब्धेरनेकान्तः। क्षीरदधिवन्निःकारणौ विनाशोत्पादौ स्फटिकव्यक्तीनां न पुनः कुम्भादिवत् सकारणाविति नाच हेतुरस्तीति निरधिष्ठानं च दृष्टान्तवचनम्। कोऽधिष्ठानार्थः आश्रयार्थः किमुक्तम्भवति निरधिष्ठानमिति। धर्मी नास्तीति यावदुक्तं भवति न हि स्फटिकस्योत्पादविनाशौ प्रतिक्षणमुपलभ्येते यत इयं चिन्ता भवेत् किमेतौ सकारणावाहोस्विदकारणाविति यथानभ्युपगतशब्दतत्त्वं प्रति कश्चिद्ब्रूयात् कृतकत्वादनित्यः शब्दस्तादृगेतदिति धर्म्यसिद्धेश्च दृष्टान्ताभाव इति च समानम्। अभ्यनुज्ञाय च स्फटिकस्योत्पाद[२]विनाशौ

---

(१) नुपपत्तेः—पा० १ पु०। (२) तस्योत्पाच—पा० ४ पु०।

योऽत्र साधकस्तस्याभ्यनुज्ञानाद्प्रतिषेधः उभावेतौ दृष्टान्तौ क्षीरदधिवत् कुम्भादिवच्च तत्र किं कुम्भादिर्दृष्टान्तो भवत्यथ क्षीरदधिनी इति। तत्र कुम्भादिवदिति युक्तम् कुम्भाद्युत्पत्तिविनाशकारणस्य दृष्टत्वात् क्षीरदधिवत्तु न युक्तम् अनुमानतो ग्रहणादिति सिद्धमनित्या बुद्धिरिति। इतश्चानित्या बुद्धिः गुणत्वे सति प्रत्यक्षाया व्यापकद्रव्यसमवायात् शब्दवत् जातिमत्त्वे सति अस्मदादिप्रत्यक्षत्वादाश्रितत्वात् शब्दवत् करणभावे सत्ययोगिप्रत्यक्षत्वात् शब्दवदेव ॥

सा त्वियं बुद्धिः कस्य गुण इत्येतच्चिन्त्यते न गुणभावात्सिद्धेः अनित्यत्वे सत्यचाक्षुषप्रत्यक्षत्वाद्गुणभावः सन्निकर्षोत्पत्तेः संशयः इति। तत्रायं विशेषः ॥

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥ १८ ॥

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात्। भवति खल्विन्द्रिये ऽर्थे च विनष्टे ज्ञानमद्राक्षमिति अद्राक्षमित्येतन्नेन्द्रियार्थसन्निकर्षात् स्मृतित्वात् स्मृतिरेषा नेन्द्रियार्थसन्निकर्षाद्भवितुमर्हति स्मृतावपि तुल्ये यथैव ज्ञातारमन्तरेण ज्ञानं न भवत्येवमनुभवितरि नष्टे अनुभवितारमन्तरेण स्मृतिरयुक्तेति। अस्तु तर्हि मनो ज्ञानं गुणः ॥

युगपज्ज्ञेयानुपलब्धेर्न मनसः ॥ १९ ॥

युगपज्ज्ञेयानुपलब्धेर्न मनसः। तत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनो नातस्तस्य गुणो ज्ञानं विशेषणोपादानादन्यः-करणवद्बहुत्वप्रसङ्ग इति चेत् अथ मन्यसे यत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनो न तस्य गुणो ज्ञानमित्येवं ब्रुवाणेन बहू-

न्यन्तःकरणानि प्रतिपन्नानि भवन्ति न ह्यसत्यन्तःकरणबहुत्वे विशेषणमर्थवदिति। न सर्वस्येन्द्रियस्य मननिमित्तत्वात् सर्वमिन्द्रियं मननिमित्तत्वान्मन इत्युच्यते। एवं च सति विशेषणं युक्तम् युगपज्ज्ञेयानुपलब्ध्या यत् समधिगतं मनो न तस्य गुणो ज्ञानमिति एवमपि विशेषणं व्यर्थम् अन्यस्यानभ्युपगमात्। यदि तस्यान्तःकरणस्य न भवत्यन्यस्य तर्हि साधनस्य ज्ञानं गुण इति प्राप्तम् अन्यस्यानभ्युपगमात्। अन्यस्योपपत्तेरप्रतिषेधः अनवस्थितत्वात् प्रमाणप्रमेयभावस्य यदायं योगी पुरुषान्तरेण पुरुषान्तरं परिच्छिनत्ति तदा पुरुषान्तरपरिच्छेदे पुरुषान्तरं साधनमिति तत्त्वज्ञानगुणं भवतीति युक्तं विशेषणमिति। तस्मान्न तस्य गुणो ज्ञानमिति। कस्य तर्हि ज्ञस्य वशित्वात् वशी ज्ञातावश्यं करणमिति न चायं ज्ञातरि नियमो ज्ञाता वश्येव वश्योऽपि भवतीति। अचेतने तु नियमः अचेतनं तु सर्वं वश्यमिति। वश्यं मनोऽचेतनत्वात् घ्राणादिवदिति। ज्ञानगुणत्वे वा सञ्ज्ञाभेदमात्रम् चित्तं चान्तःकरणं ज्ञानगुणं चेति सञ्ज्ञामात्रं भिद्यते। यथा च ज्ञातुर्ज्ञानसाधनमिन्द्रियमेवं मन्तुर्मतिसाधनेनावश्यं भवितव्यमिति। उभयोश्चेतनत्वे प्रत्ययव्यवस्थानुमानं न स्यात् विभु चान्तःकरणं ज्ञानगुणमिति सर्वेन्द्रियैर्युगपदुपलब्धिप्रसङ्गः॥

तदात्मगुणत्वे ऽपि तुल्यम्॥ २०॥

इन्द्रियैर्मनसः सन्निकर्षाभावात् तदनुत्पत्तिः॥ २१॥

तदात्मगुणत्वे ऽपि तुल्यम्। यस्यात्मा विभुश्च ज्ञानगुणश्च तस्यापि

सर्वेन्द्रियैः सम्बन्धस्याप्रतिषेधाद् युगपदुपलब्धिप्रसङ्गः न प्रसङ्गः कारणान्तरभावात् इन्द्रियार्थसन्निकर्षवदिन्द्रियमनःसन्निकर्षोपि कारणमिति । तस्मायौगपद्यमणुत्वान्मनस इति । यदि पुनरात्मेन्द्रियार्थसन्निकर्षादेव ज्ञानमुत्पद्येत् किं स्यात् ॥

नोत्पत्तिकारणानपदेशात् ॥ २२ ॥

नोत्पत्तिकारणानपदेशात् । अस्मादेवोत्पद्यतामिति न कारणमपदिश्यत इति सूचार्थः । आत्मेन्द्रियार्थसन्निकर्षात् ज्ञानमुत्पद्यत इति । अयुगपदुत्पत्तौ वा न कारणान्तरमपदिश्यत इति विदेहप्रत्ययानुत्पत्तौ वा यदेन्द्रियमर्थेन बहिरवस्थितेन सम्बद्ध्यते आत्मसम्बन्धोऽपि तत्रास्तीति(१) कस्माद्विदेहप्रत्ययो न भवतीति वक्तव्यम् अन्तःकरणप्रत्याख्याने च केवलमात्मा स्मृत्यादिकारणमिति कस्मान्न युगपदुत्पत्तिः स्मृतीनां यदा चेन्द्रियमात्मा चार्थेन युगपत्सम्बद्धौ तदा किमिन्द्रियार्थसन्निकर्षः कारणम् उत आत्मार्थ(२)सन्निकर्षः उतात्मेन्द्रियार्थसन्निकर्ष इति कारणानपदेशः विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २३ ॥

तदात्मगुणत्वे ऽपि तुल्यम् इत्येतदनेन समुच्चीयते यद्यात्मगुणो बुद्धिर्भवति विनाशकारणाभावान्नित्यत्वमस्याः प्रसज्येत कथमिति

---

(१) तस्यास्तीति—पा० ४ पु० । (२) उतात्मार्थयोः—पा० ४ पु० ।

गुणानां द्वौ विनाशहेतू आश्रयाभावो विरोधिगुणप्रादुर्भावश्च तत्र नित्यत्वादात्मनोऽनुपपन्नः पूर्वः विरोधी च गुणो नास्तीति नित्यत्वप्रसङ्गः ॥

अनित्यत्वग्रहणाद्बुद्धेर्बुद्ध्यन्तरादिनाशः शब्दवत् ॥ २४ ॥

अनित्यत्वग्रहणाद्बुद्धेर्बुध्यन्तरादिनाशः शब्दवत्। अनित्या बुद्धिरित्येतत् प्रतिपादितम्। तत्रास्या बुद्ध्यन्तरादा संस्कारादा विनाश इति प्रतिपत्तव्यम्। न द्वे सहेति चेत् अथ मन्यसे न द्वे बुद्धी सह भवतो यतः परया पूर्वा निवर्त्यते तच्च न युगपदुत्पत्तिनिषेधात् युगपदुत्पत्तिः प्रतिषिध्यते न सहभावः न हि बुद्धोर्युगपद्भावे किञ्चिद्विरुध्यत इति लब्धात्मकेन च कार्येण कारणविनाशाभ्युपगमात्। यदा च कर्यं लब्धात्मकं भवति तदा कारणं विनाशयति शब्दवत्। यथा लब्धात्मकः(१) कार्यः शब्दः कारणं शब्दं निर्मार्ष्टि तथा बुद्धिरपीति। अन्ययोर्न स्यादिति चेत् अथ मन्यसे यदि पूर्वौ बुद्धिशब्दौ पराभ्यां विनाश्येते अन्ययोर्बुद्धिशब्दयोः कथं(२) विनाशकारणमिति। यथा चान्त्यौ बुद्धिशब्दौ विना निमित्तादिनश्यतः एवमन्यदपि कार्यमिति। न स्पर्शवद्द्रव्यसंयोगान्न तदुत्पत्तिः(३) स्पर्शवद्द्रव्यसंयोगेनान्त्यशब्दो विरुध्यते। ये कुड्यादिभिः कारणस्य संयोगास्त एकार्थसमवायिनं शब्दं प्रतिबध्नन्ति अतोऽत्यन्तमश्रुतिः शब्दस्येति। अन्त्या बुद्धिः स्थितिहेत्वभावादिनश्यतीति कालादा संस्का-

---

(१) लब्धात्मा—पा० ४ पु०। (२) किं—पा० ४ पु०।

(३) तदनुपपत्तेः—पा० ४ पु०।

रादा कथं कालात् यावन्यस्य जन्मनः स्थितिहेतू धर्माधर्मौ तयोरभावादन्या बुद्धिर्विनश्यतीति कस्मात् पुनरेवमुच्यते न पुनरहेतुको विनाशोऽभ्युपगम्यत इति नाभ्युपगम्यते उक्तदोषात्। निर्हेतुके विनाशे उक्तो दोषः(१) क्षणभङ्गं निराकुर्वद्भिरिति। यदि कारणस्यायौगपद्याद्बुद्धीनामयुगपदुत्पत्तिः यत्र कारणस्य यौगपद्यमस्ति तत्र युगपदुत्पत्तिप्रसङ्गो यथा स्मृतिषु। अत्र तावदेकः परिहारः करणस्यैकक्रियानिर्वृत्तौ सामर्थ्यात् न हि करणमेकस्मिन् काले ऽनेकां क्रियां निर्वर्तयितुं शक्तमिति परिच्छेदत्वाच्च स्मृतीनां ज्ञानवद्युगपदुत्पत्तिरिति। अपरे तु कारणस्यायौगपद्यमुपपादयिष्यन्तः ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिरित्याहुः॥

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः॥ २५॥

एतत्तु न सम्यगिति प्रतिपादयितुमाह। नान्तःशरीरवृत्तित्वान्मनसः॥

नान्तःशरीरवृत्तित्वान्मनसः॥ २६॥

अन्तःशरीरे मनो वर्तत इति को वृत्त्यर्थः। न तावदाश्रयाश्रितभावः न हि मनः क्वचिदाश्रितं नापि वृत्तिः स्वकार्यसामर्थ्यम् बहिःकार्यदर्शनान्मनसाधिष्ठितं चक्षुर्निःसृत्य रूपादि ग्राहयति(२) चक्षुषोर्विसरावोर्मनसः कार्यं तद्भावभावित्वात् न

(१) उक्तो हेतुः—पा० १ पु०। (२) रूपादिमदर्थं ग्राहयति—पा० ४ पु०।

चान्या वृत्तिः सम्भवति तस्माच्चान्तःशरीरवृत्ति मन इति । अत्र ब्रूमः नाश्रयाश्रितभावो[१] मनसो वृत्तिर्नापि कार्यप्रतिलम्भोऽपि तु नाशरीरस्य मनसः कार्यमिति मनसो वृत्त्यर्थः । न ह्यशरीरं मनः पुरुषस्यार्थं करोतीति । साध्यत्वाद्हेतुः ॥

साध्यत्वाद्हेतुः ॥ २७ ॥

अशरीरं मनः पुरुषार्थासमर्थमिति साध्यमेतत् स्मरतः शरीर-धारणोपपत्तेर्न प्रतिषेधः[२] ॥

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥ २८ ॥

स्मरणशरीरधारणे युगपद्भवत इति दृष्टम् दृष्टं च सर्वेण प्रतिपत्तव्यम् चिरनिश्चरिते च मनसि स्मरतः शरीरधारणं न स्यात् । न तदाशुगतित्वान्मनसः ॥

न तदाशुगतित्वान्मनसः ॥ २९ ॥

उभयं सिध्यति स्मरणं धारणं च । न स्मरणकालानियमात् ॥

न स्मरणकालानियमात् ॥ ३० ॥

अनियतः स्मृतिकालोऽतोऽयुक्तमेतत् । शरीरसंयोगानपेक्षं चात्ममनःसंयोगं स्मृतिकारणं ब्रुवतः शरीरस्योपभोगायतनत्वं निवर्तते । ततस्तन्निवृत्तौ शरीरोत्पत्तिवैयर्थ्यमिति ॥

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥३१॥

---

(१) नाश्रयाश्रयिभावो—पा० ४ पु० । (२) रप्रतिषेधः—पा० ४ पु० ।

अपरे तु आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेष इति परिहारं ब्रुवते ॥

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३२ ॥

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्युगपदस्मरणम् ॥ ३३ ॥

प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्गः ॥ ३४ ॥(१)

एतच्च व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानं भवतीत्यपरिहारः । कर्मादृष्टमुपभोगार्थं नियामकं भवतीति न युक्तं समानत्वात् । तस्मात् पूर्व एव परिहारो नान्तःशरीरवृत्तित्वान्मनस इति । यदि तर्हि ज्ञानसमवेतात्मसन्निकर्षायौगपद्यादिति परिहारो नेष्यते प्राप्नः स्मृतीनां युगपदुत्पादः कारणस्य यौगपद्यादिति । नापेक्षाकारणस्यायुगपद्भावात् ।

यतः प्रणिधानाद्यात्ममनःसंयोगस्य सहकारिकारणं तच्च युगपद्भवतीत्ययुगपदुत्पत्तिः स्मृतीनाम् । यदि प्रणिधानाद्यपेक्षात्ममनःसंयोगो न युगपत्स्मृतिकारणं याः स्मृतयः प्रणिधानादिसन्निधानमन्तरेण(२) भवन्ति तासां यौगपद्यं स्यात् नानभ्युपगमात् । न हि प्रणिधानाद्यनपेक्षं स्मार्तमस्ति सतः स्मृतिहेतोरसंवेदनात् ।

प्रातिभेन समानाभिमानोऽयमिति प्रातिभं तर्हि युगपद्भवितु-

(१) न्यायसूचीनिबन्धे सूत्रमिदं नास्ति । (२) सन्निधानाद्यन्तरेण—पा० ४ पु० ।

मर्हति। न हि तस्यासन्निहितं कारणमिति नोक्तोत्तरत्वात्। उक्तोत्तरमेतत् न हि करणस्यानेकक्रियानिर्वृत्ति[१]सामर्थ्यमस्ति प्रातिभं चानेकं ज्ञानं भवदेकस्मिन्नर्थे भवेदथानेकस्मिन्। न तावदेकस्मिन् वैयर्थ्यात्। नानेकस्मिन् सामर्थ्याभावात्। न चायं नियमः प्रत्ययानां यौगपद्यं न भवतीति ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्ययानां यौगपद्यादिति। यदि च ज्ञानसमवेतात्मप्रदेशासन्निकर्षान्न स्मृतीनां युगपदुत्पत्तिः ये संस्कारा एकदेशास्तेष्ववस्थितशरीरस्यानेकज्ञानसमवायादेकदेशे युगपदनेकार्थस्मरणं स्यात्। न चैतदस्तीति अतश्चापरीक्षा दृति। अवस्थितशरीरस्य संस्काराः समानदेशा दृत्ययुक्तम्। आत्मप्रदेशानामद्रव्यान्तरत्वात्। एवं सति सर्वसंस्काराणां समानदेशत्वे प्रत्ययथौगपद्यप्रसङ्गोऽपरिहार्यः। संस्कारप्रत्यासत्त्या स्मृतियौगपद्यं न भवतीति का प्रत्यासत्तिः न हि संस्काराणां सन्निकृष्टविप्रकृष्टभावोऽस्ति समानदेशत्वात्। न ब्रूमः सन्निकृष्टता प्रत्यासत्तिरपि तु संस्कारस्य सहकारिकारणसमवधानं प्रत्यासत्तिः शब्दवत् यथा शब्दाः सन्तानवर्तिनः सर्व एवाकाशे[२] समवयन्ति समानदेशत्वे ऽपि यस्योपलब्धेः कारणानि सन्ति स उपलभ्यते नेतरे तथा संस्कारेष्वपीति। पुरुषस्य ज्ञानमिच्छादयोऽन्तःकरणस्येति कस्यचिद्दर्शनं तत्प्रतिषिध्यते ज्ञस्येच्छादेषनिमित्तत्वादारम्भनिवृत्त्योः॥

ज्ञस्येच्छादेषनिमित्तत्वादारम्भनिवृत्त्योः॥ ३५॥

---

(१) निमित्त—पा० १ पु०।

(२) सर्वत्रैवाकाशे—पा० १ पु०।

ज्ञातुरेवेच्छादय इति सूत्रार्थः । यद्यन्तःकरणस्येच्छादयः स्युर्न प्रत्यक्षाः स्युः न हीच्छादयोऽन्यत्र वर्तमाना अन्यस्य प्रत्यक्षा भवितुमर्हन्तीति । नित्यं चेच्छादयोऽप्रत्यक्षाः स्युः मनो गुणानामतीन्द्रियत्वात् । आरम्भनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात् परत्वानुमानम् ॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥ ३६ ॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः । प्रवृत्तिनिवृत्तिभ्यां सामानाधिकरण्यात् शरीरादिष्वप्रसङ्ग इति सूत्रार्थः ॥

परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३७ ॥

परश्वादिष्वारम्भनिवृत्तिदर्शनादनेकान्तो वाक्यार्थः ॥

नियमानियमौ तु तद्विशेषकौ ॥ ३८ ॥

नियमानियमौ तु तद्विशेषकौ । प्रयुज्यमानभूतविषयत्वं प्रवृत्तिनिवृत्त्योर्नियमः यानि भूतानि प्रयुज्यन्ते तेषु प्रवृत्तिनिवृत्ती भवतो न सर्वेष्विति । यदि पुनर्ज्ञत्वाद्भूतानां प्रवृत्तिनिवृत्ती स्यातां भूतमात्रे स्याताम् यथा गुरुत्वादिभ्यो यानि गुरुत्वादिमन्ति भूतानि तानि स्वगुणात् पतन्तीति नियमश्च दृष्टः तस्माच्च भूतानि चेतनानीति एकशरीरे च ज्ञात्रबहुत्वं निरनुमानमिति । यस्य भूतानि चेतनानि तस्यैकशरीरे बहूनि भूतानीति बहवश्चेतनाः स्युः । भवन्तु बहवश्चेतनाः किन्नो बाध्यत इति चेत् न बहुत्वे प्रत्ययव्यवस्थानानुमानं भवेत् अव्यवस्थानं तु पश्यामः

प्रत्ययानां प्रतिसन्धानात् सर्वः प्रत्ययः प्रतिसन्धीयमान एकस्मिन् कार्यकारणसङ्घाते दृष्ट इति। अन्यथाभिधानाच्च हिताहितप्राप्तिपरीहारार्थः परिस्पन्दः प्रवृत्तिनिवृत्ती भवता तु क्रियामात्रं क्रियोपरमं चाश्रित्य तस्मिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेध इत्युक्तम् यथाविधे च प्रवृत्तिनिवृत्ती प्रयुज्यमानभूताधारत्वेन तथाभूते[१] भूतमात्रे भवत इति भूतेन्द्रियमनसां समानः प्रतिषेधः मनस्त्वदाहरणमात्रम् ॥

यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ॥ ३९ ॥

यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः। यथोक्तहेतुत्वादिति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनां हेतूनामप्रतिषेधात्। पारतन्त्र्यादिति परतन्त्राणि शरीरेन्द्रियमनांसि धारणप्रेरणव्यूहनक्रियासु प्रयत्नवशात् प्रवर्तन्ते चैतन्ये पुनः स्वतन्त्राणि स्युः। अकृताभ्यागमाच्च चेतनत्वाच्छरीरादीनां तैः कृतं कर्म पुरुषेण भुज्यत इति अकृतकृतागमनाद्यदोषप्रसङ्गः अचेतनत्वे तु तत्साधनस्य स्वकृतकर्मफलोपभोग इति अथायं सिद्धोपसङ्ग्रहः परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥

परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४० ॥

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥ ४१ ॥

आत्मनो गुणो ज्ञानमिति प्रकृतम्। यथोक्तहेतूपपत्तेरिति

(१) तथाविधे—पा० ४ पु०।

आत्मप्रतिपादकानां हेतूनामप्रतिषेधात्। परिशेषादिति शरीरेन्द्रियमनसां प्रतिषेधादन्यस्य च शिष्यमाणस्यासम्भवात् आत्मनश्च शिष्यमाणत्वात् तस्य गुणो ज्ञानमिति। उपपत्तेरिति वा स्वतन्त्रो हेतुः आत्मनित्यत्व इति कस्योपपत्तेः संसारापवर्गयोरुपपत्तेरित्येवमादि भाष्ये। स्मृतिहेतूनामयौगपद्यादयुगपत्स्मरणमित्युक्तम्। अथ केभ्यः स्मृतिरुत्पद्यत इति स्मृतिकारणानामयौगपद्यप्रतिपादनार्थम् प्रणिधानादि सूत्रम्॥

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः॥ ४२॥

एवमुपपन्नमनित्या बुद्धिरिति॥

अनित्यायां च बुद्धावुत्पन्नापवर्गित्वात् कालान्तरावस्थितत्वाच्च[१] संशयः उत्पन्नापवर्गिणी बुद्धिः शब्दवत् आहो कालान्तरस्थायिनी[२] कुम्भवदिति उत्पन्नापवर्गिणीति युक्तम् कः पुनरयमर्थः उत्पन्नापवर्गिणीति अन्येभ्योऽपिविनाशिभ्य आशुतरं विनश्यतीति न त्वयमर्थ उत्पत्त्यनन्तरं ध्वंसत[३] इति। कः पुनरत्र न्यायः आशुतरविनाशिनी बुद्धिः जातिमत्वे सत्यस्मदादिप्रत्यक्षतायां व्यापकद्रव्यसमवायात् शब्दवत् प्रतिक्षणमपूर्वोत्पत्तौ[४] करणत्वे सति प्रत्यर्थप्र-

(१) वस्थायित्वाच्च—पा० ४ पु०। (२) कालान्तरावस्थायिनी—पा० ४ पु०

(३) ध्वंस इति—पा० १ पु०। (४) अयुगपदुत्पत्तौ—इत्यधिकं १ पु०।

काग्रकत्वात् यस्य प्रतिक्षणमपूर्वोत्पन्नपदार्थप्रकाग्रकत्वं करणत्वे सति तस्याशुतरविनाशित्वं दृष्टं यथा प्रदीपस्य प्रतिक्षणमपूर्वोत्पन्नान्[१] प्रध्वंसिनः पदार्थान् बुद्धिः प्रत्यर्थनियमेन प्रकाग्रयति तस्मादियमप्याशुतरविनाशिनीति। अथवा आशुतरविनाशिनी बुद्धिः गुणत्वे सत्यबाह्यकरणप्रत्यक्षत्वात् सुखवदिति। अस्यार्थस्य ज्ञापनार्थं कर्मानवस्थायिग्रहणादिति सूत्रम् ॥

कर्मानवस्थायिग्रहणात् ॥ ४३ ॥

यदि तर्ह्यनवस्थायिपदार्थेषु अनवस्थिता बुद्धिः अथ यदा बुद्धिस्थितं[२] कुम्भादिकमुपलभ्यते तदा किं कुम्भवत् कालान्तरावस्थायिनी उताशुविध्वंसिनीति। अवस्थितग्रहणे ऽपि प्रत्यक्षनिवृत्तेः प्रध्वंसिनी यदाप्यवस्थितं कुम्भादिकमुपलभते तदापि सन्तानेनैव बुद्धयो निवर्तन्ते कस्माद्व्यवहिते प्रत्यक्षनिवृत्तेः यदि कुम्भवत् कालान्तरावस्थायिनी बुद्धिरभविष्यत् व्यवहिते ऽपि प्रत्यक्षमवास्थास्यत् न त्ववतिष्ठते तस्मान्न कालान्तरावस्थायिनीति। स्मृतेरवतिष्ठत इति चेत् यदि बुद्धिर्ध्वंसिनी स्यात् स्मृतिर्न स्यात् न हि बुद्धिभेदे स्मृतिं पश्याम इति यथा पुरुषान्तरबुद्धिषु अस्ति च स्मृतिः तस्मादवतिष्ठते बुद्धिरिति नात एवानवस्थानात् न हि बुद्धावव-स्थितायां स्मृतिः सम्भवति स्मृतिर्नाम प्रत्यक्षबुद्धिनिरोधे तत्पूर्वको विषयप्रतिसन्धिः यथेदमद्राक्षमिति एतच्च न प्रत्यक्षबुद्धाववस्थितायां युक्तमिति अन्यतश्च तद्भावात् स्मृतिरलिङ्गमिति येयं स्मृतिर्बुद्धावव-स्थानलिङ्गत्वेनाभ्युपगम्यते नेयं लिङ्गमन्यतस्तद्भावात् अवतिष्ठते हि

(१) प्रतिक्षणमुत्पन्नान्—पा० ४ पु०। (२) यदावस्थितं—पा० ४ पु०।

बुद्धिजः संस्कार इति ततः प्रणिधानादिनिमित्तापेक्षात् स्मृतिरिति । हेत्वभाव इति चेत् अथ मन्यसे संस्कारात् स्मृतिर्न बुद्ध्यवस्थानादित्यत्र को हेतुः स्मृतिरेव यद्यवतिष्ठते बुद्धिः स्मृतिर्न स्यादिति ॥

अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ॥ ४४ ॥

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥ ४५ ॥

अव्यक्तग्रहणमनवस्थायित्वात् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् । यद्यनवस्थायिनी बुद्धिरव्यक्तं व्यक्तस्य ग्रहणं प्राप्नोति यथा विद्युत्प्रकाशितानामव्यक्तग्रहणमिति न विरोधात् अव्यक्तग्रहणादवस्थायिनी बुद्धिरिति ब्रुवाणोऽनवस्थायिनी बुद्धिरिति यत्प्रतिषेध्यं[१] तदभ्यनुजानासि तस्य चाभ्यनुज्ञानाद्यदुक्तं कालान्तरावस्थायिनी बुद्धिरिति तद्बाधितं भवति अव्यक्तग्रहणस्य चान्यनिमित्तत्वात् नाव्यक्तग्रहणाद् बुद्ध्यनवस्थानं सिद्ध्यति । यत्तद्व्यक्तमव्यक्तं च ग्रहणं न बुद्धेरवस्थानानवस्थानाभ्यामपि तु ग्रहणहेतोर्भेदादिति तदसम्भवाच्च नाव्यक्तं नाम ग्रहणमस्ति कस्मात् अर्थग्रहणमात्रत्वाद् बुद्धेः अर्थग्रहणमात्रं बुद्धिः । तच्चार्थग्रहणं सामान्यतो विशेषतश्च यच्च सामान्यविषयं तत्सामान्यं प्रति व्यक्तम् एवं विशेषविषयम् एवं तद्द्विषयमिति । तदिदमव्यक्तग्रहणं देशितम् कथमेकस्मिन्[२] विषये बुद्ध्यनवस्थानकारितं स्यात् लोकविरोध इति चेत् यदि

(१) प्रतिषेद्धव्यम्—पा० ४ पु० । (२) कतमस्मिन्—पा० ४ पु० ।

तर्हि व्यक्ताव्यक्तग्रहणे न स्यातां योऽयं व्यवहारो लोकेषु व्यक्तं[1] पश्यामीति स कथम् नान्यथा तदुपपत्तेः। नायं सामान्यविशेषतद्वत्सु व्यक्ताव्यक्तग्रहणभेदोऽपि तु धर्मिणः सामान्यतोऽधिगतस्य विशेषत उपलिप्साद्वारकमव्यक्तग्रहणमिति। अनेकान्ताच्च नायमेकान्तोऽस्ति यद्विषयग्रहणहेतोर्ग्राह्यस्य चानवस्थानं तत्राव्यक्तग्रहणम् ॥

न प्रदीपार्चिषः सन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम् ॥ ४६ ॥

न प्रदीपार्चिषः सन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम्। अनवस्थायित्वे ऽपि यथा प्रदीपार्चिषां सन्तत्या वर्तमानानां ग्राह्यानवस्थानं ग्रहणानवस्थानं च भवति भवति च व्यक्तं ग्रहणमर्चींषीति यथार्चिःषु तथान्यत्रापीति व्यवस्थितं क्षणिका बुद्धिरिति। शरीरगुणश्चेतना सति शरीरे भावादसति चाभावादिति। यच्च यस्मिन् सति भवति असति च न भवति तस्य तदिति विज्ञायते यथा रूपादय इति। न सति भावात् शरीरगुणत्वं चेतनायाः सिद्ध्यति सति भावस्यान्यगुणत्वे ऽपि दर्शनात्। न तावत् संयोगविभागसंस्काराः कर्मगुणाः अथ च सति कर्मणि भावोऽसति चाभाव इति। संयोगविभागशब्देषु च सत्सु शब्दो भवत्यथ च न तद्गुण इति तद्गुणत्वं च तत्रोपलब्ध्या सिद्ध्यति यद्यत्र वर्तमानमुपलभ्यते रूपादिकं तत्तस्य गुण इति। अथ सति भावादित्यनेन शरीरे चेतनोपलब्धिं ब्रूयात् तस्याप्यसिद्धता दोषः न हि शरीरे चेतनोपलभ्यते

(१) लोकेन व्यक्तं—पा० ४ पु०।

चेतनामात्रं तूपलभ्यते तच्च सन्दिग्धं किं शरीरे उतान्यस्मिन् इति उपेत्य शरीरे चेतनोपलब्धिं किं शरीरगुणश्चेतना उत द्रव्यान्तरगुण इति द्रव्ये स्वगुणपरगुणोपलब्धेः संशय इत्युक्तार्थं सूत्रम् ॥

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ४७ ॥

न शरीरगुणश्चेतना यावद्द्रव्यभावित्वा[१] द्रूपादीनाम् दृष्टान्तसूत्रम् ॥

यावद्द्रव्यभावित्वाद्रूपादीनाम् ॥ ४८ ॥

वैधर्म्येण ये शरीरगुणा भवन्ति ते यावच्छरीरं वर्तन्ते यथा रूपादयः न तु यावच्छरीरं चेतना वर्तते तस्मान्न तद्गुण इति। साधर्म्येण वा न तद्गुण इति यथाप्यूष्णतेति[२]। संस्कारवदिति चेत् अथ मन्यसे यथा संस्कारः शरीरगुणो न च यावच्छरीरं वर्तते तथा चेतनापीति न कारणानुच्छेदात् संस्कारस्य न शरीरमात्रं कारणं तस्य नोदनादिकारणसन्निधाने तदभावे भावाभावौ युक्तौ कारणसन्निधानवतोयुक्तमेतदिति। चेतनानिमित्तस्याप्यसन्निधानमिति चेत् अथ मन्यसे यथैव संस्कारस्य कारणमसन्निहितमेवं चेतनाकारणमपीति तदयुक्तम् विकल्पानुपपत्तेः यच्छरीरे चेतनोत्पत्तिकारणं तत्किं शरीरस्थमुत द्रव्यान्तरस्थम् शरीरस्थमपि किं यावच्छरीरभावि उत नैमित्तिकमिति। यदि यावच्छरीरभावि न कदाचिच्चेतनाहीनं शरीरमुपलभ्येत निमित्तस्य सन्निहितत्वात् अथ नैमित्तिकं यच्छरीरे चेतनोत्पत्तेर्निमित्तस्य कारणं

(१) यावच्छरीरभावित्वा—पा० ४ पु०। (२) यथाप्स्वग्न्युष्णतेति—पा० ४ पु०।

तत्रापि[१] चेतनावत्प्रसङ्गः । अथ द्रव्यान्तरस्थं द्रव्यान्तरवृत्तिनिमित्तं शरीरे चेतनां करोति न द्रव्यान्तरेष्वित्यत्रापि नियमहेतुर्वक्तव्यः । द्रव्यान्तरस्थं च नित्यमनित्यं वा अनित्यमपि कालान्तरावस्थायि क्षणप्रध्वंसि वेति[२] चेतनावत् प्रसङ्गः । यच्च मन्येत श्यामादिगुणं च द्रव्यं भवति न च यावद्द्रव्यभाविनो श्यामतेति तच्च न पाकजगुणान्तरोत्पत्तेः ॥

न पाकजगुणान्तरोत्पत्तेः ॥ ४९ ॥

नात्यन्तं श्यामतोपरमे[३] रूपान्तरोत्पत्तिः चेतनोपरमस्यात्यन्त इति । इतश्च प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५० ॥

यावत्सु द्रव्येषु पूर्वगुणप्रतिषेधस्तावत्सु प्रतिद्वन्द्विनो गुणान्तरस्य दर्शनम् यथा श्यामनिवृत्तौ रक्तादीनामिति । न पुनः शरीरे चेतनाविपरीतं गुणान्तरमुपलभ्यते चेतनामात्रोपरमस्यात्यन्त इति । अथ मन्यसे शरीरेष्यचेतनत्वं नाम[४] गुणान्तरमिति तन्न स्वरूपतोऽनिर्देशात् यत्तदचेतनत्वं नाम किं तत् चेतनाविपरीतं धर्मभूतं वस्तु उत चेतनाविप्रतिषेधमात्रमिति यदि विपरीतं चेतनावत् संवेद्यं स्यात् अथ चेतनाविप्रतिषेधमात्रं तन्न गुण इति ॥

शरीरव्यापित्वात् ॥ ५१ ॥

इतश्च न शरीरगुणश्चेतना शरीरव्यापित्वात् शरीरवत् शरीरा-

---

(१) तदापि—पा० १ पु० । (२) प्रतिक्षणं ध्वंसि वेति—पा० ४ पु० ।
(३) श्यामरूपोपरमे—पा० ४ पु० । (४) अचेतना नाम—पा० ४ पु० ।

वयवाश्चेतनोत्पत्त्या व्याप्यन्ते। को व्याप्त्यर्थः न कश्चित् शरीरावयव-श्चेतनाहीनो भवतीति सर्वस्य चेतनानिमित्तत्वात् शरीरवच्छरीरावयवाश्चेतनाः प्राप्नुवन्ति। भवन्तु शरीरावयवाश्चेतनाः न प्रत्ययव्यवस्थाप्रसङ्गात् शरीरवच्छरीरावयवाश्चेतना इति प्रत्ययव्यवस्थानं स्यात् न शरीरावयवाश्चेतनाः केशनखादिष्वनुपलब्धेः इति दृष्टान्तसूचम्॥

न[१] केशनखादिष्वनुपलब्धेः॥ ५२॥

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः॥ ५३॥

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः संयोगिद्रव्यं केशनखादयो न तु शरीरावयवा इति तस्मान्नायं प्रसङ्ग इति। इतश्च न शरीरगुणश्चेतना शरीरगुणवैधर्म्यात्॥

शरीरगुणवैधर्म्यात्॥ ५४॥

द्वये शरीरगुणा भवन्ति बाह्यकरणप्रत्यक्षाः रूपादयोऽतीन्द्रियं च गुरुत्वं विधान्तरं तु चेतना न बाह्यकरणप्रत्यक्षा सुसंवेद्यत्वात् नातीन्द्रिया मनोविषयत्वात् तस्मान्न शरीरगुण इति न रूपादीनामितरेतरवैधर्म्यात्॥

न रूपादीनामितरेतरवैधर्म्यात्॥ ५५॥

यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वमतिवर्तन्ते तथा रूपादिवैधर्म्ये सति चेतना शरीरगुणत्वं न हास्यति॥

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः॥ ५६॥

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः। द्वये शरीरगुणा भवन्ती-

(१) न—इति नास्ति ४ पु०।

त्युक्तः सूत्रार्थः। रूपादीनामितरेतरवैधर्म्यमननुसंहितं चाव्यावृत्तं चेति वैधर्म्यमात्रमन्वयव्यतिरेकि तु चेतनयाः शरीरगुणत्वसाधनं न भवतीति तस्मादसममेतत्। ये हेतवोऽनेन प्रकरणेन[१] लभ्यन्ते तेषां प्रयोगः न शरीरगुणश्चेतना निमित्तान्तराभावे विरोधिगुणादर्शने च सत्ययावद्द्रव्यभावित्वात् अप्सु औष्ण्यवदिति शरीरव्यापित्वादिति तु न साधनं किन्तु शरीरे चेतनां ब्रुवतो दोषोऽनेकचेतनत्वप्रसङ्गः न शरीरगुणश्चेतना बाह्यकरणाप्रत्यक्षत्वात् सुखादिवदिति। अथेदं प्रकरणं निर्णीतार्थं कस्मात्पुनरारभ्यमिति बहुधा परीक्ष्यमाणं तत्त्वं[२] निश्चिततरं भवतीत्यत आरभ्यत इति परीक्षिता बुद्धिरिति ॥

मनोऽवसरप्राप्तं परीक्ष्यते तत् प्रतिशरीरमेकमनेकमिति वा विचारे ज्ञानायौगपद्यादेकं मनः ॥

ज्ञानायौगपद्यादेकं मनः ॥ ५७ ॥

अयुगपज्ज्ञानानि भवन्तीति प्रत्यक्षम् एतच्च मनस एकत्वं साधयति। कथमिति यदि बहूनि मनांसि स्युः प्रतीन्द्रियं मनसः सम्बन्ध इति युगपदनेकार्थसन्निधाने युगपदनेकज्ञानानि भवेयुः यत्त्वेकेन्द्रियग्राह्येष्वर्थेषु विज्ञानानामयुगपद्भावः तन्न मनस एकत्वे लिङ्गं अन्यत्रलङ्गभावात् अन्यथा हि करणत्वात्तद्भवतीत्युक्तम् ॥

न युगपदनेकक्रियोपलब्धेः ॥ ५८ ॥

न युगपदनेकक्रियोपलब्धेरिति। शेषं भाष्ये। अस्योत्तरद्वारकं सूत्रम् ॥

---

(१) प्रकारेण—पा० १ पु०। (२) परीक्षितं तु—पा० ४ पु०।

आलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात् ॥५९॥

आलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात् । यथालातस्य भ्रमतो विद्यमानः क्रमो नोपलभ्यते तथा बुद्धीनामाशुभावाद्विद्यमानः क्रमो नोपलभ्यते न चास्युभयपक्षसम्प्रतिपन्ना[१] युगपदुत्पत्तिर्यया बद्धलं मनसः प्रतिपद्येमहीति ॥

यथोक्तहेतुत्वाच्चाणु[२] ॥ ६० ॥

यथोक्तहेतुत्वाच्चाणु[३] य एवैकत्वे हेतुर्मनस उक्तोऽनेनैवाणु मनोऽवसातव्यमिति । मनसः खलु भोः सेन्द्रियशरीरे वृत्तिः शरीरे विचार्यमाणे[४] मन एव विचारितं भवत्यतः शरीरं पुनर्विचार्यते। किमयं शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यते आहोस्वित् सापेक्षैरिति विप्रतिपत्तेः संशयः। श्रूयते खल्वत्र विप्रतिपत्तिः तत्रेदं तत्त्वं पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ६१ ॥

पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीरारम्भलक्षणा तत्पूर्वकृतं तस्य फलं तज्जनितौ धर्माधर्मौ तयोरनुबन्ध आत्मसमवेतयोरवस्थानं विपाककालस्यानियमात् अनियतो विपाककाल इहामुत्र जात्यन्तरे चेति तेनावस्थितेन प्रयुक्तेभ्यो भूतेभ्यः तस्य शरीरस्योत्पत्तिर्न स्वतन्त्रेभ्यः कस्मात् पुनः कर्म धर्माधर्मसञ्ज्ञकमुत्पत्तिसमकालं फलं न

---

(१) न चास्योभयपक्षसम्प्रतिपन्ना—पा० ४ पु० ।

(२) यथोक्तनिमित्तत्वाच्चाणु—पा० ४ पु० ।

(३) यथोक्तनिमित्तत्वाच्चाणु—पा० ४ पु० । (४) विचारिते—पा० ४ पु० ।

ददाति। क एवमाह न ददातीति विपाककालस्यानियमात् यदा-शेषकारणसन्निधानं भवति सन्निधाने ऽपि यदा कारणान्यप्रतिबद्धानि भवन्ति तदा ददात्येव[१] यदा पुनर्न ददाति तदा विपच्यमानकर्मातिशयप्रतिबन्धात् यो विपच्यमानः कर्मातिशयो भवति यस्य धर्माधर्मसमाख्यातोऽनुपभुक्तफलः तेन प्रतिबन्धात् विद्यमानमपि कर्मफलं न ददाति। यानि वा प्राण्यन्तराणि तस्य कर्मणः समानोपभोगानि तेषां विपच्यमानैः कर्मातिशयैः प्रतिबन्धात् न सर्वदा फलं यानि वा प्राण्यन्तराणि कर्मभागीनि तस्य कर्मणस्तत्कर्मभिः प्रतिबन्धात् तस्य वा कर्मणः सहकारिधर्माधर्मलक्षणं निमित्तं नास्तीत्यतः फलस्यानारम्भः तस्य वा सहकारिणः प्रतिबन्धात् सत्त्वान्तरकर्मणां वा सहकारिणां प्रतिबन्धात् न सर्वदा फलं धर्माधर्मौ प्रयच्छत इति। दुर्विज्ञेया च कर्मगतिः सा न शक्या मनुष्यधर्मेणावधारयितुम् आकृतिमात्रं तूक्तम्। कः पुनरत्र न्यायः कर्मतन्त्राणि भूतानि शरीरमारभन्ते न निरपेक्षाणीति। अयं न्यायोऽभिधीयते पुरुषविशेषगुणप्रेरितभूतपूर्वकं शरीरं कार्यत्वे सति पुरुषार्थक्रियासामर्थ्यात् यत् पुरुषार्थसमर्थं तत् पुरुषविशेषगुणप्रेरितभूतपूर्वकं दृष्टं यथा रथादि पुरुषविशेषगुणेन प्रयत्नेन प्रेरितैर्भूतैरारभ्यमाणं पुरुषार्थक्रियासमर्थं दृष्टं तथा च शरीरम् तस्मादिदमपि सापेक्षैर्भूतैरारभ्यते सुखदुःखनिमित्तत्वात् घटादिवदिति। दृतश्च कार्यत्वात् रथादिवत् बाह्यकरणग्राह्यत्वे सति[२] रूपादिमत्वात् घटादिवदेव। अत्र नास्तिक एवमाह भूतेभ्योमूर्त्युपादानवत् तदुपादानम्॥

(१) ददात्यपि—पा० ४ पु०। (२) बाह्यकरणप्रत्यक्षत्वे सति—पा० ४ पु०।

भूतेभ्योमूर्त्युपादानवत् तदुपादानम् ॥ ६२ ॥

यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वर्त्यामूर्तयः सिकताशर्करागैरिकाञ्जनप्रभृतयः पुरुषार्थक्रियाकारित्वादुपादीयन्ते तथा शरीरसर्गोपीति पुरुषार्थक्रियासामर्थ्यादित्येतस्य हेतोरनैकान्तिकद्वारकं सूत्रम् । साधनपक्षे दृष्टान्तमात्रत्वादसिद्धम् अथ पक्षः कर्मनिरपेक्षाणि भूतानि शरीरमारभन्ते पुरुषार्थक्रियासामर्थ्यात् सिकतादिवदिति । एतच्च न साध्यसमत्वात् ॥

न साध्यसमत्वात् ॥ ६३ ॥

यथैव शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यत इति साध्यं तथा सिकतादीनामकर्मनिमित्तः सर्गः साध्यत इति । सिकतादीनामपि कर्मनिमित्तः सर्ग इत्येतस्मादेव हेतोः सिध्यतीति । यथा चोभयपक्षसम्प्रतिपन्नो रथादिर्दृष्टान्तः पुरुषविशेषगुणप्रेरितभूतपूर्वकोस्ति न तथा अकर्मनिमित्तसर्गपक्षे दृष्टान्तोऽस्तीति विषमश्चायमुपन्यासः भूतेभ्योमूर्त्युपादानवदिति । नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६४ ॥

मातापित्रशब्देन शोणितरेतसी बीजभूते गृह्येते तत्र पित्रोः पुत्रफलानुभवनीये कर्मणी सत्त्वस्य गर्भवासानुभवनीयं कर्म सहमातृगर्भाशये शरीरोत्पत्तिं प्रयोजयति तत्र चोत्पन्नं बीजानुविधानं बीजानुविधानाच्च यज्जातीयौ तस्य पितरौ तज्जातीयः सम्भवतीति ॥

तथाहारस्य ॥ ६५ ॥

तथाहारस्य उत्पत्तिनिमित्तत्वादिति प्रकृतम् । एतदपि सिक-

तादिभिर्वैधर्म्यमेवोच्यते अशितपीतमाहारः तस्य पाकाद्रसद्रव्यं निर्वर्त्यते तस्माद्वशरीरे[१] उपचीयते गर्भशरीरे चोपहितं[२] कललादिभावेनोपचीयमानं कर्मसापेक्षैर्भूतैः पाण्यादिभावमापद्यते। यदि पुनः कर्मनिरपेक्षाणि भूतानि स्युः स्याल्यादिगतमिवान्नं पच्येत न त्विदमस्ति तस्मात् सापेक्षाणीति प्राप्तौ चानियमात् ॥

प्राप्तौ चानियमात् ॥ ६६ ॥

कर्मनिरपेक्षाणि भूतानि शरीरमारभन्त इति सर्वो दम्पत्योः संयोगः पुत्रादिफलकः स्यात्। कर्मसापेक्षेषु भूतेषूपपन्नो नियमाभाव इति। सर्वात्मभिः सम्बन्धात् साधारणविग्रहवत्त्वप्रसङ्गः। नियमहेत्वभावादिति चेत् अथ मन्यसे शरीरं सर्वात्मभिः सम्बध्यते संयोगजेन च संयोगेन क्रियाजेन वा तच्च शरीरादिगतो न कश्चिन्नियमहेतुरिति येन शरीरमेव तस्यात्मनो व्यवतिष्ठेत न च पुरुषगतो विशेषः कश्चिद्विद्यते येन शरीरमेकस्य पुरुषस्य उपभोगसाधनं भवेत् अस्ति च नियमः तस्माद्वक्तव्यो नियमहेतुरिति। अस्योत्तरद्वारकं सूत्रं शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ॥

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ॥ ६७ ॥

येनैव कर्मणा शरीरमुत्पाद्यते तदेव संयोगं नियमयति अकर्मनिमित्ते तु शरीरसर्गे यथोक्तदोष इति। तत्स्थता कुत इति चेत् अथ मन्यसे यदि कर्म नियामकं शरीरसर्गस्याथ कर्मणि

(१) तस्माच्च शरीरे च—पा० १ पु०। (२) उपचितं—पा० ४ पु०।

कुतो नियम इति न स्वसंयोगोत्पत्तिनियमात् यो यस्यात्मनः संयोगः तस्माद्यत् कर्मोपजायते तत्तस्य भवतीति । संयोगे कुतो नियम इति यथैव कर्मणि पर्यनुयोगो न व्यावर्तते तथा संयोगेऽपीति न मनोनियमहेतुत्वात् यस्यात्मनो यन्मनस्तेन यः संयोगो जन्यते स तस्य भवतीति मनस्यपि तुल्यम् मनसस्तर्हि सर्वात्मभिः सम्बन्धात् किं नियामकमिति कर्मैव यन्मनो यदीयेन कर्मणा उपनिबद्धं तदीयं तद्भवतीति। सर्गादौ कथमिति चेत् सर्गादेरनभ्युपगमाददोष्यम् अनादिः संसारः पूर्वाभ्यस्तसूत्रे प्रतिपादितमेतत् आदिमति संसार एष दोषो नानादाविति ॥

एतेनानियमः प्रत्युक्तः ॥ ६८ ॥

एतेनानियमः प्रत्युक्तः । कः पुनरयं नियमः यथैकस्यात्मनः शरीरं तथा सर्वात्मनामिति नियमः अन्यस्यान्यथाऽन्यस्यान्यथेत्यनियमो भेदो व्यावृत्तिर्दृष्टः शरीरभेदः प्राणिनामनेकरूपः स च कर्मनिरपेचैर्भूतैः शरीरारम्भे न युक्तः कर्मणां भेदाच्छरीराणि भिद्यन्त इति युक्तम् उपपन्नश्च तद्वियोगः कर्मचयोपपत्तेः । द्वे शरीरस्य प्रकृती व्यक्ता चाव्यक्ता च। तत्राव्यक्तायाः कर्मसमाख्यातायाः प्रकृतेरूपभोगात् प्रचयः प्रचीणे च[१] कर्मणि विद्यमानानि भूतानि न शरीरमुत्पादयन्तीति उपपन्नोऽपवर्गः कर्मनिरपेचेषु कस्य प्रचयान्मोचमाणा अपवर्ज्येरन् भूतलचणायाः प्रकृतेरनुच्छेदात् ॥

तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥ ६९ ॥

(१) प्रचीयमाणे च—पा० ४ पु० ।

अदृष्टकारितमिति चेत् अथ मन्यसे अदृष्टकारिता शरीरोत्पत्तिः अदृष्टशब्देनादर्शनमुच्यते अदर्शनमदृष्टमिति सर्गादौ प्रधानं पुरुषार्थेन हेतुना प्रवर्तते तत्तु प्रवर्तमानं महदादिभावेन शरीरमुत्पादयति उत्पन्ने शरीरे द्रष्टा दृश्यं पश्यतीति। दृश्यं च द्वेधा विषयो नानात्वं च प्रकृतिपुरुषयोः दृष्टेन प्रधानं चरितार्थत्वान्न प्रवर्तत इति तदेवमदर्शनं शरीरसर्गहेतुस्तद्भावभावित्वादिति[1] एतस्मिन् खल्वदर्शने पुनस्तत्प्रसङ्गोऽपवर्गे। या च प्राक् प्रवृत्तेर्दर्शननिवृत्तिवद्दर्शनाभिमता या चोत्तरकालं निवृत्ते सर्गे नैतयोरदर्शनयोः कश्चिद्विशेषः अदर्शननिमित्ता चेत् शरीरोत्पत्तिर्भवति तेन यथा प्राक् नानात्वदर्शनात् प्रधानं पुरुषार्थं प्रवर्तते तथापवृक्तेऽपि प्रवर्तेत न चैवमभ्युपगम्यते तस्मान्नादर्शनं शरीरसर्गे कारणमिति। चरितार्थतया विशेषो[2] भविष्यतीति न युक्तं न चरितार्थानामचरितार्थानां च भूतानां पुनरारम्भदर्शनात् आद्येन शरीरेण रूपाद्युपलब्धेः कृतत्वाद् द्वितीयादिशरीरं शब्दाद्युपलब्धिसाधनं न स्यात् भवति च शब्दाद्युपलब्धिसाधनं द्वितीयादिशरीरं तेन गम्यते चरितार्थान्यपि भूतानि पुनः शरीरमारभन्त इति। पुरुषार्थेन च हेतुना पुनः शरीराण्यारभन्त इति पुरुषार्थश्च पुरुषप्रधाननानात्वदर्शनं तस्य चाकारणादनर्थकः शरीरारम्भो भवेदिति। दिदृक्षाविशेषोऽदर्शनमिति चेत् अथ मन्यसे नादर्शनं दर्शनाभावः किन्तु दिदृक्षादर्शनमित्युच्यते सा चापवृक्ते प्रधाने दिदृक्षा न भवतीति न प्राक्प्रवृत्तेस्तदभावात् यावत्प्रधानं महदादिभावेन न परिणमते तावत्

(१) स्वभावभावादिति—पा० १ पु०। (२) चरितार्थतानिर्विशेषो—पा० ४ पु०

दृष्ट्या नास्ति कथं कारणं भविष्यति प्रवृत्तेरिति सर्वशक्तिमत्वात् तदाप्यस्तीति चेत् अथ मन्यसे सर्वाः कारणशक्तयः प्रधाने विद्यन्ते तदिदमात्मभूताभिः कारणशक्तिभिः सर्वशक्तिमत्प्रधानं सर्वशक्तिमत्वाच्च प्रागपि प्रवृत्तेः प्रधाने दिदृक्षास्तीति न अपवर्गाभावप्रसङ्गात् दिदृक्षावन्नानात्वदर्शनमप्यस्तीत्यपवर्गाभावः विद्यमाने च नानात्वदर्शने प्रधानस्य प्रवृत्तिरयुक्ता यदा च नानात्वदर्शनं तदापि दिदृक्षा न व्यावर्तते न हि सदात्मानं जहातीति वः पक्षः। दिदृक्षायां च सत्यां कुतोऽपवर्गः दिदृक्षानानात्वदर्शने च विरुद्धे कथमेकस्मिन् काले भवतः। अज्ञानमदर्शनमिति च ब्रुवाणो विकल्पतः पर्यनुयोज्यः किं ज्ञानाभावोऽज्ञानमुत मिथ्याज्ञानमिति किं चातः यद्यभावोपवर्गो न प्राप्नोति प्राक् प्रवृत्तेरपक्षे च प्रधाने ज्ञानाभावस्य तुल्यत्वात्। अथ मिथ्याज्ञानं तच्च युक्तं प्राक् प्रवृत्तेस्तदभावात् कथमभावो बुद्धिधर्मकत्वात् अपक्षे च प्रधाने न बुद्धिरिति[१] कथं तद्भोऽज्ञानं भविष्यतीति सत्कार्यवादाभ्युपगमात् सर्वदास्तीति ब्रुवाणो मोक्षं बाधते। कथं तत्त्वज्ञानस्य सर्वदाभावात् तत्त्वज्ञानमिथ्याज्ञानयोश्च सहानवस्थानात् प्रवृत्तेस्तादात्म्य[२]मयुक्तम्। न हि भवतां पक्षे किञ्चिदसद्भवति सच्चात्मानं जहातीति सर्वार्थानां सम्भवात् प्रधानं किमर्थं प्रवर्तत इति वक्तव्यम्। अथाभिव्यक्तिनिमित्तां प्रवृत्तिं प्रतिपद्येथाः साप्यभिव्यक्तिः प्राक् प्रवृत्तेः सती आहोऽसतीति पूर्ववत्प्रसङ्गः अथ प्रागनुपलब्धं पश्चादुपलभते किमुपजातविशेषमुतानुपजातविशेषमिति। यदि विशेषोपजननात् पश्चादुपलभ्यते व्याहतं भवति अनु-

(१) बुद्धिरस्ति—पा० ४ पु०। (२) नादर्श्य—पा० ४ पु०।

पजातविशेषः कस्मात् प्राङ्नोपलभ्यत इति वक्तव्यम् सत्कार्यवादाभ्युपगमे च स्फूर्ज्जतापि न विशेषोपजनः शक्यः प्रतिपादयितुम् न च विशेषोपजनप्रत्याख्याने वस्तुन उपलब्ध्यनुपलब्धिविषयत्वं शक्यमवगमयितुम् कर्मनिमित्ते तु सर्गे दर्शनार्थं भूतानि शरीरं पुरुषगुणप्रेरितान्यारभन्त इति युक्तम् न ह्यनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यतीति । अपरे त्वदृष्टं परमाणुगुणं वर्णयन्ति तेषामपि पुनस्तत्प्रसङ्गोऽपवर्ग इति परमाणुगुणस्य शरीरोत्पत्तिनिमित्तत्वात् पुनस्तत्प्रसङ्गोऽपवर्ग इति ॥

मनःकर्मनिमित्तत्वाच्च संयोगाद्यनुच्छेदः[1] ॥ ७० ॥

मनःकर्मनिमित्तत्वाच्च संयोगाद्युच्छेदः । परमाणवः स्वगुणादृष्टात् संहन्यन्ते संहताश्च द्व्यणुकादिप्रक्रमेण शरीरमुत्पादयन्ति तन्मनः स्वगुणादृष्टादुपसर्पतीति। उपसर्पणहेतोरदृष्टस्य नित्यत्वात् किंकृतमपसर्पणमिति । कर्माश्रयत्वे कर्माश्रयादपसर्पणमिति युक्तं प्रायणम् उभयहेतुर्मनोवृत्तिरदृष्टो भविष्यतीति न युक्तम् एकस्य जीवनप्रायणहेतुत्वानुपपत्तेर्नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७१ ॥

नित्यत्वप्रसङ्ग इति प्रायणानुपपत्तिं ब्रूमः तदिदमुक्तमुपसर्पणहेतोरदृष्टस्यानित्यत्वादपसर्पणहेतोश्चादृष्टस्याभावात् यादृच्छिके तु प्रायणे प्रायणभेदो न स्यात् ॥

अणुश्यामतानित्यत्ववदेतत् स्यात् ॥ ७२ ॥

---

(१) संयोगाद्युच्छेदः—पा० ४ पु० ।

अणुश्यामतानित्यत्ववदेतत् स्यादिति परिहारं वर्णयन्ति । यथा किलाणोः श्यामता नित्याऽथापि संयोगेन प्रतिषिध्यते एवमणुमनसोरदृष्टः सम्यग्ज्ञानेन प्रतिषिध्यते इति । एतच्च न अकृताभ्यागमप्रसङ्गादिति ॥

नाकृताभ्यागमप्रसङ्गात् ॥ ७३ ॥

अनुपपन्नप्रमाणस्याभ्युपगमोऽकृताभ्यागम इति सूत्रार्थः । यथा श्रुति वा सूत्रार्थः अकृतस्य कर्मण उपभोगप्रसङ्गादिति । एतत्सविस्तरोक्तं भाष्य इति ॥


आत्मा शरीरं करणमर्थो बुद्धिर्मनस्तथा ।
यद्यथा वस्तु तत्त्वेन तत् तथेहोपपादितम् ॥

इति-श्रीद्योतकरे न्यायसूचवार्त्तिके तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

तृतीयोऽध्यायः समाप्तः ॥

न्यायवार्त्तिके

चतुर्थोऽध्यायः ।



मनसोऽनन्तरं[१] प्रवृत्तिरवसरप्राप्ता परीक्षितव्येत्यत आह ।

प्रवृत्तिर्यथोक्ता ॥ १ ॥

प्रवृत्तिर्यथोक्ता तथा परीक्षितेत्यर्थः सूत्रस्य । किं पुनः प्रवृत्तेः परीक्षितमिति यावद्धर्माधर्माश्रयं परीक्षितं पूर्वा प्रवृत्तेः परीक्षा । तच्च प्रवृत्तिर्द्वेधा भवति कारणरूपा कार्यरूपा च । कारणरूपा प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति । कार्यरूपा धर्माधर्मसमाख्या[२] दुःखादिसूत्रे वर्णिता । तत्र कारणरूपायाः प्रवृत्तेर्विंशतिधा भेदः कार्यरूपा तु प्रवृत्तिरेकद्रव्याभ्युदयस्य प्रतिनियमात् अवस्थिता(?) विपाककालस्य नियमात् आत्मसमवायात् गुणभूता अनित्या प्रायणादिदर्शनात् । तदुक्तं विपच्यमानकर्माशयप्रचये प्रायणमिति जन्मनः कारणम् पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति संसारापवर्गहेतुभूततद्भावे संसारः तदभावे ऽपवर्ग इत्येवमादुक्तम् ॥

प्रवृत्तेरनन्तरास्तर्हि दोषा इत्यभिधीयन्तामित्यत आह तथा दोषाः ॥

तथा दोषाः ॥ २ ॥

उक्ता इति । बुद्धिममानाश्रयत्वादात्मगुणाः संसारस्यानादित्वात्

---

(१) अनन्तरा—इति क्वचित् । (२) समाख्याना—इति क्वचित् ।

अनादिना प्रवृत्तेन प्रवर्तन्ते सम्यग्ज्ञानाच्च मिथ्याज्ञाननिवृत्तौ निवर्तन्त इत्युत्पादनिरोधधर्मकाः कार्यत्वे सतीन्द्रियान्तरप्रत्यक्षत्वात् अचाक्षुषप्रत्यक्षत्वाच्च गुणाः। प्रवर्तनालक्षणादोषाः इत्युक्तम् तथा च मानादयः प्रवर्तयन्तीति लक्षणसाम्यात् तेऽप्युपसंख्येया इति नोपसंख्यायन्ते संगृहीतत्वात् केन संग्रहः प्रवर्तनालक्षणा दोषा इत्यनेनैव। तेषां तु संगृहीतानां रागद्वेषमोहार्थान्तरभावात् ॥

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ३ ॥

तेषां दोषाणां त्रयो राशयः त्रयः पक्षाः सम्भवन्ति रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षः क्रोधः ईर्ष्यासूया द्रोहोऽमर्ष इति। मोहपक्षः मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति। कामो मत्सर इत्यादि[१] किं पर्यायवचनम् आहोऽर्थान्तरभाव इति। किं चातः यदि पर्यायवचनं त्रयो राशय इत्ययुक्तम्। न हि पर्यायशब्देषु राशित्वं सम्भवति न ह्यैन्द्रशक्रपुरन्दरशब्दानां राश्यर्थः कश्चित् सम्भवति। अर्थान्तरभावे विशेषो वाच्य[२] इति। अर्थान्तरभाव इति ब्रूमः। तत्र कामः स्त्रीगतोऽभिलाषः या स्त्रीगता प्रार्थना सा काम इति। एवं चाह्नः नाकामयमानो मण्डयत इति। अक्षीयमाणवस्त्वपरित्यागेच्छा मत्सरः यद्वस्तु दीयमानमुपभुज्यमानं वा न क्षीयते तदपरित्यागेच्छा मत्सरः। यथा राजक्षीयोदपानान्मोदकं पा इति। अक्षयवस्त्वादागेच्छा

---

(१) इत्येतमादिकं—पा० ४ पु०। (२) वक्तव्य—पा० ४ पु०।

स्पृहा यद्वस्तु स्वं न भवति तस्य या आदानेच्छा सा स्पृहा। पुनर्भवप्रतिसन्धानहेतुभूता तृष्णा या पुनर्भवप्रार्थना सा तृष्णा(१)। प्रमाणविरुद्धपरद्रव्यापहारेच्छा लोभः प्रमाणविरुद्धं परद्रव्यादानं कुर्वाणो लुब्ध इत्युच्यते। एषां च सामान्यं रागः सामान्येन विशेषः सङ्गृहीत इति। शरीरेन्द्रियाधिष्ठानवैकृत्यहेतुः क्रोधः सञ्जाते यस्मिन् शरीरेन्द्रियाधिष्ठानानि विकृतानि भवन्ति स क्रोध इति। साधारणे वस्तुनि पराभिनिवेशप्रतिषेधेच्छा ईर्ष्या यद्परिगृहीतं साधारणं वस्तु तस्मिन् यः पराभिनिवेशप्रतिषेधाभिप्रायः सेर्ष्या। परगुणाक्षमता असूया या परगुणान् श्रुत्वा अक्षमतोपजायते सा असूया। परापकारेच्छा द्रोहः। अशक्तस्य परम्प्रत्यपचिकीर्षा(२) सा द्रोहः अपकारासहिष्णुता अमर्षः। अस्य च द्वेषः सामान्यं तेन सङ्गृहः। विपर्ययज्ञानं मिथ्याज्ञानम् अतस्मिंस्तदिति प्रत्यय इति। संशयो विचिकित्सा किस्मादिति(?) तथा(३) विद्यमानाविद्यमानगुणाध्यारोपेणात्मोत्कर्षप्रत्ययो मानः आहोऽहमस्मि(४) इति। शक्तस्य कर्तव्याकरणं प्रमादः यच्छक्तः स्वकर्तव्यं न करोति स प्रमाद इति। अस्य च सामान्यं मोहः तेन सङ्गृह इति। अतस्त्वेराश्यान्नोपसंख्यायन्त इति। कुत एतत् लोकतस्तदवगतेः(५)। लोकत(६) एते कामादयः एवम्भूतेष्वभिप्रायेषु प्रयुज्यन्ते नाभिप्रायमात्रे न हि भिक्षां प्रार्थयमानः कामयत इत्येवं भवतीति। लक्षणस्य तर्हि अभेदात् चिन्तमनुपपन्न-

---

(१) सा तृष्णेति—पा० ४ पु०।
(२) चिकित्सा—पा० ४ पु०।
(३) यथा—पा० ४ पु०।
(४) अहोऽहमस्मि—पा० ४ पु०।
(५) तदधिगतेः—पा० ४ पु०।
(६) लोके—पा० ४ पु०।

मिति एकं रागद्वेषमोहाः लक्षणभेदात् रागभेदवदिति । नानुपपन्नं रागद्वेषमोहार्थान्तरभावात् सत्यपि लक्षणस्याभेदे आन्तर्गणिकं भेदकं लक्षणमस्ति तदुपपत्तेस्त्विलम्। यथा रागलक्षणेन सङ्गृहीतानां कामादीनामिति । न च सामान्यमेकत्वे कारणं तथा च सामान्यस्यैवाभावः स्यात् यदि रागद्वेषमोहानामेकत्वं स्यात् समानमेतल्लक्षणमित्येतदेव न स्यादिति न ह्येकस्य समानं भवतीति । किं पुनरान्तर्गणिकं लक्षणमिति सक्लिलक्षणो रागः यो विषयेष्वभिषङ्गः स रागः अमर्षलक्षणो द्वेषः असहिष्णुता दुःखस्य दुःखसाधनानां च द्वेषः मिथ्याप्रतिपत्तिलक्षणो मोहः यथाऽवस्थितविषये ऽयथाभावप्रतिपत्तिर्या एतच्च रागद्वेषमोहानां व्यवच्छेदकं लक्षणमात्मप्रत्यक्षमिति[१] ॥

नैकप्रत्यनीकत्वात्[२] ॥ ४ ॥

एकं रागद्वेषमोहा एकप्रत्यनीकत्वात् विभागवदिति । यथा विभाग एकेनैव संयोगेन विरुद्ध्यमान एको भवति तथा तत्त्वज्ञानेनैकेन विरुद्ध्यन्ते रागादयस्तस्मादेकं रागादय इति ॥

व्यभिचारादहेतुः ॥ ५ ॥

व्यभिचारादहेतुः एकप्रत्यनीकाश्च रूपादयः एकाग्निसंयोगविरोधिनः न चैषामेकत्वमिति अनैकान्तिकोऽयम् एकयोनित्वादेकं

---

(१) एकप्रत्यनीकभावात्—अधिकं ४ पु० ।

(२) प्रत्यनीकभावात्—पा० ४ पु० ।

रागादयः शब्दवदित्यप्यनेनैव प्रत्युक्तम्। एकयोनयो रूपादयो न चैषामेकत्वमिति सति चार्थान्तरभावे ॥

तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः ॥ ६ ॥

तेषां मोहः पापीयान् पापतमः पापिष्ठ इति वा प्राप्ते द्वौ द्वावभिप्रेत्य पापीयानित्युच्यते रागमोहयोर्मोहः पापीयान् द्वेषमोहयोर्मोहः पापीयानिति। कस्मात् नामूढस्येतरौ भवतः मूढः कुप्यति मूढो रज्यते मूढो मुह्यतीति। तत्त्वज्ञानाच्च मोहनिवृत्तौ रागादिनिवृत्तिरित्येकप्रत्यनीकता यस्मात् तत्त्वज्ञानान्निवृत्ते मोहे न रागद्वेषौ भवतः अत एकप्रत्यनीकता न पुनरेकत्वादिति। एवं च कृत्वा दुःखादीनामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति सिध्यति। प्राप्तस्तर्हि

निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥ ७ ॥

निमित्तनैमित्तिकभावा[१]दर्थान्तरभावो[२] दोषेभ्यः। अदोषो मोहः दोषनिमित्तत्वाद्रूपादिवदिति ॥

न दोषलक्षणावरोधान्मोहस्य ॥ ८ ॥

न दोषलक्षणावरोधात्[३] न कार्यकारणभावेन पदार्थानां तथाभावोऽतथाभावो वा सिध्यति किन्तु लक्षणस्याभेदादिति दोषलक्षणं च मोहेऽस्तीति दोषो मोहः ॥

---

(१) निर्देशात्—पा० ४ पु०। (२) मोहान्तरभावो—पा० ४ पु०।
(३) लक्षणावबोधात्—पा० ४ पु०।

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ९ ॥

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः[१] तुल्यजातीयानामनेकविधविकल्पो निमित्त[२]नैमित्तिकभावो दृष्ट इति। यथा बुद्धिर्बुद्ध्यन्तरनिमित्तं बुद्धिजातीया चेति। तुर्यादयो द्रव्यस्य निमित्तं द्रव्यजातीयाः नोदनाभिघातसंयुक्तसंयोगाः संस्कारश्च गुणा इति परीक्षिता दोषा इति ॥

दोषानन्तरं प्रेत्यभावस्तस्या सिद्धेरात्मनो नित्यत्वात् नित्य आत्मा न जायते न म्रियते उभयं च प्रेत्यभावः मृत्वा पुनर्जन्म तच्चायं सिद्धार्थानुवादः।

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥

आत्मनित्यत्वे प्रेत्यभावसिद्धिः। नित्यः सन् आत्मा प्रेति जायते चेति किमुक्तं भवति म्रियत इति पूर्वोत्पन्नाभिः शरीरेन्द्रियबुद्धिवेदनाभिर्वियुज्यत इति। किं चोक्तं जायत इति अपूर्वोत्पन्नाभिर्निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः सम्बद्ध्यत इति। न पुनः[३] जन्ममरणे आत्मन्युत्पादनिरोधौ[४] नित्यत्वात् नित्य आत्मेति[५] पूर्वाभ्यस्तसूत्रे प्रतिपादितम्। यस्य पुनरात्मन उत्पादनिरोधौ जन्ममरणे तस्याकृताभ्यागमकृतनाशदोषप्रसङ्ग[६] इत्युक्तम् शरीर-

---

(१) मनेकप्रतिषेधः—पा० ४ पु०। (२) नित्य—पा० ४ पु०।
(३) न—पा० ४ पु०। (४) आत्मन उत्पादनिरोधौ—पा० ४ पु०।
(५) नित्य आत्मेत्येतत्—पा० ४ पु०। (६) दोषः—पा० ४ पु०।

दाद्दे पातकाभावादिति सूत्रं वर्णयद्भिः। कथमुत्पत्तिरिति चेत् किन्धर्मकात् कारणात्[१] शरीरेन्द्रियमहाभूतादि व्यक्तमुत्पद्यत इति ॥

व्यक्ताव्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥

व्यक्ताव्यक्तानां प्रत्यक्षप्रामाण्यात्। किं पुनर्व्यक्तमुपलब्धिलक्षणप्राप्तं रूपादियुक्तं द्रव्यं तत्सामान्यात् परमाणुलक्षणमपि पृथिव्यादिकारणं व्यक्तमित्युच्यते। किं सामान्यं रूपादियोगः रूपादिसामान्ययोगात्[२] परमाणवो व्यक्ता इत्युच्यन्त इति रूपादियुक्तेभ्यः परमाणुभ्यो घटादि गवादि व्यक्तमुत्पद्यत इति। कः पुनरत्र न्यायः प्रत्यक्षप्रामाण्यात्[३] रूपादिमतामुत्पत्तिरिति नानेकान्तात् नायमेकान्तो रूपादिमद्भ्यो रूपादिमदुत्पत्तिरिति अरूपादपि संयोगाद्रूपादिमदुत्पद्यमानं घटादि गवादि दृष्टमिति। न सूत्रार्थापरिज्ञानात् नायं सूत्रार्थो रूपादिमत एव रूपादिमदुत्पद्यत इति अपि तु रूपादिमत्सामग्रीपूर्वकं गवादि व्यक्तमिति सूत्रार्थः। एवं च[४] नानेकान्तोऽस्ति न ह्यरूपायाः सामग्र्याः रूपादिमत्कार्यमिति॥

न घटाद्वटनिष्पत्तेः ॥ १२ ॥

न घटाद्वटनिष्पत्तेः। सजातीयात् सजातीयमुत्पद्यत इति

---

(१) किन्धर्मकारणात्—पा० ४ पु०। (२) रूपादिसामान्यात्—पा० ४ पु०।
(३) रूपादिमद्भ्यो—इत्यधिकम् ४ पु। (४) सति—इत्यधिकम् ४ पु०।

मत्वा प्रतिषेधः न सूचार्थापरिज्ञानादिति न ब्रूमः सर्वं सर्वस्य कारणमिति यश्च सर्वं सर्वस्य कारणत्वेनाभ्युपेयात् स एवं प्रत्यवस्थेयो न घटाद्घट उत्पद्यमानो दृष्ट इति । अपि तु

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः । यदपि तद्घटादि व्यक्तमुत्पद्यते तदपि व्यक्तादेव कपालादेः व्यक्ताच्चोत्पद्यमानं घटादि न किञ्चिद्बाधत इति । रूपादिमत्सामग्रीपूर्वकं शरीरादि व्यक्तं(१) दर्शनस्पर्शनाभ्यामेकार्थग्रहणाद्घटवदिति शब्दवद्वा वैधर्म्येण तदेतत्तत्त्वम् । अतः परं प्रावादुकानां दर्शनान्युपन्यस्य कानिचित् प्रतिषिध्यन्ते कानिचिदुपगम्यन्त इति । तत्र तावत्

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ १४ ॥
व्याघातादप्रयोगः ॥ १५ ॥

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् । अभावाद्भावो जायत इति कस्यचिद्दर्शनं तत्र न्यायं ब्रुवते नानुपमृद्य प्रादुर्भावादिति न किलाविनष्टे कारणे कार्यमुत्पद्यत इति। यथा बीजविनाशोत्तरकालमङ्कुरः प्रादुर्भवति यदि बीजविनाशोऽङ्कुरकारणं नाभविष्यदविनष्टेऽपि बीजे ऽङ्कुरोऽभविष्यत् न चैवमस्ति(२) तस्माद्बीजविनाशोऽङ्कुरकारणमिति उपमृद्य प्रादुर्भवतीति व्याघातः यदुपमृद्भवति तदस्ति

---

(१) गवादि—पा० ४ पु० । (२) न चैवमस्तीति नास्ति ४ पु० ।

न ह्यसदुपमर्दकारणमिति यच्च प्रादुर्भवति तच्चास्ति न हि सदुत्पद्यत इति तदिदमुपमृद्नाति प्रादुर्भवति चेति व्याहतमुच्यते को व्याघातः सहासम्भवः यद्युपमृद्नाति न जायते अथ जायते नोपमृद्नाति ॥

नातीतानागतयोः कारकशब्दप्रयोगात् ॥ १६ ॥

नातीतानागतयोः कारकशब्दप्रयोगात् । अतीते ऽनागते च कारकशब्दः प्रवर्तमानो दृष्टः अतीते तावत् भिन्नं कुम्भमनुशोचति भिन्नस्य कुम्भस्य कपालानि अभूत् कुम्भ इति। अनागतेऽपि पुत्रो जनिष्यते जनिष्यमाणं पुत्रमभिनन्दति जनिष्यमाणस्य पुत्रस्य नाम करोति अजाताः पुत्राः स्थविरं तापयन्तीति बहुलं प्रयोगा भाक्ता इति। एवमयं प्रादुर्भविष्यन्नङ्कुर उपमृद्नातीत्युच्यते कः पुनरुपमर्दार्थः आनन्तर्यसामर्थ्यात् अनन्तरोत्पत्त्यर्थः यस्माद्बीजोपमर्दादनन्तरमयं प्रादुर्भवतीति। अत्रोक्तं व्याघातादिति नाजातेनोपमर्दो नोपमर्दसमर्थो जायत इति। यदपीदमुच्यते अतीते ऽनागते च कारकशब्दाः प्रयुज्यन्त इति न प्रयोगो वार्यते अपि त्वसत :कारणादुत्पत्तिर्न युक्तेति कारकशब्दानां च त्रैकालिकः प्रयोगः तदुक्तं प्रामाण्यसामान्यचिन्तायां वृत्तस्तिष्ठतीति यथा। यत्पुनरेतत् आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भवतीत्युच्यत इति न बीजनाशोऽङ्कुरकारणमपि तु व्याहत(१)व्यूहानां बीजावयवानां पूर्व-

(१) व्याहत—व्याहृत—पा० ४ पु० ।

व्यूहनिवृत्तौ व्यूहान्तरमुत्पद्यत इति व्यूहान्तराद्ङ्कुर आविर्भवतीति। न चाविनष्टे पूर्वव्यूहे व्यूहान्तरेण शक्यते भवितुमित्यामर्न्नयं प्रादुर्भावार्थः। एवं च बीजोपादानं युक्तमिति। अस्य चार्थस्य ज्ञापनार्थं सूत्रम् ॥

न विनष्टेभ्योऽनिष्पत्तेः ॥ १७ ॥

न विनष्टेभ्योऽनिष्पत्तेः इति। न हि बीजविनाशोऽङ्कुरस्य कारणमपि तु बीजावयवाः पूर्वव्यूहपरित्यागेनेत्यर्थः सूत्रस्य(१) ॥

क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥

क्रमनिर्देशादप्रतिषेधः। पूर्वं बीजविनाशः पश्चादङ्कुरोत्पत्तिरिति सूत्रार्थः। अभावश्चेदङ्कुरोत्पत्तिकारणं स्यात् सर्वं सर्वस्मादुत्पद्येत। अभावस्य निर्विशेषत्वात्। न हि शालिबीजे विनष्टे काचिदन्वय-शक्तिरस्ति अनन्वितं च कार्यं सर्वाभिः शक्तिभिरुत्पद्येत अन्वितं तु दृष्टं तस्मान्नाभावः कारणमिति सूत्रार्थः। अपर इदानीमाह ॥

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥ १९ ॥

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्। पुरुषोऽयं समीहमानो नावश्यं समीहाफलमाप्नोति तेन गम्यते पराधीनं पुरुषस्य कर्म-फलावधानमिति(२)। निरपेक्षश्चेत् पुरुषः कर्मफलभोगे समर्थः स्यात्

---

(१) नेति सूत्रार्थः—पा० ४ पु०। (२) फलावाधनमिति—पा० ४ पु०।

न कस्यचिदफला क्रिया भवेत् न कश्चिद्दुःखं कुर्यादिति। उभयं च दृष्टं तस्मादीश्वरः कारणमिति॥

न पुरुषकर्माभावे फलानिष्पत्तेः॥ २०॥

न पुरुषकर्माभावे फलानिष्पत्तेरिति। ईश्वरश्चेत् कारणं स्यात् पुरुषकर्मान्तरेणापि सुखदुःखोपभोगौ स्याताम्[१] ततश्च कर्मलोपोऽनिर्मोचश्च। ईश्वरस्यैकरूपत्वादेकरूपा क्रियेति। अथेश्वरः कारणभेदानुविधानेन कार्यं निर्वर्तयति यदपेक्षते तन्न करोतीति प्राप्तम् न हि कुलालो दण्डादि करोति एवं कर्मसापेक्षश्चेदीश्वरो जगदुत्पत्तिकारणं स्यात् कर्मणीश्वरो नेश्वरः स्यात्॥

तत्कारितत्वादहेतुः॥ २१॥

तत्कारितत्वादहेतुः। न ब्रूमः कर्माद्यनपेक्ष ईश्वरः कारणमिति। अपि तु पुरुषकर्म ईश्वरोऽनुगृह्णाति कोऽनुग्रहार्थः। यद्यथाभूतं यस्य यदा विपाककालः[२] तत्तथा तदा विनियुङ्क्त इति। यः पुनरीश्वरं कर्मानपेक्षं कारणत्वेन प्रतिपद्यते तस्यानिर्मोचत्वादिदोषः। सापेक्षे त्वीश्वरे यथोक्तो न दोषः। शेषं भाष्ये। तत्कारितत्वादेवं ब्रुवता निमित्तकारणमीश्वर इत्युपगतं भवति। यच्च निमित्तं तदितरयोः समवायिकारणासमवायिकारणयोरनुग्राहकम्। यथा तुर्यादि तन्तूनां तत्संयोगानां चेति। ईश्वरश्चेत् जगतो निमित्तं जगतः साक्षादुपादानकारणं किमुक्तं पृथिव्यादि

(१) सुखदुःखोपभोगौ भवेत्—पा० ४ पु०। (२) परिपाककालः—पा० ४ पु०।

परमसूक्ष्मं परमाणुसञ्ज्ञितं द्रव्यमिति व्यक्तकारणाभ्युपगमे तु सति निमित्तविशेषविप्रतिपत्तौ ईश्वरप्रक्रिया। यस्मान्निमित्तकारणे विप्रतिपद्यन्ते केचित् कालं केचिदीश्वरं केचित् प्रकृतिमिति तदेवं निमित्तविशेषविप्रतिपत्तौ किं न्याय्यमिति। ईश्वर इति न्याय्यं तच्च हि प्रमाणानि अविघातेन प्रवर्तन्त इति। अस्तित्वासिद्धिरिति चेत् अथ मन्यसे सिद्धं ईश्वरस्यास्तित्वे कारणान्तरनिराकरणं निमित्तकारणाभावश्च सिद्धेत् तत्त्वसिद्धं तस्मादयुक्तमिति। न अत एव तदुपपत्तेः इति येनैव न्यायेन ईश्वरस्य कारणत्वं सिध्यति तेनैवास्तित्वमिति न ह्यविद्यमानं कारणमिति। कः पुनरीश्वरस्य कारणत्वे न्यायः अयं न्यायोऽभिधीयते प्रधानपरमाणुकर्माणि प्राक्प्रवृत्तेर्बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते अचेतनत्वात् वास्यादिवदिति यथा वास्यादि बुद्धिमता तक्ष्णा अधिष्ठितमचेतनत्वात् प्रवर्तते तथा प्रधानपरमाणुकर्माणि अचेतनानि प्रवर्तन्ते तस्मात् तान्यपि बुद्धिमत्कारणाधिष्ठितानीति[1] तच्च प्रधानकारणिकास्तावत् पुरुषार्थमधिष्ठायकं प्रधानस्य वर्णयन्ति पुरुषार्थेन प्रयुक्तं प्रधानं प्रवर्तते पुरुषार्थश्च द्वेधा भवति शब्दाद्युपलब्धिर्गुणपुरुषान्तरदर्शनं चेति तदुभयं प्रधानप्रवृत्तेर्विना न भवतीति न प्राक् प्रवृत्तेस्तदभावात् यावत् प्रधानं महदादिभावेन न परिणमते तावन्न शब्दाद्युपलब्धिरस्ति न गुणपुरुषान्तरोपलब्धिरिति हेत्वभावात् प्रधानप्रवृत्तिरयुक्ता अथास्तिना सदात्मानं लभते न सन्निरुद्धत

---

(१) बुद्धिमता तक्ष्णाधिष्ठितानि—पा० ४ पु०।

इति। एवं च सति विद्यमानः पुरुषार्थः प्रधानं प्रवर्तयतीति न पुरुषार्थाय प्रधानस्य प्रवृत्तिः न हि लोके यद्यस्य भवति स तदर्थं पुनर्यतत इति। सततं च प्रवृत्तिः प्राप्नोति कारणस्य सन्निहितत्वादिति पुरुषार्थः प्रवृत्तेः कारणमिति पुरुषार्थस्य नित्यत्वात् सततं प्रवृत्त्या भवितव्यमिति। अथ विद्यमानोऽपि न प्रवर्तयति न तर्हि पुरुषार्थः कारणमिति यस्याभावात् प्रधानं न प्रवर्तते यस्य च भावात् प्रवर्तते तत्कारणमिति। अथ विद्यमानः प्रतिबन्धान्न प्रवर्तयति प्रतिबन्धापगमस्याशक्यत्वात् सततमप्रवृत्तिः यत्प्रतिबन्धकारणं पुरुषार्थस्य तस्यापगमः कर्तुमशक्यः न सदात्मानं जहातीति प्रतिबन्धकस्य नित्यत्वान्नित्यमप्रवृत्त्या भवितव्यम्। यदा भवन्तः सत्त्वरजस्तमसां साम्यावस्थां प्रकृतिं वर्णयन्ति सा कुतो निवर्तत इति वक्तव्यम्। न चानिवृत्तायां साम्यावस्थायां वैषम्येण शक्यं भवितुम्। अथाङ्गाङ्गिभावस्यानियमादैषम्यं भवति अत्रापि भवन्तं पर्यनुयुञ्ज्महे। कथं साम्येनावस्थितमधिकं हीनं च भवति नापूर्वोपचयो विद्यते न पूर्वहानमस्तीति यांश्च शब्दादीन् प्रागनुपलब्धस्वरूपान् पुरुष उपलभते बुद्धिरुपलम्भयति ते किमुपजातविशेषा उतानुपजातविशेषा इति। यद्युपजातविशेषा उपलभ्यन्त इति व्याहतं भवति नासदात्मानं लभत इति। अथानुपजातविशेषा एवोपलभ्यन्ते तथाप्यनिवृत्तो व्याघातः प्रधानं पुरुषार्थः प्रवर्तयतीति। सोऽयं प्रधानवादो यावद्यावदिचार्यते तावत्तावत् प्रमाणवृत्तं बाधत इति। ये परमाणून् पुरुषकर्माधिष्ठितान् जगतः कारणत्वेन वर्णयन्ति तान् प्रतीदमुच्यते परमाणवः प्रवर्तन्त इति सततं

प्रवृत्त्या भवितव्यम्। अथ कालविशेषापेक्षाः प्रवर्तन्ते परमाणुभिः कालो व्याख्यातः यथा अचेतनत्वात् परमाणवो बुद्धिमन्तमधिष्ठातारमपेक्षन्ते तथा कालोऽपीति न हि तत्राचेतनत्वं निवर्तत इति। चीरादिवदचेतनस्यापि प्रवृत्तिरिति चेत् यथा अपत्यभरणार्थं चीरादेरचेतनस्यापि प्रवृत्तिरेवं परमाणवोऽप्यचेतनाः पुरुषार्थं प्रवर्तिष्यन्त इति। तन्न युक्तम् साध्यसमत्वात् यथैव परमाणवः स्वतन्त्राः प्रवर्तन्त इति साध्यं तथा चीराद्यचेतनं स्वतन्त्रं प्रवर्तत इति। यदि चीरादि स्वतन्त्रं प्रवर्तेत मृतेष्वपि प्रवर्तेत न तु प्रवर्तते अतोऽवगम्यते बुद्धिमत्कारणाधिष्ठितं तदपि न चायं हेतुः तस्मान्न प्रवर्तते[१] एवं यावद्यावदचेतनं प्रवर्तते तावत् सर्वं चेतनाधिष्ठितमिति[२]। अयमपरो हेतुः बुद्धिमत्कारणाधिष्ठितं महाभूतादि[३] व्यक्तमिति सुखदुःखादिनिमित्तं भवति रूपादिमत्त्वात् तुर्यादिवदिति। धर्माधर्मौ बुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः करणत्वाद् वास्यादिवदिति। आत्मैवाधिष्ठाता धर्माधर्मयोर्भविष्यतीति चेत् यस्येतौ धर्माधर्मौ स एवाधिष्ठाता भविष्यतीति न युक्तम् प्राक् कायकरणोत्पत्तेः तदसम्भवात् यावत् कायकरणसङ्घातो नोपजायते पुरुषस्य तावदयमज्ञः उपलभ्यानपि तावद्रूपादी[४]न्नोपलभते कुतोऽनुपलभ्यौ धर्माधर्मावुपलप्स्यत इति। यदि पुरुषः स्वतन्त्रः प्रवर्तते न दुःखं कुर्यात् न हि कश्चिदा-

---

(१) निवर्तते—पा० ४ पु०। (२) बुद्धिमत्कारणाधिष्ठितमिति—पा० ४ पु०।
(३) महाभूतानि—पा० ४ पु०। (४) विषयान्—इति अधिकम् ४ पु०।

त्मनो दुःखमिच्छतीति । यश्चात्मनोऽङ्गोपघातं शिरश्छेदादि वा करोति[१] तद्वैकल्ये प्रायणे[२] वा हितबुद्धिः प्रवर्तत इति । यदि पुनर्धर्माधर्माभ्यामेवाधिष्ठिताः परमाणवः प्रवर्तेरन् न युक्तमेतदचेतनत्वात् न हि किञ्चिदचेतनं स्वतन्त्रमधिष्ठायकं दृष्टमिति अभ्युपगम्यापि च धर्माधर्मयोः परमाणुप्रवृत्तिसामर्थ्यं न करणस्य केवलस्य क्रियानिवृत्तावसामर्थ्यात् न हि करणं केवलं क्रियां निर्वर्तयदुपलभ्यते । अथ परमाण्वपेक्षाभ्यां[३] धर्माधर्माभ्यां क्रियते तदपि न युक्तमदृष्टत्वात् न हि कर्मकरणाभ्यां क्रियां जन्यमानां क्वचिदपि पश्याम इति आत्मा कर्ता भविष्यतीति उक्तमेतदज्ञत्वादिति । अकारणोत्पत्तिर्भविष्यतीति न युक्तमदृष्टत्वादिति । न चान्या गतिरस्ति तस्माद्बुद्धिमत्कारणाधिष्ठिताः परमाणवः कर्माणि च प्रवर्तन्त इति । क्रियावेशाद्कारणमिति चेत् अथ मन्यसे ये खलुकर्तारो भवन्ति ते क्रियाविष्टाः कुलालादय इति क्रियारहितस्येश्वरस्तस्माद्कारणमिति न विकल्पानुपपत्तेः ईश्वरो निष्क्रिय इति कां क्रियामधिकृत्योच्यते। द्वयी हि नः क्रिया उत्क्षेपणादिका चाख्यातशब्दवाच्या च । यद्याख्यातशब्दवाच्यामधिकृत्योच्यते तदाऽसिद्धो हेतुः स्वातन्त्र्याभ्युपगमात् स्वातन्त्र्यं हि भगवति नित्यमस्ति । किं पुनः स्वातन्त्र्यम् अन्यकारकाप्रयोज्यत्वमितरकारकाप्रयोजकत्वं च तदुक्तं कारकानि वर्णयद्भिरिति । अथोत्क्षेपणादिकामधिकृत्योच्यते निष्क्रिय इति तदानेकान्तः क्रियावच्च कारणं दृष्टं

(१) सोऽपि—चधिकम् ४ पु० । (२) प्रधाने—पा० ४ पु० ।
(३) परमात्मापेक्षाभ्यां—पा० ४ पु० ।

Pariçiṣṭa Parvan, (Text) Fasc. 1–5 @ /6/ each	Rs.	1	14
Prākṛita-Paiṅgalam, Fasc. 1–6 @ /6/ each		2	4
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each		14	10
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-4 @ /6/ each ...		1	2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1–5 @ /6/		1	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Ṭhi S'îñ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each		13	0
Rtogs *brjod, dpag hkhri* S'îñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I. Fasc. 1–3 @ /12/		2	4
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37	0
Ditto English Fasc, 1–6 @ 1/ each		6	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each		13	2
Maghāzi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each		1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1-15 @ /6/ each ...	Rs.	5	0
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each		7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1-6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1-5 @ /6/ each		1	14
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ /6/ each		1	14
Ditto (English) Fasc. 1-14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1-6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn, (Text) Fasc. 1-5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1		0	12


ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each		50	0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.			
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members			
N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.			
4. Centenary Review of the Researches of the Society from 1784–1883 ...		3	0
A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)		4	0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)		2	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)		4	0
Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)			
5. Anīs-ul-Musharrahīn		4	0
6. Catalogue of Fossil Vertebrata		3	0
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion		3	0
8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...		3	8
9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I		32	0
10. Khizānatu-l-'ilm		2	0
11. Mahābhārata, Vols. III and IV, @ 20/ each		4	0
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each		40	0
13. Sharaya-ool-Islām		18	0
14. Tibetan Dictionary, by Csoma de Körös		4	0
15. Ditto Grammar		10	0
16. Kaçmīraçabdāmṛta, Parts I & II @ 1/8/ " "		8	0
17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...		3	0
18. Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein PH.D., Jl. Extra No. 2 of 1899		1	0
		4	0
Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each		29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...		5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

Books are supplied by V.-P.P. 1-8-02.

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1074.



न्यायवार्त्तिकम् ।

NYĀYA-VĀRTTIKAM

EDITED BY

PANDIT VINDHYESVARĪ PRASĀD DUBE.
LIBRARIAN, GOVT. SANSKRIT COLLEGE, BENARES.

FASCICULUS VI.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1904.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46 GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWI, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 2-5 @ /6/ each		1	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each		10	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1		0	6
Baudhāyana Sautra Sūtram, Fasc. 1-2 @ /6/ each		0	12
*Bhāmati, (Text) Fasc. 4-8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4		1	8
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1-2		0	12
Catadusani, Fasc. 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-2 ...		3	6
Çatasahasrika-projnaparamita, Part I, Fasc. 1-2 @ /6/ each ...		0	12
*Caturvarga Chintāmani (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1-4		3	0
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-17 @ /6/ each ...		5	4
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /6/ each		1	2
Dan Kriya Kaumudi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-6...		2	4
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each		1	8
Kāla Viveka, Fasc 1-6		2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc, 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...		4	2
Mahā-bhāṣya-pradipōdyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-10 @ /6/ each		7	2
Manuṭīkā Saṅgraha, (Text) Fasc. 1-3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-7 @ /12 each		5	4
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each		4	14
Nyāyavārtika. (Text) Fasc. 1-6 @ /6		2	4
*Nirukta, (Text) Vol. III. Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /6/ each ...		5	4
Nityacarapaddhati Fasc. 1-7 (Text) @ /6/		2	10
Nityacarapradipi Fasc. 1-3		1	2
Nyayabindutika, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6 Vol. II, Fasc. 1-3 @ /6/ each		3	6

निष्क्रियं चेति कदाचिद्द्रव्याणि उपरतक्रियाणि द्रव्यमारभन्ते संयोगात् निवृत्ते कर्मणि संयोगोपकरणानि द्रव्याणि द्रव्यमारभन्त इति निष्क्रियाणामारम्भः। यदा च युगपद्बहूनि द्रव्याणि संहन्यन्ते तदाऽसाधारणकार्यव्यावृत्तेभ्यः संयोगेभ्यः एकमेव द्रव्यमुत्पद्यते एकावयवविभागे तु द्रव्यनिवृत्तौ शेषाणि द्रव्यान्तराणि द्रव्यमुत्पादयन्त[१] इति निष्क्रियाणामारम्भः। कानिचित् पुनः क्रियावन्त्यारभन्ते यदान्यतरकर्मजात् संयोगान्निवृत्ते कर्मणि इतरस्मिन् द्रव्ये कर्मनिवृत्तिसमकालमेव द्रव्यमुत्पद्यते तदा क्रियावता द्रव्येणारभात् क्रियावतामारम्भः विरोधश्चोत्क्षेपणादिकायाः क्रियायाः अनभ्युपगमादिति। न कारणमीश्वरः विकल्पानुपपत्तेः। कर्ता चेदीश्वरः किं सापेक्षः करोति उत निरपेक्ष इति किं चातः यदि सापेक्षः येन करोति तस्याकर्ता एवमन्यत्रापि प्रसङ्गः। तदपि साधनम् येन करोति तस्याकर्तेति। अथायं किञ्चिदनपेक्ष्य करोति तदृदन्यत्रापि प्रसङ्गः। अथायं सर्वमनपेक्ष्य करोति[२] एवमपि पुरुषकर्माफलं भवेत् अनिर्मोक्षश्च प्रसज्येत यस्मा[३]त्कर्मनिमित्ते सर्गे दोषः[४] स इहापि प्रसज्यत इति निरपेक्षकर्तृत्वस्यानभ्युपगमात् धर्माधर्मविफलत्वादिदोषो नास्ति न चाकर्मनिमित्ते सर्गे दोष इति। येन करोति न तस्याकर्तेति चेत् नानेकान्तेकान्तात् नायमेकान्तोऽस्ति यो येन करोति स तत्र करोतीति यथाऽनेकग्निल्यपर्यवदातः पुरुषः कर-

---

(१) मारभन्त इति—पा० ४ पु०। (२) तस्याकर्तेति—पा० ४ पु०।

(३) यस्माकर्मनिमित्ते—पा० ४ पु०। (४) उक्त—इत्यधिकम् ४ पु०।

णान्तरोपादानो वास्यादि करोति वास्याद्युपादानो दण्डादि[१] करोति तदुपादानो घटादि न च पर्यायकर्तृत्वे सति अकर्तृत्वं तथेश्वरोऽपि धर्माधर्मोपादानः शरीरसुखदुःखादि आत्ममनःसंयोग-शुद्धाशुद्धाभिसन्धिसाधनश्च धर्माधर्मौ सुखदुःखस्रष्ट्यपेक्षः तत्साध-नाद्यपेक्षश्च शुद्धमशुद्धं चाभिसन्धिमिति। यदा करोति तदा साध-नस्याकर्तेति चेत् अथ मन्यसे यदायं साध्यं यत् किञ्चिद्दृष्टं निर्वर्त-यति तदा येन साधयति तस्याकर्ता प्रसज्यत इति। नैतदेवं ब्रूमः सर्वानर्थानयमेकस्मिन् काले करोतीति अपि तु पर्यायेण पर्या-यकर्तृत्वे चायमदोषः। यदादौ करोति तस्यासाधनोत्पत्तिरिति चेत् अथ मन्यसे यदि शरीरादिकर्तृत्वं धर्माधर्माद्यपेक्षस्य अथ यदादौ करोति[२] कथं तत् आदेरनभ्युपगमाद्देश्यमेतत् अनादिः संसार इति प्रतिपादितमेतत् धर्माधर्मसाफल्यं चैवम् यदि चानादिः संसारः चापेक्षश्च कर्ता एवं प्राण्यन्तरसमवायिनां धर्माधर्माणां साफल्यम्। अथायमीश्वरः कुर्वाणः किमर्थं करोति लोके हि ये कर्तारो भवन्ति ते किञ्चिदुद्दिश्य प्रवर्तन्ते इदमाप्स्यामि इदं हास्यामि चेति न पुन-रीश्वरस्य हेयमस्ति दुःखाभावात् नोपादेयं वशित्वात्। क्रीडार्थ-मित्येके एके तावद् ब्रुवते क्रीडार्थमीश्वरः सृजतीति नन्वेतदयुक्तम् क्रीडा हि नाम रत्यर्थं भवति विना क्रीडया रतिमविन्दतां न च रत्यर्थी भगवान् दुःखाभावादिति। दुःखिनश्च सुखोपगमार्थं क्रीडन्ति। विभूतिख्यापनार्थमित्यपरे। जगतो वैश्वरूप्यं ख्यापनीय-

---

(१) घटादि—पा० ४ पु०। (२) तस्यासाधनात्—इत्यधिकम् ४ पु०।

मित्यपरे मन्यन्ते। एतदपि तादृगेव न हि विभूतिख्यापनेन कश्चिदतिशयो लभ्यते न चास्याख्यापनेन किञ्चिद्धीयत इति। किमर्थं तर्हि करोति तत्स्वाभाव्यात् प्रवर्तत इत्यदुष्टम् यथा भूम्यादीनि धारणादिक्रियां तत्स्वाभाव्यात् कुर्वन्ति तथेश्वरोऽपि तत्स्वाभाव्यात् प्रवर्तत इति प्रवृत्तिस्वभावकं तत्त्वमिति। तत्स्वाभाव्यात् सततं प्रवर्तत(१) इति चेत् अथ मन्यसे यदि प्रवृत्तिस्वभावकं तत्त्वं प्रवृत्तिनिवृत्ती न प्राप्नुतः न हि प्रवृत्तिस्वभावके तत्त्वे निवृत्तिर्युज्यत इति क्रमेणोत्पत्ति(२)र्न प्राप्नोति तत्त्वस्यैकरूपत्वात् इदमिदानीं भवदिदमिदानीं न भवतीति(३) न युक्तम् न ह्येकरूपात् कारणात् कार्यभेदं पश्याम इति। नैष दोषः बुद्धिमत्त्वेन विशेषणात् बुद्धिमत्तत्त्वमिति प्रतिपादितम्। बुद्धिमत्तया च विशिष्यमाणं सापेक्षं च न सर्वदा प्रवर्तते न सर्वमेकस्मिन् काले उत्पादयति यस्य कारणसान्निध्यं तद्भवति यदसन्निहितकारणं तन्न भवति न च सर्वस्य युगपत्कारणसान्निध्यमस्ति अतः सर्वस्य युगपदुत्पादो न युक्तः स खलु प्रवर्तमानो धर्माधर्मयोः परिपाककालमपेक्षते कारणान्तरोत्पादं तद्भागिनां च सत्त्वानां तत्र(४) सन्निधानं तद्भागिसत्त्वधर्माधर्मपरिपाकं च तदप्रतिबन्धं चेति। यत् तदीश्वरस्यैश्वर्यं किं तन्नित्यमनित्यमिति। यद्यनित्यं तस्य कारणं वाच्यं(५) यस्य चानित्यमैश्वर्यं तस्य कारणभेदो भवति अणिमादेः एवमन्येषामपीत्यनेक ईश्वरः प्रसज्यत इति।

(१) प्रवृत्तिरिति—पा० ४ पु०।
(२) क्रमेण चोत्पत्ति—पा० ४ पु०।
(३) माभूदिति—पा० ४ पु०।
(४) तत्र तत्र—पा० ४ पु०।
(५) वक्तव्यम्—पा० ४ पु०।

अथानेकत्वे किं बाध्यत इति एकस्मिन् वस्तुनि व्याहतकामयोरीश्वरयोः प्रवृत्तिर्न प्राप्नोति अथैकमितर अतिशेते योऽतिशेते स ईश्वरः नेतरः[१] इति । अथ नित्यमैश्वर्यं धर्मवैयर्थ्यं न तद्धर्माश्रयवतीति । नित्यमिति ब्रूमः । न च धर्मवैयर्थ्यं दोषः तस्य यो धर्म ईश्वरे नासौ तच्चैश्वर्यं करोति किन्तु प्रत्यात्मवृत्तीन् धर्माधर्मसन्निचयाननुगृह्णाति न चेश्वरे धर्मोस्तीत्यचोद्यमेतत् तत्स्वभावानवधारणात् सन्देहः ईश्वरः किं द्रव्यमाहो गुणादीनामन्यतम इति। द्रव्यं बुद्धिगुणत्वाद्द्रव्यान्तरवद् बुद्धिमत्त्वात् तर्हि आत्मान्तरमिति नात्मान्तरं गुणभेदात् । तद्यथा गुणभेदे सति पृथिव्यादयो नात्मानः तथा गुणभिन्न ईश्वरस्तस्मादसावपि नात्मान्तरमिति । कः पुनरेतस्य भेदः । एके तावद् ब्रुवते धर्मज्ञानवैराग्यैश्वर्याण्यतिशयवन्ति तस्मिन्निति नित्यत्वमतिशयः । एतत्तु न बुध्यामहे यथा बुद्धिमत्तायामीश्वरस्य प्रमाणसद्भावो न चैवं धर्मादिनित्यत्वे प्रमाणमस्ति न चाप्रामाणिकं प्रतिपत्तुं शक्यम् अतिशयस्तु बुद्धिनित्यत्वं गुणभेदः तच्च हि नित्या बुद्धिः संख्यादयश्च सामान्यगुणाः षड्गुण[२] आकाशवदीश्वर इति। अथास्य बुद्धिनित्यत्वे किं प्रमाणमिति। नन्विदमेव बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्तन्त इति बुद्धिमत्तायामेतत् साधनं सापुनर्नित्येति कुतः प्रत्यर्थनियमासम्भवात् ये खलु प्रत्यर्थनियता बुद्धिभेदास्ते शरीरादिकारणसन्निधाने सति भवन्ति न त्विय[३] प्रत्यर्थनियता युगपदनेककार्योत्पत्तिदर्शनात् यथा स्थावर-

---

(१) इतरो नेश्वर इति—पा० ४ पु० ।

(२) न चाप्रामाणिकं शक्यम्—इत्यधिकम् ४ पु० । (३) न चेयं—पा० ४ पु० ।

भेदस्यानेकस्य युगपदुत्पाद इति । स च प्रत्यर्थनियतबुद्धिभेदेष्वीश्वरस्य न युक्तः संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धय एव तस्य गुणाः । अथ बुद्धिमत्तयेश्वरस्य[१] शरीरयोगमपि प्रतिपद्यते । तेनापि प्रतिपद्यमानेन शरीरादयो नित्या अनित्या वा अवश्यमेषितव्याः । यद्यनित्या धर्माधर्मसङ्गावोभ्युपेयः तदभ्युपगमे च तत्तत्त्वादीश्वरो नेश्वरः स्यात् । अथ नित्यान् शरीरादीन् कल्पयसि एवमपि दृष्टविपरीतं कल्पितं भवति दृष्टविपर्ययं प्रतिपद्यमानेन बुद्धेर्नित्यत्वं[२] प्रतिपत्तव्यम् । अथ सन्तानवर्तिनीमनेकां बुद्धिमीश्वरे प्रतिपद्यते एवमपि न युगपदुत्पादः स्थावरादीनां[३] प्राप्नोति अथ ताः सन्तानवर्तिन्योऽर्थाः[४] बुद्धयो भवन्ति । एवमपि दृष्टविपरीतं कल्पितं भवति । एवं च कल्पयता बुद्धिनित्यत्वमेव प्रतिपत्तव्यम् । एतावच्चैतत् स्यात् नित्या वा सन्तानवर्तिनी वा सन्तानवर्तिनी न युक्ता । यदि गुणभेदाद्भेदः यदभिन्नगुणं तदेकं प्राप्नोति यथा दिक्कालाविति नानेकान्तात् गुणभेदान्नानात्वं ब्रूमः न पुनर्गुणाभेदादेकत्वमिति तथाहि अभिन्नगुणानां घटादीनां नानात्वमिति दिक्कालयोर्गुणाभेदे ऽपि कार्यभेदान्नानात्वमिति । न च बुद्धिमत्तया विनेश्वरस्य जगदुत्पादो घटत इति । सा च बुद्धिः सर्वार्थातीतानागतवर्तमानविषया प्रत्यक्षा नानुमानिकी नागमिकी न तत्रानुमानं नागम इति ज्ञाननित्यत्वाच्च न संस्कारः नित्यं विज्ञानमीश्वरस्येति

---

(१) बुद्धिमन्तमीश्वरस्य—पा० ४ पु० । (२) बुद्धेरेव—पा० ४ पु० ।
(३) व्यवस्थादीनां—पा० ४ पु० । (४) सन्तानवर्त्तिन्यः सर्वार्थाः—पा० ४ पु० ।

न तत्र संस्कारो विद्यत इति संस्काराभावाद्बुद्धिर्नित्यत्वाच्च न स्मृतिः स्मृत्यभावाच्च नानुमानं न दुःखमधर्मस्याभावात् अत एव न वैराग्यमिति दुःखाभावान्न विरज्यत इति अत एव न द्वेषो दुःखाभावादिति। इच्छा तु विद्यते ऽक्लिष्टाऽव्याहता सर्वार्थेषु यथा बुद्धिरिति। अथ किमयं बद्धो मुक्त इति। न बद्धो दुःखाभावादेव अबद्धत्वान्न मुक्त इति बन्धवान् मुच्यत इति न च भगवति बन्धनमस्तीति अतो न मुक्त इति। आत्मान्तराणाममसम्बन्धादधिष्ठातृत्वमनुपपन्नमिति चेत् अथ मन्यसे ऽर्थान्तरसमवायिनो ये धर्माधर्मास्ते न साक्षादीश्वरेण सम्बद्ध्यन्ते न पारम्पर्येण[१] न चानधिष्ठितयोर्धर्माधर्मयोः प्रवृत्तिर्युक्तेति। तच्च न अजसम्बन्धोपपत्तेः अजः सम्बन्ध आत्मान्तराणामित्येक इच्छन्ति न चैतदिह प्रतिषिध्यत इति अप्रतिषेधादुपात्तः स इति। ते त्वजं सम्बन्धं प्रमाणतः प्रतिपादयन्ति व्यापकैराकाशादिभिः सम्बद्ध ईश्वरः मूर्तिमद्द्रव्यसम्बन्धित्वात् घटवदिति यथा घटादि मूर्तिमता घटादिना सम्बन्धित्वव्यापकैराकाशादिभिः सम्बद्ध्यते तथेश्वरोपि मूर्तिमत्सम्बन्धीति तस्मादयमपि व्यापकैराकाशादिभिः सम्बद्ध्यत इति। स पुनरात्मेश्वरसम्बन्धः किं व्यापकोऽव्यापक इति अर्थाभावादव्याकरणीय एषः आत्मेश्वरसम्बन्धोऽस्तीत्येतदेव[२] शक्यते वक्तुम्। स पुनरीश्वरात्मानौ व्याप्नोति न व्याप्नोतीति न व्याक्रियते। ये ऽप्यजं संयोगं नेच्छन्ति तेषामप्यणुमनः संयोगोपपत्तेरस्ति सम्बन्धः यानि प्रत्यात्ममनांसि तानि सर्वाणीश्वरसम्बद्धानीत्यतः सम्बन्धसम्बन्धोपपत्तेरात्मान्तराण्यधितिष्ठति यथात्महस्तसंयोगप्रयत्नाभ्यां हस्ते

(१) न चासम्बद्धमधिष्ठातुं शक्यते—अधिकम् ४ पु०। (२) इत्येव च—पा० ४ पु०।

कर्म भवति उत्पन्नकर्मको हस्तः सन्दंशादिना सम्बद्ध्यते तत्सम्बन्धादयःपिण्डाद्यधितिष्ठति। यदि तर्हि सर्गादावीश्वरस्य कारणत्वे ऽयं न्यायोभिहितः इदानीमीश्वरो न कारणमिति प्राप्तम् इदानीमपि स एव न्यायः मृतशरीरिणां यौ धर्माधर्मौ तौ बुद्धिमत्कारणाधिष्ठिताविति समानो न्यायः। बुद्धिमत्कारणाधिष्ठितानि स्वासु स्वासु धारणादिक्रियासु महाभूतानि वाय्वन्तानि प्रवर्तन्ते अचेतनत्वाद्वास्यादिवत्। एवं कार्यत्वात् तृणादीनि पचीकृत्य दर्शनस्पर्शनविषयत्वादिति वक्तव्यम्। एवं यत्र यत्र विप्रतिपत्तिः कार्यत्वं च तत्तदनेनैव न्यायेनानेन दृष्टान्तेन वास्यादिना पक्षयित्वा साधयितव्यम्। आगमाच्च आगमादपि श्रूयते ईश्वरः कारणम्।

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा स्वभ्रमेव वा॥
यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति॥

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्॥ २२॥

अपर इदानीमाह। अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्। यथा कण्टकतैक्ष्ण्यादि निर्निमित्तं च उपादानवच्च तथा शरीरादिसर्गोपि तदिदं दृष्टान्तसूत्रम्। कः पुनरत्र न्यायः अनिमित्ता रचनाविशेषाः शरीरादयः संस्थानवत्त्वात् कण्टकादिवदिति। नानुपलब्धनिमित्तानामनुमानतो निमित्तोपलब्धिः यस्य

निमित्तं प्रत्यक्षतो नोपलभ्यते तस्यानुमानतः प्रत्येतव्यम् कुतः निमित्तवद्द्रव्यसामान्यात् यानि खलु निमित्तवन्ति द्रव्याणि संस्थानविशेषवन्ति तानि घटादीनि संस्थानविशेषवच्छरीरं कण्टकादयश्च तस्मात् निमित्तवन्त इति। उक्तं चात्र किमुक्तम् पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति। न चोभयपक्षसम्प्रतिपन्नं संस्थानविशेषवदनिमित्तं दृष्टमिति अपरे तु अनिमित्तनिमित्तत्वान्नानिमित्तत इति परिहारं वर्णयन्ति॥

अनिमित्तनिमित्तत्वान्नानिमित्ततः॥ २३॥

अनिमित्तमेव निमित्तं यतश्चोत्पत्तिस्तन्निमित्तमिति। अनिमित्तनिमित्तत्वात् नानिमित्तत उत्पत्तिरिति एतच्च न निमित्तानिमित्तयोरर्थान्तरभावाद्प्रतिषेधः॥

निमित्तानिमित्तयोरर्थान्तरभावाद्प्रतिषेधः॥ २४॥

अन्यन्निमित्तमन्यच्च निमित्तप्रत्याख्यानमिति न च प्रत्याख्यानमेव प्रत्याख्येयं भवति निमित्तमित्यर्थाभ्यनुज्ञा अनिमित्तमिति तस्य प्रतिषेधः अभ्यनुज्ञाप्रतिषेधयोश्चैकत्वमयुक्तमिति। स खल्वयं वादोऽकर्मनिमित्तः सत्त्वसर्ग इति एतस्मान्न भिद्यत इति। अभेदे तु तत्प्रतिषेधेनैव प्रतिषिद्धो बोद्धव्यः कण्टकादीनां चानिमित्तं जन्मेति ब्रुवाणः प्रष्टव्यः। किं कण्टकमात्रस्यानिमित्तं जन्म उत सर्वस्येति। यदि कण्टकमात्रस्यानिमित्तं जन्म तच्छेषेण[१] दृष्टान्तेन शक्यं प्रतिपादयितुं

(१) निमित्तं जन्म तच्छास्त्रेण—पा० ४ पु०।

निमित्तवदिति । अथ सर्वमनिमित्तमित्ययं पक्षस्तथापि व्याघातः प्रतिपाद्यप्रतिपादकन्यायस्याभ्युपगमात् सर्वं चानिमित्तं प्रतिपादयसि चेति व्याघातः । वाक्योपादानाच्च व्याघातः अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिवदितिवाक्यं प्रतिपादकमुपादीयते न च निमित्तमस्तीति व्याघातः । अनिमित्ततो भावोत्पत्तिरिति सनिमित्ता भावोत्पत्तिरिति च वाक्ये यद्यनयोरर्थभेदं प्रतिपद्यसे वाक्यभेदादर्थभेदप्रतिपत्तिरिति व्याहतं भवति अनिमित्ता भावोत्पत्तिरिति । अथ न[१] वाक्यभेदेनार्थभेदं प्रतिपद्यसे वाक्यविशेषोपादानं व्याहतम् यत्किञ्चिद्वाक्यमुपादेयमिति अनिमित्तां भावोत्पत्तिं प्रतिपद्यमानेन सर्वलोकव्यवहार उच्छिन्नो भवति अनिमित्ता भावोत्पत्तिरिति च भावमात्रपक्षीकरणेन दृष्टान्तो भवति । अथ शरीरादेकदेशं पक्षयसि तथाप्यन्यतरधर्मासिद्धो दृष्टान्तः संस्थान[२]विशेषवत्त्वस्य विद्यमानत्वात् अनिमित्तत्वस्य चाभावादिति । अन्ये तु मन्यन्ते सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥

किमनित्यं नाम यस्य कदाचिद्भावस्तदनित्यम् उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकं च विनष्टं नास्ति किं पुनः सर्वं भौतिकं शरीरादिकमभौतिकं च बुद्ध्यादि तदुभयमुत्पत्तिविनाशधर्मकमिति विज्ञायत इति। तस्मात् सर्वमनित्यमिति सूत्रस्य दृष्टान्तार्थत्वात् तस्य सर्वान्तर्भावादुदाहरणाभावः । सर्वमनित्य[३]-

(१) न—इति नास्ति ४ पु० । (२) सन्तान—पा० ४ पु० ।

(३) मुत्पत्तिविनाशधर्मकत्वादिति ब्रूषे—पा० ४ पु० ।

मिति ब्रूषे दृष्टान्ताभावः सर्वस्य पक्षीकृतत्वात् न साध्यमुदाहरणं युक्तम् उत्पत्तिविनाशधर्मकत्वादिति चायं हेतुरव्यापकः। यदि सर्वं पक्षयित्वा उत्पत्तिविनाशधर्मकत्वमुपादत्से परमाणवाकाशादिषु तद्गुणेषु च केषुचित् सामान्यादिषु नोत्पत्तिविनाशधर्मकत्वमस्तीति हेतुरव्यापकः नानित्यता नित्यत्वात् ॥

नानित्यता नित्यत्वात् ॥ २६ ॥

सर्वमनित्यमेवेति ब्रुवाणः प्रष्टव्यः किं सर्वस्यानित्यता नित्या आहोस्विदनित्येति। यद्यनित्यता नित्या न तर्हि सर्वमनित्यम् अथानित्या अनित्यताया अभावात्[१] सर्वमनित्यमिति व्याहतो हेतुः॥

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ २७ ॥

तदनित्यत्वमग्नेर्दाह्यं[२] विनाश्यानुविनाशवत्। यथाऽग्निर्दाह्यं विनाश्यानुविनश्यति एवमनित्यतापि सर्वं विनाश्यानुविनश्यति। अयं च खलु वादः सर्वमनित्यमिति नित्यं व्याचष्टे ॥

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ॥ २८ ॥

नित्यस्य प्रत्याख्यानं न युक्तं यथोपलब्धि व्यवस्थानात् यत्र यत्राऽयं हेतुरुपलभ्यते तत्र तत्र हेतुसामर्थ्यादनित्यत्वं प्रतिपद्यामहे यत्र पुनरयं हेतुर्नास्ति तेषामनित्यत्वं कथं प्रतिपत्तव्यम्। अथाकारणकमनित्यं प्रतिपद्यसे व्याहतस्तर्हि हेतुः उत्पत्तिविनाशधर्मकत्वादिति अनित्यमिति ब्रुवाणेनावश्यं नित्यमभ्युपेयं नञः प्रसज्यपर्युदासे

(१) स्वभावात्—पा० ४। (२) दाह्यत्वमिति क्वचित्।

प्रतिषेधविषयत्वात् अयं नञ् प्रवर्तमानः प्रसज्यप्रतिषेधेन प्रवर्तते पर्युदासेन वा तथा चोत्तरपदसिद्धिः यदि नित्यं न भवतीत्यनित्यं यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति सिद्धमुत्तरपदम्। अथ नित्यादनित्यमिति तथाप्युत्तरपदेन भवितव्यम् नामत्युत्तरपदार्थं तस्यान्यत्वं सिद्धमतीति अनित्यताभावाच्च सर्वमनित्यमिति न दोषः[१] अनित्यत्वं नाम धर्मः सोऽसति धर्मिणि न भवतीति एवं च सति सर्वस्यानित्यत्वं न दोष इति। अथ पुनरुत्पत्तिधर्मकेणानित्येन सिद्धं शेषं सन्दिह्यमानानित्यत्वं विपरीतनित्यत्वं च सत्त्वादनित्यमिति साधयेत् तस्याप्युत्तरपदसिद्धानित्यत्वसिद्धिरिति प्रतिज्ञादोषाद्वाक्यं निवर्तत इति। अयमपर एकान्तः॥

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥

सर्वं नित्यं पञ्चभूतनित्यत्वात्। भूतमात्रमिदं सर्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेः सर्वं नित्यमिति॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥

नोत्पत्तिविनाशकारणोपलब्धेः। उत्पत्तिकारणं भावानामुपलभ्यते विनाशकारणं च तदुभयं नित्यत्वे न स्यात् न हि नित्यं नाम जायते विनश्यतीति॥

तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥

---

(१) अनित्यतायाः धर्मत्वेनाभ्युपगमात्—अधिकम् ४ पु०।

तल्लक्षणावरोधा[१]दप्रतिषेधः । यदिदमुत्पद्यते विनश्यतीति च मन्यसे न तद्भूतलक्षणहीनं गच्छते भूतलक्षणावरोधात्[२] सर्वं नित्यमिति। सर्वमनित्य[३]मिति च ब्रुवाणो न कञ्चिज्जायते विनश्यतीति प्रतिपद्यते तत्प्रतिपत्तौ च हिताहितप्राप्तिपरिहारार्थोऽस्य परिस्खन्दो व्यर्थ आपद्येत सर्वस्य च पचीकरणादृष्टान्ताभावः वाक्योपादानं च व्याहतम्। यदिदं वाक्यं[४] परप्रतिपादनायोपादीयते सर्वं नित्यं पञ्चभूतनित्यत्वादित्यनेन वाक्येनायं किङ्करोति किमसिद्धं साधयति उत सिद्धं निवर्तयति । यदि तावदसिद्धं साधयति केयं सिद्धिर्वाक्येन[५] प्रतिपाद्यते यदि विज्ञानं व्याहतं भवति सर्वं नित्यं विज्ञानं च. जायत इति । अथ प्रतिपत्तिर्न क्रियते का तर्हि सिद्धिः या प्रवर्तमानं करोति अवश्यं कारकेणापूर्वं किञ्चिन्निष्पाद्यं तन्निष्पत्तेर्व्याघातः कारकत्वं वा निवर्तते न हि नित्यस्य किञ्चित् कर्तव्यमस्ति । अथ सिद्धं निवर्तयतीति पक्ष आश्रीयते एतस्मिन्नपि पक्षे नित्यं निवर्तते चेति व्याघातः । अथ तिरोभवतीति तिरोभावेऽप्ययमपूर्वोत्पत्तिः पूर्ववस्तुविनाशो वाभ्युपेय इति सर्वथा न व्याघातान्मुच्यसे यत्प्रागनुपलब्धरूपं पश्चादुपलभ्यते तत्रावश्यमपूर्वोत्पत्तिर्वा पूर्ववस्तुविनाशो वाभ्युपेय इति[६] सर्वथा न व्याघातान्मुच्यसे यत्पुनरेतद्भूतलक्षणावरोधात् सर्वं नित्यमिति नान्यथा तदुपपत्तेः भूतलक्षणयोगोन्यथा सम्भवतीति ॥

---

(१) बोधा—पा० ४ पु० । (२) बोधात्— पा० ४ पु० ।
(३) सर्वं नित्यं—पा० ४ पु० । (४) वाक्यं—पा० ४ पु० ।
(५) वाक्यन—पा० ४ पु० । (६) तदभ्युपगमे च व्याघात इति—अधिकम् ४ पु० ।

नोत्पत्तितत्कारणोपलब्धेः ॥ ३२ ॥

उत्पत्तिकारणोपलब्धेः कारणसमानगुणोत्पत्तिश्च दृश्यते कारणं च दृश्यते न चैतदुभयं नित्यविषयम् न हि नित्यस्योत्पत्तिर्नापि नित्यस्य कारणमस्ति अस्ति चैतदुभयं तस्मात् कारणसमानगुणं कार्यमुत्पादयति इति कारणसमानगुणं कार्यमुत्पद्यत इति कारणसमानगुणोत्पादे च कार्यभूतलक्षणावरोधः सिद्धतीति। विभक्त्यायं चैतत् व्यक्ताव्यक्तानां चाविवक्षा प्रामाण्यादित्येतस्मिन् सूत्रे। अव्यापकस्यायं हेतुः पञ्चभूतनित्यत्वादिति कथं कर्मादीनामव्याप्तेः कर्मबुद्धिशब्दादयः पञ्चभूतनित्यत्वादित्यनेन व्याप्ता इति ज्ञातुः प्रयत्नदर्शनाच्च व्याघातः उत्पत्तिविनाशप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्टः सर्वनित्यत्वे च न युक्तः प्रसिद्धस्यावयवी तद्धर्मा उत्पत्तिविनाशधर्मा चावयवी प्रतिपादितोऽतोऽयुक्तमेतत्। कथमव्यापकोऽनेकान्तः पक्षस्यान्तद्वये ऽवस्थानात् पक्षो हि सर्वं हि नित्यमिति तच्च सर्वं भूतलक्षणम्[१] अन्यथा च तत्पक्षान्तद्वये ऽवस्थानात् न सर्वं भूतलक्षणयुक्तमित्यनेकान्तः। स्वप्नविषयाभिमानवन्मिथ्योपलब्धिरिति चेत् अथ मनुषे यदिदमुत्पद्यते विनश्यति चेति तन्न तत्त्वतोऽस्ति अभूत्वे तस्मिन्नभिमानो भवति उत्पन्नं विनष्टमिति यथा न स्वप्ने विषयाः सन्ति अथ च विषयाभिमानोऽस्तीति न प्रमाणाभावात् यदिदं गवादि घटाद्युत्पत्तिविनाशे युक्तमुपलभ्यते एतन्नास्तीति नामत्वप्रतिपादकं प्रमाणमभिधीयते न चाप्रामाणिकं शक्यं प्रतिपत्तुम् यथा

(१) लक्षणम्—इत्यधिकम् ।

च चित्तव्यतिरेकिणो विषयास्तथोपरिष्टाद्वक्ष्यामः। यदि स्वप्नविषयाभिमानः अथ भूतोपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते। पृथिव्याद्यभावे सर्वव्यवहारविलोप इति चेत् अथ मन्यसे यदि पृथिव्यादीनि भूतानि न सन्ति ननु पृथिव्याद्याश्रयो व्यवहार उच्छिद्येत तदितरत्र समानम्। यदि व्यवहारोच्छेदभयाद्भूतानि प्रतिपद्यन्ते तत एवोत्पत्तिविनाशावपि प्रतिपद्यस्व न ह्युत्पत्तिविनाशावन्तरेण कश्चन व्यवहारः सिद्ध्यतीति नित्यानां द्रव्याणामतीन्द्रियत्वात् अविषयत्वाच्चोत्पत्तिविनाशयोः यन्नित्यं तदतीन्द्रियम् अविषयश्चोत्पत्तिविनाशयोः तेन स्वप्नविषयाभिमानवत्तदभिमान इत्ययुक्तम्। उत्पत्तिविनाशाभिमान इति ब्रुवतोत्पत्तिविनाशयोर्विषयो वक्तव्यः। न च सर्वनित्यवादिनामुत्पत्तिविनाशयोर्विषयोऽस्ति विषयं च प्रत्याचक्षाणेन तदनुकारी विपर्ययप्रत्ययो हेय इति। अपरे तु सर्वं नित्यमित्येतदन्यथा वर्णयन्ति 'व्यवस्थिते तस्योपादानस्य धर्ममात्रं निवर्तते धर्ममात्रमाविर्भवति यच्च निवर्तते तन्निवृत्तमप्यस्तीति यच्चाविर्भवति तत्प्रागप्याविर्भावादस्ति ॥

न व्यवस्थानुपपत्तेः ॥ ३३ ॥

न व्यवस्थानुपपत्तेरिति। शेषं भाष्ये। यच्च निवर्तते तन्निवृत्तमप्यस्तीति ब्रुवाणो भवान् प्रष्टव्यो भवति(१) किमुक्तं भवति(२) यदि ब्रूषे पूर्वमुपलब्धं पश्चान्नोपलभ्यत इति। अथ सतोऽनुपलब्धिः किङ्कृता यद्यावरणादिकृता तदावरणाद्युपलभ्येत उक्तं चात्र यत्पूर्व-

(१) जायते—पा० ४ पु०। (२) निवृत्तमिति—अधिकम् ४ पु०।

मनुपलब्धं पश्चादुपलभ्यते तस्यापूर्वविशेषोत्पादः पूर्वविशेषप्रच्यवोऽभ्युपेय इति तदभ्युपगमे च व्याघातः यच्चोक्तं यच्चाविर्भवति तत् प्रागप्याविर्भावादस्ति तन्न व्याघातात् आविर्भवति विद्यते चेति व्याहतम्। अथाविर्भावोऽभिव्यक्तिः तथापि पूर्वदोषानिवृत्तिरभिव्यक्तिरसती भवतीति। अयमपर एकान्तः॥

सर्वं पृथग्भावलक्षणपृथक्त्वात्॥ ३४॥

सर्वं पृथग्भावलक्षणपृथक्त्वात्। भावस्य लक्षणं शब्दः लक्ष्यतेऽनेन भावः सर्वो भावसमाख्याशब्दोऽनेकविषयो यथा कुम्भ इति। भावसमाख्याशब्दोऽनेकस्मिन्नवयवसमूहे वर्तत इति यथा कुम्भशब्दः। एवमन्येऽपि शब्दा इति। अस्य प्रयोगः कुम्भशब्दोऽनेकविषयः एकपदत्वात् सेनाशब्दवदिति। पदश्रवणादनेकार्थावगतेः यस्मात् पदश्रुतेरनेकोर्थोऽवगम्यते यथा सेनेति॥

नानेकलक्षणैरेकभावनिष्पत्तेः॥ ३५॥

नानेकलक्षणैरेकभावनिष्पत्तेः। अनेकलक्षणैरिति मध्यमपदलोपी समासोऽनेकविधलक्षणैरिति। गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः सम्बद्ध एको भाव उत्पद्यते अतः शब्दादेकावगतौ[१] शेषोऽनुषक्तोवगम्यत इति गुणव्यतिरेको गुणीति अवयवातिरिक्त[२]श्चावयवीति विभक्तन्यायमेतत्। यत् पुनरेकपदत्वादनेकविषयः कुम्भादिशब्द इति तन्न दृष्टान्ताभावात् न हि कश्चिच्छब्दोऽनेकविषयोऽस्ति सेनादिशब्दानामनेकविषयत्वेनासिद्धेः यथा चैकविषयः सेनादि-

(१) एकाधिगतौ—पा० ४ पु०। (२) अवयवव्यतिरिक्त—पा० ४ पु०।

शब्दस्तथोक्तमिति । सर्वस्य पचीकरणाद्दृष्टान्ताभावः आधाराधेयभावेनानुषक्तानां रूपादीनामवयविनश्च ग्रहणादन्यथासिद्धः नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वेनावस्थानाच्च विरुद्धः[१] अनेकमित्ययं नञः प्रयोगः स चायं प्रसज्यप्रतिषेधपर्युदासविषयत्वेन प्रतिषेधात् प्रकल्प्यते । यदि तावत् प्रसज्यप्रतिषेध एको न भवतीति यदेकत्व प्रतिषिद्ध्यते तदन्यत्र भवति एवं च व्याघातः । अथ पर्युदासपक्षः एकस्मादन्यदनेकमिति एवमप्येकमभ्युपगतं भवति न ह्यसत्येकस्मिन् तस्मादन्यदनेकं सिद्ध्यतीति । इतश्च

लक्षण[२]व्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥

तल्लक्षणव्यवस्थानादेवाप्रतिषेधः । न हि कश्चिदेको भाव इत्युक्तः पक्षः[३] कस्मात् लक्षणप्रव्यवस्थापनात्[४] न हि कुम्भ इत्युक्ते ऽनेकोऽर्थोवगम्यते । कथं नावगम्यते एकवचनान्तत्वात् एकवचनान्त एष शब्दः कुम्भ इति । न बहुष्वेकवचनं युक्तम् प्रैष[५]सम्प्रतिपत्त्योरेकविषयत्वात् कुम्भमानयेति प्रैष एकविषयो भवति । इतरोपि कुम्भशब्दात् प्रतिपद्यैकं कुम्भमानयति ते एते प्रैषसम्प्रतिपत्ती एकविषये ज्ञापयतः कुम्भशब्देनैकोर्थोऽभिधीयत इति । यांस्तु रूपादीनवयवान् प्रतिपद्यसे स न शब्दार्थः किन्त्वनुषङ्गः तन्नान्तरीयकत्वादिति समूहभेदस्य चानवस्थानात् यच्चावस्थानं तदेकं गवादिघटा-

---

(१) विरुप इति—पा० ४ पु० । (२) तल्लक्षण—पा० ४ पु० ।
(३) इत्ययमयुक्तः प्रतिषेधः—पा० ४ पु० । (४) व्यवस्थानात्—पा० ४ पु० ।
(५) वैध—वैष—पा० क्वचित् ।

दिद्रव्याणि समुदितानि प्रतिपद्यमानेन समूहोऽभ्युपेयते स चायं समूह इयन्ति द्रव्याणि एतानि घटादि[१]भावेनावस्थितानीति न व्यवतिष्ठते ऽस्य भेदोऽन्यतर[२]तमत्वेन यत्तत् परमल्पं[३] तद्भेद्यं ततो निवर्तत इति । यतश्चायं भेदो निवर्तते तदेकम् । एकं च प्रत्याचक्षाणेनैकमपि प्रत्याख्येयम् एकसमुच्चया[४]दनेकस्य । अथ मन्यसे यन्तमभेद्यं परमाणुं प्रतिपद्यसे स रूपादीनां समुदाय इति चत्वारि वा द्रव्याणि पृथिव्यादीनि समुदितानि परमाणुरिति । एतस्मिन् वै दर्शने ये रूपादयः समुदितास्ते परमाणुरिति यत्परमाणौ रूपं स कस्य समुदाय इति वक्तव्यम् । एवं शेषेषु गुणेषु चत्वारि द्रव्याणि समुदितानि परमाणुरिति ब्रुवाणेन चतुष्टयस्य समुच्चयनिमित्तत्वात् यदेकं पृथिव्यादि स कस्य समुदाय इति वक्तव्यम् । अथानन्तं समुदायं प्रतिपद्यसे अष्टौ द्रव्याणि समुदितानि परमाणुरिति शास्त्रं व्याहतं भवति । कामेष्टद्रव्यकोणुरशब्द[५] इति एकानुपपत्तौ नानेकोपपत्तिरित्येतद्वेद्यम् । यश्चायं हेतुः समूहे भावशब्दप्रयोगादिति उभयतो व्याघातान्न किञ्चित् कथमुभयतो न कश्चिदेको भावः समूहे भावशब्दप्रयोगादिति प्रतिज्ञाहेत्वोर्व्याघातः । यस्मादेकार्थानुपपत्तौ[६] न समूह उपपद्यत इति समूहं चाश्रित्यैकं प्रत्याचक्षाणेन समूह एव प्रत्याख्यातो भवतीति सोऽयमुभयतो व्याघातात् यत्किञ्चनवाद इति । शेषं भाष्ये ॥

---

(१) गवादि—पा० ४ पु० ।
(२) अन्यतर—पा० ४ पु० ।
(३) मन्यं—पा० ४ पु० ।
(४) समुदाया—पा० ४ पु० ।
(५) णुशब्द—पा० ४ पु० ।
(६) नानेकाश्च न इत्यधिकं क्वचित् ।

अथायमपर एकान्तः ॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७ ॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः[१] । यावद्भावजातं तत्सर्वमभावः कस्मात् भावेष्वितरेतराभावसिद्धेः । असत्प्रत्ययप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात् सर्वमभावः अनुत्पन्नप्रध्वस्तपटवत् सर्वो भावशब्दोऽसत्समानाधिकरणः प्रतिषेधसमानाधिकरणश्च प्रध्वस्तपटवत् यथा नास्ति पट इति कथं नास्ति कदा च नास्तीति स्याल्लाद्यात्मना ऽनुत्पद्यमानो ध्वस्तश्चेति । सोऽयं घट[२]शब्दोऽसत्प्रत्ययसमानाधिकरणो घटस्यात्यन्तासत्त्वं प्रतिपादयति । तथा च सर्वे भावा असत्प्रत्ययसमानाधिकरणास्तस्मात् सर्वमभाव इति। प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोश्च व्याघातः सामानाधिकरण्यमभिन्नविभक्तिसत्त्वमेकविभक्त्युच्चारणमिति भावाभ्युपगमात् तच्छब्दाभ्युपगमाच्च विधेः । यत्सर्वमिति मन्यसे तदभाव इति नासति तत्प्रत्ययेन भवितुं शक्यम् । न च भावप्रत्ययेनाभाव इति च भावः प्रतिषिध्यते नासत्युत्तरपदार्थे नञः प्रयोग इति प्रसज्यप्रतिषेधपर्युदासाभ्यां पूर्ववत् प्रसङ्गः यथानेकपदे ऽनित्यपदे चैवं सर्वपदे चाभावपदे च व्याघात ऊह्यः । शेषं भाष्ये । सर्वासत्त्वे विभक्तिस्वभावावधारणं वक्तव्यम् । यदि च सर्वमभावो विभक्तिः किंस्वभाविकेति वक्तव्यमेतत् । असत्यां च विभक्तावभिन्नविभक्तिकत्वं सामानाधिकरण्यमिति व्याहतम् । असत्प्रत्ययप्रतिषेधसामानाधिकरण्यमिति ब्रूषे[३]

(१) नरासिद्धेः—पा० ४ पु० । (२) स घट—पा० ४ पु० ।
(३) ब्रुवाण एव—पा० ४ पु० ।

सर्वमभाव इति च व्यावर्तयसि न ह्यसदधिकरणं भवति । अधिकरणं नाम यद्यत्र वर्तते तत्राभावे नास्तीति सूत्रेणाभिसम्बन्धः ॥

न स्वभावसिद्धेर्भावानाम् ॥ ३८ ॥

न स्वभावसिद्धेर्भावानामिति । स्वेन भावेन भावा भवन्तीति सूत्रार्थः । किं पुनरनेन सूत्रेण क्रियते पूर्वसूत्रविरोधश्चोद्यते । कथमिति भावेष्वितरेतराभावसिद्धेरित्यभावोऽभावताभिधीयते तथा-चाभिदधानः[१] स्वभावतोऽभावानभ्युपैषि विशेषणवैयर्थ्यं च भावेष्वि-तरेतराभावसिद्धेरिति[२] सर्वामत्वे ह्येवमेव वक्तव्यम् न सन्ति भावा न पुनरेवं वक्तुं युक्तम् इतरदितरत्र[३] भवतीति इतरदिति[४] चायं विधानशब्दः न च सर्वस्याभावे विधीयमानं वस्तु सम्भवति यदितरशब्दवाच्यं स्यादिति । इतरवाच्यतां चाभ्युपगम्येतरदितरत्र प्रतिषिध्यत इति । स्वभावसिद्धिरभ्युपगता भवति कश्च स्वो भावो भावानां द्रव्यादीनां सदादि सामान्यं क्रियावदादिर्विशेषः स्वर्ग-पर्यन्ताः पृथिव्याः प्रत्येकमनन्तो भेदः सामान्यविशेषसमवायादीनां सामान्यो वैशेषिकश्चान्तर्गणिकोऽनन्तो भेद इति । सोऽयमभावस्य निरूपाख्यत्वात् सम्प्रत्यायकः स्वभावभेदो न स्यात् अस्ति त्वसौ[५] तस्मान्न सर्वमभाव इति । अथवा स्वभावसिद्धेरिति गौरिति प्रयुज्य-माने नाभावः प्रतयते किन्तु जातिविशिष्टं द्रव्यं यदि च सर्वमभावः स्यात् गौरिति प्रयुक्ते ऽभावो गम्येत तस्मान्न सर्वमभाव इति ।

---

(१) चानिदधानः—पा० ४ पु० । (२) तरेतरासिद्धेः—पा० ४ पु०

(३) इतरदितरवन्न—पा० १ पु० । (४) इतरवदिति—पा० १ पु० ।

(५) अस्ति त्वयं—पा० ४ पु० ।

अथवा स्वभावसिद्धेरिति अमन् गौरश्वात्मना अनश्वो गौरगौर्गौरिति कस्मान्नोच्यते इति अवचनाद् गौरिति[१] अगौर्गौरित्युक्ते व्याहतं भवति यदि व्याघातभयाद्गौर्गौरिति नोच्यते हन्त तर्हि सिद्धो-ऽभावः। कथं तर्हि अयं प्रतिषेधोऽगौरश्व इति। व्यतिरेकप्रतिषेधे भावेनासत्प्रत्ययस्य सामानाधिकरण्यमिति यथा न सन्ति कुण्डे वदराणीति कुण्डवदरयोः सम्बन्धः प्रतिषिद्ध्यते न कुण्डवदरसभावः॥

न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ३९ ॥

न स्वभावसिद्धिरापेक्षिकत्वात्। न स्वभावसिद्धिरापेक्षिकी यतः न स्वेनात्मना किञ्चित् सिद्धमिति। यथा दीर्घह्रस्वे परापरे चेति॥

व्याहतत्वादयुक्तम् ॥ ४० ॥

व्याहतत्वादयुक्तम्। यदि ह्रस्वापेक्षाकृतं दीर्घं ह्रस्वमनापेक्षिकम् अथ दीर्घापेक्षाकृतं ह्रस्वं दीर्घमनापेक्षिकं परस्परापेक्षयोश्च यद-पेक्षयेतरज्ज्ञायते तदनापेक्षिकमिति उभयोरभावः एकस्याभावा-दिति। अपेक्षायामनपेक्षायां च द्रव्ययोर्न भेदः यावती एव द्रव्ये ऽपेक्षमाणे तावती एव[२] अनपेक्षमाणेऽपि न ह्यन्यतरत्र भेदः। अतिशयग्रहणं कथं यदि द्रव्ययोर्द्वयोरभेदः अपेक्षमाणयोरनपेक्ष-माणयोर्दीर्घह्रस्वप्रत्ययः तर्हि न प्राप्नोति न न प्राप्नोति द्वयोर्ग्रहणे ऽतिशयस्य ग्रहणात् द्वयोस्तावद् द्रव्ययोः प्रत्यर्थनियते द्वे ह्येव बुद्धी भवतः अत एकस्मिन् विद्यमानमतिशयं गृह्णाति एकस्मिन् विद्यमानं च ह्रस्वत्वम् सोऽयमुभयदर्शने प्रतिसन्धत्ते प्रतिसन्धानप्रत्ययजा तस्य

(१) गौरस्तीति—पा० ४ पु०। (२) द्रव्ये—इत्यधिम् ४ पु०।

बुद्धिरुत्पद्यते अस्माद्दीर्घमदोऽस्मादद्दो ह्रस्वमिति न पुनर्वस्तुन उत्पादानुत्पादाविति। स्वभावसिद्धौ चासत्यां[१]मपेक्षा न प्राप्नोति। यदि स्वभावसिद्धमन्तरेणापेक्षाभेदाद्दीर्घादिभेदा भवन्ति सर्वमपेक्ष्य सर्वस्य सर्वत्र तथाभूतः प्रत्ययः स्यात् न च रूपरसगन्धस्पर्शप्रत्ययेष्वपेक्षासामर्थ्यमस्ति न च परिमण्डलौ परमाणू उपलभमान ईश्वरः परमाणुमपेक्ष्य परमाण्वन्तरे दीर्घह्रस्वादिप्रत्ययान् करोति अतो नापेक्षाकृताः प्रत्यया इति। सर्वमभाव इति सर्वथा चायं वादो व्याहतः। कुतो व्याघातः आदौ तावत् प्रमाणोत्पत्त्यनुत्पत्ती[२] सर्वमभाव इति ब्रुवाणः प्रमाणं पर्यनुयोज्यः। यदि ब्रूते व्याहतं भवति अथ नाभिधत्ते ऽर्थोऽस्य न सिध्यति प्रमाणाभावात्। सर्वमभाव इति वाक्यं तस्य यद्यभिधेयम् अर्थं प्रतिपद्यते पूर्ववद्व्याघातः अथ न प्रतिपद्यते वर्णोच्चारण[३]मात्रमनर्थकमिति। सर्वमभाव इति च वाक्यस्य[४] प्रतिपादयितारं प्रतिपत्तारं च यदि प्रतिपद्यते[५] पूर्ववद्व्याघातः सर्वमभाव इति सर्वं भाव इति च वाक्ये यद्यनयोरर्थभेदं प्रतिपद्यते व्याहतं भवति अथ न प्रतिपद्यते विशेषोपादानं व्यर्थम् सोऽयं सर्वाभाववादो यावद्यावद्विचार्यते तावत्तावदुपपत्तिं न सहत इति।

अथेमे संख्यैकान्तवादाः। सर्वमेकं सदविशेषादित्येवमादि भाष्ये। तेषां प्रतिषेधद्वारकं सूत्रम् ॥

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥ ४१ ॥

---

(१) स्वभावसिद्धावसत्यां—पा० ४ पु०। (२) प्रमाणोपपत्त्यनुपपत्ती— पा० ४ पु०।
(३) सर्वोच्चारण—पा० ४ पु०। (४) वाक्यार्थ—पा० ४ पु०।
(५) पाद्यते—पा० ४ पु०।

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्। संख्यैकान्तानामसिद्धिः कारणस्य प्रतिज्ञार्थव्यतिरेकात् सर्वमेकमिति प्रतिज्ञां कृत्वा यदि प्रतिज्ञेयव्यतिरिक्तं साधनं ब्रवीति एकान्तो न सिद्धयति तच्च साधनं प्रतिज्ञायाश्चार्थ इति द्वैतम् एवं द्वैतादिष्वपीति। अथ प्रतिज्ञेयव्यतिरिक्तं साधनं नास्ति एवमप्येकान्तोऽस्य वा न सिद्धयति साधनाभावात् न साध्यं साधनमिति ॥

न कारणावयवभावात् ॥ ४२ ॥

न कारणावयवभावात्। कारणस्य साध्यावयवत्वादित्ययं[१] सूत्रार्थः। साध्यावयवसाधनम् एवं च सति साध्यव्यतिरिक्तं साधनं नोक्तं भवति न चासाधना सिद्धिरिति ॥

निरवयवत्वादहेतुः ॥ ४३ ॥

निरवयवत्वादहेतुः। साध्यावयव एव कारणमित्ययमहेतुः निरवयवत्वात् प्रतिज्ञार्थस्य सर्वमेकमित्येतस्मिन् प्रतिज्ञार्थे न किञ्चिदपवृज्यते अनपवर्गेण सर्वं पचीकृतमिति सर्वस्य निरवयवस्य पचीकरणान्न हेतुरस्ति न च साध्यं हेतुर्भवितुमर्हतीति। आत्मनि च क्रिया विरुद्धयते यत्तत्प्रतिपाद्यं तदेव प्रतिपादकमिति न युक्तं न कर्म करणं भवितुमर्हतीति। ते खल्विमे संख्यैकान्ता यदि विशेषकारितस्यार्थभेदस्य प्रत्याख्यानेन वर्तन्ते मिथ्यावादा भवन्ति प्रत्यक्षानुमानागमविरोधित्वात्। प्रत्यक्षोयं गवादिघटादिभेदः अनुमानतोऽपि गम्यते अन्यदन्येनानुमीयते आगमतोऽपि गम्यते प्रतिपन्नः

(१) साध्यावयवत्वादि साधनं नास्ति एवं सत्येकान्तो ह्यर्थं—पा० ४ पु०।

प्रतिपादयिता अप्रतिपन्नः प्रतिपाद्य[१] इति । अथाभ्यनुज्ञानेन वर्तन्ते तथाप्येकान्तत्वं जहति । अथ सामान्यकारितोऽभेदः विशेषकारितश्च भेद इति प्रतिपद्यते तथापि न किञ्चिद्बाध्यते । न च भेदमन्तरेण सामान्यं लक्षावकाशमिति सामान्यं प्रतिपद्यमानेन[२] भेदोऽभ्युपगन्तव्यः भेदं च[३] प्रत्याचक्षाणेन सामान्यमपि प्रत्याख्येयम् विशेषानाधारस्य सामान्यस्याविषयत्वात् ते खल्विमे संख्यैकान्ताः स्तत्त्वज्ञानप्रविवेकाय परीक्षिता इति ॥

प्रेत्यभावानन्तरं फलमुद्दिष्टं तस्मिन् ।

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४४ ॥

सद्यः कालान्तरे च फलनिष्पतेः संशयः । काचित् क्रिया सद्यःफला यथा पचति दोग्धीति तस्याः सद्यःफलमोदनपयसी क्रियानन्तरं भवतीति[४] । काचित् कालान्तरफला यथा कृषति वपतीति तस्याः कालान्तरे फलं न क्रियानन्तरं तस्याधिगम इति । अस्ति चेयं क्रिया अग्निहोत्रं जुहुयादिति तस्याः फले सन्देहः किमियं सद्यस्तापादिफला उत कालान्तरफला ॥

न सद्यः कालान्तरोपभोग्यत्वात्[५] ॥ ४५ ॥

न सद्यः[६] कालान्तरोपभोग्यत्वात् । स्वर्गः फलं श्रूयते चोदितया[७] च क्रियया नानर्थिकया श्रक्यं भवितुम् न चायं तापादिका-

---

(१) प्रतिपद्यते—पा० ४ पु० । (२) सामान्यं च प्रतिपद्यमानेन—पा० ४ पु० ।
(३) भेदं वा—पा० ४ पु० । (४) भवत इति—पा० ४ पु० ।
(५) सूत्रमिदं न्यायसूचीनिबन्धे नास्ति । (६) न सद्यः फलम्—पा० ४ पु० ।
(७) चोदितरया—पा० ४ पु० ।

मोऽग्निहोत्रं जुहोति तेनावगम्यते तां हवनादिक्रियामपेक्षमाणा-दात्ममनःसम्बन्धात् विशुद्धेनाभिसन्धिना अनुगृहीतादात्मनि धर्म उत्पद्यत इति। स च कालान्तरे ऽप्रतिबध्यमानशक्तिः देशाद्यनु-गृहीतः फलं ददाति तच्च पतिते तस्मिन् देहे भवति देहान्तरा-पन्नस्यातो न सद्य इति ॥

कालान्तरेणानिष्पत्तिर्हेतुविनाशात्[1] ॥ ४६ ॥

कालान्तरेणानिष्पत्तिर्हेतुविनाशात्। व्यावृत्ते हवने व्यावृत्ते च पूर्वशरीरे देहान्तरे फलं श्रूयते तन्न विनष्टात् कारणाद् युक्त मिति ॥

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात्[2] ॥ ४७ ॥

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात्। न ब्रूमो विनष्टात् कार-णात् कार्यमुत्पद्यते अपि तु अग्निहोत्रहवनादिलक्षणया क्रियया यथोक्तेन विधिना धर्मो जन्यत इत्युक्तम् तस्मात् फलमिति यथा फलार्थिना वृक्षस्य मूलसेकादिकर्म क्रियते न च मूलसेकात् विन-ष्टात् फलेन युक्तं भवितुम् अपि तु मूलसेकादिकर्मकृतं भोक्तुः कर्मापेक्षं पृथिव्यादिधातुमनुगृह्णाति स उपगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यमभिनिर्वर्तयति तद्रसद्रव्यं वृक्षमाफलात् सद्य उपसर्पति तस्मात् पर्णादिफलं निर्वर्तते। एवं च सति विन-ष्टात् मूलसेकात् फलनिर्वृत्तिः न च मूलसेकादिवैयर्थ्यमिति। तदिदं प्राङ्निष्पत्तेः ॥

---

(१) निष्पत्तेर्हेतुविनाशात्—पा० ४ पु०। (२) वृक्षफलवच्च स्यात्—पा० ४ पु०।

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ॥ ४८ ॥

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात्। प्राङ्निष्पत्तेरुत्पत्तिधर्मकं नासत् उपादाननियमात् असत्त्वसमाने[१] उपादाननियमो न प्राप्नोति सदपि न भवति विद्यमानस्योत्पत्तिर्व्याहतेति[२] अस्ति चोत्पद्यते चेति व्याहतम्। न सदसत् सदसतोर्वैधर्म्यात् सदित्यर्थाभ्यनुज्ञा असदिति तस्य प्रतिषेधः अभ्यनुज्ञाप्रतिषेधयोः सामानाधिकरण्यमनुपपन्नम्। तस्मान्न सदसदपि नाप्युभयविपरीतं कार्यं युज्यते तस्य स्वरूपानिर्देशादिति। न हि तस्य स्वरूपं शक्यं निर्देष्टुमिति। प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा। सत्यमिति कस्मात् ॥

उत्पादव्ययदर्शनात् ॥ ४९ ॥[३]

उत्पादव्ययदर्शनात्। वस्तुनः प्रागनुपलब्धिरूपस्य पश्चादुपलब्धिर्या सोऽसदुत्पादे सति युज्यते विनाशश्चोपलब्धरूपस्य पुनरनुपलब्धिरिति। न चैतत् सर्वनित्यवादिनः[४] न हि सत्यस्य उत्पादो न च विनाश इति उत्पादविनाशौ च प्रत्याचक्षाणेन लोको ज्ञेयः। अथ लोकोऽयं प्रवर्तमानः किमर्थं प्रवर्तते ननु चायं प्रवर्तते इदमाप्स्यामि इदं हास्यामीति सत्यमेवं प्रवर्तते न पुनः सत्कार्य-

---

(१) असत्त्वेन समानेन—पा० ४ पु०।

(२) विद्यमानस्योत्पादो व्याहन्यते—पा० ४ पु०।

(३) प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनादित्येकमेव सूत्रमिति केचित्।

(४) सम्भवति—इत्यधिकम् ४ पु०।

वादिनः किञ्चिद्धेयमुपादेयं वा विद्यते प्रतिज्ञादीनां सावयवानामुपादानं व्यर्थम् उत्पादव्ययप्रत्याख्यानात् न किञ्चित् जायते न किञ्चित् विनश्यतीति अवयवानामुपादानं व्यर्थं(१) यदि सत्कार्यप्रतिपत्त्यर्थं प्रतिपत्तेर्विद्यमानत्वाद् व्यर्थमुपादानम् न हि यद्यस्य लोके भवति स तदुपादानमुपादत्ते इति। अथाज्ञानतिरोभावार्थमुपादानमिति एतदपि तादृगेव। न हि अनुपजातविशेषस्याज्ञाननिवृत्तिर्युक्तेति। अथाभिव्यक्त्यर्थमुपादानमिति केयमभिव्यक्तिर्नाम या उपादानेन क्रियते यदि कार्यं व्याहतम्। अथ कार्यधर्मः तथाप्यनिवृत्तो व्याघातः। अथोपलब्धिः कार्यविषयाभिव्यक्तिः सा क्रियत इति न मुच्यसे व्याघातात्(२)। अथ कारणात्मनावस्थितस्य कार्यात्मनाऽवस्थानमभिव्यक्तिः एवमप्यनिवृत्तो व्याघातः कार्यात्मनावस्थानमसङ्गवतीति। अथ कारणस्य संस्थानविशेषोऽभिव्यक्तिः संस्थानविशेषोऽभूत्वा भवतीति व्याघातः। अथास्ति व्यर्थमुपादानम् अथ कारणस्य खलक्षणपुष्टिरभिव्यक्तिः। न अपूर्वाभ्यागमाभावे खलक्षणपुष्टिशब्दार्थं पश्याम इति व्यर्थमुपादानम् खलक्षणपुष्टिश्च पूर्वमभूत्वा पश्चाद् भवतीति व्याघातान्न मुच्यसे(३)। एवं येन येन कल्पेनाभिव्यक्तिरभिधीयते तेन तेन सत्कार्यं बाधत इति। यत्पुनरेतत् नासदुपादाननियमादिति॥

बुद्धिसिद्धं तु तदसत्॥ ५०॥

बुद्धिसिद्धं तु तदसत्। नायं सत्त्वादुपादाननियमोऽपि तु साम-

(१) उत्पादव्ययवादिनः—पा० ४ पु०। (२) न मुच्यसे उपघातात्—पा० ४ पु०।
(३) व्याघातः—पा० ४ पु०।

र्थात् इदमनेन शक्यं निर्वर्तयितुं[१] नेदमनेनेत्येवं बुद्धिसिद्धं कार्यं कृत्वा यद् यस्योत्पत्तये समर्थं तत् तस्योपादीयते न सर्वं सर्वस्य न सर्वस्मात् सर्वमुत्पद्यमानं दृष्टमिति। अथोत्पत्तिनियमेन कार्यनियमेन कार्यकारणनियमं प्रतिपद्यते तेनापि कार्यकारणशब्द्योरर्थो वाच्यः[२] किमुक्तं भवति कारणमिति किमुक्तं च भवति कार्यमिति। ननु करोतीति कारणं क्रियत इति कार्यम्। यद्यभिव्यक्तिः पूर्ववत् प्रसङ्गः अथ विद्यमानेष्वपि करोत्यर्थो दृष्ट इति मन्यसे यथा केशान् कुरु पृष्ठं कुर्विति न तद्विद्यमानानां हि वचनाविशेषः केशानामविद्यमानः क्रियते पश्चात् पृष्ठस्य मलापगमोऽविद्यमान इति न विद्यमानं कारणार्थं जात्वपि पश्याम इति तस्मादसदेतत्। यदि ह्यसत् क्रियत इति खरस्य विषाणं किं न क्रियत इति। क एवमाह न क्रियत इति यत् तत् खरस्य विषाणं तत् क्रियत इति। अथ खरः कस्मात् विषाणस्य कारणं न भवतीति एतत् न जानीमः कस्मात् न भवतीति न पुनः खरेण विषाणं क्रियमाणं दृष्टमित्यतोऽवसीयते। एतेन शशविषाणं व्याख्यातम्। न तदसत्त्वात् न क्रियते किं तु कारणाभावादिति। न चासत्त्वमुत्पत्तौ हेतुः अपि तु सतोऽनुत्पत्तेरसदुत्पद्यत इति असत्त्वात् खरविषाणं नोत्पद्यत इति ब्रुवाणः स्वसिद्धान्तं बाधते न हि भवत्यत्रे खरविषाणं नास्ति सत्त्वे चासत्त्वे च समाने यस्य कारणमस्ति तदुत्पद्यत इति सत्कार्यवादिनस्त्वेवं सर्वलोकव्यवहार उच्छिद्यत इत्युक्तम् नापूर्वं जायते न

---

(१) निर्णयितुं शक्यं—पा० ४ पु०। (२) वक्तव्यः—पा० ४ पु०।

पूर्वं विनश्यतीति। अथासत्कार्यं[१] किं प्रमाणम् न सत्त्वे न चासत्त्वे ऽनुमानमस्ति धर्मिणविप्रतिपत्तेः क तर्हि विवादः यदुभयपक्षम-प्रतिपन्नं तस्य धर्मेषु तदुभयपक्षसम्प्रतिपन्नाः तन्तवस्तान् प्रति पक्षा विभज्यन्ते। एके तावद् ब्रुवते तन्तुमात्रं पट इति। अपरे तु तन्तवः संस्थानविशेषेणावस्थिता इति। अपरे तु तन्तव एव कार्यात्मना ऽव-तिष्ठन्ते इति। अपरेषां धर्माधर्मा[२]विर्भावतिरोभावाविति। अपरे तु शक्तिविशिष्टास्तन्तवः पट[३] इत्याहुः। तदेवं विभक्तेषु पक्षेषु तन्तु-मात्रेषु तद्व्यतिरेकः साधयितव्यः स चोपपादित[४] इति। ये ऽपि संस्थानविशेषेणावस्थितान् तन्तून् पट इति वर्णयन्ति तान् प्रति साधनं प्रागुपलब्धिकालात् संस्थानविशेषशून्याः तन्तवः तत्कारणत्वात् तुर्या-दिवदिति। एतेन कार्यात्मनाऽवतिष्ठन्त इति व्याख्यातम्। तथा धर्मान्तराविर्भावतिरोभावाविति अत एव शक्तिविशेषावस्थितास्तन्तव इति ब्रुवाणः किञ्चिदपि न बाधत इति तान् प्रति न साधनमुच्यत इति। य एवार्थो बुद्धिसिद्धः तदसदिति स एवार्थः शक्तिविशेषाव-स्थितास्तन्तव इति सर्वेषु चैव पक्षेषु नापूर्वोत्पादमन्तरेण पटबुद्धिः सम्भवतीति व्याघातोऽनिवार्यः। विद्यमानाभिव्यक्त्यर्थास्तन्तवः तदर्थिना नियमेनोपादानात् खनित्रादिवत् विद्यमानस्याभिव्यक्तिरसतीति अभिव्यक्तिवत् कार्येपि प्रसङ्गः सर्वं चोक्तोत्तरमेतत्। यत् पुनरेत-

---

(१) असत्कार्यवादे—पा० ४ पु०। (२) धर्मान्तराविर्भाव—पा० ४ पु०।

(३) शक्तिविशिष्टान् तन्तून् पट—पा० ४ पु०।

(४) उपपादित इति द्वितीयाध्याये। प्रागुपलब्धिकालादिति कारणव्यापारात् प्रागित्यर्थ इति तात्पर्यटीकायां वाचस्पतिमिश्राः।

दुपादाननियमादिति उपादानं कारणम् न च सति कारणार्थं पश्याम इति पूर्ववत् प्रसङ्गः यदपि खनित्रादिवदिति न च खनित्राद्युदकार्थमुपादीयते अपि तु आवरणविगमार्थम् आवरणविगमश्च विभागः स चाभूत्वा भवतीति असिद्धो दृष्टान्तः। अथ विभागं न प्रतिपद्येत सोऽप्यप्रतिपन्नविभागो विभागप्रत्ययोत्पत्तिकारणं पर्यनुयोज्यः। अथाप्राप्तिमात्रात् विभागप्रत्ययं प्रतिपद्यते साप्यप्राप्तिः किं प्राप्तेरभावः उत प्राप्तेरन्येति किञ्चातः यदि प्राप्तेरभावोऽप्राप्तिः सा ऽप्राप्तिः कुतो भवतीति वक्तव्यम्। यदि प्राप्तिविरोधनिमित्तं तद्विभाग इति नाभावो विभागस्य यच्च प्रतिषिध्यते तदन्यच्च भवतीत्युक्तम्। अप्राप्तिश्च द्वयी असंसर्गः संसृष्टानां विगमश्च। तत्र यः संसृष्टानां विगमः स विभाग इति तं च खनित्रादीनि कुर्वन्ति। अथ प्राप्तेरन्याऽप्राप्तिः सापि द्वयी तत्रापि पूर्ववत् प्रसङ्गः। अथ भिन्नदेशोत्पत्तिं विभागं प्रतिपद्येत भिन्नदेशे द्रव्ये उत्पन्ने इति विशेषणोपादानान्न भिन्नदेशोत्पत्तिर्विभाग इति। उत्पन्ने उत्पन्नमिति भिन्नदेशतया भिन्नमिति विभागात् विभक्तमिति तान्येतानि भेदप्रत्ययनिमित्तानि[१] प्रत्ययभेदानुमेयानि न ह्येते पर्यायशब्दा भिन्नमुत्पन्नं विभक्तं चेति। भिन्नदेशोत्पत्तेश्च प्रतिषिद्धत्वान्न भिन्नदेशोत्पत्तिर्विभाग इति। क्षणिकत्वाद् विभागस्य विभागप्रत्ययोत्पत्तिर्न[२] युक्तेति चेत् न सामान्याभिव्यक्तिसंयोगविनाशाभ्यामेव प्रत्ययोत्पत्तिकालानुभवात्। पूर्वं तावत् स्वकारणा-

(१) प्रत्ययभेदनिमित्तानि—पा० ४ पु०।

(२) विभागप्रत्ययस्योत्पत्तिर्न—पा० ४ पु०।

दुत्पन्नो विभागः सामान्यं व्यनक्ति सामान्याभिव्यक्त्युत्तरकालं विभाग-प्रत्ययं करोति संयोगं च विनाशयति संयोगविनाशोत्तरकालं संयोगाद्द्रव्यात्मकात्[१] विनश्यतीति। तदेवमनेकक्षणानुभवादुत्पन्नमात्रो विभागो ध्वंसत इत्यसिद्धम्। तदेवं व्यवस्थितमेतदसदुत्पद्यत इति॥

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः॥ ५१॥

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः। यच्च मूलसेकादि कर्म यच्च पर्णादिफलं तदुभयं वृक्षाश्रयम् कर्म त्विह कर्मफलं चान्यत्रेति आश्रयव्यतिरेकात् वृक्षफलोत्पत्तिवदित्यसिद्धो दृष्टान्तः॥

प्रीतेरात्माश्रयत्वादप्रतिषेधः॥ ५२॥

प्रीतेरात्माश्रयत्वादप्रतिषेध इति। आश्रयव्यतिरेकोऽसिद्ध इति सूत्रार्थः। यत्रैव कर्म तत्रैव कर्मफलमिति॥

न पुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादिफलनिर्देशात्॥ ५३॥

न पुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादि[२]फलनिर्देशात्। पुत्रादि फलत्वेन निर्दिश्यते न पुत्राद्यात्मनि वर्तत इति॥

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः॥ ५४॥

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः। पुत्रादिसम्बन्धात् फलं प्रीतिर्भवति तत्कारणत्वात् पुत्रादि फलशब्देनाभिधीयते

---

(१) संयोगाद्द्रव्यात्मकात्—पा० ४ पु०।

(२) अन्नादिष—पा० ४ पु०।

यथान्नसाधनाः प्राणाः अन्नं वै प्राणा[१] इति। उपचारस्य प्राणाभावात् लोकप्रयुक्तवाक्यानुविधानेन क्रियत इति।

फलानन्तरं दुःखमुद्दिष्टं लक्षितं च[२] बाधनालक्षणं[३] दुःखमिति। तत् किं सर्वलोकस्य सुखस्य[४] प्रत्याख्यानम् आहोस्विदन्यः कल्प इति। अन्य इत्याह कथं न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम्। अयन्तु जन्ममरणप्रबन्धानुभवनिमित्तात् दुःखानिर्विण्णस्य दुःखभावनोपदेशः कथं नामायं सर्वं दुःखमिति भावयेत् भावयंश्च विरज्येत विरक्तो मुच्येत इति। कथं पुनरयं सर्वं दुःखमिति भावयति सर्वे सत्त्वनिकायाः सर्वः पुनर्भवः सर्वमुत्पत्तिस्थानं दुःखसाहचर्यात् दुःखमित्युक्तमृषिभिः दुःखभावनमुपदिश्यते तत्र चाहेतुरुपादीयते॥

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः॥ ५५॥

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिरिति। तत्र जायत इति जन्म शरीरेन्द्रियबुद्धयो व्यपदिश्यन्ते शरीरादीनां प्रादुर्भावे उत्पत्तिः जन्मन उत्पत्तिः जन्मोत्पत्तिः विविधा च बाधना हीना मध्यमोत्कृष्टा चेति। शेषं भाष्ये। अनेनाभिप्रायेण दुःखोपदेशो न सुखं प्रत्याख्यातम्॥

न सुखस्याप्यन्तरालनिष्पत्तेः[५]॥ ५६॥

न सुखस्याप्यन्तरालनिष्पत्तेः। यस्माद्बाधनान्तराले सुखमुत्पद्यमानं प्रत्यक्षदृष्टमिति। इतश्च॥

---

(१) प्राणिनः प्राणा—पा० ४ पु०। (२) उक्तं च—पा० ४ पु०।
(३) लक्षितं—पा० ४ पु०। (४) सर्वलोकसाक्षिकस्य—पा० ४ पु०।
(५) निर्वृत्तेः—पा० ४ पु०।

बाधनानिर्वृत्तेर्वेदयतः पर्येषणदोषाद्प्रतिषेधः ॥ ५७ ॥

बाधनानिर्वृत्तेर्वेदयतः पर्येषणदोषाद्प्रतिषेधः । सुखस्य दुःखोद्वेगेनेति प्रकरणात् यस्मादयं वेदयन् इदं मे सुखसाधनमिदं मे दुःखसाधनमिति सुखसाधनमाप्तुं दुःखसाधनं हातुं प्रयतते सुखसाधनानां प्राप्तये चास्य यतमानस्यानेकविधास्तापोऽनुपपन्नवते तत्तापानुभवात् सर्वं दुःखमित्युच्यते न सुखस्याविर्भावादिति(१)। अयमेव चार्थो मुनिना श्लोकेन वर्णितः ॥

कामं काम्यमानस्य यदा कामः समृध्यति ।
अथैनमपरः कामः क्षिप्रमेव प्रबाधते(२) ॥ इत्येवमादि ।

दुःखविकल्पे सुखाभिमानाच्च ॥ ५८ ॥

दुःखविकल्पे सुखाभिमानाच्च । यश्च सुखार्थं यतमानस्य दुःखविकल्पो भवति तं सुखाङ्गभावात् सुखमित्यभिमन्यमानः पुनस्तदुपादत्ते पुनः पुनर्निवर्तत इति न संसारमतिवर्तते(३) तस्याः सुखसञ्ज्ञायाः प्रतिषेध उपदेशोऽयं क्रियत इति सर्वं दुःखमिति । यद्येवं कस्माद् दुःखं जन्मेति नोच्यते सोऽयमेवं वक्तव्ये यदाह दुःखमेवेति तेन सुखाभावं ज्ञापयति यदपि तदन्तराले सुखमुपजायते तदपि

---

(१) सुखस्याभावादिति—पा० ४ पु० ।

(२) कामं काम्यं कामयमानस्य यदा कामः समृद्ध्यति सम्पन्नो भवति यथानन्तरमेनं पुरुषमपरः कामः इच्छा क्षिप्रं बाधते । स्वर्गादिप्राप्तावपि स्वाराज्यादि कामयते । एवं तत्प्राप्तौ प्राजापत्यादीत्यस्य इच्छा तदुपायप्रार्थनादिना दुःखेन बाधत इत्यर्थः । इति तात्पर्यटीकायां वाचस्पतिमिश्राः ॥

(३) पुनः पुनर्जायते न संसारमभिवर्तते— पा० ४ पु० ।

दुःखमेव दुःखानुषङ्गात् नाभावादिति जन्मविनिग्रहार्थो यो वै खल्वयमेव शब्दः जन्मनोऽनेन विनिग्रहं शास्ति सर्वं दुःखमिति भावयन् दुःखसाधनानि नोपादत्ते अनुपाददानो विमुच्यते इति ।

दुःखोद्देशानन्तरमपवर्गः सम्प्रत्याख्यायते ॥

क्षीणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५९ ॥

क्षीणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभाव इत्यनेन सूत्रेण क्षीणानुबन्धान्नास्त्यपवर्गः । शेषं भाष्ये । अनुबन्धः सदा[१]करणीयता नायमृणानुबन्धात् कदाचित् मुच्यते जन्मप्रभृति यावत् प्रायणमिति क्लेशानुबन्धादपवर्गो नास्ति । क्लेशानुबद्ध एवायं जायते क्लेशानुबद्ध एवायं म्रियते इति । प्रवृत्त्यनुपबन्धादपवर्गो नास्ति न कदाचिदयं न कर्म करोति यत्तावदृणानुबन्धादिति ॥

प्रधानशब्देनानुपपत्तेर्गुणशब्देनानुवादो[२] निन्दाप्रशंसोपपत्तेः ॥ ६० ॥

प्रधानशब्देनानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेरिति[३]। नायं प्रधानशब्दः प्रत्यादेयदानप्रतिदेयग्रहणासम्भवात् । यत्र खलु एकः प्रत्यादेयं[४] ददाति इतरः प्रतिदेयं गृह्णाति तत्रायमृणशब्दः प्रधानं भवति अन्यत्र भाक्त इति तस्माद् गुणशब्देनाय-

---

(१) सर्वदा—पा० ४ पु० । (२) नायमर्थमदो—पा० ४ पु० ।

(३) क्षीणेति—इत्यधिकम् । (४) खल्वेभ्यः प्रत्यादेयं—पा० ४ पु० ।

मनुवाद इति। यथाग्निर्माणवक इति तत्राग्निशब्दो दहनादिसमर्थे तेजोविशेषे वर्तते स तत्र वर्तमानः तत्सामान्यादतथाभूते माणवके प्रयुज्यते अग्निर्माणवक इति न पुनरग्निशब्दो माणवकसमानाधिकरणो दहनादिसमर्थं माणवकं प्रतिपादयति अपि तु येऽग्नेः पिङ्गलपाटवत्वादयो धर्माः तत्सम्बन्धिनं माणवकं प्रतिपादयति तद्वारकश्च प्रयुज्यमानोऽयं शब्दो गुणोपकरणत्वात्(१) गौणो भवति। तथा च ऋणशब्दः(२) प्रयुक्तोपमञ्चेदं वाक्यम् ऋणवान् जायत इति उपमाच्च लुप्ता द्रष्टव्या(३) ऋणवान् जायत इति। क उपमानार्थः अस्वातन्त्र्यं ऋणवान् यथा अस्वतन्त्रः एवमयं जायमानः कर्मसु अस्वतन्त्रो वर्तत इति। जायमान इति चायं गुणशब्द एव न मुख्यः सम्भवति न हि मातृतः कुमारे जायमाने लोहितपाणिपादास्थेऽध्ययनादिकर्मोपपत्तिरिति अतो गृहस्थे जायमाने इति। किं पुनर्गृहस्थस्य जायमानेन कुमारेण सामान्यक्रियासम्बन्धः अग्निहोत्रादिहवनक्रियासम्बन्धसामान्यात् गृहस्थो जायत इति। यथा मातृतः कुमारको जायमानः शरीरादिभिः सम्बध्यते एवमग्निहोत्रहवनादिक्रियासम्बन्धसामान्येन जायत इति। कस्मात् शक्तस्यार्थिनः कर्मभिरधिकारात् शक्तश्चार्थी च कर्मभिरधिक्रियते मातृतः कुमारके जायमाने न शक्तिः न चार्थितेति उभयं तु गृहस्थे जायमाने तस्मात् गृहस्थो जायमानोऽभिधीयत इति।

---

(१) गुणोपकरणात्—पा० ६ पु०। (२) स शब्दः—पा० ६ पु०।
(३) उपमाच्च लुप्तनिर्दिष्टा द्रष्टव्या—पा० ४ पु०।

अर्थित्वस्यापरिणामे जरामर्यवादोपपत्तिः यच्चेदं ब्राह्मणमाजरसं कर्मभिः सम्बन्धं ग्रास्नि तदन्यथा सम्भवतीति अर्थित्वस्यापरिणामे जरामर्यवादोपपत्तिः। यदार्थित्वपरिणामः यदार्थित्वं परिणतं भवति(१) तदानेन अग्निहोत्रं सन्न्यसनीयम् आयुषस्तुरीयभागं प्रव्रज्यायुक्तमाह जरेति यावज्जीवसंयोगे हि जरया हवा इत्यनर्थकं यस्मात् अयमग्नक्रस्य बाह्याग्निर्विहिता सत्यर्थित्वे अन्येन हवनं ग्रास्नि यदा पुनरर्थित्वं विपरिणतं तदा सन्यासोऽभिधीयत इति। कस्मात् पुनरेतदेवमुच्यते सत्यर्थित्वे ऽग्निहोत्रहवनमिति कर्मविधौ कामसंयोगश्रुतेः यस्मात् सर्वस्मिन् कर्मणि कामविधिः श्रूयते स्वर्गकाम इति यथोपदिष्टार्थं विद्वांश्चोपदेशविषयः यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते न गायनो बधिरेषु प्रवर्तते न नर्त्तकोऽन्धेषु न चोपदेशविज्ञानं बालके ऽस्ति(२) तस्मान्न तं प्रत्युपदेशः न भिद्यते च लौकिकात् लौकिकोऽपि तावदपरीक्षको न जातमात्रं कुमारकमेवं ब्रूयादधीस्व यजस्व ब्रह्मचर्यं चरेति(३)। कुत एवम्भूतरूपपन्नानवद्यवादी ब्रूयादिति। अथापि विहितं वा अनूद्येत कामाद्वार्थः(४) कल्प्येतेति विहितानुवचनं न्याय्यम् तत्रानुपपन्नप्रमाणकस्यार्थस्याभिधानं कामतः प्रकल्प्येत यो ह्यर्थः प्रमाणतो यावदभिधानं न सम्भवति तस्य यदभिधानं तत्र कामतः प्रकल्पनं

---

(१) यदार्थित्वविपरिणामः यदा ह्यर्थित्वं विपरिणतं भवति—पा० ४ पु० ।
(२) बालकेष्वस्ति—पा० ४ पु० । (३) ब्रह्मचर्यं चरेति—पा० ४ पु० ।
(४) कामार्थत्वादर्थः—पा० ४ पु० ।

सम्भवति यथा जायमानः कुमारकः ऋणवान् भवतीति उपपन्न-प्रमाणस्याभिधानमनुवचनम् यथा जायमानग्रब्दो गृहस्थ इति। कथमवगम्यते गृहस्थ इति यज्ञसाधनत्वात् यस्मात् यजमानो यज्ञाङ्गं भवति साधने तु प्रयत्नव्यापारो दृष्टः न फले यथा पाक-साधनेषु काष्ठादिषु न पाके न लोष्टादिषु साधनेषु। शेषं भाष्ये। कथं पुनरिदं गम्यते फलार्थिन एतद्ब्राह्मणं भवतीति।

अधिकाराच्च विधानं विद्यान्तरवत् ॥ ६१ ॥[1]

समारोपणादात्मन्यप्रतिषेधः ॥ ६२ ॥

समारोपणादात्मन्यप्रतिषेधः। यस्मान्निवृत्ते ऽर्थित्वे समारोपणं विधीयते।

पाचचयान्तानुपपत्तेश्च फलाभावः ॥ ६३ ॥

पाचचयान्तानुपपत्तेश्च फलाभावः। यस्मान्निवृत्ते ऽर्थित्वे प्रव्रजितानां पाचचयान्तानि कर्माणि न क्रियन्ते यदि चेदं ब्राह्मणमविशेषेण प्रवर्तते तेन सर्वत्र पाचचयान्तानि कर्माणि प्रसज्यन्त इति। शेषं भाष्ये। यत्पुनरेतत् क्लेशसन्ततेरविच्छेदादिति।

सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः ॥ ६४ ॥

सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः। यथा सुषुप्तस्य स्वप्नादर्शने क्लेशानुबन्धोविच्छिद्यते सुखदुःखसाधनानुबन्धश्च तथा मुक्त-

---

(१) इदं सूत्रं न्यायसूचीनिबन्धे न दृश्यते ॥

स्यापीति तच्च योगिनो मुक्तस्य रूपमुदाहरन्तीति यदपि प्रवृत्त्यनुबन्धादिति।

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६५ ॥

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य। विद्यमाना प्रवृत्तिः क्लेशमन्तरेण प्रतिसन्धानाय न भवतीति धर्माधर्मकारणं न भवतीति यावदुक्तं स्यात् प्रतिसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म तच्च तृष्णाकारितम्। एतच्चोक्तं वीतरागजन्मादर्शनादिति सूत्रे। कर्मवैफल्यप्रसङ्ग इति चेत् न कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात् न ब्रूमो विद्यमाने कर्मणि मुच्यत इति अपि तु कर्माणि अन्ते जन्मनि विपच्यन्ते।

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६६ ॥

न क्लेशसन्ततेः स्वाभाविकत्वात्। नोपपद्यते क्लेशसन्ततेर्विच्छेदः कुतः क्लेशसन्ततेः स्वाभाविकत्वात्। अनादिरियं क्लेशसन्ततिः स्वभावतः प्रवृत्ता न चासावुच्छेत्तुं शक्येति। तत्रैके परिहारं वर्णयन्ति।

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविके ऽप्यनित्यत्वम् ॥ ६७ ॥[१]

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविके ऽप्यनित्यत्वम्। यथा प्रागु-

---

(१) विश्वनाथपञ्चाननास्तु प्रागुत्पत्तेः इत्यारभ्य ऋणुश्यामतानित्यत्ववदेत्यन्तमेकमेव सूत्रमामनन्ति॥

त्पत्तेरभावोऽनादिरथ च भावेन निवर्त्यते[१] एवमनादिः क्लेशसन्ततिरतत्त्वज्ञस्य तत्त्वज्ञानेन विरोत्स्यत इति ।

अणुश्यामतानित्यत्ववद्वा ॥ ६८ ॥

अणुश्यामतानित्यत्ववद्वा यथाणोः श्यामता अनादिश्च अनित्या च एवं क्लेशसन्ततिरपीति । सतः खलु धर्मो नित्यत्वमनित्यत्वं चेति नित्यानित्यत्वे अवधारयद्भिः[२] उक्तं तत्त्वभावे भाक्तमिति । का पुनरिह भक्तिः नित्यमकारणम् अकारणञ्च प्रागभावः अनित्यं भूत्वा न भवति न च प्रागभावाभावे सति[३] भवत्येतत् सामान्यम् यत्पुनरेतदनादिरणुश्यामतेति हेत्वभावादयुक्तम् अनुत्पत्तिधर्मकमनित्यं नाम हेतुरस्ति अयं तु समाधिः ।

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६९ ॥

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् । कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति चार्थः । अनुभूतविषयप्रार्थनासङ्कल्प इत्युक्तम् । मिथ्यासङ्कल्पेभ्यो रञ्जनीय[४]कोपनीयमोहनीयेभ्यो रागादयः प्रादुर्भवन्ति । कर्म च निकायनिर्वर्तकं सङ्कल्पापेक्षं रागादीन् जनयति । दृष्टो हि कश्चित् सत्त्वनिकायो रागबहुलो यथा पारावतादिः । कश्चित् क्रोधबहुलो यथा सर्पादिः । कश्चित् मोहबहुलो यथाजगरादिः । यदि कर्म रागादीन् निर्वर्तयेत सर्वदा रागादि-

---

(१) विरुध्यते—पा० ४ पु० । (२) नित्यानित्यत्वावधारयद्भिः—पा० ४ पु० ।
(३) प्रागभावे सति—पा० ४ पु० । (४) व्यञ्जनीय—पा० ४ पु० ।

भिर्भवेदित्यनिर्मोचप्रसङ्गः न कारणवैकल्यात्[१] सङ्कल्पाद्यपेक्षं कर्म रागादिकारणम् न निरपेक्षमिति। सुखादीनामपि तर्हि कर्मकारणकत्वं न प्राप्नम् न निरपेक्षत्वात् कर्मसुखादिषु कर्तव्येषु सङ्कल्पान्नापेक्षते ऽपि तु स्वकारणसन्निधानापेक्षं सुखादि करोति। यथोत्क्षेपणादिकर्म नोदनाद्यपेक्षं संस्कारं करोति अनपेक्षं तु संयोगविभागाविति। परस्परनिमित्तत्वं च रागादीनां दृष्टम् रक्तो मुह्यति रक्तः कुप्यति कुपितो मुह्यति रज्यते च मूढः कुप्यति रज्यते चेति। यदपौदमुच्यते अनादिः क्लेशसन्ततिरिति तन्न अविशेषात् यथानादिः क्लेशसन्ततिरेवमाध्यात्मिका भावाः सर्वेऽनादिना प्रबन्धेन प्रवर्तन्ते न जातु अनुत्पन्नपूर्वं किञ्चिदुत्पद्यते न चैवं किञ्चिदनुत्पत्तिधर्मकं[२] प्रतिज्ञायते अनुत्पन्नपूर्वं तु तत्त्वज्ञानं केवलमुत्पद्यते नान्यः कश्चिदाध्यात्मिको भाव इति॥


इति—औद्योतकरे न्यायवार्त्तिके चतुर्थस्याध्यायस्याद्यमाह्निकम्॥

---

(१) वैफल्यात्—पा० ४ पु०। (२) अनुत्पत्तिधर्मकं—पा० ४ पु०।

चतुर्थोऽध्याये

द्वितीयमाह्निकम् ।



ॐ नमः परमात्मने ।

तदिदं तत्त्वज्ञानमुत्पद्यमानं किं विषयमात्रे भवति आहोस्विद्विषयविशेषे इति। विषयमात्रे तावदशक्यं तत्त्वज्ञानेन भवितुम् कुतः विषयाणामानन्त्यात् विषयविशेषे ऽपि तत्त्वज्ञानविषयत्वेन योऽवतिष्ठते स विभज्य वचनीयः। तत्र विषयान्तराणामात्मादिप्रमेयव्यतिरेकिणां निराकरणं प्रमेयविशेषविषयत्वात् सूत्रस्य यत्तदात्मादिसूत्रं न तेन प्रमेयमात्रमभिधीयते प्रमेयमात्राभिधाने हि आत्मादिग्रहणं व्यर्थम् अपि तु प्रमेयविशेषः यस्तत्त्वज्ञानविषयत्वेन व्यवतिष्ठमानः संसारविच्छेदहेतुर्भवति यश्च मोहविषयत्वात् संसारं प्रतनोति स तत्त्वतो ज्ञेय इति। तस्मिन् अयं प्रश्नः किं खलु यावन्तो विषयाः तावत्सु तत्त्वज्ञानं प्रत्येकमुत्पद्यते अथ क्वचिदुत्पद्यते इति। न तावत् प्रत्येकम् आत्मादेरानन्त्यात् किमिदमानन्त्यम् इयत्ताप्रत्ययाविषयत्वम्। अथ क्वचिदुत्पद्यते यत्र नोत्पद्यते[१] तत्त्वज्ञानं तत्रानिवृत्तो मोहः यत्र मोहस्तत्र रागद्वेषाविति रागद्वेषमोहाश्च बन्धनमित्यनिर्मोक्षप्रसङ्गः। अथ मन्यसे ऽन्यविषयं तत्त्वज्ञानमन्यविषयं मोहं निवर्तयति एवं च सत्यपवर्गः प्राणिमात्रे प्राप्नोति[२] न हि कश्चित् प्राणी

---

(१) नोत्पन्नं—पा० ४ पु० । (२) भवति—पा० ४ पु० ।

कस्यचिदर्थस्य तत्त्वं न वेत्ति न मोहार्थापरिज्ञानात् न तत्त्वज्ञानस्यानुत्पत्तिमात्रं मोहोऽपि तु मिथ्याज्ञानं मोहः तच्च मिथ्याज्ञानं यस्मिन् विषये प्रवर्तमानं संसारबीजं भवति स विषयस्तत्त्वतो ज्ञेय इति। किं पुनस्तन्मिथ्याज्ञानम् अनात्मन्यात्मप्रत्ययः(१) इति। प्रेषं भाष्ये ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥ १ ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः। शरीरादिदुःखान्तं प्रमेयं दोषनिमित्तम् तद्विषयत्वान्मिथ्याज्ञानस्य तद्विषयं तत्त्वज्ञानमुत्पन्नं तद्विषयमहङ्कारं निवर्तयति समाने विषये तयोर्विरोधात्। सर्वं चैतदुक्तं द्वितीयसूत्रे इति।

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः ॥ २ ॥

दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः। कामा विषया इन्द्रियार्था रूपादय उच्यन्ते। तत्र ते विषया मिथ्यासंकल्प्यमाना रागादीन् जनयन्ति कः पुनरेषां तु मिथ्यासंकल्पः असाधारणप्रत्ययोत्पत्तिनिमित्तत्वेन व्यवसायो ममैवैत इति। तानसाधारणतया प्रतिपद्यते(२) नैते मम दैवचौराग्निदायादसाधारणा इति। एवमेतस्य प्रतिपद्यमानस्य(३) यो व्यवसायस्तद्विषयो मोहः स निवर्तत इति। तन्निवृत्तावध्यात्मं शरीरादीन् प्रसञ्जयते। किं पुनः प्रसंख्यानं शरीरादिषु नैते आत्मान इति व्यतिरेकदर्शनं प्रसंख्यानम्।

---

(१) आत्मग्रह—पा० ४ पु०। (२) प्रसञ्जयते—पा० ४ पु०।
(३) प्रसञ्जयमानस्य—पा० ४ पु०।

सोऽयमध्यात्मं बहिश्च विविक्तचित्तो विहरन् मुक्त इत्युच्यते। एतच्च तं प्राहुः जीवन्नेव विद्वान् संहर्षायामाभ्यां मुच्यत इति। अतः परं काचित्सञ्ज्ञा भावयितव्या काचिद्धेया इत्युपदिश्यते। नार्थनिराकरणं नार्थोपादानं किं तु यथाव्यवस्थित[१] एव विषये किञ्चिद्भावनीयं किञ्चित् निराकरणीयमिति।

तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥

तन्निमित्तं तु अवयव्यभिमानः। तेषां दोषाणां निमित्तमवयव्यभिमानः। तत्रावयवीति सञ्ज्ञा भावनीया स्त्रीसञ्ज्ञा हेया सपरिष्कारा[२] पुरुषस्य परिष्कारो बन्धनं स्त्रियाः पुरुषसञ्ज्ञा सपरिष्कारेति। तत्रापि च द्वे सञ्ज्ञे निमित्तसञ्ज्ञा अर्थव्यञ्जनसञ्ज्ञा च। निमित्तसञ्ज्ञा दन्तौष्ठमिति दन्तादिषु दन्तत्वादिनिबन्धना सञ्ज्ञा। अर्थव्यञ्जनसञ्ज्ञा च दत्यं दन्ता दत्यमोष्ठाविति दत्यमित्यध्यारोपेण उच्यमाना[३] सञ्ज्ञा मोहः स च रागादिकारणमिति हेयः न पुनरवयवी निराकार्यः[४] प्रमाणतस्तथाभावादिति ॥

अथेदानीमर्थं निराकरिष्यता अवयविन्युपपाद्यते।

विद्याविद्याद्वैविध्यात् संशयः ॥ ४ ॥

विद्याविद्याद्वैविध्यात् संशयः। सदसतोरुपलम्भात् द्विविधा विद्या सदसतोरनुपलम्भात् अविद्या द्विविधैव। एवं चावयवी यद्युप-

---

(१) व्यवच्छित—पा० ४ पु०।
(२) अनुपरिष्कारा—पा० ४ पु०।
(३) भाव्यमाना—पा० ४ पु०।
(४) निराकर्तव्यः—पा० ४ पु०।

लभ्यते अथ नोपलभ्यते न कथञ्चन संशयात् मुच्यते इति। तत्र तावदुक्तं न विद्याविद्याद्वैविध्यं संशयस्य कारणम् उपलब्ध्यनुपलब्ध्योः पूर्वपदविशेषणत्वात्।

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वात्। तस्मिन्नवयविनि संशयो न युक्तः पूर्वोक्तानां हेतूनामप्रतिषेधात् तत्र ये ऽवयविनोऽर्थान्तरभावे हेतव उद्दिष्टास्ते न शक्या प्रतिषेद्धुमिति।

वृत्त्यनुपपत्तेरपि तर्हि न संशयः[1] ॥ ६ ॥

वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्तिः। नास्त्यवयवीति तद्विभजते।

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः[2] ॥ ७ ॥

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः। अवयवा अवयविनि वर्तेरन् अवयवी वा अवयवेषु। अवयवा अवयविनि वर्तमानाः कृत्स्नेन वर्तन्ते एकदेशेन वा। तत्र तावदवयवा अवयविनि कृत्स्नेन वर्तन्ते अवयवावयविनोः परिमाणभेदात्। अल्प[3]परिमाणोऽवयवो महापरिमाणश्चावयवीति अल्प[4]परिमाणेन महा-

---

(१) संशयानुपपत्तिरिति—पा० ४ पु०। विश्वनाथसम्मतोऽपि।

(२) न्यायसूचीनिबन्धे ऽपि सूत्रमिदं दृश्यते। किं तु विश्वनाथेनानवधृतम्।

(३) अणु—पा० ४ पु०। (४) अणु—पा० ४ पु०।

परिमाणस्याव्याप्तिः एकद्रव्यश्चावयवः प्राप्नोति एकावयवे वृत्तित्वात्। न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति नाप्यवयव्येकदेशेन वर्तते न ह्यस्यान्ये ऽवयवा एकदेशभूताः सन्ति तस्मिन्नपि चैकदेशेन वर्तमानोऽवयवः किमेकदेशेन वर्तते कृत्स्नेन वेति पूर्ववत् प्रसङ्गः। अथावयवेषु अवयवी वर्तते

तेषु चावृत्तेरवयव्यभावः[1] ॥ ८ ॥

तेषु चावृत्तेरवयव्यभावः। न तावत् प्रत्यवयवं कृत्स्नो वर्तते तयोः परिमाणभेदात् अवयविनश्च एकद्रव्यताप्रसङ्गात्। एकावयववृत्तित्वादेकद्रव्योऽवयवी प्राप्नोति एकद्रव्यश्चावयवी एकेन द्रव्येणारभ्यत इति सततोत्पत्तिप्रसङ्गः। किञ्च एकद्रव्यत्वात्[2] द्व्यणुक[3]मेकस्मिन् परमाणौ वर्तत इति कारणविभागविनाशाभावात् नित्यं प्राप्नोति उत्पत्तिमच्च नित्यं चेति न दृष्टान्तोऽस्ति। अथाप्यवयवी एकदेशेन वर्तते तथापि अवयविन आरम्भकावयव्यतिरिक्तावयवाः प्राप्नुवन्ति ये ऽवयवेषु वर्तन्त इति।

पृथक् चावयवेभ्योऽवयव्यवृत्तेः ॥ ९ ॥

पृथक् चावयवेभ्योऽवयव्यवृत्तेः। नाप्यवयवव्यतिरेकेणान्यत्र वर्तते अयद्द्रव्यान्नित्यत्वप्रसङ्गात् अवयवव्यतिरेकेणान्यत्र वर्तमान उपलभ्येत नित्यश्च स्यादनाधारं द्रव्यं नित्यमिति।

---

(१) विश्वनाथेनावधृतम्। (२) एकद्रव्यवृत्तित्वात्—पा० ४ पु०।
(३) एकद्रव्ये यद्द्व्यणुकं—पा० ४ पु०।

न चावयव्यवयवाः ॥ १० ॥

न चावयव्यवयवाः । न चावयवानां धर्ममात्रमवयवी कस्मात् धर्मस्यावयविनो धर्मिभिरवयवैः पूर्ववत् सम्बन्धोऽनुपपन्नः न चाच धर्मिभ्योऽवयवेभ्योऽवयवी धर्मः पृथगुपलभ्यते नित्यत्वप्रसङ्गादिति च समानम् । अवयवी चैकदेशेन अवयवे वर्तत इति अवयवसमूह-मात्रमवयवी प्राप्नोति । एकस्मिंश्चावयवे एकदेशेन वर्तमानोऽवयवी एकावयवोपलम्भात् एकदेशेनोपलब्धौ तत्स्थानोऽवयवी गृह्येत न त्वेकतन्तुदर्शने पटोपलब्धिर्भवति तदेवं मुक्तसंशयोऽभिधीयते नास्त्यवयवीति । यत्तावदवयवा अवयविनि वर्तन्त इति तन्न अनभ्युपगमात् न कारणं कार्ये वर्तते ऽपि तु कारणे कार्यमिति(१)। यत्पुनरेतदवयव्यवयवेषु वर्तमान एकदेशेन वर्तते कृत्स्नेन वा वर्तत इति तन्न ।

एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रसङ्गः ॥ ११ ॥

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रसङ्गः । कृत्स्न-मिति च एकदेश इति च भेदविषयावेतौ शब्दौ न चैतावेक-स्मिन्नुपपन्नौ अनेकस्यांशेषता कृत्स्नशब्दस्यार्थः अंशेषस्य कस्यचिदभि-धानमेकदेशशब्दस्य न चैतदिहोपपद्यते इति । तस्माच्चावयविनि कृत्स्नशब्दो नाप्येकदेशशब्द इति ।

---

(१) किं तु कार्यं कारण इति—पा० ४ पु० ।

अवयवान्तराभावे ऽप्यवृत्तेरहेतुः ॥ १२ ॥

अवयवान्तराभावे ऽप्यवृत्तेरहेतुः । अवयवान्तराभावादिति । यद्यवयवव्यतिरिक्तमवयवान्तरं प्रतिपद्येथाः तथाप्यवयवोऽवयवे वर्तते नावयवीत्यहेतुः अवयवान्तराभावात् नैकदेशेन वर्तत इति एवं[१] चानेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः उभयेन व्याघातादित्युक्तम् । यद्यवयवी नैकदेशेन वर्तते न कृत्स्ने वर्तते अथ कथं वर्तत इति वृत्तिरवयवेषु आश्रयाश्रयिभावः[२] समवायाख्यः सम्बन्धः स कथं भवतीति यस्य यतोऽन्यत्रात्मलाभानुपपत्तिः तत् तत्रैव वर्तत इति न खलु कारणद्रव्येभ्योऽन्यत्र कार्यद्रव्यमात्मानं लभत इति । विपर्ययस्तु कारणद्रव्येषु न कारणानि कार्यद्रव्येषु आत्मानं लभन्त इति । कथं नित्ये आश्रयाश्रयिभावः[३] अनित्येषु दर्शनात् सिद्धम् नित्येषु यथाऽनित्या नियतोपलभ्यन्ते तत्र वर्तन्ते तथा नित्यान्यपि यत्रोपलभ्यन्ते तत्र वर्तन्त इति एतत् समानमनित्यानां नित्यैः । रूपान्तरानिर्देशादिति चेत् अथ मन्यसे यदि व्यतिरिक्तोऽवयवी भवति तस्यावयवरूपादिव्यतिरेकेणावयविनो रूपान्तरं निर्देष्टव्यम् यथाऽचित्रास्तन्तवः पटमात्र[४]मारभन्त इति न उपलभ्यमान[५]रूपाद्याधारत्वात् यदवयविनो रूपमुपलभ्यते तदस्य रूपं यथावयवस्य कार्यकारणभावाच्च[६]

---

(१) कथं च—पा० ४ पु० । (२) आश्रयाश्रितभावः—पा० ४ पु० ।
(३) नित्येषु कथमाश्रयाश्रितभावः—पा० ४ पु० । (४) पटश्चित्र—पा० ४ पु० ।
(५) नोपपद्यमान—पा० ४ पु० । (६) कार्यकारणभावानभ्युपगमाच्च—पा० ४ पु० ।

विरुद्धः अवयविनो रूपं निर्दिश्यतामिति ब्रुवाणेन अवयवावयविनौ तावदभ्युपगतौ तदभ्युपगमाच्च विरुद्धः एतावानेवायं विवाद इत्यभ्युपेतहानिः । उपेत्य चित्रविवादं ब्रूमः पटस्य चित्रं रूपमिति। अनेकत्वप्रसङ्ग इति चेत् अथ मन्यसे चित्रं रूपमवयविनोऽभ्युपगच्छता अनेकरूपोऽवयव्युपगतो भवति न चैकं द्रव्यमनेकरूपम् नाप्यनेकस्मिन् एकमिति(१) । न चित्रशब्दस्यानेकैकविषयत्वात्(२) चित्रशब्देनानेकं चाभिधीयते अनेकं च चित्रं रूपं चित्राणि रूपाणीति न एकस्मिन्न दृष्टत्वात् । न हि एकस्मिन् चित्रं दृष्टमिति नाभ्युपेतहानेः । एकं चित्रमित्यनभ्युपगतानेकचित्रमिति ह्येयम् एकचित्रसमुच्चयो ह्यनेकचित्रमिति अथानेकमचित्रं चित्रमित्युच्यते एवमप्यनिवृत्तो व्याघातः अचित्रं चित्रमिति यथाऽशुक्लं शुक्लमिति । अथाचित्राणि तन्तुरूपाणि संहत्य पटे चित्रं रूपमुत्पादयन्तीति(३) पच्च आश्रीयते एवं चैतस्मिन्न किञ्चिद् बाध्यते पटान्तरे प्रसङ्गश्चित्रप्रत्ययस्य यस्य पटस्य एकं चित्रं पार्श्वं द्वितीयमचित्रं तेन यथैकस्मिन् पार्श्वे तं पटं पश्यतश्चित्रबुद्धिर्भवति(४) एवं पटान्तरेऽपि चित्रपटबुद्ध्या भवितव्यम् भवतैवेदमुक्तम् यस्य पटस्यैकं पार्श्वं चित्रं स तु पटो न चित्रः पार्श्वस्यापटत्वात् । चित्रप्रत्ययस्तत्र कस्मान्नेति चेत् चित्राचित्राभ्यां पार्श्वाभ्यां पट आरभ्यमाणश्चित्रः पट इति यथा पटान्तरे(५) चित्रप्रत्यय एवं चित्र-

---

(१) नाप्येकस्मिन्ननेकम्—पा० ४ पु० । (२) शब्दस्यैकानेकविषय—पा० ४ पु० ।
(३) चित्ररूपमारभन्ते—पा० ४ पु० । (४) चित्रपटबुद्धिर्भवति—पा० ४ पु० ।
(५) घटान्तरे—पा० ६ पु० ।

प्रत्ययः घटान्तरे ऽपि[१] प्रसक्तः[२] न प्रसक्तः एकस्य चित्ररूपस्यानारम्भकत्वात् एकस्मिन् पार्श्वे चित्रं रूपं तत्क्रयमवयविनि रूपान्तरमारभ्यत इति। एतावच्च शक्यं वक्तुम् अवयवरूपाभ्यामवयविरूपान्तरमारभ्यत इति तयोपलब्धेः। यद्यन्यरूपोऽवयवी स्यात् नोपलभ्यते न चावयवरूपादवयविनो ग्रहणं युक्तम्[३] वायोरप्युपलब्धिप्रसङ्गात् यद्यन्यरूपादन्यस्योपलब्धिर्भवति वायोरप्युपलब्धिः प्राप्नोति न चैतदस्ति। तस्मात् स्वरूपादवयव्युपलभ्यते उभयावयवदर्शनप्रतिसन्धानाच्चावयविनि रूपोपलब्धिर्भवति न चैवं सत्यरूपोऽवयवीति तस्मादवयव्यभिमानः प्रतिषिध्यते मपरिस्काररूपो नावयवीति यथा रूपादिषु मिथ्यासंकल्पो न रूपादय इति। अयं चार्थो मुनिना श्लोकेन दर्शितः।

इन्द्रियार्था ह्यनर्थाय यदि स्युरविकल्पिताः।
सर्वोऽनर्थेन मज्येत चरन्निन्द्रियगोचरः॥ इति।

सर्वाग्रहणमवयव्यसिद्धेः इत्यवस्थितोऽप्येदमाह।

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः॥ १३॥

केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः। यथा एकैकः केशः तैमिरिकेण नोपलभ्यते केशसमूहस्तूपलभ्यते तथा एकैकश्रोऽणुर्नोपलभ्यते अणुसमूहस्तूपलभ्यत इति तदिदमणुसमूहविषयग्रहणमिति।

---

(१) घटान्तरे—पा० ४ पु०। (२) प्रसङ्गः—पा० ४ पु०।
(३) न चावयवरूपाभ्यामन्यदवयविनो ग्रहणं युक्तम्—पा० ४ पु०।

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषय-ग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ १४ ॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः । न ह्यौन्द्रियं प्रक्ष्यमाणं स्वविषयमतिक्रामति न हि चक्षुः प्रक्ष्यमाणं रसं गृह्णाति नाप्रक्ष्यमाणं स्वविषयात् प्रच्यवते अपि तु स्वविषय एवेन्द्रियस्य प्रकर्षापकर्षापेक्षाणि पटुमन्दभावेन ग्रहणानि भवन्तीति । तच्च पटुग्रहणं सामान्यविशेषतद्वतां ग्रहणमिति मन्दं तु ग्रहणं(१) सामान्यमात्रालोचनमिति सोऽयं तैमिरिकः कश्चित् चक्षुर्विषयं केशं न गृह्णाति केशसमूहं च गृह्णाति उभयं हि अतैमिरिकस्य चक्षुषो विषय इति । परमाणवस्त्वतौन्द्रिया दर्शनविषयत्वं न प्रतिपद्यन्ते संहता ऐन्द्रियका असंहता अतौन्द्रिया इति महान् व्याघातः । अनुपजातविशेषाणां दर्शनविषयत्वानुपपत्तेः तस्मादुत्पद्यते ऽवयवी यो दर्शनस्य विषय इति । समुच्चयमात्रं(२) दर्शनस्य विषय इति चेत् अथ मन्यसे दर्शनस्य समुच्चयमात्रं विषयः समुच्चिताः परमाणवो दर्शनस्य विषयतामुपयान्तीति न समुच्चयस्य संयोगभावात् । समुच्चयो निरूप्यमाणः परमाणुसंयोगः संयोगश्चोपलभ्यमानाश्रय उपलभ्यते भवतीति ह्यौदमनेन संयुक्तमिति यश्च विषय उपलभ्यते तस्यानुपलब्धौ यच्चावरणं कारणमुपलभ्यते न तु परमाणव

---

(१) मन्दग्रहणं तु—पा० ४ पु० । (२) समुच्चयमात्रमिति साधु. ।

उपलब्धिलक्षणप्राप्ताः तस्मान्न तेषामावरणादेरग्रहणकारणा[1]द्ग्रहणमिति ॥

अवयवावयविप्रसङ्गश्चैवमाप्रलयात्[2] ॥ १५ ॥

अवयवावयविप्रसङ्गश्चैवमाप्रलयात् । यश्चावयविनोऽवयववृत्तिविकल्पाद्भाव उक्तः सोऽवयवस्यावयवेषु प्रसज्यमानः प्रलयाद्वा निवर्तत निरवयवाद् वा परमाणुतो निवर्तत । कथमिति यथावयव्यवयवेषु वर्तमानः प्रत्येकं सर्वात्मना वा एकदेशेन वा वर्तत इत्युक्तम् । तथावयवोऽवयवेषु वर्तमानस्तदवयवोऽप्यवयवेषु इत्येवं यावत् परमाणुरिति यावद्वा प्रलयोऽनिवृत्तिर्वेति । सर्वथोपलब्धि[3]विषयो नास्ति उपलब्धिविषयं चाश्रित्यायं वादः किमवयव्येकदेशेन वर्तते उत सर्वात्मना वर्तत इति । सोऽयमाश्रयं व्याघ्नन्नात्मव्याघाताय कल्पत इति ।

न प्रलयोऽणुसद्भावात् ॥ १६ ॥

न प्रलयोऽणुसद्भावात् । न चास्ति प्रलयोऽणुसद्भावात् । अयं खलु विभज्यमानभेदस्तावद् वर्तते यावत् परमाणुरिति परमाणुर्नाम विभागे ऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्त्वावस्थानात् । लोष्टस्य विभज्यमानावयवस्याल्पतरमल्पतरमुत्तरमुत्तरं भवति स चायमल्पतरप्रसङ्गो यतो निवर्तते यतो नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे[4] इति । अथ न परमाण्वन्तो विभागस्तेन

---

(१) तेषामनावरणादेरग्रहणकारणा—पा० ४ पु० । (२) प्रसङ्गश्चाप्रलयात्—पा० ४ पु० ।
(३) सर्वोपलब्धि—पा० ४ पु० । (४) आचक्ष्महे—पा० ४ पु० ।

परं वा त्रुटेः ॥ १७ ॥

परं वा त्रुटेः । अवयवविभागस्यानन्त्यात् त्रुटिरमेयः प्राप्नोति संख्यापरिमाणगुरुत्वैस्तावत् परिमाणस्त्रुटिः (?) इयदत्र गुरुत्वं वर्तत इति इयन्तश्च परमाणवः संहतास्त्रुटिभावमापद्यन्त इति नावधारणं युक्तम् । किं कारणम् यथैवानेकपरमाणुसंहतो हि महान् संख्यापरिमाणगुरुत्वैरमेयः तथा त्रुटिरपि भेदस्यानन्त्यात् प्रसज्यते अथ प्रलयान्तो विभागः सोऽपि न युज्यते विभागस्य विभज्यमानद्दानानुपपत्तेः स प्रलयान्तो विभागः स चायं विभागो विभज्यमानाधारो विभज्यमानश्च[१] नास्ति विभागोऽस्तीति व्याघातः । विभज्यमानावयवं परमाणुं प्रतिपद्यमानेन सावयवः परमाणुः प्रतिपत्तव्यः । सावयवत्वे परमाणुशब्दस्यार्थो वाच्यः किमुक्तं भवति परमाणुरिति । ये च परमाणोरवयवास्ते किं समानपरिमाणा उत भिन्नपरिमाणा इति । यदि समानपरिमाणा अवयवावयविभावो दुरुपपादः न हि वयं समानपरिमाणानां क्वचिदवयवावयविभावं पश्यामः । अथ भिन्नपरिमाणाः न परमाणुः प्रतिषिध्यते कार्यमिदं परमाणुरिति कृत्वा प्रतिषिध्यते ।

अथेदानीमानुपलब्धिकः सर्वं नास्तीति मन्यमान आह ।

आकाशव्यतिभेदात्तदनुपपत्तिः ॥ १८ ॥

आकाशव्यतिभेदात्तदनुपपत्तिः । आकाशेन परमाणुर्व्यतिभिन्नः व्यतिभेदादनित्यो घटवदिति ।

---

(१) विभज्यमानाधारश्च—पा० ४ पु० ।

आकाशस्यासर्वगतत्वं वा ॥ १९ ॥

अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनात्कार्ये तद्भावः ॥ २० ॥

आकाशस्यासर्वगतत्वं वा। अथ परमाणोरन्तराकाशं नास्ति असर्वगतं तर्ह्याकाशं प्रसज्यते ऽन्तःपरमाणूनाममसम्बन्धात्। आकाशव्यतिभेदादनित्यः परमाणुरित्यभिदधानो व्यतिभेदार्थं प्रष्टव्यः किमुक्तं भवति आकाशव्यतिभेदादिति। यदि परमाण्वाकाशेन सम्बन्धो व्यतिभेदः तदात्र न किञ्चिद् बाध्यते न हि आकाशसम्बन्धात् परमाणोर्नित्यत्वमनित्यत्वं प्रसज्यत इति। अथ सम्बन्धमात्रमेवानित्यताकारणं ब्रूयात् तथाप्याकाशग्रहणं व्यर्थम् सम्बन्धमात्रस्यानित्यताबाधकत्वात् न हि कृतकत्वस्य साधनभावे देवदत्तकृतकत्वादि युक्तमुक्तम् संयोगमात्रं चोत्तरसूत्रेणानूद्यते चरितार्थं संयोगोपपत्तेरिति तदेतदेव पुनरुच्यते इति। तस्मान्नायं [१]व्यतिभेदार्थः। अथ परमाण्वन्तःसम्बन्धो व्यतिभेदः सोऽपि न युक्तः अकार्यत्वात् परमाणोरन्तर्बहिरिति कार्यस्य कारणान्तरवचनम् अकार्यञ्च परमाणुस्तस्मान्नान्तर्बहिरिति। अथ परमाण्ववयवसम्बन्ध आकाशेन व्यतिभेदः एतदपि तादृगेव परमाणोरकार्यत्वान्न तस्यावयवा इति। अथ परमाण्ववयवानां विभागो व्यतिभेदः सोऽप्यकार्यत्वेनैव प्रत्युक्तः। कार्यस्यावयवा विभज्यन्ते अकार्यञ्च परमाणुरिति। तस्मान्नावयवविभागः उपेत्य परमाणोरवयवान् न तद्विभागस्याकाशं

(१) पर-इत्यधिकं ४ पु०।

कारणं कर्मजो हि विभागः तस्याकाशमपि कारणमिति न न्यायोऽस्ति आकाशं च विभागहेतुत्वेन प्रतिपद्यमानः सर्वभावानामनवस्थानं प्रतिपद्येत न सन्निहिते विभागे हेतावाकाशे भावानामवस्थानं युक्तम् । सदप्याकाशं निमित्तान्तरमपेक्षते तद्व्यतिरेकेणाकाशस्यापि तदुत्पत्तावस्ति सामर्थ्यमिति प्रमाणाभावः । अथान्तःशुषिरं व्यतिभेदः एतदपि नास्ति सर्वतो व्यवहितस्य यस्य मध्येऽवयवा न सन्ति तच्छुषिरं न च परमाणोरवयवाः सन्ति कुतः शुषिरं व्यतिभेदः । न चान्या गतिरस्ति तस्मादाकाशव्यतिभेदादिति शून्यमभिधानम् । यत्पुनरेतदाकाशमसर्वगतं प्रसज्येत अन्तःपरमाणुनाऽसम्बन्धादिति न सर्वगतार्थापरिज्ञानात् नायं सर्वगतार्थो यन्नास्ति तेन सम्बन्ध इति अपि तु यन्मूर्तिमत् तेन सर्वेण सम्बन्ध इति[1] सर्वगतत्वार्थः । न च परमाणोर्मध्यमस्ति तस्मान्न तेनासम्बन्धादाकाशमसर्वगतं प्रसज्यत इति ।

सर्वसंयोगशब्दविभवाच्च सर्वगतम्[2] ॥ २१ ॥

सर्वसंयोगशब्दविभवाच्च सर्वगतम् । यस्मात् सर्वमूर्तिमद्भिः संयोगा विभवन्ति आकाशे तदाश्रया भवन्ति शब्दाः स्वकारणसन्निधानादुपजायमानाः सर्व एवाकाशमाश्रयन्त इति सर्वगतमाकाशम् ।

---

(१) तेन सर्वेण सम्बन्धात्—पा० ६ पु० ।

(२) शब्दसंयोगविभवाच्च सर्वगतमिति न्यायरत्नचीनिबन्धे । विश्वनाथसम्मतोऽपि ।

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ २२ ॥

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः। सर्पता क्रियावता द्रव्येणाकाशं न व्यूह्यते सर्पतश्च क्रियावतो द्रव्यस्य क्रियाहेतुं गुणं न प्रतिबध्नाति कस्मादस्पर्शत्वात् यत् स्पर्शवत् भवति तद्व्यूह्यते प्रतिबध्नाति च न त्वेवंधर्मकमाकाशं तस्माद्प्रतिघातीति स भवान् सावयवे स्पर्शवति द्रव्ये दृष्टं धर्मं विपरीतेनाशङ्कितुमर्हतीति। उक्तं चात्र यदि परमाणुर्विभज्यते परमाणुर्न स्यात्। किं कारणम् विभागे ऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानमिति। विनाशं च परमाणोर्भवन् कारणविनाशाद्वा कल्प्येत कारणविभागाद्वा उभयं च नास्ति परमाणोरकार्यत्वादित्युक्तम्। तस्मान्नाकाशव्यतिभेदाद्-नित्यत्वमिति।

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ २३ ॥

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः। सावयवाः परमाणवो मूर्तिमत्त्वादिति संस्थानवत्त्वाच्च सावयवा इति। संस्थानवत् सावयवं दृष्टम् घटादिसंस्थानवन्तः परमाणवः तस्मात् सावयवा इति।

संयोगोपपत्तेश्च ॥ २४ ॥

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ २५ ॥

संयोगोपपत्तेश्च। सावयवत्वं संयोगित्वादिति सूत्रार्थः। नन्विदं सूत्रं संस्थानवत्त्वादित्यनेनैव चरितार्थं संयोगविशेषस्य संस्थानवत्ते-

नाभिधानात्। न च चरितार्थं अवयवसंयोगविशेषस्य संस्थानवत्त्वे-नाभिधानात् संयोगमात्रं च संयोगशब्देनाभिधीयत इति न दोषः। तत्र मूर्तिर्नामाव्यापिद्रव्यषड्विधं(१) परिमाणम् अणुमहद्दीर्घं ह्रस्वं परमह्रस्वं परमाणिति। संस्थानं नाम प्रचयाख्यः संयोगः संयोगो-ऽप्राप्तिपूर्विका प्राप्तिरिति। यत् तावत् मूर्तिमत्त्वात् सावयवा इति तन्न अनैकान्तात्। यः परमाणोरवयवः स मूर्तिमांश्च निरवयव-श्चेत्यनेकान्तः। अथ मूर्तिमत्त्वात् तस्याप्यवयवाः सन्ति एवं सति चुटिरमेयः प्राप्नोति गुरुत्वसंख्यापरिमाणैरित्युक्तम्। अथ तावत् मूर्तिमद्विभज्यते यावदन्त इति अन्त्यो निरवयव इति वाच्यम्(२) अथान्तो विभागः स न युक्तः विभागस्य विभज्यमानैर्विनानुपपत्ते-रिति। एतावच्चैतत् कल्प इति स्यात् परमाण्वन्तो विभागः प्रत्य-यान्तो वा अनन्तो वा यदि परमाण्वन्तोऽनैकान्तः व्याहतं भवति परमाणुर्मूर्तिमाँश्च न च सावयव इति। कः पुनरत्र व्याघातः निरवयवं मूर्तिमन्तं च परमाणुं प्रतिपद्यसे सावयव इति च ब्रवीषि प्रतिपत्त्या व्याहन्यते अनन्ते प्रलयान्ते च व्याघातः चुटेरमेयत्वप्रसङ्गः विभागस्य चानाधारत्वप्रसङ्गः, सावयवः परमाणुरिति च प्रतिज्ञापदे व्याहते। कथमिति सावयवशब्दस्यार्थः समानजातीयारब्धं समान-जातीयाश्रितम् अवयवस्तदाधार इति सावयवः परमाणुरिति ब्रुवता कार्यविशेषः परमाणुश्चेत्युक्तं भवति। कार्यविशेषः परमाणुश्चेति व्याहतम्। अथैकपरमाणुपूर्वकत्वं परमाणोः प्रतिपद्यसे तथा च न

---

(१) अव्यापिनो द्रव्यस्य षड्विधं—पा० ४ पु०। (२) इत्युक्तम्—पा० ४ पु०।

परमाणुः सावयव इति नास्यावयवाः सन्ति किं तु कृतकः परमाणुपूर्वकत्वात्। एतच्च न दृष्टान्ताभावात् एकं कारणमिति च दृष्टान्तोऽस्ति एकेन चारभ्यमाणस्य परमाणोर्न कारणसामग्र्यपेक्षणमस्तीति न प्रागभावो युक्तः यस्य प्रागभावो नास्ति तस्य चोत्पादो न युक्तः। अथैकशब्दपूर्वकत्वे सति शब्दादीनां प्रागभावादि प्रतिपद्यते तदप्यसिद्धम् नैकं कारणमस्ति आश्रयाद्यपेक्षः शब्दः शब्दान्तरं करोतीति प्रतिपद्यापि चैकपरमाणुपूर्वकत्वं परमाणोः कः सावयवार्थः कतमस्तचावयवः कतमस्तचावयवीति। अथ कारणमेवावयव इति न कार्यपरमाणुकाले कारणपरमाणुरस्तीति सावयवार्थो वक्तव्यः। मूर्तिमत्त्वात् सावयवः परमाणुरिति ब्रुवाणो विकत्थतः पुनः पर्यनुयोज्यः केयं मूर्तिः यया मूर्त्या मूर्तिमान् परमाणुरिति मत्यां च मूर्तौ किमर्थान्तरमनर्थान्तरं वा परमाणोर्मूर्तिरिति यदि रूपादिविशेषो मूर्तिर्न भवत्यचे तया मूर्त्या मूर्तिमान् कश्चन न च रूपादिव्यतिरिक्तं प्रमाणेन परमाणुं प्रतिपद्यते सर्वापकर्षप्राप्ता रूपादय एव परमाणुः न च रूपादिभीरूपादयो रूपादिमन्तः न चानर्थान्तरभावे मतुप्व्युत्पादं पश्यामः ननु दृष्टोऽनर्थान्तरभावे ऽपि मतुप्प्रत्ययो यथा हस्तिमती सेनेति न दृष्ट इति ब्रूमः। यथा च सेनानर्थान्तरं तथोक्तमिति। असति चार्थान्तरभूते परमाणावमत्यां च मूर्तौ सावयवा परमाणवो मूर्तमत्त्वादिति वाक्यस्यार्थो रूपादयो रूपादिमन्तो रूपादिमत्त्वादिति। एतेन पटोऽमूर्तिमत्त्वात् सावयव इति प्रत्युक्तम्। न च रूपादिव्यतिरिक्तं पटं प्रतिपद्यसे न मूर्तिमत्त्वम्। अथ च मूर्ति-

मत्त्वात् सावयवः पट इति च ब्रवीषि व्यतिरेकाभ्युपगमे व्याघातः अनभ्युपगमे नार्थः सिद्ध्यतीति दृष्टान्तोभयधर्मसिद्धत्वात् न पटे सावयवत्वं मूर्तिमत्त्वार्थं इति। एतेन सावयवाः परमाणवः संयोगोपपत्तेरिति व्याख्यातम्। संयोगस्याभ्युपगमे व्याघातः अनभ्युपगमे परमाणुत्वादिति हेत्वर्थः संस्थानविशेषवत्त्वं तु असिद्धम् य एवार्थः सावयवत्वादिति स एवार्थः संस्थानविशेषवत्त्वादिति। अथ संस्थानमसर्वगतद्रव्यपरिमाणं प्रतिपद्येथाः[१] एवं सति मूर्तिमत्त्वेन संस्थानवत्त्वं चरितार्थमिति पृथग् वक्तव्यम् मूर्तिमत्त्वात् संस्थानविशेषवत्त्वादिति। उक्तं चात्र विभागे ऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्त्वावस्थानात् अणुवयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति। यत् पुनरेतत् संयोगोपपत्तेर्मध्ये सन्नणुः पूर्वापराभ्यां सम्बध्यमानः[२] सावयवः अयमेवार्थः कारिकया गीयते[३]।

षड्भिन युगपद्योगे परमाणोः षडंशता[४]।
षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः॥ इति

परमाणुर्युगपत् षड्भिः सम्बद्ध्यमानः षडंशः प्राप्नोति भिन्नदेशत्वात् सम्बन्धानाम्। अथ समानदेशाः सर्वे संयोगाः षण्णां परमाणूनां पिण्डः परमाणुमात्रकः प्राप्नोति। यदि द्वे द्वे द्रव्ये अधिकृत्याभिधीयते ततोऽपि देशाः परमाणूनां[५] सम्बन्धिनं

---

(१) मन्येथाः—पा० ४ पु०। (२) संबध्यमानः—पा० ४ पु०।
(३) अभिधीयते—पा० ४ पु०।
(४) योगात् परमाणोः षडंशता—पा० ४ पु०।
(५) ततो भिन्नदेशा अथ परमाणूनां—पा० ४ पु०।

परमाणुमधिकृत्याभिधीयते ततोऽनेकः संयोगः समानदेश इति न किञ्चित् बाध्यते । यत् पुनरेतत् समानदेशाः परमाणव इति तन्नानभ्युपगमात् देशा एव तावत् परमाणौ न सन्तीति कुतः समानदेशा भविष्यन्ति। न च किञ्चिद् द्रव्यं समानदेशमस्तीत्यसिद्धो दृष्टान्तः । ननु च कार्यकारणे[१] संयोगसमानदेशे यथा घटः पटेन सम्बद्धते तन्तुना तदंशुना च तत्त्वाश्रयेणेत्यादि । एतदनभ्युपगमेन प्रत्युक्तम् । समानदेशास्तत्र संयोगा इति न कार्यकारणे न च संयोगा अपि द्वे द्वे अधिकृत्येति षण्णां समानदेशत्वादिति वाच्यम् न द्रव्यं समानदेशतायां व्यवतिष्ठते न संयोगसमानदेशतायामिति। यत् पुनरेतद्दिग्देशभेदो यस्यास्ति तस्यैकत्वं न युज्यते क एवमाह दिग्देशभेदोऽस्तीति दिग्देशभेदाश्च दिशः संयोगाः परिकल्पितांश्च दिग्देशभेदान् कल्पयित्वा परमाणोर्दिग्देशभेदोऽभ्युपगम्यते मुख्यस्तु न दिग्देशभेदो नापि परमाणोर्भेदः परमाणुर्दिशा सम्बद्धत इति । एतावन्मात्रं विद्यते एतच्च न किञ्चित् बाधते । छायावृतौ तर्हि न प्राप्नुतः परमाणोरदेशत्वादिति न देशवत्त्वाच्छायावृतौ किं तर्हि मूर्तिमत् स्पर्शवत्त्वात् मूर्तिमत्स्पर्शवद्द्रव्यं द्रव्यान्तरमावृणोति किमिदमावृणोति स्वसम्बन्धित्वेनेतरस्य सम्बन्धं[२] प्रतिषेधतीति। छाया तु तेजःपरमाणोरावरणात् मूर्तिमता परमाणुना तेजःपरमाणुरावियते यच्च[३] चास्यावरणं तत्र छायेति विरलतेजःसम्बन्धीनि द्रव्यगुणकर्माणि छायेत्यभिधीयते सर्वतो

---

(१) कार्याकारणे—पा० ४ पु० । (२) सम्बन्धित्वं—पा० ४ पु० ।
(३) यस्य—पा० पु० ।

व्यावृत्ततेजःसम्बन्धीनि तु तानि तमःसञ्ज्ञकानीति। तदेवं छायावृत्यो[१]रन्यथासिद्धत्वाद्हेतुः। एतेन क्रियावत्त्वात् स्पर्शवत्त्वाद् द्रव्यान्तरारम्भकत्वात् क्रियाकारणसंस्कारप्रत्ययत्वात्[२] परत्वापरत्ववत्त्वादित्येवमादि प्रत्युक्तम्। कथमिति यथा मूर्तिमत्त्वात् सावयवादित्येतस्मिन् वाक्ये प्रतिज्ञादोषा हेतुदोषाः तथा सर्वेष्वेतेषु पक्षेषु परपक्षाभ्युपगतेषु हेतुषु यथासम्भवं विरुद्धासिद्धानैकान्तिकादिदोषभेदा वक्तव्या इति। शेषं भाष्ये। ये तु क्रियावत्त्वादिभिः परमाणूनामनित्यत्वं साधयन्ति तैः क्रियावत्त्वं व्यञ्जकं वा कारकं वावश्यमभ्युपगन्तव्यम्। यदि क्रियावत्त्वमनित्यत्वस्य कारकं यदक्रियं तन्नित्यं प्राप्नोति। अथ जन्म क्रियेत्यभिधीयते तदाऽनित्याः परमाणवो जन्मवत्त्वादिति हेत्वर्थः जन्मवत्त्वमसिद्धं परमाणूनामिति। अथ क्रियावत्त्वं व्यञ्जकमुच्यते व्यञ्जकत्वे ऽप्यन्यतोऽनित्यत्वं परमाणूनां वक्तव्यम्। न ह्ययं व्यञ्जकस्य धर्मो यद्व्यङ्ग्यं वस्तु कुर्यात् अपि तु अन्यतो भूतं हेतुर्व्यनक्ति न हि प्रदीपोऽसन्तमर्थं जनयित्वा प्रकाशयति परसिद्धोत्पेक्षणादिक्रियाभ्युपगमे विरुद्धः। एतेन घटादिदृष्टान्तो व्याख्यातः। क्रियावत्त्वं च क्रियासमवायः तदभ्युपगमे विरुद्धः अनभ्युपगमे ऽनित्यः परमाणुः परमाणुत्वादिति हेत्वर्थः। मतुपश्चार्थान्तरे दृष्टत्वाद् विरुद्धः अनर्थान्तरे दृष्टान्ताभावः। एवं शेषाण्यि वाक्यानि विकल्प्य यथासम्भवं दोषा वक्तव्या इति। अथ परपक्षसिद्धानेतानभ्युपैति[३] कथं परपक्षसिद्धाः अथ न

---

(१) छायावरणयोः—पा० ४ पु०। (२) संस्कारास्रयत्वात्—पा० ४ पु०।
(३) एतान धर्मानभ्युपैति—पा० ४ पु०।

प्रमाणतः कथं स्वयमनुपलभ्यो धर्मः परप्रतिपादनायोपादीयत इति ॥

यदिदं भावान् बुद्धीराश्रित्य विषयाः सन्तीति मन्यसे मिथ्याबुद्धय एताः यदि हि तत्त्वबुद्धयः स्युः बुद्धा विवेचने क्रियमाणे बुद्धिविषयाणां याथार्थ्य[१]मुपलभ्येत ॥

बुद्धा विवेचनात् तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे[२] पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ २६ ॥

बुद्धा विवेचनात् तु भावानां याथात्म्यानुपलब्धिः तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः। य एते बुद्धिविषया गवाद्यो घटाद्यश्च नैते तत्त्वतः सन्ति कस्मात् बुद्धा विविच्यमानानां भेदग्रो ग्रहणात्। यथायं तन्तुरयं तन्तुरिति बुद्धा तन्तुषु विविच्यमानेषु न पटः कश्चिदस्ति यः पटबुद्धेर्विषयः स्यादेव[३]मंशुषु बुद्धा विविच्यमानेषु एवं तदवयवेषु तावद् यावत् परमाणुः परमाणवोऽपि भागशो विविच्यमानास्तावत् यावत् प्रलय इति। तदेवं सर्वेषामसत्त्वे गवादिबुद्धयो घटादिबुद्धयश्च मिथ्याबुद्धय इति ॥

व्याहतत्वादहेतुः ॥ २७ ॥

व्याहतत्वादहेतुः। बुद्धा विवेचनात् तु भावानां सर्वभावानुपपत्तिरित्ययुक्तम् कस्माद् व्याघातात् को व्याघातः सहासम्भवः

---

(१) यथार्थता—पा० ४ पु०।

(२) न याथात्म्योपलब्धिस्तन्त्वपकर्षे—इति क्वचित्। न याथार्थ्योपलब्धिस्तन्त्वपकर्षे—पा० ४ पु०। (३) भवेदेव—पा० ४ पु०।

यदि बुद्ध्या विवेचनं भावानां न सर्वभावानुपपत्तिः । अथ सर्वभावानुपपत्तिर्न बुद्ध्या विवेचनं सर्वभावानामिति सर्वभावानामनुपपत्तिरिति ब्रुवाणः प्रमाणं पर्यनुयोज्यः यदि प्रमाणं ब्रवीति व्याहतं भवति अथ न ब्रवीति अर्थोऽस्य न सिद्ध्यति प्रमाणाभावात् । अथाप्रामाणिकी सिद्धिः सर्वभावोत्पत्तिः कस्मान्न सिद्ध्यति यश्च सर्वभावानामभावो भावेष्वितरेतरापेक्षसिद्धेरित्येतस्मिन् वादे दोष उक्तः स इहापि द्रष्टव्य इति । यत् पुनरेतत् यदि व्यतिरिक्तं पटादिद्रव्यं स्यात् तन्तुषु बुद्ध्या विविच्यमानेषु पृथगुपलभ्येतेति ॥

तदाश्रयत्वादपृथग्ग्रहणम् ॥ २८ ॥

तदाश्रयत्वादपृथग्ग्रहणम् । कारणद्रव्याश्रितं कार्यं तस्मिन् न पृथगुपलभ्यत इति विपर्यये यदि पृथग्ग्रहणात् यत्र कार्यकारणभाव आश्रयाश्रितभावश्च नास्ति तत्र पृथग्ग्रहणमिति ॥

प्रमाणतश्चार्थप्रतिपत्तेः ॥ २९ ॥

प्रमाणतश्चार्थप्रतिपत्तेः । यदस्ति तथा च यन्नास्ति यथा च तत्सर्वं प्रमाणत उपलब्ध्या सिद्ध्यतीति । शेषं भाष्ये ॥

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ३० ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ ३१ ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः । यथा स्वप्ने विषया न सन्ति अथ च विषयाभिमानः एवं न प्रमाणानि न प्रमेयानि सन्ति अथ च प्रमाणप्रमेयाभिमानः ।

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३२ ॥
हेत्वभावादसिद्धिः ॥ ३३ ॥
स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ३४ ॥

मायागन्धर्वनगरमृगतृष्णिकावदेति। न प्रमाणाभावात् स्वप्नान्तवदविद्यमानेषु विषयेषु अभिमान इत्यत्र न हेतुरुच्यते इति स्वप्नान्ते चासन्तो विषया इति को हेतुरिति। ख्यातिरिति चेत् अयं जाग्रद्वस्थोपलभ्यानां विषयाणां चित्तव्यतिरेकिणामसत्त्वे हेतुः ख्यातिः स्वप्नवदिति न दृष्टान्तस्य साध्यसमत्वात्। य एते स्वप्नावस्थायां विषयाः ख्यान्ति न ते चित्तव्यतिरिक्ता इति अत्र को हेतुः। प्रतिबुद्धेनानुपलम्भान्न सन्तीति अथ मन्यसे यस्मात् प्रतिबुद्धेन नोपलभ्यन्ते तस्मान्न सन्तीति न विशेषणोपादानात्। ये प्रतिबुद्धेनोपलभ्यन्ते ते सन्तीति प्राप्तं व्यर्थं वा विशेषणं प्रतिबुद्धेनानुपलम्भादिति। यदि चोपलभ्यमानं जाग्रद्वस्थायां विषयमसन्तं मन्यसे(१) अथ चित्तमस्तीत्यत्र को हेतुरिति विपर्यये च सामर्थ्याभावादहेतुः जाग्रतोऽनुपलब्धिरिति। यद्युपलब्धिः सत्त्वसाधनं ततोऽनुपलब्धिरसत्त्वं साधयति विपर्यये हि सामर्थ्यं दृष्टमिति। न चित्तव्यतिरेकिणो विषया ग्राह्यत्वात् वेदनादिवदिति यथा वेदनादिग्राह्यं न चित्तव्यतिरिक्तं तथा विषया अपि वेदना सुखदुःखे चित्तं ज्ञानमिति सुखदुःखाभ्यां चान्यं ज्ञानमित्यसिद्धो(२) दृष्टान्तः

---

(१) प्रतिपद्यसे—पा० ४ पु०।

(२) सुखदुःखाभ्यां चान्यं वेदनादिग्राह्यं न चित्तव्यतिरिक्तज्ञानमित्यसिद्धो—पा० ४पु०।

सुखदुःखे ग्राह्ये ग्रहणं ज्ञानमिति[१] ग्राह्यग्रहणभावादन्यत्वम्। अथाभिन्नं विज्ञानं वेदनायास्तथापि ग्राह्यं च गृहीतिश्च एकमिति न दृष्टान्तोऽस्ति। न हि कर्म च क्रिया च एकं भवतीति। अथैकत्वं प्रमाणवृत्तमनपेक्ष्य प्रतिपद्येथाः तथापि चत्वारः स्कन्धा इति शास्त्रव्याघातः। अथ चतुष्टं न प्रतिपद्यते दृष्टं विज्ञानमात्रमेवाभ्युपगम्यते सोऽपि दृष्टं विज्ञानभेदमनुयोक्तव्यः बाह्यस्याध्यात्मिकस्य च विज्ञानभेदहेतोरभावात्[२]। कथं विज्ञानभेद इति स्वप्नवद्विज्ञानभेदं यदि प्रतिपद्यते सोऽपि दृष्टानुभूतानां भावानां भावनावशेन विज्ञानभेदं प्रतिपादयितव्यः। अथ स्वप्नपक्षे भावानां भावनावशाद् विज्ञानभेदं प्रतिपद्येत सोऽपि भाव्यभावकयोर्भेदेन[३] प्रत्यवस्थेयः नाभिन्नं भाव्यं भावकं चेति ये चैते स्वप्नादिप्रत्ययाः पुरविमानोद्यानयानादिभेदानुविधायिनः ते मिथ्याप्रत्यया इति मिथ्याप्रत्ययानां च जाग्रदवस्थाप्रत्ययसामान्याद्भावः ममापि सर्व एव मिथ्याप्रत्यया भविष्यन्तीति ब्रुवाणः प्रधानमनुयोक्तव्यः न च निःप्रधानं विपर्ययप्रत्ययं पश्याम इति चित्तव्यतिरेकिणं विषयमप्रतिपद्यमानः साधनदूषणस्वभावं पर्यनुयोक्तव्यः। यदि बाह्यस्वभावकं व्याघातकम् अथ चित्तस्वभावकं न चित्तेन परः प्रतिपद्यते इत्यर्थो न[४] सिद्ध्यति। न ह्येतरस्वप्नमनाख्यातमितरो विजानातीति। अथ शब्दाकारं चित्तं

---

(१) विज्ञानमिति—पा० ४ पु०।

(२) सोऽपि दृष्टविज्ञानहेतोरभावात्—पा० ४ पु०।

(३) भाव्यभावकवर्गयोर्भेदेन—पा० ४ पु०।

(४) इत्यर्थोऽस्य न—पा० ४ पु०।

प्रतिपद्यते तेनापि शब्दाकारं चित्तमित्याकारार्थो वक्तव्यः। आकारो हि नाम प्रधानवस्तुसामान्यादतस्मिंस्तदिति प्रत्ययः। न च भवत्पक्षे शब्दो विद्यत इति शब्दाकारं चित्तमिति निरभिधेयं वाक्यम् चित्तव्यतिरिक्तं विषयमप्रतिपद्यमानो जाग्रत्स्वप्नावस्थायां भेदं पर्यनुयोज्यः जाग्रदवस्थायां विषया न सन्ति स्वप्नावस्थायामपीति दृयं स्वप्नावस्था दृयं जाग्रदवस्थेति कुत एतत् धर्माधर्मव्यवस्था न प्राप्नोति(१) यथा स्वप्नावस्थायामगम्यादिगमनादधर्मोत्पत्तिर्न भवत्येवं जाग्रदवस्थायामपि न स्यात्। अथ सिद्धोपघातानुपघातौ भेदं जनयत इति प्रतिपद्येत तदपि तादृगेव सिद्धोपघातश्चेति सो वैकल्यहेतुरिति कथमवगम्यते। अथ विज्ञानस्य स्पष्टतामस्पष्टतां च भेदं प्रतिपद्येत विषयमन्तरेण ज्ञानस्य तुच्छताऽस्पष्टता वक्तव्या। असत्यर्थे(२) विज्ञानभेदो दृष्ट इति चेत् अथ मन्यसे यथा तुल्यकर्मविपाकोत्पन्नाः प्रेताः पूयपूर्णां नदीं पश्यन्ति न तच्च नद्यस्ति न पूयं न ह्येकं वस्त्वनेकाकारं भवितुमर्हति दृष्टश्च विज्ञानभेदः केचित् तामेव जलपूर्णां पश्यन्ति केचित् रुधिरपूर्णामित्यतोऽवसीयते यथाऽध्यासे निमित्तापेक्षमसति बाह्ये निमित्ते विज्ञानमेव तथोत्पद्यते इति। न व्याघातात् असति बाह्ये विज्ञानमेव तथेति ब्रुवाणः प्रष्टव्यो जायते कथं तथेति। यदि रुधिराकारं विज्ञानं रुधिरं तर्हि वक्तव्यं किं रुधिरमिति एवं जलाकारं नद्याकारं च वक्तव्यं पूयपूर्णां पश्यन्तीति च वाक्यस्य पदानि प्रत्येकं विचार्य-

---

(१) व्यवस्थानं न प्राप्नोति—पा० ४ पु०। (२) असत्यप्यर्थे—पा० ४ पु०।

माणानि रूपादिस्कन्धा भावैर्निर्विषयाणि भवन्ति देशादिनियमश्च न प्राप्नोति एकस्मिन् देशे नदीं पूयपूर्णां पश्यन्ति न देशान्तरेषु अमत्यर्थं नियमहेतुर्वक्तव्यः यस्य पुनर्विद्यमानं केनचिदाकारेण व्यवस्थितं तस्य शेषो मिथ्याप्रत्यय इति युक्तम्। मिथ्याप्रत्ययाश्च भवन्तो न प्रधानं[१] बाधन्त इति पूयादिप्रत्ययानां प्रधानं वक्तव्यमिति यथा पूयादिप्रत्ययानामेवं मायागन्धर्वनगरमृगतृष्णास्वप्नादीनामिति कर्मणो वासनान्यच्च फलमन्यच्च कल्प्यत इति। अस्यार्थो यच्चैव किल कर्म तच्चैव किल फलेन भवितव्यम् यस्य चित्तव्यतिरेकिणो विषयास्तस्यान्यच्च कर्मान्यच्च कर्मफलमिति व्यधिकरणे कर्मफले भवत इति। तन्नानभ्युपगमात् न मया कर्मफले व्यधिकरणे अभ्युपगम्येते आत्मनि कर्म तच्चैव फलमित्यदोषः। मदीयाच्चित्तात् अर्थान्तरं विषयाः सामान्य विशेषवत्त्वात् सन्तानान्तरचित्तवत् प्रमाणगम्यत्वात् कार्यत्वादनित्यत्वात् धर्मपूर्वकत्वाच्चेति।

एवं च सति ॥

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥ ३५ ॥

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे। स्थाणौ पुरुषाध्यवसायो मिथ्योपलब्धिः तत्त्वज्ञानेन च

---

(१) प्रधानप्रत्ययं बाधन्त--पां० ४ पु०।

मिथ्याध्यवसायः स निवर्तते नार्थः स्थाणुपुरुषलक्षणः न ह्यसौ स्थाणुर्न भवतीति यथा स्वप्नोपलब्धानां ये ऽध्यवसायाः ते जाग्रदवस्थोपलब्ध्या निवर्त्यन्ते नार्थो विषयसामान्यलक्षण इति । शेषं भाष्ये ॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ३६ ॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भादप्रतिषेधः । मिथ्याबुद्धेर्निमित्तमस्ति किं पुनस्तत्सामान्यदर्शनं विशेषादर्शनम् अविद्यमानविशेषाध्यारोप इति । मिथ्याबुद्धिं प्रतिपद्यमानेन तस्यानिमित्तं वक्तव्यं निमित्तं च प्रतिपद्यमानेनार्थोऽभ्युपेय इति ॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ३७ ॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः तत्त्वं स्थाणुरिति प्रधानं पुरुष इति तत्त्वप्रधानयोरलोपे मिथ्याबुद्धिर्भवतीति । शेषं भाष्ये । दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम् ।

अथ तत्त्वज्ञानं कथमुत्पद्यत इति ॥

समाधिविशेषाभ्यासात् ॥ ३८ ॥

समाधिविशेषाभ्यासात् । शेषं भाष्ये । व्यापकत्वादन्तःकरणस्य प्रत्याहारो न युक्त इति चेत् अथ मन्यसे व्यापकमन्तःकरणं तत्कथं प्रत्याह्रियत इति नोक्तोत्तरत्वात् । यथा न व्यापकमन्तःकरणं तथोक्तमधस्तात्[१] । स्वाङ्गगतीक्षणानुपपत्तिरिति चेत् अथ

---

(१) षणुत्वात्—प० ४ पु० ।

मन्यसे यस्याप्यन्तःकरणमणु तस्यापि स्वाङ्गगतिवीक्षणं(१) न प्राप्नोति युगपद्धस्ते चक्षुषि वा सन्निधानात् शरीरात्ममनःसंयोगयौगपद्यात् प्रयत्नदर्शनयोर्युगपदुत्पत्तेः स्वात्मशरीरसम्बन्धस्यात्मनः सम्बन्धश्च(२) युगपद् भवति तत्रात्ममनःशरीरसम्बन्धात् स्वाङ्गगतिरात्ममनः-सम्बन्धाच्चक्षुषः प्रेरणम् तथा स्वाङ्गगतिः प्रयत्नाङ्गवतीति दर्शनं चक्षुरभ्रेरर्थस्य च सन्निधानादिति। न चात्मनः प्रदेशाः सन्तीत्य-चोद्यम् प्रदेशवति चात्मनि अन्येनात्मप्रदेशेन मनः सम्बध्यते अन्येन शरीरमिति स्वाङ्गे गतीक्षणादिदोषः यस्य पुनर्निष्प्रदेश एवासौ तस्यैष दोषो न भवतीति शरीरसम्बन्धिनात्मना मनः सम्बन्ध इति॥

नार्थविशेषप्राबल्यात् ॥ ३९ ॥

नार्थविशेषप्राबल्यात्। नोपपद्यते समाधिविशेषाभ्यासः अबु-भुत्समानस्यापि बुद्ध्युत्पत्तेः यथा स्तनयित्नोः शब्दप्रभृतिषु इति॥

क्षुदादिभिः प्रवर्तनाच्च ॥ ४० ॥

क्षुदादिभिः प्रवर्तनाच्च(३)। क्षुत्पिपासाभ्यां चानिवृत्तोपि(४) बुद्धय एव उत्पद्यन्ते इति न युक्तः समाधिविशेषः॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ४१ ॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः। पूर्वकृतः पूर्वशरीराभ्यस्तः

---

(१) स्वाङ्गगतेरीक्षणं—पा० ४ पु०।

(२) समर्थस्यात्मनः समर्थश्च—पा० ४ पु०। एवमग्रेऽपि।

(३) क्षुधादिभिः प्रवर्तनाच्चेति क्वचित्। (४) चानिच्छतोऽपि—पा० ४ पु०।

समाधिविशेषः तस्य फलं धर्मः तत्फलतः पुनः समाधिविशेष इति समाधिविशेषाच्च बाह्यविषयाभिभवः लौकिकस्यापि तावत्समाधिविशेषावस्थितस्य बाह्यविषयोपनिपाते बुद्धयो नोत्पद्यन्ते किं पुनर्योगिन इति। यदि बाह्यविषयोपनिपाते अर्थज्ञानानि प्रादुर्भवन्ति अपवर्गेऽप्येवं प्रसङ्गः युक्तश्चापवर्गे बाह्यविषयविशेषोपनिपातो[१] विद्यत इति बुद्ध्युत्पादप्रसङ्गः ॥

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ ४२ ॥

अपवर्गेऽप्येवंप्रसङ्गः ॥ ४३ ॥

न निष्पन्नावश्यम्भावित्वात् ॥ ४४॥

न निष्पन्नावश्यम्भावित्वात्। सति शरीरे बाह्यविषयो ज्ञानोत्पत्तिकारणम् नान्यथेति सूत्रार्थः ॥

तदभावश्चापवर्गे ॥ ४५ ॥

तदभावश्चापवर्गे। तस्य शरीरादेरुपलब्धिकारणस्याभावोऽपवर्ग इति। तस्मात् सर्वदुःखमोक्षो[२]ऽपवर्ग इति। यस्मात् सर्वं दुःखबीजं दुःखं चापवर्गे विच्छिद्यते तस्मात् सर्वदुःखेन विमुक्तिरपवर्गः ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४६ ॥

---

(१) विषयोपनिपाते—पा० ४ पु०। (२) सुखदुःखमोक्षो—पा० ४ पु०।

तदर्थं यमनियमाभ्यासात्मसंस्कारः योगाच्च विध्युपायैः ।
तस्यापवर्गस्याधिगमाय यमनियमाभ्यासंसंस्कारः[१] ॥

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥ ४७ ॥

प्रज्ञानग्रहणाच्चाभ्यासः तद्विद्यैश्च सह संवादः ज्ञानग्रहणं शास्त्रग्रहणं तद्विद्यायत्नसुपायं वुद्ध्यन्त इति तद्विद्या इत्यविभक्तार्थं वचनम् ॥

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ॥ ४८ ॥

तं शिष्यगुरुसब्रह्मचारिशिष्ट इत्येवमादि सूत्रम् एतत् तु निगदेनैव नीतार्थम् ॥

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४९ ॥

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे तमभ्युपेयादिति वर्तते ॥

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ५० ॥

तत्त्वाध्यवसायसंरक्षणार्थं[२] जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति । अनुत्पन्नतत्त्वज्ञानेनैतत्कर्तव्यमिति सूत्रार्थः । विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य ।

---

(१) नियमाभ्यासात्मसंस्कार—पा० ४ पु० ।
(२) प्रतिपक्षहीन—इत्यधिकम् ४ पु० ।

ताभ्यां विगृह्य कथनम्[१] ॥ ५१ ॥

ताभ्यां जल्पवितण्डाभ्यां विगृह्येति विजिगीषया न तत्त्वबुभुत्सयेति विद्यापालनार्थं चैतत् न लाभपूजाख्यात्यर्थमिति[२] ॥

प्रवृत्तिदोषसम्बन्धः प्रेत्यभावः प्रपञ्चितः ।
फलं दुःखं विमुक्तिश्च चतुर्थे परिकीर्तिताः ॥

इति-श्रीद्योतकरे न्यायसूत्रवार्त्तिके चतुर्थाध्यायस्य द्वितीयमाह्निकम्[३] ॥
चतुर्थोऽध्यायः समाप्तः ॥


---

(१) न्यायसूचीनिबन्धानुसारेणेदं सूत्रमेव । भाष्यमित्यन्ये ।

(२) ताभ्यां विगृह्य कथनमिति सूत्रम् । यस्तु कुदर्शनबलाद्धितमिथ्याज्ञानमवलम्ब्य दुर्विदग्धतया सद्विद्यावैराग्याद्वा लाभपूजाख्यात्यर्थितया कुहेतुभिरीश्वराणां जनाधाराणां पुरतो वेदब्राह्मणपरलोकादिदूषणे प्रवृत्तस्तं प्रति वादी समीचीनं दूषणमप्रतिभयाऽपश्यन् जल्पवितण्डे श्रवणार्थं विगृह्य जल्पवितण्डाभ्यां तत्त्वकथनं करोति विद्यापरिपालनाय । माभूदीश्वराणां मतिविभ्रमेण तच्चरितानुवर्त्तिनीनां प्रजानां धर्मविप्लव इति इदमपि प्रयोजनं जल्पवितण्डयोः न तु लाभख्यात्यादि द्रष्टम् । न हि परहितप्रवृत्तपरमकारुणिको मुनिर्दृष्टार्थं परपांसुलोपायमुपदिशतीति नात्पर्यटीकायां वाचस्पतिमिश्राः ।

(३) इति श्रीमदुद्योतकराचार्यविरचितं न्यायसूत्रचतुर्थाध्यायवार्त्तिकं समाप्तम् —पा० ४ पु० ।

पञ्चमोऽध्यायः ।



जातेः संक्षेपेणोक्तायाः विस्तरो वक्तव्य इतीदमारभ्यते[१] । साधर्म्यादि सूत्रम् ॥

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्ति-प्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्ति-विशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ॥१॥

तत्र जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिषेधासमर्थो हेतुः। जातेः प्रयोगप्रतिषेधादसदुत्तरत्वाच्चारम्भो न युक्त छलजातिनिग्रह-स्थानानां स्ववाक्ये परिवर्जनमिति प्रतिषिद्धा जातिः न च जातिः सदुत्तरमतश्च जातेः प्रयोगो न युक्तः। अनारम्भप्रयोजनस्योक्तत्वादुक्तं जातेरारम्भप्रयोजनं स्वयं च सुकरः प्रयोग इति । साधुसाधननि-राकरणार्थं वा प्रयोगः । यदा तु वादी परस्य साधनं साध्विति मन्यते लाभपूजाख्यातिकामश्च भवति तदा जातिं प्रयुङ्क्ते कदाचि-

---

(१) अथ प्रमाणादयः पदार्था उद्दिष्टा लक्षिताः परीक्षिताश्च तत्किमपरमव-शिष्यते यदर्थं पञ्चमाध्याय आरभ्यत इत्यत आह । साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति भाष्यम् । तस्यार्थमाह वार्त्तिककारः जातेः संक्षेपेणोक्तायाः इत्यादि । इति तात्पर्यटीकायां वाचस्पतिमिश्राः ।

दयं जात्युत्तरेणाकुलीकृतो नोत्तरं प्रतिपद्यते उत्तराप्रतिपत्त्या च निगृह्यते अनभिधाने च जातेरेकान्तजयः परस्येत्यैकान्तिकात् पराजयाद्वरमस्तु सन्देहः(१) इति युक्तो जातेः प्रयोगः। असाधुसाधननिराकरणार्थमित्यन्ये। एके तु जातेः प्रयोगं मन्यन्ते असाधुसाधननिराकरणार्थमेवं चाहुः असाधौ तु साधने य आभां प्रयोग सोनभिज्ञतया साधनदोषस्य तद्दोषप्रदर्शनार्थं वा प्रसङ्गव्याजेनेति। एतत्तु न युक्तम् प्रयोजनाभावाद्। यदि तावदसाध्येतत्साधनमिति प्रतिपद्यते य एवास्य दोषो बुद्धः स एव वक्तव्यो न जात्यभिधानेन(२) प्रयोजनमस्ति। अथ न बुद्ध्यते किमिति जातिं प्रयुङ्क्ते न ह्यबुद्ध्यमानः शक्नोति प्रयोक्तुम्। अथाबुद्ध्यमानोपि प्रयुङ्क्ते यत्किञ्चिद् ब्रूयात् नियमो न स्यात्। एतेनानैकान्तिके पञ्चानां प्रयोगः प्रत्युक्तः। य आहुरनैकान्तिके साधने परेण प्रयुक्ते पञ्च जातयः प्रयोक्तव्या इति तदप्यनेनैव प्रत्युक्तम्। कथमिति बुद्ध्या तदेव वक्तव्यमबुद्ध्या अज्ञानमिति। एतेन युक्तायुक्तयोः पूर्वापरभावः प्रत्युक्तः। अयुक्ते साधने अयुक्तमुत्तरं युक्ते युक्तमिति। युक्तं च नाम यत् प्रतिज्ञादिदोषोद्भावनं नासौ जातिः उत्तरमेव तदिति जातिलक्षणपरिज्ञानादयुक्तमेतदपीति। समीकरणार्थं प्रयोगः समः साधर्म्यमेव समं वैधर्म्यमेव(३) समामिति समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः। समीक्रियतां परपक्षो मावाकारि अयं तु समीकरणार्थं प्रवर्तते यथा लोके

---

(१) वरं तत्सन्देह—पा० ६ पु०। (२) जात्यभिधाने—पा० ६ पु०।
(३) समं वैधर्म्यमेव—इति नास्ति ६ पु०।

कुटुम्बार्थं यतत इति । विशेषहेत्वभावो वा समार्थः न भवता विशेषहेतुः कश्चिदपदिश्यत इति । एनमर्थमुररीकृत्य प्रवर्तते यथाभूतं भवतः साधनं तथाभूतं ममापीति न सर्वापदेशव्याप्तिरव्यापकत्वात् । न हि सर्वापदेशे सर्वा जातयः प्रवर्तन्ते न हि वैधर्म्येण स्थापनायामुत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसमाः प्रयोक्तुं शक्यन्त इति । न वादिप्रतिवादिनोस्तुल्यता समार्थः जातेरसदुत्तरत्वात् । नियमेनैव जातिवाद्यसद्वादी भवति वादिनस्तु सदसद्वादित्वे अनियम[१] इति ॥

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ २ ॥

प्रतिषेधाविति । साधर्म्येणोपसंहारे तद्विपरीतसाधर्म्येण प्रत्यवस्थानं वैधर्म्येणोपसंहारे तद्विपरीतसाधर्म्येण प्रत्यवस्थानं साधर्म्यसमः यथा अनित्यः शब्द उत्पत्तिधर्मकत्वात् । उत्पत्तिधर्मकं कुम्भाद्यनित्यं दृष्टम् । यद्यनित्यघटसाधर्म्यादनित्यः नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः प्राप्त इति । एतस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः नित्यसाधर्म्यमप्याकाशेनामूर्तत्वमस्तीति नित्यः[२] प्राप्तः । अथ मन्यसे सत्यस्मिन् साधर्म्ये न नित्यः न तर्हि वक्तव्यमनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चानित्य इति । सेयं जातिर्विशेषहेत्वभावं दर्शयति विशेषहेत्व-

---

(१) अनियमप्रसङ्गः—पा० ६ पु० ।

(२) अमूर्तत्वमस्त्यतो नित्यः—पा० ६ पु० ।

भावाच्चानैकान्तिकदेशनाभासा इति । एवं वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः यथा तस्मिन्नेव हेतावाकाशवैधर्म्यादनित्य इत्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः अनित्येनापि घटेनास्य वैधर्म्यममूर्तत्वमतो नित्यः प्राप्तः । तस्मिन्नेव हेतौ घटसाधर्म्यादित्युक्ते यद्यनित्यघटसाधर्म्यादनित्यः वैधर्म्यमप्यस्यास्यमूर्तत्वमतो नित्यः प्राप्तः । अथ मन्यसे सत्येतस्मिन्[१] वैधर्म्ये न नित्यः[२] न तर्ह्ययमेकान्तोऽनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चानित्य इति । सेयं विशेषहेत्वभावः ॥

अनयोरुत्तरम् ।

गोत्वादेर्गोसिद्धिवत् तत्सिद्धिः ॥ ३ ॥

गवाश्वसाधर्म्ये सत्त्वादौ समाने वैधर्म्ये चैकशफत्वादौ साधर्म्यात् सत्त्वाद्गौरश्वो न भवति । न वैधर्म्यादेकशफत्वादेरगौर्गौर्भवति । किं कारणम् एकस्यानन्वयादेकस्य चाव्यावृत्तेः । यदन्वयव्यतिरेकि साधर्म्यं तस्माद्धर्मव्यवस्था गोत्वं च तथा तस्माद्गोत्वादेव गौः सिध्यति तथेहाप्यमूर्तत्वमुभयव्यतिरेकि उभयान्वयि च तस्मान्नित्यत्वमनित्यत्वं च[३] न शक्यं प्रतिपत्तुम् । अपि त्वन्वयव्यतिरेकसम्पन्नादुत्पत्तिधर्मकत्वा[४]दनित्य इति अतो यद्ब्रवीषि विशेषहेत्वभावादित्ययं विशेष इति ॥

---

(१) सत्यप्यस्मिन्— पा० ६ पु० । (२) प्राप्तः—इत्यधिकम् ६ पु० ।
(३) नित्यमनित्यं च—पा० ६ पु० । (४) उत्पत्तिमत्त्वा—पा० ६ पु० ।

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥ ४ ॥

अविद्यमानधर्माध्यारोप उत्कर्षः विद्यमानधर्मापचयोऽपकर्षः वर्ण्यः साध्यः अवर्ण्यः असाध्यः विकल्पो विशेषः एतेषां धर्माणामुद्भावनार्थाः प्रयोगा उत्कर्षसमाद्या जातयः(१) साध्यसाधनधर्मयोस्तुल्यतया प्रत्यवस्थानं साध्यसमेत्युच्यते। यथा तस्मिन्नेव हेतौ घटसाधर्म्यादिति कृते यदि यथा घटस्तथा शब्दस्तदा घटो रूपादिमान् शब्दोऽप्येवं प्रसक्त इत्युत्कर्षसमः। शब्दोऽरूप इति घटोऽप्येवं प्रसक्त इत्यपकर्षसमः। घटोऽनित्य इत्यवर्ण्यः शब्दोऽप्येवं शब्दो वावर्ण्य इति घटोऽप्येवमिति वर्ण्यावर्ण्यसमौ। सत्येतस्मिन् उत्पत्तिधर्मकत्वे विभागजः शब्दो न विभागजो घटः विभागजाविभागजविकल्पे च(२) नित्यानित्यविकल्प इति विकल्पसमः। घटो वा अनित्य इत्यत्र को हेतुरयमपि साध्यवज्ज्ञापयितव्य इति साध्यवत् प्रत्यवस्थानात् साध्यसमः ॥

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५ ॥

न हेत्वर्थापरिज्ञानादिति सूत्रार्थः। न ब्रूमो यावन्तो घटधर्मास्ते सर्वे एव शब्दे सम्भवन्तीत्यपि तु यो यस्य साधको धर्म उपपद्यते स तत्साधनं तत्रोपसंक्रियते। तथा च शब्दे नं शब्दे चोत्पत्तिधर्मकत्वं धर्म उपसंक्रियते। एवं यथोक्तमसम्बद्धम् यथा गौस्तथा गवय इत्युक्ते न गोधर्माः सर्व एव गवये न गवयधर्माः सर्व एव गवि

---

(१) उभयोः—पा० ६ पु० । (२) विकल्पवत्—पा० ६ पु० ।

प्राप्नुवन्ति । अपि तु यदितरस्येतरेण सम्बद्ध्यते तावन्मात्रमेवोपसंहियते। अशेषधर्मोपसंहारे तु यथा तथेत्येव न स्यात् स एवासाविति स्यात् तथेहापीत्ययमदोषः । यत्पुनरेतद्विभागजाविभागजविकल्पवन्नित्यानित्यविकल्प इति । यथोत्पत्तिधर्मकत्वमन्वयव्यतिरेकि नैवं विभागजत्वम् । न हि किञ्चिद्विभागाज्जायमानं यथोक्तविशेषणं नित्यमनित्यं वा दृष्टमित्येतदप्यनुत्तरम् ॥

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥

दृष्टान्तः साध्य इति ब्रुवता भवता न दृष्टान्तलक्षणं व्याख्यायि । दृष्टान्तो हि नामाविहतयोर्दर्शनयोर्विषयः । तथा च साध्यत्वमनुपपन्नम् । अथ दर्शनं विहन्यते नासौ दृष्टान्तो लक्षणाभावादिति । यत्त्वोक्तं जातीनां[१] पौनरुक्त्यं प्रसज्यत इति । न पौनरुक्त्यमर्थभेदात् । यथा चोत्कर्षसमादीनां भिन्नोऽर्थस्तथोक्तम् । प्रयोगभेददर्शनाच्च प्रयोगश्च भिन्न उत्कर्षसमादीनामिति । आनन्त्यमिति चेत् अथ मन्यसे यदि प्रयोगभेदाद्भेदो न चतुर्विंशतिर्जातय इति प्राप्तम् । नानवधारणात् नेदमवधार्यते चतुर्विंशतिर्जातय इति किन्तू[२]दाहरणानां भेदः। कथमवगम्यते । तथाहि प्रकरणसमैका चतुर्द्धा भिन्नेति । अथ सामान्यतोऽभिन्ना जातय इत्यभेदं ब्रूयात् तस्याप्यभ्युपगतं चतुर्दशत्वं निवर्तते । अथ कुतश्चिद्भेदाभेदः अदेश्यं तर्हि उत्कर्षसमाद्या न विकल्पसमातो भिद्यन्त इति यथा केनचिद्भे-

---

(१) जातीनां—पा० ५ पु० । (२) अपि तू—पा० ६ पु० ।

देन चतुर्दशत्वं तथा केनचिद्धेदेन चतुर्दशत्वं तथा केनचिद्भेदेन चतुर्विंशतित्वम् (?) अविशेषसमा त्वियं जातिः उत्कर्षसमादीनामेकत्वं किञ्चित्साधर्म्यादिति। अस्या जातेरुक्तमुत्तरम् ॥

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वाद्-प्राप्त्यसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ ७ ॥

तस्मिन्नेव हेतौ घटसाधर्म्यादिति कृते यदि तावदयं हेतुः साध्यं सम्प्राप्नोति प्राप्त्या अविशिष्टः। कोऽविशेषार्थः उभयोर्विद्यमानता नाविद्यमानः सम्प्राप्यत इति हेतोः साधनार्थो हीयते। अथ न प्राप्यते अप्राप्तेन हेतुना अविशिष्टत्वाद्हेतुर्भवति न ह्यग्निरप्राप्तो दहति प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः। अनयोर्भेदेनोपन्यासो विवक्षातः भेदविवक्षायां प्राप्त्यप्राप्तिसमाविति अभेदविवक्षायामेकमेवोत्तरम् यथा वृक्षा वनमिति। जातिलक्षणाभावान्नैवेयं जातिरिति चेत् अथ मन्यसे यज्जातेर्लक्षणं तदस्या नास्ति साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति हि तत्। न च लक्षणेनासम्बद्धा जातिरिति शक्यं वक्तुम् न हि गोलक्षणहीनोऽश्वो गौरिति। न सूत्रार्थापरिज्ञानात्। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरित्यस्य सूत्रस्यार्थो न व्यज्ञायीत्यनुत्तरमेतत्। एतेन चैकाल्यसमाद्याः प्रत्युक्ताः सूत्रार्थापरिज्ञानात् ॥

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारा[१]दप्रतिषेधः ॥ ८ ॥

---

(१) चाप्यभिचारादित्यपि क्वचित्।

मृत्पिण्डप्राप्तानां दण्डादीनां नाविशेषो न च साध्यसाधनभाव-निवृत्तिः न हि मृत्पिण्डप्राप्तो दण्डः साधनत्वं जहाति नापौतरत् साध्यत्वं जहाति। अथ मन्यसे घटस्तत्र साध्यस्तस्य चाविद्यमानस्य किं साधनेन। नाविद्यमानस्य साधनमपि तु मृत्पिण्डो घटीक्रियत इति। किमिदं घटीक्रियत इति मृद्द्रव्यवाः पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते व्यूहान्तराच्च घटोत्पत्तिः। पीडने चाभिचाराद-प्राप्त्यापि साधकत्वं दृष्टम्। कोऽप्राप्त्यर्थः। परस्परोपश्लेषमन्तरेण साधकत्वम्। अन्यथा तूद्देशेनायं प्राप्त एव नियमात् दृश्यं च जातिः सर्वहेत्वपवादद्वारिका। यदि ज्ञापको हेतुरपदिश्यते तथापि। अथापि कारकस्तथापीति। सा चेयं कार्यकारणत्वापवादद्वारेण प्रव-र्तमाना व्याहता भवति। को व्याघातः उत्तरस्यानुत्थानम्। कथ-मिति यदिदमुत्तरं प्राप्यार्थं कारणत्वापवादद्वारेण साधयेदप्राप्य वेति तस्यापि प्रतिषेध्यं प्राप्य वाऽप्राप्य वेति समो दोषः॥

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रति-दृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ॥ ९॥

यथा तस्मिन्नेव हेतौ घटादिसाधर्म्येण कृते दृश्यं घट एव तावदनित्य दृश्यत्व को हेतुरिति प्रसङ्गसमः। प्रतिदृष्टान्तसमस्य यदेव भाष्य उदाहरणं तदेव द्रष्टव्यमिति। वाय्वाकाशसंयोगस्या-कारणत्वादयुक्तमिति चेत्। अथ मन्यसे न वाय्वाकाशसंयोगः क्रियाकारणं चिरमपि कालेष्वसम्भवात्। न वाय्वाकाशसंयोगेनाकाश-

क्रिया कृता न करोति न करिष्यतीति यच्च त्रिष्वपि कालेष्वकारणं तदकारणम् यथा घटो घटान्तरस्य। न तत्समानधर्मोपपत्तेः। न ब्रूमो वाय्वाकाशसंयोग एव कारणमपि तु तथाभूतधर्मोऽन्यच्च दृष्टो यथा वायुवनस्पतिसंयोग इति। यस्त्वसौ तथाभूतः क्रियां न करोति तन्नाकारणत्वादपि तु प्रतिबन्धात् केनास्य प्रतिबन्धः। महत्परिमाणेन यथा मन्दवातवेगेन नुन्नानां लोष्टादीनामिति। यदि च क्रियां दृष्ट्वा क्रियाकरणमिति मन्यसे सर्वं कारणं क्रियानुमेयं भवतः प्राप्तं ततश्चोपादानं कारणस्य न प्राप्नोति किमिदं करिष्यत्याहो न करिष्यतीति यस्य पुनः साधर्म्यादुपादानं तस्य युक्तम् यदि च तत्सदृशं न कारणमिति मन्यसे अनैकान्तिको हेतुर्न प्राप्नोति न हि यच्छब्दे ऽमूर्तत्वं तदाकाशादाविति अनुमानं चान्यत्र दृष्टस्यान्यत्र सादृश्यादेव प्रवर्तते न हि ये धूमधर्मा एकस्मिन् धूमे त एव धूमान्तरेष्वपीति ॥

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत् तद्विनिवृत्तिः॥१०॥

इदं तावदयं प्रष्टव्यः के प्रदीपमुपाददते किमर्थं चेति। दिदृक्षमाणा दृश्यदर्शनार्थमिति। अथ प्रदीपोपलब्ध्यर्थं कस्मान्न प्रदीपोपादानं कुर्वते। अन्तरेण प्रदीपो दृश्यते प्रदीपान्तरमिति। अथ दृष्टान्तः किमर्थमुपादीयते अज्ञातस्य प्रज्ञापनार्थम्। अथ दृष्टान्ते दृष्टान्तः किमर्थं देश्यते यदि प्रज्ञापनार्थं नाप्रज्ञातो दृष्टान्त इति। यत्पुनराकाशदृष्टान्तवदिति ॥

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥

अभ्युपगमात् प्रतिदृष्टान्तस्य च हेतुभावं प्रतिपद्यमानेन दृष्टान्तस्यापि हेतुभावोऽभ्युपगन्तव्यः हेतुभावश्च साधकत्वं स च कथमहेतुर्न स्यात्। यद्यप्रतिषिद्धः साधकः स्यात् अप्रतिषिद्धश्चायं साधकः, प्रयोगानुपपत्तेश्च। यदि तावदेवं प्रयुङ्क्ते यथा भवदीयो दृष्टान्तस्तथा मदीय इति अभ्युपगमान्न प्रतिदृष्टान्तः। अथैवं प्रयुङ्क्ते यथा मदीयो न दृष्टान्तस्तथा त्वदीय इति तथापि व्याघातान्न प्रतिदृष्टान्त इति ॥

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥

यथा अनित्यः शब्द उत्पत्तिधर्मकत्वात् घटवदिति स्थिते यदि ब्रूयात् प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति तदभावादनुत्पत्तिधर्मकः अनुत्पत्तिधर्मकत्वाच्च नित्य इति। अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः ॥

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥

यथैव प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति तथा शब्दोपीति उत्पन्नः सन् शब्द इति भवति उत्पन्नः सनुत्पत्तिधर्मक इति भवति तथाऽनित्य इति। उत्पन्ने उत्पत्तिधर्मकत्वमस्तीति न कारणप्रतिषेधः अनुत्पन्नस्य चातथाभावात् न चायमनुत्पन्नः शब्द इति वा उत्पत्तिधर्मक इति वा अनित्य इति वा व्यपदेष्टुं शक्यत इति।

ज्ञापकश्चायं हेतुर्न कारकः ज्ञापके च कारकवत् प्रत्यवस्थानमसम्बद्धम् न कारकज्ञापकयोर्भेदोऽस्ति कारकत्वादिति चेत् । न कारकज्ञापकयोः क्रियाज्ञप्तिहेतुत्वात् । योऽप्ययं ज्ञापकः सोऽपि किञ्चित् कुर्वन् ज्ञापक इत्युच्यते कारकोपीति(१) । नैष दोषः कारकस्य क्रियाहेतुत्वात् ज्ञप्तिहेतुत्वाद् ज्ञापकस्येति । तत्रैको वस्तु निष्पादयति एकस्तु विद्यमाने वस्तुनि ज्ञप्तिं करोति प्राक्चोत्पत्तेरुत्पत्तिधर्मकत्वस्याभावादनुत्पत्तिधर्मकः शब्द इति ब्रुवाणः शब्दमभ्युपैति नासतोऽनुत्पत्तिधर्मकत्वं धर्म इति । ततश्च विशेषणमनर्थकं प्रागुत्पत्तेरिति अपरे तु प्रागुत्पत्तेः कारणाभावादित्युक्ते अर्थापत्तिसमैवेयमिति । प्रागुत्पत्तेः प्रयत्नानन्तरीयकत्वस्याभावादर्थादप्रयत्नानन्तरीयकोऽप्रयत्नानन्तरीयकत्वाच्च नित्य इति कृते उत्तरं ब्रुवते नायं नियमो प्रयत्नानन्तरीयकं(२) नित्यमिति । त्रयी हि तस्य गतिः किञ्चिन्नित्यमाकाशादि किञ्चिदनित्यं विद्युदादि किञ्चिदसदेव आकाशकुसुमादि । एतत्तु न युक्तमुत्पश्यामः कथमिति यत्तावदसदप्रयत्नानान्तरीयकमिति न युक्तं प्रयत्नानन्तरीयकत्वस्य जन्मविशेषणत्वात् यस्य न प्रयत्नानन्तरं जन्म तदप्रयत्नानन्तारीयकं न चाभावो विद्यते अतो न तस्य जन्म यच्चासत् किं तस्य विशेष्यमस्ति । एतेन नित्यं प्रत्युक्तम् । न हि नित्यमप्रयत्नानन्तरीयकमिति शक्यं वक्तुम् । जातिलक्षणाभावान्नेयं जातिरिति चेत् नानुत्पत्तैरहेतुभिः साम्यात् योनुत्पन्नः स न हेतुः तद्यथा अनुत्पन्नास्तन्तवो न पटस्य कारणमिति ॥

(१) कारकत्वादिति—पा० ६ पु० । (२) प्रागुत्पन्नः—इत्यधिकम् ६ पु० ।

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः ॥ १४ ॥

उदाहरणं भाष्ये। संशयसमा साधर्म्यसमातो न भिद्यते इति चेत् अथ मन्यसे यथा साधर्म्यसमोदाहरणं साधर्म्यात् प्रवर्तते तथा संशयसमापीति अतोऽभेदान्न जात्यन्तरमिति। न उभयैकसाधर्म्यभेदात् उभयसाधर्म्यात् संशयसमः एकसाधर्म्यात् साधर्म्यसम इति विशेषः ॥

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥

साधर्म्यात् साधर्म्यदर्शनात् संशयः वैधर्म्याद्विशेषदर्शनान्न संशयः उभयथा तु[१] संशये सामान्यविशेषदर्शने सति संशये ऽत्यन्त[२]संशयप्रसङ्गो नित्यं सामान्यं संशयं करोतीति तु न प्रतिपद्यामहे सति सामान्ये विशेषदर्शनाद्व्यावृत्तेरिति ॥

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥ १६ ॥

उदाहरणं भाष्ये। संशयसमासाधर्म्यसमाभ्यां प्रकरणसमा न भिद्यते कथमिति तत्रापि साधर्म्यमिहापीति। न उभयपक्षसाधर्म्याद् भेदसिद्धेः उभावत्र वादिप्रतिवादिनौ पक्षपरिग्रहेण नित्यानित्यत्वे साधयतः न चैवं साधर्म्यसमसंशयसमयोरिति ॥

---

(१) उभयथा संयोगिनि—पा० ६ पु०। (२) संशय इत्यत्र—पा० ६ पु०।

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः[१] ॥ १७ ॥

विरुद्धाव्यभिचार्येष उक्तोत्तर इति। प्रकरणोत्थानं च न प्रतिपक्षादिति ब्रूमः किन्तु तत्त्वादर्शनात्[२] तदुक्तं प्रकरणसमे हेत्वाभास इति ॥

चैकाल्यासिद्धे[३]**र्हेतोरहेतुसमः** ॥ १८ ॥

अहेतुसाम्यात् प्रत्यवस्थानमहेतुसम इति ॥

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

विरोधः सूत्रार्थः। नोत्पद्यमानमहेतुत उत्पद्यते नापि ज्ञाप्यमानमहेतुना ज्ञाप्यत इति ॥

प्रतिषेधानुपपत्तेश्च प्रतिषेद्व्याप्रतिषेधः ॥ २० ॥

विरोध उत्तरदोष इति। यस्त्रिष्वपि कालेषु न साधयति स न प्रतिषेधे ऽपि हेतुरिति समानो दोषः। उक्तोत्तरत्वाच्च प्रत्यवादीनामप्रामाण्यं चैकाल्यासिद्धेरित्यत्रोक्तोत्तरमेतदिति ॥

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ २१ ॥

उदाहरणं भाष्ये ॥

---

(१) प्रतिपन्नोपपत्तेः—पा० ९ पु०। (२) तथा दर्शनात्—पा० ९ पु०।
(३) नैकाल्यानुपपत्तेरिति न्यायसूचीनिबन्धे।

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥

अनुपपाद्यसामर्थ्यमर्थादापद्यत इति ब्रुवाणः पक्षं हापयति। किं कारणम् सामर्थ्यस्यानुक्तत्वात्। एवं च पक्षहानेरुपपत्तिः। अनैकान्तिकत्वाच्चार्थापत्तेः[१] पूर्वसूत्रव्याघातः। यदुक्तं नानैकान्तिकत्वमनर्थापत्तावर्थापत्त्यभिमानादिति तद्व्याहन्यते[२] नास्ति व्याघातः सन्निधिविप्रिष्टाया अनैकान्तिकत्वाभ्युपगमात्। येयं सूत्रेणोपात्ता सानैकान्तिकी नार्थापत्तिमात्रं यथानुमानं व्यभिचारि यत् तदप्रमाणं नेतरदिति तथेहापीति ॥

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥

उदाहरणं भाष्ये। साधर्म्यसमातो न भिद्यते अविशेषसमः कस्मात् साधर्म्यमात्रात्। प्रवृत्तेरविशेषादिति चेत्। न एकसमस्तभेदाङ्गेदः एकसाधर्म्यात् साधर्म्यसमा समस्तसाधर्म्याद्विशेषसमेति ॥

क्वचित् तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः[३] प्रतिषेधाभावः ॥ २४ ॥

---

(१) अनुपपत्तेः—पा० ६ पु०। (२) नुपपत्तिरिति—पा० ५ पु०।
(३) तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः—पा० ६ पु०।

क्वचित् साधर्म्यमुपलभ्यते क्वचिन्नेति सूत्रार्थः । अभ्युपगमाच्च विरोधः सर्वभावानामनित्यत्वं प्रसज्जयता अभ्यनुज्ञातं शब्दस्यानित्यत्वं व्यर्थं वा सर्वभावग्रहणमिति । उक्तश्च विशेषोन्नयव्यतिरेकसम्पन्नो हेतुर्नोत्तर इति ॥

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥

उदाहरणं भाष्ये । उपपत्तिसमा प्रकरणसमातो न भिद्यत इति तत्रापि नित्यानित्यकारणोपपत्तिरिहापीति । न नित्यानित्यकारणस्यैकत्रोपपत्तेः । नित्यकारणं चानित्यकारणं चैकत्रोपपद्यत इत्युपपत्तिसमः नित्यानित्यपक्षाभ्यां प्रत्यवस्थानात् प्रकरणसम इति भेदः ॥

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥

विरोधः सूत्रार्थः । नित्यत्वकारण(१)मयस्योपपद्यते इति ब्रुवताभ्यनुज्ञातम् अनित्यत्वकारणमिति तथा च विरोधादुत्तरपक्षोत्थानं न युक्तम् ॥

निर्दिष्टकारणाभावे ऽप्युपलम्भादुपलब्धिसमः ॥ २७ ॥

उदाहरणं भाष्ये । सर्वसाध्याधारोपेणाव्यापकत्वं साधनस्येत्युपलब्धिसमार्थः । सर्वमनित्यं सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वेनाधारोप्याव्यापकत्वं हेतोः न ह्ययं हेतुः सर्वस्मिन्ननित्ये द्व्यणु-

---

(१) नित्यानित्यकारण—पा० ६ पु० ।

कादौ विद्यत इति । श्रूयमाणप्रतिज्ञार्थाव्यापकत्वं वा[१] । यथा-ऽनित्यः शब्दः शब्दान्तरोत्पादकत्वादिति न शब्दान्तरोत्पादकत्वेन सर्वः शब्दो व्याप्यते । न ह्यन्यः शब्दः शब्दान्तरं करोति ॥

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ २८ ॥

अनित्यः शब्द इति ब्रुवता न साध्यान्तराणां कारणान्तरं प्रतिषिध्यते न साध्यस्य कारणान्तरमिति। अपरे तु परिहारान्तरं ब्रुवते यदेव प्रयत्नानन्तरीयकं तदेव तस्मादनित्यमिति । एतत्तु नाविवादात् । यः प्रयत्नानन्तरीयकत्वं प्रतिपद्यते न तं प्रति किञ्चित् साध्यते यदा तु प्रयत्नानन्तरीयकत्वं वस्तुविशेषणं तदान्यो हेतु र्वक्तव्यः । जातिलक्षणाभावान्नेयं जातिः । न अहेतुसाम्याज्जातिः ॥

तदनुपलब्धेरनुपलम्भाद्भावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ २९ ॥

उदाहरणं भाष्ये । न उक्तोत्तरत्वात् । द्वितीयाध्याये उक्तोत्तरमेतत् ॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ३० ॥

आवरणाद्यसम्भवे ऽसत्त्वाभ्युपगमे च सत्यनुपलब्धेरिति प्रयोगः । एवं च सति न हेत्वन्तरं नानैकान्तिकं विपक्षावृत्तित्वात् । आवरणाद्यसम्भवे सत्त्वाभ्युपगमे विपर्ययस्याव्यभिचारान्नार्थापत्तिसमेति ॥

---

(१) प्रतिज्ञातार्थ—पा० ६ पु० ।

ज्ञानविकल्पानां च भावाभावसंवेदनाद्ध्यात्मम् ॥ ३१ ॥

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥

सर्वमनित्यं प्राप्नोतीत्युदाहरणं भाष्ये। अविशेषसमातो अनित्यसमा न भिद्यते तत्रापि सर्वाविशेष दृहापीति। भिद्यते तत्र सर्वाविशेष दृह सर्वानित्यत्वमिति ॥

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसामर्थ्यात्[१] ॥ ३३ ॥

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः ॥ ३४ ॥

प्रतिषेध्येन पक्षेण प्रतिषेधस्य प्रतिज्ञादियोगः सामान्यम्। तद्यदि वादिप्रतिषेध्यस्यानित्यत्वस्यासिद्धिर्घटादिसाधर्म्यात् ननु प्रतिषेधस्याप्यसिद्धिः प्रतिषेध्येन प्रतिज्ञादियोगसामान्यादिति नेयं साधर्म्यमात्रात् स्थापना अपि तु दृष्टान्ते विशिष्टमन्वयव्यतिरेकिणं धर्म[२]मुपलभ्य तत्सामर्थ्यात्। न च प्रतिपक्षस्यैवंभूतो धर्म उपपद्यते। तस्मात् प्रतिषेधो नोपपद्यते। उक्तं चात्र क्वचित् तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभाव इति। यच्चाविशेषसम उत्तरं तद्-

(१) साधर्म्यात्— ५ पु०। (२) व्यतिरेकिलक्षणं धर्म—पा० ९ पु०।

ह्यपि द्रष्टव्यम् । नामाधनादिति चेत् । अथ मन्यसे न मया सर्वस्यानित्यत्वप्रसङ्गेन सर्वस्यानित्यत्वं साध्यते अपि त्वेवं ब्रुवाणस्य सर्वस्यानित्यत्वं प्राप्नोतीति प्रसङ्गः क्रियते । न विशेषहेतूपपत्तेः । न मया साध्यसाधर्म्यमात्रेण साधनमुच्यते इत्यतो न सर्वानित्यत्वप्रसङ्गः सर्वानित्यत्वसाधने प्रमाणाभावाच्च न सर्वानित्यत्वप्रसाधकं प्रमाणमस्तीति अथ सर्वमनित्यं सत्त्वादिति साधयेत् तस्यापि नान्वयो न व्यतिरेकः ॥

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्ते[१]र्नित्यसमः ॥ ३५ ॥

अनित्यः शब्द इत्येतस्यां प्रतिज्ञायां प्रतिज्ञादिदोषोद्भावनद्वारिका जातिः, अनित्यः शब्द इत्यभिदधान एव भवान् शब्दस्य नित्यत्वं प्रतिजानीते कथमिति यदनित्यत्वं तत्[२] किं शब्दे नित्यमस्ति उत कदाचिद्भवतीति । यदि नित्यं धर्मनित्यत्वाद्धर्मिणोऽपि नित्यत्वम् । अथानित्यमनित्यत्वस्याभान्नित्यः शब्द इति ॥

प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥

प्रतिषेध्ये नित्यमनित्यत्वमिति ब्रुवताभ्यनुज्ञातमनित्यत्वम् अभ्यनुज्ञानाच्चासमर्थः प्रतिषेध इति । अथ नाभ्यनुज्ञायते नित्यमनित्यभावान्नित्यः शब्द इति हेतुर्नोपपद्यते हेत्वनुपपत्तेरनर्थकः प्रति-

---

(१) नित्यत्वापत्तेः—पा० ६ पु० । (२) यत् तदनित्यत्वं—पा० ६ पु० ।

षेधः । प्रश्नानुपपत्तिश्च पृथग्धर्मत्वेनानित्यत्वस्यानभ्युपगमात् । अपि चानात्यन्तिकसत्तायोगोऽनित्यत्वमित्युक्ते न युक्तः प्रश्नः किमयमत्यन्तं भवति उत नात्यन्तमिति । आत्यन्तिकानात्यन्तिकभावयोगश्चैकस्य न युक्तः । अनित्यता नित्येति ब्रुवता एकस्यात्यन्तिकसत्तायोगो ऽनात्यन्तिकयोगश्चाभ्यनुज्ञायते स चायं विरोधान्न युक्त इति । प्रतिषेध्यदोषोद्भावनाद्युक्त इति चेत् अथ मन्यसे न मयैकस्य नित्यत्वमनित्यत्वं चाभ्युपगम्यते अपि त्वनित्यः शब्द इति ब्रुवाणस्य भवतः स एव दोष इति । न विकल्पानुपपत्तेः । नायं पक्षदोषो न साधनदोषः पक्षदोषस्तावदयं न भवति पक्षस्य तादवस्थ्यात् । न साधनस्य प्रतिज्ञादिदोषाणामनुद्भावनात् विरोधस्य चोक्तोत्तरत्वादिति ॥

प्रयत्नकार्यानेकत्वात् कार्यसमः ॥ ३७ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते जातिः कार्यसमा प्रयुज्यते प्रयत्नकार्यमनेकधा दृष्टमिति किञ्चित् प्रयत्नानन्तरं व्यज्यते किञ्चित् प्रयत्नानन्तरमुत्पद्यते प्रयत्नानन्तरमुपलब्धेर्हेतुत्वाधारोपेणानैकान्तिकदेशनात् कार्यसमः कार्यः शब्दः प्रयत्नानन्तरमुपलब्धेरिति हेतुमनैकान्तिकं चोदयति । प्रयत्नानन्तरमुपलभ्यमानं कार्यमकार्यं च दृष्टमिति । अथ प्रयत्नानन्तरं जन्म हेत्वर्थः तथाप्यभिद्रुदेशनेति ॥

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ ३८ ॥

यत् खलु प्रयत्नेन व्यज्यते तच्चानुपलब्धिकारणमुपपद्यते न तु शब्दस्यानुपलब्धिकारणं किञ्चिदस्ति तस्मान्न व्यज्यते इति । संशय-

समातो न भिद्यत इति चेत् । उभयसाधर्म्यात् संशयसमः अयं तु न तथा तस्माद्भिद्यत इति । अथ साधर्म्यसमातो न भिद्यत इति चेत् । न हेत्वध्यारोपणात् । साधर्म्यसमा न हेत्वध्यारोपेण प्रवर्तते इयं त्वन्यथाभिहिते हेतौ अन्यथाकारं प्रवर्तते ॥

एवं जातयो व्यवस्थिताः । अथेदानीं षट्पचीमुपन्यस्यन्निदमाह ।

प्रतिषेधे विप्रतिषेधे ऽपि[१] समानो दोषः ॥ ३९ ॥

प्रथमपचवादी जातिवादिनमुत्तरं ब्रवीति । यद्यनैकान्तिकत्वादहेतुः प्रतिषेधोप्यनैकान्तिकः कस्यचिदप्रतिषेधात् कस्यचित्प्रतिषेधादिति । विशेषहेत्वभावो वा अविशेषः । शेषं भाष्ये ॥

सर्वत्रैवम् ॥ ४० ॥

सर्वासु जातिष्वेषा प्रयुक्तिरिति सूत्रार्थः ॥

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥

तृतीयः पचो विप्रतिषेधः । एतस्मिन् विप्रतिषेधे समानमनैकान्तिकत्वं दोष इति चतुर्थः पचः ॥

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ ४२ ॥

---

(१) प्रतिषेधे ऽपि समानो दोषः—पा० न्यायसूचीनिबन्धे ।

प्रतिषेधं द्वितीयपक्षं सदोषमभ्युपेत्य तृतीयपक्षे ऽपि प्रतिषेधे तुल्यदोषतामासञ्जयन् विप्रतिषेधे ऽपि समानो दोष इति ब्रुवन् मतमनुजानाति[१] सेयं मतानुज्ञा भवतीति पञ्चमः पक्षः ॥

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्ष-दोषाभ्युपगमात् समानो दोषः ॥ ४३ ॥

स्वपक्षसमुत्थानं दोषमभ्युपेत्य परपक्षे ऽपि प्रयुञ्जन्[२] स्वपक्ष-दोषमनुजानातीति तुल्या मतानुज्ञा । शेषं भाष्ये । अत्र खलु स्थापनाहेतुवादिनः प्रथमतृतीयपञ्चमाः पक्षाः । प्रतिषेधहेतुवादिनो द्वितीयचतुर्थषष्ठाः पक्षाः । तेषां साध्यसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरर्थाविशेषात् न पुनरुक्तदोषप्रसङ्गः । समानः तृतीय-पञ्चमयोः पुनरुक्तदोषः । तच्च पञ्चमषष्ठयोः पुनरुक्तदोषः तृतीय-चतुर्थयोर्मतानुज्ञादोषः प्रथमद्वितीययोर्विशेषहेत्वभाव इति षट्-पक्ष्यामुभयोरसिद्धिरयुक्तत्ववादित्वात् । यदानुपलब्धिकारणाभावे सति प्रयत्नानन्तरमुपलब्धेरिति विशेषहेतुरुच्यते तदा न षट्पक्षी प्रवर्तते । एतास्तु जातयो न तत्त्वविवेकमुपकुर्वन्तीति भेदमाच-मासामुक्तमिति ॥

इति-श्रीद्योतकरे न्यायवार्त्तिके पञ्चमस्याध्याय-स्याद्यमाह्निकम् ॥

---

(१) तमनुजानाति—पा० ६ पु० । (२) प्रसञ्जयन्—पा० ६ ।

ॐ नमः परमात्मने ।

न्यायवार्त्तिके

पञ्चमे ऽध्याये

द्वितीयमाह्निकम् ।

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानवक्तव्यमिति सङ्क्षेपेणोक्तम् तदिदानीं विभजनीयम् । निग्रहस्थानानि तु पराजयवस्तूनि अपराधाधिकरणानि । सामान्यतो द्वे निग्रहस्थाने । कर्तृकर्मकरणानां कस्य । तच्चैके वर्णयन्ति पक्षस्येति । एवं चाऽदूषणानि न्यूनतावयवोत्तरदोषाश्चेपभावोद्भावनानि । एभिर्ह्यसौ परपक्षो दूष्यत इति । एतत्तु न सम्यक् कर्मणस्तादवस्थ्यात् न हि दूषणाभि-

धानेन कर्मणोऽन्यथात्वं भवति यथाभूत एवार्थो दूष्यमाणस्तथाभूत एवादूष्यमाणोऽपि । न करणस्य विषयान्तरे ऽसामर्थ्यात् । साधनमपि प्रतिज्ञादिकं न दूष्यते[१] विषयान्तरे ऽसामर्थ्यात् । न हि किञ्चित्साधनं यद्विषयान्तरे समर्थं स्यात् सर्वं साधनं स्वविषये समर्थमिति । तस्मादसमर्थयोः कर्मकरणयोरुपादानात् कर्तुर्निग्रह इति । यत् कर्म क्रियार्थमुपादीयमानमभीष्टक्रियां न निर्वर्तयति तदिदमसमर्थं यथा सिकता घटादिकरण इति । यत् करणं क्रियार्थमुपादीयमानं क्रियां न निर्वर्तयति तदसमर्थं यथा तुर्यादि घटे । स्वविषये त्वुभयं समर्थम् । तदन्यविषयस्य च कर्मणो ऽन्यविषयस्य च करणस्यान्यथोपादानात्[२] कर्तुरज्ञानम् । अज्ञानं पुनरप्रतिपत्तिर्विप्रतिपत्तिर्वेति कर्ता निगृह्यते न कर्मकरणे पारतन्त्र्यात् । तस्मात् स्वतन्त्र्यस्य कर्तुर्निग्रह इति । विप्रतिपत्त्यप्रतिपत्त्योश्च पुरुषधर्मत्वात् पुरुषस्येति । विप्रतिपत्त्यप्रतिपत्ती च पुरुषस्य वचनद्वारेण गम्येते तस्मात् प्रतिज्ञादिदोषा इति भक्तिः[३] । कानिचिन्निग्रहस्थानान्यज्ञानादीनि पुरुषधर्मा एव । द्वैविध्यानुपपत्तिरनेकाभिधानादिति चेत् । अनेकं निग्रहस्थानं प्रतिज्ञाहान्यादिसूत्रे पठ्यते तस्माद्वे निग्रहस्थाने इत्ययुक्तम् । न सामान्यभेदविस्तरस्य विवक्षातः प्रवृत्तेः । सामान्यमधिकृत्य निग्रहस्थाने द्वे भेदविस्तरविवक्षायां तु द्वाविंशतिधा भेदः उदाहरणमात्रत्वाच्च भेदस्यानन्त्यमिति । प्रायेण प्रतिज्ञाद्यवयवाश्रयाणीति भाष्यम् । वक्तृविषय-

---

(१) न दूष्यमिति—पा० ६ पु० । (२) पपादनात्—पा० ६ पु० ।
भक्तिः—पा० ६ पु० ।

कत्वात् प्रतिज्ञाद्यवयवाश्रितत्वमनुपपन्नमिति चेत् । अथ मन्यसे विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमित्यभिधाने प्रतिज्ञाद्यवयवाश्रितत्वे कः प्रसङ्ग इति । न क्रियावचनदोषद्वारेण कर्तृवक्तृणामङ्गत्वोपपत्तेः । क्रियाद्वारेण कर्ता दूष्यते वचनद्वारेण वक्तेति न प्रतिज्ञाद्याश्रयत्वमनुपपन्नम् । न चाधाराधेयभाव आश्रयाश्रयिभावो विवक्षितः । किं तु प्रतिज्ञादिमुखेनोद्भावनमिति । तत्त्ववादिनमतत्त्ववादिनं चाभिसंबन्धयन्त इति भाष्यम् । तत्त्ववादिनो निग्रहस्थानानुपपत्तिः प्रतिपादकत्वात् तत्त्वं ब्रवीतीति प्रतिपादयति प्रतिपाद्यंश्च निगृह्णात इति न युक्तम् । न परापदिष्टदूषणदोषानवबोधद्वारेण तदुपपत्तेः । तत्त्ववादी प्रथमपक्षे द्वितीयपक्षवादिना च यो दूषणाभास उक्तस्तस्य तत्त्वानवबोधान्निगृह्णाते तत्त्वमभिदधानोऽपि तत्र वस्तु निर्णितं निर्णीते च वस्तुनि दूषणाभासस्याप्रतिपत्त्या निगृह्णात इति । तत्रोदाहरणभेदप्रदर्शनार्थं प्रतिज्ञाहान्यादिसूत्रम् ॥

लक्षणं च ॥

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ २ ॥

प्रतिदृष्टान्तस्य यो धर्मस्तं यदा स्वदृष्टान्तेऽभ्यनुजानाति तदा निगृहीतो वेदितव्यः । यथाऽनित्यः शब्द ऐन्द्रियकत्वात् घटवदित्येकः । सामान्यमैन्द्रियकं दृष्टं नित्यं कस्मान्न तथा शब्द इति द्वितीयः । यदि सामान्यमैन्द्रियकं नित्यमिति घटोऽप्येवमस्त्विति तृतीयः । अनेन किल प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्यनुजानाति

अभ्यनुज्ञानाच्च दृष्टान्तं जहन्निगमनान्तमेव पक्षं जहातीति प्रतिज्ञाहानिरित्युच्यते । एतत्तु न वुद्ध्यामहे कथमत्र प्रतिज्ञा हीयत इति । हेतोरनैकान्तिकत्वं सामान्यदृष्टान्तेन परेण चोद्यते तस्यानैकान्तिकदोषोद्धारमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते । नित्यताप्रतिपत्तेश्चासिद्धता दृष्टान्तदोषो भवति । सोऽयं दृष्टान्तदोषेण साधनदोषेण वा निग्रहो न प्रतिज्ञाहानिः । दृष्टान्तं च जहत् प्रतिज्ञामपि जहातीत्युपचारेण निग्रहस्थानम् । न च प्रधानासम्भवे उपचारो लभ्यते इति प्रतिज्ञाहानेर्मुख्यो विषयो वक्तव्यः । कथं तर्हीदं सूत्रं प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिरिति । दृष्टश्चासावन्ते व्यवस्थित इति दृष्टान्तः स चासौ दृष्टान्तश्चेति स्वदृष्टान्तशब्देन स्वपक्ष एवाभिधीयते । प्रतिदृष्टान्तशब्देन च प्रतिपक्षः प्रतिपक्षश्चासौ दृष्टान्तश्चेति । एतदुक्तं भवति । परपक्षस्य यो धर्मस्तं स्वपक्ष एवानुजानातीति यथाऽनित्यः शब्द ऐन्द्रियकत्वात् द्वितीयपक्षवादिनि सामान्येन प्रत्यवस्थिते इदमाह । यदि सामान्यमैन्द्रियकं नित्यं दृष्टमिति शब्दोऽप्येवं भवत्विति एषा प्रतिज्ञाहानिः । प्रागनेन प्रतिज्ञातमनित्यः शब्द इति सामान्येन अनैकान्तिकत्वेन प्रत्यवस्थित इदमाह नित्य इति[१] । प्राक् प्रमाणावधारितार्थपरित्यागादिप्रतिपत्तितो निग्रहस्थानमिति । प्रसङ्गविधानादिति चेत् । अथ मन्यसे नायं पश्चादपि शब्दस्य नित्यतां प्रतिपद्यते किं तु प्रसङ्गं करोति । यदि सामान्यमैन्द्रियकं नित्यं दृष्टं शब्देऽप्येवं भवत्विति

---

(१) नित्यः शब्द इति—पा० ई पु० ।

प्रसङ्गं विधत्ते। यच्च[१] नात एव तत्प्राप्तेः। यत एवासौ हेतुदोषोद्धारे कर्तव्ये प्रसञ्जयत्यत एव निगृह्यत इति। हेतुदोषेण चरितार्थत्वान्न प्रतिज्ञाहानि[२]र्निग्रहस्थानमित्यन्ये। अन्ये तु वर्णयन्ति नैवेदं निग्रहस्थानं युक्तं हेतुदोषेण चरितार्थत्वात् यस्मादैन्द्रियकत्वादित्यस्य हेतोरनैकान्तिकत्वं दोषस्तेनायं निगृहीत इति। नानैकान्तिकदोषपरीहारेण विप्रतिपत्तेस्तदुपपत्तेः। तस्यैवानैकान्तिकस्य परिहारं कुर्वाणोऽयं निगृह्यत इत्यतो ऽनैकान्तिकत्वं न निग्रहस्थानमिति ॥

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ ३ ॥

उदाहरणं पूर्ववत्। सर्वगतासर्वगतविकल्पेन प्रतिज्ञान्तरं करोति। असर्वगतोऽनित्यः शब्द इति तच्चानित्यः शब्द इति पूर्वा प्रतिज्ञा सामान्येनैन्द्रियकेण प्रतिहतो ऽसर्वगतोऽनित्यः शब्द इति प्रतिज्ञान्तरम्। तत् कथं निग्रहस्थानम्। साधनसामर्थ्यापरिज्ञानात्। अपरिज्ञाय साधनसामर्थ्यं कुर्वतोऽसर्वगतोऽनित्यः शब्द इति प्रतिज्ञा न च प्रतिज्ञा प्रतिज्ञान्तरं साधयति साधनसामर्थ्यापरिज्ञानात्। तदेतत्प्रतिज्ञान्तरं तदिदमप्रतिपत्तितो विप्रतिपत्तितो वा निग्रहस्थानमिति ॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥

यत्र प्रतिज्ञा हेतुना विरुध्यते हेतुश्च प्रतिज्ञया स प्रतिज्ञाविरोधो नाम निग्रहस्थानम्। यथा गुणव्यतिरिक्तं द्रव्यं भेदेनाग्रहणा-

(१) तच्च— पा० ६ पु०। (२) प्रतिज्ञाहानिरिति नास्ति ६ पु०।

दिति। एतेनैव प्रतिज्ञाविरोधोऽपि वक्तव्यः। यत्र प्रतिज्ञा स्ववचनेन विरुध्यते यथा श्रमणा गर्भिणी। हेतुविरोधोऽपि यत्र प्रतिज्ञा हेतुना विरुध्यते यथा सर्वं पृथक् समूहे भावशब्दप्रयोगादिति। एतेन प्रतिज्ञया दृष्टान्तविरोधोऽपि वक्तव्यः। हेतोश्च दृष्टान्तादिभिर्विरोधः प्रमाणविरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्यः। परपक्षसिद्धेन गोत्वादिनानैकान्तिकदेशनाद्विरोधः। यः परपक्षसिद्धेन गोत्वादिना व्यभिचारयति तद्विरुद्धमुत्तरं वेदितव्यम्। स्वपक्षानपेक्षं च तथा। यश्च स्वपक्षानपेक्षं हेतुं प्रयुङ्क्ते अनित्यः शब्द ऐन्द्रियकत्वादिति समूहसिद्धस्य गोत्वादेर्नित्यत्वविरोधाद्विरुद्धः। उभयपक्षसम्प्रतिपन्नस्त्वनैकान्तिकः यदुभयपक्षसम्प्रतिपन्नं वस्तु तथात्वेन तेनानैकान्तिकदेशनेति। दृष्टान्ताभासाश्च कस्मान्निग्रहस्थानेषु नोक्ताः हेत्वाभासपूर्वकत्वाद् दृष्टान्ताभासानां तदभिधानेनैवोक्ता वेदितव्या इति॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः॥ ५॥

यः प्रतिज्ञातमर्थं प्रतिषेधे कृते परित्यजति स प्रतिज्ञासंन्यासो वेदितव्यः। उदाहरणं पूर्ववत्। सामान्येनानैकान्तिकत्वे हेतोः कृते ब्रूयात् कश्चैवमाह नित्यः शब्द इति एतत्साधनसामर्थ्यापरिच्छेदात्[१] विप्रतिपत्तितो निग्रहस्थानमिति॥

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्॥ ६॥

---

(१) परिज्ञानात्—इति क्वचित्।

उदाहरणं भाष्ये । साधनान्तरोपादाने पूर्वस्यासामर्थ्यख्यापनान्निग्रहस्थानमिति सामर्थ्ये वा हेत्वन्तरं व्यर्थमिति ॥

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥ ७ ॥

उदाहरणं भाष्ये । अभ्युपगतार्थासङ्गतत्वान्निग्रहस्थानं यदभ्युपगतं तत्सम्बद्धं[१] मन्यदसम्बद्धमुच्यत इति ॥

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥

उदाहरणं भाष्ये । साधनानुपादानादज्ञानमेवं ब्रुवन्न साधनं साध्यं जानीत इति न साध्यं न साधनं चोपादत्त इति निगृह्यते ॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥

उदाहरणं भाष्ये । असामर्थ्यख्यापनान्निग्रहस्थानम् असामर्थ्यं[२] चाज्ञानमिति ॥

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १० ॥

यथा दश दाडिमादि[३] वाक्यम् । निरर्थकापार्थकयोरभेद इति चेत् । अथ मन्यसे निरर्थकादपार्थकं न भिद्यते तत्राप्यर्थो न गम्यत

---

(१) तत् स्थितमिति क्वचित् । (२) असमर्थं वा—पा० ६ पु० ।

(३) दाडिमा इति—पा० ६ पु० ।

दृष्टापीति । भिद्यत इति ब्रूमः । कथं तत्र हि वर्णमात्रमिह तु पदान्यसम्बद्धानि । तत् कथं निग्रहस्थानम् । वाक्यादृते न विशेषावगतिरिति साधनसामर्थ्यापरिज्ञानान्निग्रहस्थानम् ॥

अवयवविपर्यासवचनमप्राप्तकालम् ॥ ११ ॥

अवयवानां विपर्यासेनाभिधानं निग्रहस्थानम् । नैवमपि सिद्धेरित्येके । एके तु ब्रुवते नैतन्निग्रहस्थानमेवमपि सिद्धेरिति । समयानभ्युपगमाच्च । न च वयमेवं समयं प्रतीच्छाम इति । प्रयोगाच्च । प्रयुक्तस्यावयवव्यत्ययः सर्वशास्त्रेष्विति कस्यायं समय इति । तत्तावतैवमपि सिद्धेरिति प्रयोगोपेतशब्दवदेतत्स्यात् यथा गौरित्यस्य पदस्यार्थे गवीति(१) प्रयुज्यमानं पदं ककुदादिमन्तमर्थं प्रतिपादयतीति । न च शब्दान्वाख्यानं व्यर्थम् । अनेन शब्देन गोशब्देनैवासौ प्रतिपद्यते गोशब्दात् ककुदादिमन्तमर्थम् । तथा प्रतिज्ञाद्यवयवविपर्यासेना(२)नुपूर्वी प्रतिपद्यते आनुपूर्व्या चार्थ(३) मिति । एतत् कथम् । पूर्वं तावत् कर्मोपादीयते ततः करणम् स्तम्भिण्डाद्युदाहरणम् अनेकधा लोक इति । यत्पुनरेतत् समयानभ्युपगमात् इति नायं समयोपि त्वर्थस्यानुपूर्वी सोयमर्थस्यानुपूर्वीमन्वाचष्टाणोनाभ्याख्येय इति । यत्पुनरेतत्प्रयोगादिति । न निग्रहस्थानविषयापरिज्ञानात् । शास्त्रे वाक्यान्यर्थसंग्रहार्थमुपादीयन्ते संगृहीतं त्वर्थं वाक्येन प्रतिपादयिता प्रयोगकाले प्रतिज्ञादिकयानुपूर्व्या प्रतिपादयतीति ॥

(१) गौरित्यस्य शब्दस्यार्थे गावीति । (२) विपर्ययेण—पा० ६ पु० ।
(३) आनुपूर्व्याचार्थम्—पा० ६ पु० ।

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥

यस्मिन् वाक्ये प्रतिज्ञादीनामन्यतमोऽवयवो न भवति तद्वाक्यं न्यूनं वेदितव्यम् । तत् कथं निग्रहस्थानम् । न साधनाभावे साध्यसिद्धिरिति । एके तु प्रतिज्ञान्यूनं नास्तीत्याचक्षते । एतत् तु न युक्तम् । प्रतिज्ञामन्तरेण प्रयोगे विकल्पतः पर्यनुयोज्यः । यः प्रतिज्ञान्यूनवाक्यं ब्रूते किमयं निगृह्यते अथ न यदि निगृह्यते कतमं निग्रहस्थानमिति न हि हेत्वादयो न सन्तीति । न च हेत्वादिदोषाः सन्तीति निग्रहं चाभ्युपैति तस्मात् प्रतिज्ञान्यूनमेवेति । अथ न निग्रहः न्यूनं वाक्यमर्थं साधयतीति साधनाभावे सिद्धिरभ्युपगता भवति। यत्तु ब्रवीषि सिद्धान्तपरिग्रह एव प्रतिज्ञा एतदपि न बुध्यामहे कर्मण उपादानं प्रतिज्ञा। सामान्यविशेषवतोऽवधारितस्य वस्तुनः परिग्रहः सिद्धान्त इति ॥

हेतूदाहरणाधिकमधिकम् ॥ १३ ॥

यस्मिन् वाक्ये हेतू द्वौ दृष्टान्तौ द्वौ तद्वाक्यमधिकं निग्रहस्थानमाधिक्यात् । तच्च न दार्ढ्यादित्येके एके तु ब्रुवते नेदं निग्रहस्थानं दार्ढ्याद् दार्ढ्यं हि ज्ञाप्यस्य भूयोभिर्ज्ञापकैर्दृष्टं यथा धूमालोकाभ्यामग्नेरिति । न दार्ढ्यार्थानभिधानात् भूयोभिर्ज्ञापकैर्दार्ढ्यं भवतीति न दार्ढ्यार्थोऽभिधीयते किं ब्रवीषि दार्ढ्यादिति । सुतरां प्रतिपत्तिर्दार्ढ्यमिति तदपि तादृगेव किमुक्तं भवति सुतरामिति । अथ ब्रवीषि द्वे अपि ज्ञापके । सत्यं द्वे अपि ज्ञापके । एकेनैवाभिधानान् व्यर्थमभिधानं द्वितीयस्य प्रकाशिते दीपान्तरोपा-

दानवदिति। अनवस्था वा प्रकाश्रिते ऽपि साधनान्तरोपादानादिति॥

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्॥१४॥

शब्दपुनरुक्तं अनित्यः शब्दो ऽनित्यः शब्द इति। अर्थपुनरुक्तं अनित्यः शब्दो निरोधधर्मकोध्वान इति॥

अनुवादे त्वपुनरुक्तमर्थविशेषोपपत्तेः(१)॥१५॥

नावाधनादित्येके। एके तु ब्रुवते नेदं निग्रहस्थानमबाधनात्। न हि परीक्षाविधेः पुनर्ब्रुवता किञ्चिद्बाध्यते परप्रतिपादनार्थं च वाक्यप्रयोगः पुनरभिधानेन सुतरामर्थं प्रतिपद्यत इति न निग्रहस्थानं प्रतिपादकत्वात्। सत्यं प्रतिपाद्यति प्रतिपादितार्थप्रतिपादकत्वात् वैयर्थ्यं स्यात् वैयर्थ्यान्निग्रहस्थानं साधनविषयापरिज्ञानात् न चायं शिष्यो न गुरुस्तस्मान्नायं पुनः प्रतिपाद्यत इति॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम्॥१६॥

पूर्ववन्निग्रहस्थानमिति॥

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम्॥१७॥

शेषं भाष्ये। उत्तरेणावस्थानात् नेदं निग्रहस्थानमिति केचित्। उत्तरेणावस्थानात्(१) उत्तरेण गुणदोषवता मूढत्वामूढत्वं(२) गम्यत इति

(१) न्यायसूत्रचौनिबन्धे सूत्रमिदं न दृश्यते॥ विश्वनाथेनापि नावधृतम्॥

(२) अमूढत्वं गम्यते—पा० ई पु०।

किं पुनरुच्चरिते नास्ति । अस्ति हि उत्तरे कश्चित्समर्थो दृश्यते न प्रत्युच्चारणेनासौ तावता निग्रहस्थानमर्हति । यश्चारभ्य स्वपक्षं न निर्वाहयेत् तस्य स्यात् स्वलीकारमात्रमिति । नोत्तरविषयापरिज्ञानात् । यद्ययं न प्रत्युच्चारयति निर्विषयमुत्तरं प्रसज्यते । अथोत्तरं ब्रवीति कथं नोच्चारयति तदिदं व्याहतमुच्यते नोच्चारयत्युत्तरं च ब्रवीतीति । अप्रतिज्ञानाच्च नेदं प्रतिज्ञायते पूर्वमुच्चारयितव्यं पश्चादुत्तरमभिधेयमपि तु यथाकथञ्चिदुत्तरं वक्तव्यम् । उत्तरं चाश्रयाभावे न युक्त[1]मिति युक्तमप्रत्युच्चारणं निग्रहस्थानमिति ॥

अविज्ञातं चाज्ञानम् ॥ १८ ॥

स्फुटं भाष्ये । अप्रतिपत्तितो निग्रहस्थानम् ॥

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १९ ॥

श्लोकपाठादिभिरवज्ञां दर्शयन्नोत्तरं प्रतिपद्यत इति । तदप्रतिभा नाम निग्रहस्थानं मूढत्वादिति ॥

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ २० ॥

यत्र कर्त्तव्यं कार्यं व्यासज्य कथां विच्छिनत्ति स विक्षेपो विज्ञेयः यथा रसालया मया भुक्तं प्रतिस्थाय कर्णो मे कण्डं चिणोतीत्येवमादि । तत् कथं निग्रहस्थानम् । अज्ञाननिगूहनार्थं तु प्रयुक्तमज्ञानमेव परिहारेणाविष्करोति ॥

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥ २१ ॥

---

(१) उत्तरं चाश्रयाभावे न युक्तम्—पा० ६ पु० ।

यः परेण चोदितं दोषमनुद्धृत्य भवतोऽयं दोष इति ब्रवीति सा मतानुज्ञा परमतं स्वमतेनु[1]जानाति । उदाहरणं भवांश्चौरः पुरुषत्वादिति स तं प्रति ब्रूयात् भवानपीति सोभ्युपगम्य दोषं परपक्षेभ्यनुजानातीति निग्रहौतो वेदितव्यः अनभ्युपगतो[2] न पुरुषत्वं चौर्ये हेतुरिति वक्तव्यम् । किन्तु परस्वेनानतिसृष्टेन सम्बन्धः तत उत्तरापरिज्ञानान्निग्रह्यत इति । प्रसङ्गविधानान्न निग्रहस्थानमित्यन्ये । अपरे तु ब्रुवते नैतन्निग्रहस्थानं प्रसङ्गविधानात् नैवायं पश्चादपि तं दोषं प्रतिपद्यते अपि तु प्रसङ्गं करोति यदि पुरुषत्वाच्चौरो भवति भवानपि पुरुषस्तस्माच्चौर इति । एतत्तु नात एव यत एवायमुत्तरे वक्तव्ये प्रसङ्गं करोति तत एवोत्तरापरिज्ञानान्निग्रह्यत इति ॥

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ २२ ॥

यो निग्रहस्थानप्राप्तं न निग्रह्णाति स निग्रहीतो भवति निग्रहस्थानप्राप्तत्वापरिज्ञानात् । नान्यवचनादित्यन्ये । अन्ये ब्रुवते नेदं निग्रहस्थानम् अन्योत्तरस्याभिधानात् यस्मादसौ निग्रहस्थानप्राप्तं न निग्रह्णाति ब्रुवन्नन्यदुत्तरमभिधत्त इति तच्च नात एव । यत एवासौ निग्रहस्थाने वक्तव्ये अन्यदभिधत्ते ऽत एव निग्रह्यते जानानो ह्यसौ किमर्थमन्यत् ब्रवीति ॥

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ २३ ॥

(१) स्वमतत्वेनानु—पा० ६ पु० । (२) अनभ्युपगतो—पा० ६ पु० ।

Acc. No. 24884
Date 18.6.68

अनिग्रहस्थान एवाभिधत्ते निगृहीतोऽसीति एतन्निग्रहस्थानाप-रिज्ञानान्निग्रहस्थानमिति ॥

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ २४ ॥

अस्योदाहरणं स्फुटं भाष्ये । प्रतिज्ञातार्थव्यतिरेकेणाभ्युपगतार्थ-परित्यागान्निगृह्यत इति ॥

हेत्वाभासाश्च यथोक्ताः ॥ २५ ॥

यथैव विभक्ता लक्षणेन तथैव तेषां निग्रहस्थानभाव इति । त इमे प्रमाणादय उद्दिष्टाः प्रथमसूत्रे लक्षिताः प्रथमेऽध्याये परी-क्षिताः शेषेष्विति त्रिविधा तत्त्वस्य परिसमाप्तिरुक्ता वेदितव्येति ॥

जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥
यदक्षपादप्रतिमो भाष्यं वात्स्यायनो जगौ ।
अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम् ॥

इति श्रीपरमर्षि-भारद्वाज-पाशुपताचार्य-श्रीमदुद्योतकरकृतौ न्यायवार्त्तिके पञ्चमोऽध्यायः समाप्तः ॥

॥ समाप्तोऽयं ग्रन्थः ॥

॥ शुभमस्तु ॥

Padmāwatī, Fasc. 1-4 @ 2/	Rs.	8	0
Pariçista Parvan, (Text) Fasc. 1-5 @ /6/ each		1	14
Prākṛita-Paingalam, Fasc. 1-7 @ /6/ each		2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6 each Fasc.		12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each		1	8
Ditto (English) Fasc. 1-3 @ /12/ each		2	4
Sraddha Kriya Kaumudi, Fasc. 1-5		1	14
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each		7	2
Trantra Vartika (English) Fasc. 1-2 @ /12/		1	8
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each		14	4
Tattvarthadhigama Sutram, Fasc. 1		0	6
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/		1	2
Tul'si Sat'sai, (Text) Fasc. 1-5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...		2	4
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/		4	8
Vallala Caritam, Fasc. 1		0	6
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1-6 @ /6/		2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each		4	8
Vidhano Parigata, Fasc. 1-4		1	8
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 2-6 @ /6/		1	14
Vṛhat Svayambhū Purāṇa, Fasc. 1-6		2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1-4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5 @ 1/ each		13	0
Rtogs brjod dpag bkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5 @ 1/ each		10	0

Arabic and Persian Series.

'Alamgirnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ /12/		2	4
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each		32	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each		39	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each		37	0
Ditto English Fasc, 1-8 @ 1/ each		8	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each		3	0
Futūn-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each		13	2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each	1	14
Muntakhabu-t-Tawarikh, (Text) Fasc. 1–15 @ /6 each ... Rs.	5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each	1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto Ditto (English) Fasc. 1–4	3	0
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	10	8
Ditto Index	1	0
Tārikh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
Wis o Rāmīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vols. XIX and XX @ 10/ each	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.: and from 1870 to date @ /8/ per No.		
3	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 7), 1882, (6), 1883 5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.		
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spokon in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)		
5.	Anīs-ul-Musharrahīn	4	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion ...	3	0
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	3	8
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	32	0
10.	Khizānatu-l-'ilm	2	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	4	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	40	0
13.	Sharaya-ool-Islām	18	0
14.	Tibetan Dictionary, by Csoma de Körös	4	0
15.	Ditto Grammar	10	0
16.	Kaçmiraçabdāmṛta, Parts I and II @ 1/8/	8	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	3	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	1	0
		4	0
	Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

Books are supplied by V.-P.P.

Library IIAS, Shimla
S 181.43 Ud 9 N: 1
00024884